तस्य च प्रमाणान्तरविषयत्वात्तदपेक्षत्वात्तन्निबन्धना प्रवृत्तिर्लोके, नियोगनिष्ठस्तु वेदे, अतो नाऽन्याऽपेक्षा । उक्तोत्तरमेतत् । अपि च न नियोगमात्रं प्रवृत्तिहेतुः । मिथ्या तर्हि नियोगज्ञानम् । न च तद्युक्तम् । कारणद्वयाऽभावात् । न वयं नियोगमवजानीमहे येन मिथ्यात्वं स्यात् । सत्यपि तस्मिन्पुरुषः प्रवर्तते लोकइव यस्य कस्य चिन्नियोगात् । न हि तत्र नियोगो नास्ति । अतत्परत्वे तात्पर्यमप्रमाणक-रविषयत्वात् । प्रमाणान्तराऽपेक्षत्वात्तन्निबन्धना साध्यसाधनभावा-ऽवगमनिबन्धना प्रवृत्तिर्लोके । अनाप्तवाक्ये च नियोगस्य माना-न्तरेण बाधितत्वादप्रवृत्तिः । मानान्तराऽगोचरनियोगनिष्ठस्तु पदा-र्थान्वयो वेदे । स च प्रतीतः प्रवृत्तौ हिताऽहितप्राप्तिपरिहारसाधन-तामनुविधानकारणं नाऽपेक्षते । प्रवर्त्तनैकरसत्वात् । अतो नाऽन्या-ऽपेक्षा । न हि प्रमाणं शब्दस्तदवबोधने मानान्तरमपेक्षते । नाऽपि नियोगः पुरुषप्रवृत्तौ हिताऽहितप्राप्तिपरिहारसाधनतामित्यर्थः । तदे-तद् दूषयति—उक्तोत्तरमेतत् । विवक्षापरत्वनिराकरणप्रस्तावे ।

यत्तु प्रवर्त्तनैकरसत्वमभिमतं नियोगस्य, तदपि न मृष्यामह-इत्याह—अपि च लौकिको भवतु, अलौकिको वा, सर्वथा नियोग इत्येव न नियोगमात्रं प्रवृत्तिहेतुः । चोदयति—न चेत्प्रवर्त्तयति, मिथ्या तर्हि नियोगज्ञानम् । न चैतदुचितं, कारणद्वयाऽभावात् । परिहरति—न वयं नियोगमवजानीमहे, येन मिथ्यात्वं वेदस्य स्यात् । सत्यपि तस्मिन्पुरुषप्रवृत्तिर्लोकइव यस्य कस्य चिन्नि-योगात् । न हि तत्र नियोगो नास्ति । अथ न तन्नियोगपरं लौकि-कमपि तु विनियोगपरमित्यत आह—अतत्परत्वे नियोगपरत्वे-लौकिकस्य लोकाऽधीनाऽवधारणार्थस्य[1] वैदिकस्य तात्पर्ये नियोगपर-त्वमप्रामाणिकमित्युक्तम् ।

१ अर्थाऽवधारणस्य २ पु॰ पा॰ ।

मित्युक्तम् । ननु कर्तव्यताऽवगमात् प्रवृत्तिः । अवगच्छति च नियुक्त इदं मम कर्तव्यमिति । यस्त्ववगच्छन्नपि अनुष्ठेयं नाऽनुतिष्ठति स सत्त्वे प्यर्थाऽनर्थप्राप्तिपरिहारयोरननुतिष्ठन्निव न दण्डैर्वार्य्यते । तदेतदविमृष्टनियोगरूपम् । तथा हि । प्रवर्तनामात्रं नियोगः । स च लिङाद्यर्थ इति प्रवर्त्तितो ऽहमत्रेति प्रतिपत्तिः शब्दात् । कर्तव्यताऽवग-

ननु न वयं नियुक्तिमात्रं नियोगं ब्रूमहे, अपि तु कर्त्तव्यताम् । सा च निरपेक्षा प्रवृत्तहेतुर्वेदादवगम्यतइत्याह—ननु कर्त्तव्यताऽवगमात्प्रवृत्तिः । अवगच्छति च नियुक्त इदं मम कर्त्तव्यमिति । यस्त्ववगच्छन्नप्यनुष्ठेयं नाऽनुतिष्ठति स सत्वे ऽप्यर्थाऽनर्थप्राप्तिपरिहारयोरननुतिष्ठन्निव न दण्डैर्वार्यते । इदमभिसंहितम्, चेतनप्रवृत्तिलक्षणकार्यौन्नेयशक्तयो लिङादयः प्रवृत्तिहेत्वभिधायिनः । तद्धेतुश्च स्वात्मनि कर्त्तव्यताऽवगमो विदित इति कर्त्तव्यतामभिदधाति । तथा च ततः कर्त्तव्यतामवगम्याऽप्यप्रवर्त्तमाना हिताऽहितप्राप्तिपरिहारोपायतामिव न दण्डैः पराणुद्यन्तइति । दूषयति—तदिदमविमृष्टनियोगरूपं वचः । तथा हि । लोकाऽनुसारादाज्ञादिरूपिनं प्रवर्त्तनामात्र नियोगः । स च लिङाद्यर्थो, न पुनः प्रवृत्तिहेतुः कर्त्तव्यता । तदवबोधे ऽपि कर्त्तव्यताऽनवबोधात् । अननुविधेयनियोगेन हि तत्र नियोगप्रत्ययो नास्ति, अपि तु कर्त्तव्यताऽवबोधः । तदवबोधे सत्यसति विधुरप्रत्ययो[1]पनिपाते प्रवृत्तेरवश्यम्भावनियमादिति । तस्मात्प्रवर्त्तितो ऽहमिति प्रतिपत्तिः शब्दात्प्रवृत्तिहेतुः । कर्त्तव्यताप्रतिपत्तिस्तु प्रेक्षापूर्व्वतो नियोज्यस्य

१ विरोधिप्रत्यय २ पु॰ पा॰ ।

मस्तु नियोक्तुरनुविधेयत्वात् । अनुविधेयनियोगे ममेदं कर्तव्यमित्यध्यवसायात् । इतरत्र तु प्रवर्तनामात्रप्रतीतेः । उक्तं च कर्तव्यताविषयो नियोगो न नियोगः कर्तव्यतामाह । तद्विषयत्वादेव हि तर्हि कर्तव्यताऽवगमः । न तावदयं शाब्दः । शब्देन नियोगमात्रस्याऽभिधानात् ।

नियोक्तुरनुविधेयत्वात् । कस्मात् ? अनुविधेयनियोगे ममेदं कर्तव्यमित्यध्यवसायात् । इतरत्र तु कर्तव्यताऽवसायरहितप्रवर्तनामात्रप्रतीतेः ।

अत्रैव जरत्प्राभाकरोन्नीतार्थं गुरोर्वचः सङ्गच्छतइत्याह— उक्तं च, कर्तव्यताविषयो नियोगः प्रवर्तना नियोक्तुर्धर्मः, तमभिदधाति लिङ्, न नियोज्यस्य धर्मं कर्तव्यत्वं प्रवर्तनाया विषयमाह, विषयस्य विषयिणो ऽन्यत्वात् ।

नवीनास्तून्नयन्ति, अनिरूपितनियोगव्यापारस्येदं चोद्यमित्युपक्रम्येदमुक्तम् । कर्तव्यताविषयो हि नियोगो न कर्तव्यतामाहेति । यागकर्तव्यताऽनुष्ठानं विषयो यस्य नियोगस्य स तथा । तेन हि नियोगः साध्यते, न पुनर्नियोगो यागस्यानुष्ठानं ज्ञापयति ।

एतदुक्तं भवति, साक्षान्नियोग एव कर्तव्यतया ऽवगम्यते लिङादिभ्यः । स तु यागविषयस्तदनुष्ठानमन्तरेण कर्तव्यताया अपर्यवसानात् तदनुष्ठानमाक्षिपति । सो ऽयमाक्षेपाऽपरनामोपादानव्यापारो नियोगस्याऽऽस्थीयतइति । तदेतदपूर्वात्मनि कार्यरूपे नियोगे सत्युपपद्यते । तदभावश्च निपुणतरमुपपादितः । तदास्तां तावत् ।

चोदयति—नियोगस्य तद्विषयत्वादेव तर्हि कर्तव्यताऽवगमः । विषयिणो विषयनान्तरीयकत्वादिति भावः । निराकरोति—न तावदयं शाब्दः । कस्मात् ? शब्देन नियोगमात्रस्याऽभिधानात् ।

**नाप्यार्थः । सर्वनियोगेष्वभावात् । तस्मादिदमपि दर्शनमविमृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः । अस्तु तर्ह्यनुविधेयो नियोक्ता भूतानाम् । साक्षात्कृताऽऽनुभविकश्रेयःसाधनो हितकामः सर्वज्ञः ।**

ननूक्तं नान्तरीयकत्वादिति, तत्राह—न प्यार्थः । कुतः ? सर्वनियोगेष्वभावात् । कर्तव्यताऽवगमस्य । न खल्वयमननुविधेयेन शतशोऽपि नियुज्यमानोऽवबुध्यमानोऽपि नियोगं कर्तव्यतामवगंस्यत इत्युक्तम् । उपसंहरति- तस्मादिदमपि दर्शनमपि दृश्यमानसुन्दरमिति नाद्रियन्ते वृद्धाः । तत्सिद्धमेतत् । विवादाध्यासिता लिङादयो न मानान्तराऽपूर्वकार्येऽभिधायिनः, तेनाऽगृहीतसङ्गतित्वात्, यद्येनाऽगृहीतसङ्गति न तत्तदभिधायि, यथा वाजिपदं क्रमेलकस्येति । अगृहीतसङ्गतेरभिधायकत्वे व्यवस्थाहेत्वभावात् । सर्वस्य सर्वमभिधाकं सम्भवेदित्यव्यवस्था । तदिदमगृहीतसङ्गतित्वं व्यवस्थाहेत्वभावेन व्याप्तं स्वव्यापकविरुद्धव्यवस्थोपलब्धेरभिधायकत्वान्निवर्तमानमनभिधायकत्वएवावतिष्ठतइति प्रतिबन्धसिद्धिः ।

सम्प्रत्यन्यथा प्रत्यवतिष्ठते परः । अस्तु तर्ह्यनुविधेयो नियोक्ता भूतानां, भिषज इव तस्य भगवतो नियोगादर्थाऽनर्थप्राप्तिपरिहारार्थेन प्रवर्त्स्यन्ति निवर्त्स्यन्ति चेति । कस्मादित्याह—यतः साक्षात्कृताऽऽनुश्रविकश्रेयःसाधनः । ननु साक्षात्कृताऽऽगमगम्यश्रेयःसाधनोऽपि कदाचिदन्यथा ब्रूयात्, न वा ब्रूयात् । तत्कथमस्याऽनुविधेयते ? त्यत आह—हितकामः परेषां स्वार्थीभूत[1]विश्वव्यापिकारुण्यो हि भगवान् वैराग्याऽतिशयसंपन्नो मात्रयाऽपि रागादिभिः क्लेशैरुपक्लेशैश्च मदमानादिभिरपरामृष्टः । तदयमतिमहति संसारदुःखपङ्के निमज्जतः प्राणिनः पश्यन् कथं नामैतानुद्धरेयमिति तद्दुः

१ स्वामीभूत २ पु॰पा॰ ।

खेन कथं न न दूयमानो वा हिताऽहितप्राप्तिपरिहारोपायतत्त्वं विद्वान् करणापाटवे सति कथमन्यथोपदिशेत्, नोपदिशेद् वा। अथैवम्भाव एवास्य कुत? इत्यत आह—सर्वज्ञः प्रहीणरागाद्यावरणतत्त्वज्ञानः खल्वसमनवयवेन विश्वं करतलाऽऽमलकमिव साक्षादीक्षमाणः सर्वज्ञः साक्षात्कृताऽऽनुप्रविकश्रेयःसाधनो भवति, भवति च हितकामः। दुःखितो जगदुद्धर्तुकामस्यास्य सर्वज्ञतामन्तरेण तदनुपपत्तेस्तत्र प्रवृत्तेः।

न च सर्वज्ञो नास्ति। तथा हि। तदभावव्यवहारो बाधकप्रमाणसद्भावाद्वा साधकप्रमाणाऽभावाद्वा भवेत्। न तावद्बाधकप्रमाणसद्भावः। न खलु प्रत्यक्षमस्य बाधकं रजतस्येव समारोपितस्य शुक्तितत्त्वं विषयः सम्भवति। तद्विरुद्धोपस्थानाऽसम्भवात्। सर्वज्ञताया अत्यन्तपरोक्षायाः केन चिदपि सह प्रत्यक्षप्रतीतेन विरोधाऽनवगतेः। नाप्यनुमानमस्य बाधकम्। तद्धि विधिनिषेधसाधनतया द्विविधम्। तत्र विधिसाधनं स्वभावहेतुकं कार्यहेतुकं वा न निषेधे साध्ये प्रभवति। अन्यसाधनत्वे ऽन्यसाधनस्याऽप्रसङ्गात्। अनुपलब्धिलिङ्गकं तु प्रतिषेधसाधनं भवेत्। तच्च स्वभावाऽनुपलम्भसाधनादन्यदिह सर्वज्ञविरुद्धार्थान्तरविधानेन वा तत्कारणव्यापकनिषेधेन वा सर्वविदभावं साधयेत्। न तावत्स्वभावविप्रकर्षिणा[1] सर्वविदा सह कस्य चिदपि प्रतीयमानस्य विरोधो दृष्टपूर्वः। विरोधिप्रतिपत्तिनान्तरीयकतया विरोधाऽवगतेः। विरोधिप्रतिपत्तौ वा नाऽत्यन्ताय तन्निषेधः। न च प्रत्यक्षाऽनुपलम्भसाधनं कार्यकारणभावः स्वभावविप्रकर्षवति सर्वविदि शक्याऽवगमः। अत एव व्यापकत्वमपि कस्य चिद् दुरवसायमेव सर्वविदि। नापि विपक्षे बाधके प्रमाणप्रवृत्तिः क्षणिकत्वस्येव सत्त्वे सर्वविद्व्यापकाऽभावाऽवगम[2]निबन्धनम्। तदभावात्। भावे वा न्निषेधो नास्ति अत्यन्तायतस्य। न खलु खपुष्पं कस्य

१ विप्रकृष्टेन २पु॰ पा॰। २ व्यापकावगम २ पु॰ पा॰।

चिह्नाप्यं सम्भवति व्यापकं वा । न चान्यमात्रनिवृत्तावन्यस्य निवृत्तिः । अतिप्रसङ्गात् । यथाहुः ।

अन्यस्यैव निवृत्त्या ऽन्यविनिवृत्तिः कथं भवेत् ।
नाऽश्ववानिति मर्त्येन न भाव्यं गोमताऽपि किम् ? ॥ इति ।

न च सत्त्वज्ञेयत्वादयो सर्वज्ञतासहभुवः सहप्रश उपलब्धा व्याप्ता विवादाध्यासितस्य पुरुषधौरेयस्य विरुद्धोपस्थापनेन सर्वज्ञतां प्रतिक्षिपन्तीति साम्प्रतम् । सत्त्वादेरसर्वविद्व्याप्यसिद्धेः । न खलु दर्शनाऽदर्शनमात्रनिबन्धनं व्याप्तिविज्ञानं, मा भूच्चैत्रः श्यामो मैत्रीतनयत्वात् परिदृश्यमानमैत्रीतनयस्तोमवदित्यनुमानम् । तत्तनयताया अश्यामतया विरोधाऽभावेन सन्दिग्धव्यतिरेकित्वान्नानुमानमेतदिति चेत् ? न । इहाऽपि समानत्वात् । न हि सर्ववित्तया सह सत्त्वादेः कश्चिद्विरोधो, येनासौ न सन्दिग्धव्यतिरेकः स्यात् । द्वयी हि विरोधाऽवगतिः । सहाऽनवस्थानं वा, छायाऽऽतपवत् परस्परपरिहारो वा भावाऽभाववत् । न तावदविकलकारणस्य सर्वज्ञत्वस्यालोकस्येवाऽभावः सत्त्वादेः सन्तमसस्येव भावे ऽभावः । यतः सहाऽनवस्थितिरूपविरोधसङ्गतिः स्यात् । तथा च भावे वा नात्यन्ताभावः सर्वज्ञताया इत्युक्तम् ।

नाऽप्युत्तरः । न खलु सर्वज्ञतासत्त्वादिपरिहारेण सत्त्वादयो वा तत्परिहारेण भावाऽभाववत् प्रत्ययपथमवतरन्ति । न च सर्वज्ञतया तेषां व्याप्तिरस्तीत्युक्तम् ।

स्यादेतत् । उपदेशप्रणयनमेव बाधकं सकलवस्तुतत्त्वदर्शनस्य । तथा हि । उपदेशो विकल्पविज्ञानयोर्निर्विकल्पश्च समारोपितगोचरतया मिथ्येति न तथा तथागतविज्ञानं भवितुमर्हति । तदयमुपदेशो निषेध्यसर्वविषयतत्त्वविज्ञानविरुद्धसमारोपितगोचरविकल्पविज्ञानकार्यं इति विरुद्धकार्योपलब्ध्या बुद्धादीनां सर्वज्ञत्वाऽभाव-

साधनम् । उपदेशाऽभावे वा वृथा तत्प्रसाधनं तत्सन्निधानमात्राद्वा चैत्यवन्दनादिचोदनानामनिःसृतत्वाभ्युपगमे ऽनाश्वास इति । तन्न । विकल्पस्य सर्वविज्ञानत्वाऽविरोधात् । द्विविधो हि विकल्पो विपर्यासपूर्वो ऽतत्पूर्वश्च । तत्र विपर्यासपूर्वो भवादृशा, मतत्पूर्वस्तत्रभवतः सर्ववेदिनः । न खल्वसौ भ्रान्तो विकल्पवानपि तु विदितसमस्तवस्तुतत्त्वविस्तारः करुणापराधीनमानसो दुःखिन उपदेष्टुकामः । वचनमन्तरेण तदनुपपत्तेः विकल्पं विना तदसम्भवात् तस्याऽतात्त्विकत्वं विद्वानपि तमाहरति । यथा नैरात्म्यतत्त्वं विद्वानपि विकल्प्य समारोपितमात्मानं निषेधति, नास्त्यात्मेति । यथा वा वैयाकरणप्रवरो गाव्यादिशब्दानसाधून् जानानो ऽपि पृथग्जनप्रतिपिपादयिषया प्रयुञ्जानो ऽपि नाऽपशब्दकारी । तदिदमाहार्यमस्य रूपं न तात्त्विकमिति तत्त्वविदो नोपदेशविरोधः । न च रागादिमत्ता । न खलु कृपा रागपक्षे वर्त्तते । नन्वियं परदुःखप्रहाणेच्छेति राग एव । मैवम् । न हीच्छामात्रं रागः, अपि तु चित्तमलमात्मनो दर्शनाऽऽवरणमभूतगुणाऽभिनन्दनं रागमाचक्षते । न ह्यसति नित्यात्मदर्शने स्वार्थतृष्णापरिप्लुतः कश्चित्परिस्पन्दते । यथा हि चैत्रः स्वतो भिन्नं मैत्रमुदीक्षमाणः स्वगतसुखतृष्णापरिप्लुतो न मैत्रसुखाय घटते । तथा पूर्वाऽपरक्षणविविक्तं विज्ञानमात्रमात्मानं साक्षादीक्षमाणः सन्ततिपतितस्तद्विपरीतलक्षणान्तरोपकार[1]कर्मणि प्रवर्त्तते, प्रवर्त्तते च स्वार्थतृष्णापरिप्लुतः । तेनाऽवगच्छामो, ऽवगच्छति नूनमयमहमिति विभिन्नानपि स्वचित्तक्षणानेकतया । तदिदं सहजमात्माऽदर्शनं निदानं रागादीनाम् । यथा ऽहं सुखी भवेयं दुःखी च मा भूवमिति च मा भूवमिति च तृष्यतो येवाहमिति धीः सैव सहजं सत्त्वदर्शनमिति । न च सर्वविदः करुणा ऽहमुपकुर्यां परानित्येवमाकारापि सत्त्वदर्शनाऽवयवा यस्मान्नात्मगामी फलाभिलाषो ऽयमपि तु स्वार्थम-

१ मायो न तत्संततिपतितलक्षणात्मोपकार २ पु॰ धा॰ ।

न। तस्याऽनुपपत्तेः, अज्ञानाच्च। तथा हि—
हेत्वभावे फलाऽभावात्प्रमाणे सति न प्रमा।
चक्षुराद्युक्तविषयं परतन्त्रं बहिर्मनः॥

नपेक्ष्य परदुःखप्रहाणेच्छेत्युक्तम्। न च सर्वे चित्तक्षणाः प्रत्येकं परमुपकुर्यामहमहमित्यहमहमिकयोत्पद्यमाना अप्यात्मदर्शनाऽवयवाः। परोपचिकीर्षायास्तं विना ऽप्युपपत्तेः। तत्त्वदर्शने चोपदेशसम्भवात्स्वगतता[1]मन्तरेणापि परोपकारस्य समीहितत्वादपेक्षितलक्षणत्वाच्च फलस्य तत्सम्बन्धस्य प्रवृत्तेः प्रेक्षावत्ताऽविघातात्। तस्मादुपदेशतत्त्वविज्ञानयोरविरोधात्सन्दिग्धव्यतिरेकित्वाद्वचनमपि न सर्वज्ञताया बाधकमिति न बाधकप्रमाणसद्भावस्तदभावव्यवहारसाधनम्। नाऽपि साधकप्रमाणाऽभावः। तथा हि। प्रत्यक्षाऽभावो वा सकलप्रमाणाभावो वा स्यात्। प्रत्यक्षाभावो ऽपि चाऽऽत्मनः सर्वेषां वा, यदात्मनस्तदा ऽपि दृश्यताविशेषणो निर्विशेषणो वा। न तावदात्मप्रत्यक्षनिवृत्तिर्दृश्यताविशेषणा सर्वज्ञाऽभावसाधनी। तस्य स्वभावविप्रकर्षिणस्तत्त्वानुपपत्तेः प्रसिद्धत्वान्निर्विशेषणायाश्च व्यभिचारात् समस्तप्रत्यक्षनिवृत्तेश्चाऽसिद्धत्वत्। न खल्वर्वाग्दृशः सकलप्रत्यक्षनिवृत्तिः। असिद्धत्वात्। न च प्रमाणं प्रमेयस्य व्यापकं कारणं वा, येन तन्निवर्तेत। तस्मान्न तदभावसिद्धिः। नापि तद्भावसन्देहः। तत्साधनेन तत्सद्भावस्य निवेदयिष्यमाणत्वात्। तस्मादनुविधेयपुरुषधौरेयनियोगादेव प्रवृत्तिनिवृत्ती इति साम्प्रतम्।

तदेतन्निराचष्टे—न। कुतः? तस्याऽविधेयस्य सर्वविदो ऽनुपपत्तेः। अज्ञानाच्च। पातिते प्रमाणदारुणि यथायथं परिशोधयति—तथा हि।

हेत्वभावे फलाऽभावात् प्रमाणे सति न प्रमा।
चक्षुराद्युक्तविषयं परतन्त्रं बहिर्मनः॥

१ सकर्तृकताम् २ पु० पा०।

यद्यप्यात्मप्रत्यक्षनिवृत्तिर्विप्रकर्षवतामभावं व्यभिचरति। सर्वप्रत्यक्षनिवृत्तिरसिद्धा। असर्वदृशः सकलप्रमाणनिवृत्त्या च नाऽर्थाऽभावसिद्धिः। अव्यापकनिवृत्त्याऽव्याप्यनिवृत्तेरनियमात्। अव्यापकत्वं चाऽहेतुत्वात्। तन्मात्रानुबन्धाऽभावाच्च। अन्यथा सर्वस्य सर्वदर्शित्वप्रसङ्गात्। अविशेषाच्च। वचनादयश्च यद्यप्यविरोधादनिवर्तकाः तथापि कारणनिवृत्त्या कार्यनिवृत्तिप्रतीतेः प्रमा-

तदेतद्व्याख्यातुमना भूमिकामारचयति—यद्यप्यात्मप्रत्यक्षनिवृत्तिर्विप्रकर्षवतां त्रिविधेन कालदेशस्वभावविप्रकर्षेण तद्वतां रामसुमेरुपरमाणवादीनामभावं व्यभिचरति। सर्वप्रत्यक्षनिवृत्तिरसिद्धा। असर्वदृशोऽस्मदादेः सकलप्रमाणनिवृत्त्या च नार्थाऽभावसिद्धिः। कस्मात्? अव्यापकनिवृत्तावव्याप्यनिवृत्तेरवश्यम्भावाऽनियमात्। अव्यापकत्वमेव कुत? इत्याह—अव्यापकत्वं चाऽहेतुत्वादकारणत्वात्तन्मात्रप्रतिबन्धा[1]ऽभावाच्च। हेतुधर्ममात्राऽनुबन्धे हि साध्यधर्मोऽस्य व्यापकः। यथा वृक्षत्वं शिंशपात्वस्य। न च प्रमेयमात्राऽनुबन्धि प्रमाणम्। तस्मात् अन्यथा प्रमेयाऽनुबन्धित्वे प्रमाणस्याऽस्मदादेः सर्वस्य सर्ववित्त्वप्रसङ्गः। तथा सत्यविशेषोऽस्मदादीनां भवदभिमतेन सह सर्वविदा। प्रमेयमात्राऽनुबन्धिप्रमाणशालिता हि सर्वज्ञता। सा चाऽस्मदादेरपीत्यविशेषप्रसङ्गः। वचनादयश्च यद्यप्यनिवर्त्तकाः सर्वार्थतत्त्वविदो विपश्चितश्चाऽविरोध[2]स्तया सह वचने सत्त्वादीनां, तथाऽपि कारणनिवृत्त्या कार्यनिवृत्ति-

१ तन्मात्राऽनुबन्ध २ पु· पा·।
२ विरोधात् २ पुं· पा·।

णाऽनुपपत्त्या तत्कार्यायाः सर्वार्थेषु संविदो ऽभावमनुमिमीमहे। तथा हि। न प्रत्यक्षं चक्षुरादिजन्म तावत्सर्वार्थेषु, तेषां विषयनियमात्। किंचिदेव हि वर्तमानं संबद्धं च तद्विषयो न सर्वो ऽर्थः।

यद्यपि चाऽनेकविधप्रमेयसंवेदनाद्रूपतो नियमो दुर्निरूपः। पटुमन्दतादिभेदतश्च नानादेशपरिमाणार्थ-

प्रतीतिः[१]। न ह्यस्ति सम्भवो, नास्ति धूमकेतनः, अस्ति च धूम इति। प्रमाणं च करणं प्रमाया इति प्रमाणाऽनुपपत्त्या तत्कार्यायाः सर्वार्थसंविदो ऽभावमनुमिमीमहे।

प्रमाणाऽनुपपत्तिमेव दर्शयति—तथा हि। न प्रत्यक्षं चक्षुरादिजन्म तावत् सर्वार्थेषु सम्भवति। कुतः? तेषां चक्षुरादीनां विषयनियमात्। नियमभेदमाह—किञ्चिदेव वर्तमानं संबद्धं तद्विषयः। न हि वर्तमानमात्रं तद्विषयः। स्वभावविप्रकर्षवतां परमाणवादीनामपि तद्विषयत्वप्रसङ्गात्। अत उक्तं—किञ्चिदेवावयवि द्रव्यादीति। तथा ऽपि कालव्यवहितदेशविप्रकृष्टं च तद्विषयः प्रसज्येत, अत उक्तं सम्बद्धमिति।

एतस्मिंश्च नियमे न सर्वविषयं विज्ञानमिन्द्रियजमित्याह—न च सर्वो ऽर्थो देशकालस्वभावविप्रकर्षशालिनः। तथा नियमान्तरे तु दूषणमनभ्युपगमादेव परिभूतमित्याह—यद्यपि चाऽनेकविधप्रमेयसंवेदनाद्रूपतो नियमो दुर्निरूपः। तथा हि। न तावद्रूपवच्चाक्षुषम्, अरूपस्याऽपि सङ्ख्यादेश्चाक्षुषत्वात्। नापि रूपिसमवेतम्। तदसमवेतस्य नीरूपस्य कालादेरपि चाक्षुषत्वादिति न रूपतो नियमः। नापि पाटवं वा रूपशब्दादीनामुद्भवसमाख्यातं, स्फीताऽऽलोकमध्य-

१ प्रतीतेः २ पु· पी·।

परिच्छेदान्न देशतः संबन्धनियमः। परिमाणतो नियमश्च²। कालतस्तु निरूप्यते । प्राप्यकारित्वे ऽवर्तमानस्य प्राप्त्यभावात् । अप्राप्यकारित्वे ऽप्यर्थसामर्थ्यसव्यपेक्षत्वात् ।

वर्तिता ऽर्थस्य ऐन्द्रियकत्वनियमहेतुः । अनुद्भूतानां मन्दानां रूपशब्दादीनां चक्षुरादिगतानामन्धकारस्थस्य च घटादेरग्रहणादिति साम्प्रतमित्याह—पटुमन्दतादिभेदतश्च ग्रहणाऽग्रहणनियमो दुर्निरूपः । इन्द्रियपाटवतारतम्येन मन्दमन्दतरमन्दतमग्रहणात् । वृषदंशादीनां च निरालोकवर्तिपदार्थग्रहणात् । नापि देशसन्निधिमहत्त्वे द्रव्यग्रहणनियमकारणे इत्याह—नानादेशपरिमाणार्थपरिच्छेदान्न देशतः सम्बन्धनियमः । चक्षुरेतावति देशे संनिकृष्यते, नैतावतीति नायं नियमः सम्भवतीति तुल्यवद्भूम्यादिगतकुम्भादिशनैश्चरादिग्रहणदर्शनात् । परिमाणतो नियमश्च दुर्निरूपः । सूक्ष्मसूक्ष्मतरसूक्ष्मतमगोचरत्वस्योपलब्धेः । अणोरनुपलम्भ इत्यचोद्यम्[1] । यदेव भवदभिमतं त्र्यणुकमीक्षामहे तदेव परमाणुमाचक्ष्महे । तदवयवाऽनुपलम्भात् तत्कल्पनाहेत्वनुपपत्तेश्च । दृश्यमानाऽवयवस्य च स्थवीयसस्तैरेव क्षोदीयोभिरारम्भसम्भवात् । अमहतो ऽपि च गुणादेश्चाक्षुषत्वान्न महिमगुणशालिता तद्धेतुः । तदेकार्थसमवायस्य वा तद्धेतुत्वे त्र्यणुकस्याऽग्रहणप्रसङ्गः स्यात्, तदभावात्परस्पराऽपेक्षोभयकारणत्वे वा त्र्यणुकस्य च गुणादेश्चैकैककारणशालिनोरचाक्षुषता स्यात् । परस्पराऽनपेक्षकारणत्वे तु तृतीयस्यापि प्रकारस्य सम्भवो दुर्वारः । भवतु वा स्वभावविशेष एव चाक्षुषत्वे हेतुरेक इति न परिमाणतो नियमोपपत्तिः । तस्मान्निरूपणान्तराऽभावात् कालतस्तु निरूप्यते नियमः ।

तथा हि—इन्द्रियाणि प्राप्यकारीणि न वा, उभयथापि तेषां वर्तमानविषयतैषितव्येत्याह—प्राप्यकारित्वे प्राप्ते उभयाश्रयत्वेनाऽवर्तमानस्याऽसत. आश्रयत्वाऽयोगात् प्राप्त्यभावात् । अप्राप्यकारित्वे

१ इति चेत् २ पु॰ पा॰ ।

ज्ञानोत्पत्तावजातनिवृत्तयोरनुपाख्येयत्वात् असामर्थ्यात्। तथा चाऽतिशयानामपि चक्षुरादयः स्वविषयमेव देशतः परिमाणतः संख्यातो वा ऽधिकं बोधयेयुः नाऽविषयमजातमतिवृत्तम्। तदुक्तं विद्यमानोपलम्भनत्वा-

यद्यपि प्राप्याप्रयत्वेन नाऽपेक्ष्यते ऽर्थः तथापि इन्द्रियाणामसत्यर्थे विज्ञानाऽजननात् अर्थसामर्थ्याऽपेक्षत्वात्। ज्ञानोत्पत्तौ कार्ये अजातनिवृत्तयोरनुपाख्येयत्वात् हेतोरसामर्थ्यम्। न खल्वतीतो ऽजातशत्रुः सम्प्रति संतर्पयति विप्रानन्नपानैरुत्थापयति वा यूपं महासंपन्निमित्तमनागतशङ्खश्चक्रवर्त्ती। यद्युच्येत मा नाम भूतामर्वाग्दृशां लोचनगोचरावतीताऽनागतौ, योगविमलाञ्जनोज्ज्वलीकृतलोचनास्त्वालोचयिष्यन्ति सकृदेव जगदुदरवर्त्ति वृत्तवर्तिष्यमाणमर्थमात्रम्। अचिन्त्यो हि इन्द्रियाणां सामर्थ्याऽतिशयः, प्रभावाऽतिशयश्च योगस्य।

यथा हि न चक्षुरादीनां देशतः परिमाणतः संख्यातो वा नियमः तथा कालतो ऽपि मा भूदिति तत्राह—यदा कालतो नियम इति व्यवस्थापितं तदा अतिशयानामपि सिद्धाञ्जनादिभिर्योगिनां चक्षुरादयो ऽर्वाग्दृशामिन्द्रियाणि च स्वविषयमेव देशतः परिमाणतः संख्यातो वा ऽधिकं बोधयेयुः, नाऽविषयमजातमनिवृत्तं वा। एतदुक्तं भवति। यथैव कार्यमहेतुकं न भवति कादाचित्कत्वव्याघातात् एवमनियतहेतुकमपि। न खलु अनियतहेतुकत्वमहेतुकत्वाद्विशिष्यते। कारणस्य हि कार्यप्राग्भावनियमः कारणत्वं, तच्चाऽनियतनिमित्तत्वे ऽनुपपन्नम्। न हि जातु यवबीजमत्यन्तपरिकर्मितमपि कलमाऽङ्कुराय परिकल्प्यते। नानाकारणमेकं वृश्चिकादी[1]ति च स्थूलदृशः। कुशाग्रीयदृशस्तु प्रणिहितमीक्षमाणाः पश्य-

१ एककारणवृश्चिकादीति पु० पा०।

ङ्गात्। तथा हि। प्रत्यक्षे रूपादिवेदने तच्चक्षुरादिपर-तन्त्रं तन्नियमादेव नियतम्। अन्यथा ऽन्धाद्यभावप्रस-न्ति तत्रापि कमपि जातिभेदम्। तस्माद्यथैव कारणान्तराणि स्वकार्यनिरतसामर्थ्यानि स्वकार्य एवाऽतिशयमनुभवन्ति नाऽकार्ये ना-प्यन्यकार्ये तथेन्द्रियाण्यपि न स्वविषये नाऽप्यन्यविषये इति सिद्धम्।

अत्रैव पारमर्षे सूत्राऽवयवं योजयति—तदुक्तं विद्यमानोप-लम्भनत्वादिति। ननु मा प्रवर्त्तिषत बाह्यानीन्द्रियाणि, मनस्तु प्रव-र्त्स्यतीत्यत आह—मानसमपि प्रत्यक्षं न सर्वं बोधयति। बहिर्म-नसो ऽस्वतन्त्रत्वात्। यत्र हि मनः स्थितं तत्र तेन प्रवर्त्तितव्यं, स्वप्रत्ययाऽनुविधानात्। आन्तरे च सुखादौ तत्[1] स्वतन्त्रमिति सुखादिविषयं तत्। न च सुखादयश्चिततया स्वसंवेदनप्रत्यक्षा इति साम्प्रतम्। विज्ञानादन्यत्वात्। विज्ञानाऽभिन्नहेतुतया तत्त्वमेषा-मिति चेत्। न। अभिन्नहेतुजत्वस्याऽसिद्धेः। इन्द्रियार्थसंनिकर्षो हि चन्दनविज्ञानस्य हेतुः, सुखस्य तु तद्विज्ञानं, तदभावे ऽपि विज्ञानमात्रादेव स्वप्ने सुखोत्पाददर्शनात्। सत्यपि चन्दनाऽनुलेपे हेमन्ते तदनुत्पादादित्येषा दिक्। तस्मात्सुखादिविषयं मानसं बहिर्विषयं भवितुं नाऽर्हति, तत्र तत्प्रत्ययस्य मनस इन्द्रियादित-न्त्रत्वादिन्द्रियादीनां च तदगोचरत्वात्।

कस्मान्न स्वतन्त्रं बहिर्मन? इत्यत आह—स्वातन्त्र्ये रूपादौ मनसो ऽन्धबधिराद्यभावप्रसङ्गात्। न खल्वन्धादयो निर्मनस्का, स्तेषां स्मृत्याद्यभावप्रसङ्गात्। मनश्चेच्चक्षुरादिनिरपेक्षमीक्षेत रूपादीन्न कश्चिदन्धबधिरादिः प्रसज्येतेति। तदेव स्फोटयति—तथा हि। प्रत्यक्षे रूपादिवेदने तन्मनश्चक्षुरादिपरतन्त्रं तन्नियमादेव नियत,-मन्यथा नियमाद्यभावे ऽन्धाद्यभावप्रसङ्गादिति।

दिति । मानसमपि प्रत्यक्षमान्तरसुखादिविषयम् । बहि-र्मनसो ऽस्वतन्त्रत्वात् । स्वातन्त्र्ये ऽन्धबधिराद्यभावप्रसङ्गादित्युक्तम् । तज्जन्मसमनन्तरप्रत्ययसहकार्यपेक्षणाद्यदि नाऽन्धाद्यभावः सर्वथा पारतन्त्र्यं न निवर्तते । तद्विषयत्वात् । अन्यथेन्द्रियान्तरजसहकारिणो ऽपि प्रवृत्तेः स

उक्तं शङ्कते—तज्जन्मसमनन्तरप्रत्ययसहकार्यपेक्षणाद्यदि नाऽन्धाद्यभावः । अयमर्थः । न खलु मनो नाम चक्षुरादिवत् किंचिदिन्द्रियान्तरं रोचयामहे, किं तु पूर्वमेव विज्ञानं चरमज्ञानस्योपादानमाचक्ष्महे । तदेव हि समं विज्ञानत्वेनाऽनन्तरं चाऽव्यवहितत्वेन समनन्तरप्रत्यय इत्युच्यते । तच यदिन्द्रियजविज्ञानसमनन्तरप्रत्ययसहकारिणा तदिन्द्रियजविषयक्षणोपादानेन रूपेक्षणान्तरेणेन्द्रियजविज्ञानसमानकालेन जनितं स्वजनकक्षणविषयं विशदाभमुपरतेन्द्रियव्यापारस्य ज्ञानं तन्मानसं प्रत्यक्षम् । न तदिन्द्रियजं, तद्व्यापारोपरमे भावात् । नाऽऽन्तरविषयम् । इन्द्रियजविषयविज्ञानविषयक्षणजनितक्षणान्तरगोचरत्वात् । न चाऽन्धबधिराद्यभावः । तेषामिन्द्रियरहिततया तज्जविज्ञानाऽभावेनोपादानविरहात् । न चाऽप्रत्यक्षं, विशदाभासत्वादिति ।

निराकरोति—सर्वथा नेन्द्रियान्तरपारतन्त्र्यं निवर्तते स्वोत्पत्तौ मानसस्य प्रत्यक्षस्य । कुतः ? यदिन्द्रियजविज्ञानविषयाऽनन्तरक्षणो ग्राह्यः तदिन्द्रियविषयजविषयजविषयत्वात्[1] । अन्यथा तदिन्द्रियजविषयाऽनपेक्षणे[2] स्वोत्पत्तौ मानसस्येन्द्रियान्तरजविज्ञानसहकारिणो ऽर्थात्प्रवर्तमानस्य रूपविज्ञानस्य स एवाऽन्धाद्यभावः प्रसज्येत । सहकारिभिः सह स्वोपादेयमुपादानमपि करोतीति सहकारीत्युच्यते । यद्युच्येत तुल्यजातीयविषय एव समनन्तरप्रत्ययो भवति

१ तदिन्द्रियजविषयत्वात् पा० २ पु० । २ विषयजाऽनपेक्षणे पु० २ पा० ।

एवाऽन्धाद्यभावः । न च तुल्यजातीयविषय एव समनन्तरप्रत्ययः । जात्यन्तरसंचाराऽभावात् । न खल्वेष ज्ञानधर्मो, जात्यन्तरसंचारात् । न प्रत्यक्षधर्मो, ऽवितर्कितरूपाद्यपेक्षणात् । न मानसधर्मः । सुखादिषु तददर्शनात् । अपि च विषयनियमात्पारतन्त्र्यमस्तु सहकारिविशेषाऽपेक्षया वेति

नाऽसजातीयविषयः, तेनाऽयमप्रसङ्ग इति, तत्राह—न च तुल्यजातीयविषय एव समनन्तरप्रत्ययः । कस्मात् ? जात्यन्तरसंचाराऽभावप्रसङ्गात् । न तावन्निरुपादानं विज्ञानं भवितुमर्हति । न चाऽनियतोपादानम् । उक्तमेतत्, नियतहेतुकत्वमहेतुकत्वान्नाऽतिरिच्यतइति । तदिह पूर्वबुद्धिभावाऽभावाऽनुविधानादुत्तरबुद्धिभावाऽभावयोः सैवोपादानमिति युक्तम् । ततश्च शुक्लविज्ञानाऽनन्तरमुपजायमानं घनसारशलाकायां शीतस्पर्शविज्ञानं शुक्लविज्ञानोपादानमेषितव्यम् । अन्यथा शुक्लविज्ञानजातीयस्य संतानस्य शिशिरज्ञानजात्यन्तरसंचाराऽभावः स्यादित्यर्थः ।

तदेतद्विभजते—न खल्वेष ज्ञानमात्रस्य धर्मः । कुतः ? जात्यन्तरसंचारात् । न प्रत्यग्धर्मः । कस्मात् ? अविकल्पितरूपाद्यपेक्षणात् । अविकल्पितस्य रूपस्य साक्षात्कारात्तद्विषयपूर्वज्ञानसंभवे तु शब्दादिस्मृतौ सत्यां वा ऽऽलोचनमात्रं भवेदित्यर्थः । न मानसप्रत्यक्षधर्मः । कस्मात् ? सुखादिषु तद्विषयपूर्वज्ञानाऽदर्शनात् ।

एवं तावदुक्तेन क्रमेण सहकारिविशेषाऽपेक्षया क्षणान्तरविषयत्वे ऽपि पारतन्त्र्यमापादितं मनसः । सम्प्रति विमर्शपूर्वकमिन्द्रियविषयतयैव पारतन्त्र्यमवधारयति—अपि च विषयनियमात्पारतन्त्र्यमस्तु सहकारिविषयाऽपेक्षया वेति विमृश्याऽभिमतमवधारयति—पारतन्त्र्यं युक्तम् । य एव यदिन्द्रियविषयः तत्रैव मनस्तदिन्द्रियतन्त्रं प्रवर्ततइति युक्तमित्यर्थः । कस्मात् ? स्मरणे तथा दर्शनात् ।

पारतन्त्र्यं युक्तं, स्मरणे तथा दर्शनात्। एकेन्द्रियग्राह्ये च सजातौ रूपान्तरग्रहणप्रसङ्गः। अवान्तरजात्यपेक्षणे भिन्नसन्तानाऽऽपातः। तद्तत्सन्तानवृत्त्योर्जात्यभेदात्। तस्मादेकसन्तानक्षणे समनन्तरप्रत्ययतां वदता चक्षुरादिविषयग्राहित्वमेवोक्तं भवति। क्षणविवेकप्रतिभासनादभेदप्रतिभासनात् क्षणिकत्वप्रतिक्षेपात्।

अपि च तुल्यजातीयविषयं समनन्तरप्रत्ययं मानसप्रत्यक्षकारणं ब्रुवाणो न तावदेकेन्द्रियग्राह्यतया तुल्यजातीयतां वक्तुमर्हति, अतिप्रसङ्गादित्याह—एकेन्द्रियग्राह्ये च सजातावभ्युपगम्यमाने रूपान्तरग्रहणप्रसङ्गः, पीतदर्शनमपि चाक्षुषं मानसप्रत्यक्षं चक्षुरसन्निकृष्टे ऽपि नीले प्रसुवीत, तदिन्द्रियग्रहणाऽर्हत्वस्योभयत्राऽविशेषादित्यर्थः। यदि त्ववान्तरजातिरास्थीयेत न चासौ रूपान्तरइति नाऽतिप्रसङ्ग,स्तत्राह—अवान्तरजात्यपेक्षणे हि भिन्नसन्तानक्षणाऽऽपातः। एकनीलोत्पलसन्तानवर्त्येकनीलोत्पलक्षणविषयमिन्द्रियाऽसन्निकृष्टसंतानान्तरवर्तिनीलोत्पलक्षणविषयमपि विशदं मानसं जनयेत्। कुतः? तदसन्तानवृत्त्या नीलोत्पलक्षणयोर्जात्यभेदात्। उपसंहरति—तस्मादेकनीलोत्पलसन्तानवर्त्तिक्षणविषयेन्द्रियजज्ञाने समनन्तरप्रत्ययत्वं तदिन्द्रियविषयज्ञानविषयजविषयस्य मानसस्य वदता ऽकामेनापि चक्षुरादिविषयग्राहित्वमेवोक्तं भवति। तथा चाऽस्येन्द्रियपारतन्त्र्यमिति सिद्धम्।

न चेतावता ऽपि चक्षुरादिविषयत्वमेव भविष्यति, न चक्षुरादिविषयग्राहित्वमित्यत आह—क्षणविवेकप्रतिभासनात्। इदमभिसंहितम्। क्षणिकत्वे हि सिद्धे भावानामेव तद्भवेदपि, न त्वेतदस्ति। तथा हि। अस्य साधनं प्रत्यक्षमनुमानं वा भवेत्। प्रमाणान्तराऽभा-

वात् । प्रमाणस्य सतो ऽत्रैवाऽन्तर्भावात् । अनन्तर्भावे तत्त्वाऽनुपपत्ते-रिति स्थितेः । तत्र न तावत्प्रत्यक्षं लौकिकं नीलादिवर्ति क्षणिकतां गोचरयति । ननु न नीलादन्यत् क्षणिकत्वं नाम वस्तुसत् । अर्थ-क्रियाभेदे हि तथा स्यात् सितादिवत् । न च क्षणिकत्वस्य नील-साध्याया अर्थक्रियाया भिन्ना समस्ति अर्थक्रिया, या स्वलक्षणभेदे-नाऽवतिष्ठेत । क्षणिकत्वं पीतादिवन्नीलसाध्ययैव चेदर्थक्रियया तत्त्-त्वतो नीलाद्भिद्यते । न भिद्यते चेन्नूनं नीलग्राहिणा प्रत्यक्षेणैव क्षणिकत्वं गृहीतं तदव्यतिरेकात् । तदनुपपन्नम् । अनुभवाऽनारो-हात् । न खल्वनुभवो व्याख्यानमर्हति । स च नीलमिति न तु क्षणिकवचनमिति । तदव्यतिरेकात्तद्गोचरत्वे स्थेम्नो ऽपि तदभि-न्नस्य तत्त्वप्रसङ्गः । मानान्तरात्तु क्षणिकस्य तद्भेदसिद्धौ प्रत्यक्षसि-द्धाभिधानं प्रलापः । तत्र तस्याऽवसायाऽजनकत्वात् । अवसायाऽन-नुगतव्यापारस्य प्रत्यक्षस्य प्रवृत्तिविषयं प्रति प्रामाण्याऽनभ्युपगमात् ।

स्यादेतत् । अनुभवारूढैव क्षणमात्रवर्तिता नीलादीनाम् । तथा हि । प्रत्यक्षविज्ञानं क्षणिकं स्वसमयेनैवाऽवच्छिन्नं परिच्छिनत्ति । तद्यथा । नीलाऽऽकारमालोचनं नीलं परिच्छिन्दत् तदभावं व्यवच्छि-न्दत् तदभावाऽव्यभिचारिणः पीतादीनपि व्यवच्छिनत्ति । तथा ऽस्तसमयाऽवच्छिन्नं नीलं परिच्छिन्दत् समयवर्तिताऽभावमप्यस्य व्यवच्छिन्दत् तदभावाऽविनाभाविनीं तत्पूर्वाऽपरसमयवर्तितामस्य व्यवच्छिनत्ति । तदव्यवच्छेदे पीतादीनामप्यव्यवच्छेदः । तथा च नीलसाध्याऽर्थक्रियाऽर्थिनो न क्व चिदेव नियमेन प्रवर्तेरन् । तदनु-भवसिद्धैव क्षणिकता भावानामिति ।

तदनुपपन्नम् । नीलमात्रगोचरत्वादालोचनस्य । न खल्व-तदात्मानमपि गोचरयति, दवीयसी त्वस्य स्वसमयगोचरता । स्वसं-वेदनाऽभ्युपगमे ऽप्यात्माऽनात्मप्रकाशनमात्रं नात्मानं समयेना-ऽऽत्मना वा नीलं समयेन वा घटयेत् । आलोचनमात्रतया विशेष-

णविशेष्यभावाऽविषयत्वात्[1] । आलोचनस्यापि तत्समयाऽविच्छेदेऽपि नीलादीनां नैकक्षणमात्रवर्त्तित्वसिद्धिः । आलोचनस्यापि द्विचादिक्षणवर्त्तित्वात् एकक्षणमात्राऽवस्थानाऽसिद्धेः । न चैकस्य क्रमवदनेकसम्बन्धो विरुध्यतइति निवेदयिष्यते । तत्सिद्धं प्रत्यक्षेण क्षणविवेकाऽप्रतिभासनान्नेन्द्रियविषयज्ञविषयता[2] मानसस्य किञ्चिदिन्द्रियविषयग्राहित्वमेवेति ।

ननु मा नाम क्षणभेदः प्रतिभासतां, तदभेदस्तु कुत? इत्यत आह—अभेदप्रतिभासनात् । सोयं स्फटिक इति प्रत्यभिज्ञैव भगवती स्थापयिष्यति स्फटिकम् । नन्वियं न स्फटिकस्य पूर्वाऽपरक्षणाऽवस्थानलक्षणं स्थिरत्वं गोचरयितुमर्हति । न खल्वेतद्विज्ञानमेकं, कारणभेदाद् विषयभेदात् स्वभावविरोधाच्च । तथा हि । स इति पारोक्ष्यमयमिति च साक्षात्कारः । न त्वनयोः स्वभावविरुद्धयोर्दहनतुहिनयोरिव शक्या शक्रेणाप्येकता ऽऽपादयितुम् । त्रैलोक्यस्यैक्यप्रसङ्गात् । सत्यपि च स्फटिक इति व्यपदेशाऽभेदे देशकालभेदाद् विरुद्धधर्म्मसंसर्गादनयोर्गोचरो भिद्यते । न च संस्कारः पूर्वाऽनुभवयोनितया तद्गोचरनियतः सम्प्रतितनीमननुभूतचरीमस्य सत्तामवगमयितुमर्हति । न चेन्द्रियाणि सन्निहितविषयाणि प्राक्तनीं गोचरयन्ति तत्तास्पदमस्य सत्तामसन्निहिताम् । न च कारणभेदे ऽपि कार्याऽभेदसम्भवः । कारणभेदाभेदाऽधीनत्वात्तद्भेदाऽभेदयोः । अन्यथा ऽऽकस्मिकत्वाऽऽपत्तेः । तत्तेदन्तास्पदे च स्वगोचरमात्रचारिणी स्मरणग्रहणे न परस्परस्य गोचरं सम्भिन्तः । न चाऽऽभ्यामन्यदेकं विज्ञानमुभयविषयाऽसंभेदसमर्थं सम्भवत्युक्तादेव क्रमात् । न चाऽस्य प्रामाण्यं, विकल्पत्वेनाऽवस्तुनिर्भासत्वात् स्मार्त्तादविशेषाच्च । तस्मात्प्रत्यभिज्ञां स्थापयति भावानिति मनोरथमात्रम् ।

---

१ विशेषविशेषस्य भावविषयत्वात् २ पु॰ पा॰ ।
२ इन्द्रियविषयता, २ पु. पा॰ ।

अत्रोच्यते । एकमेवेदं विज्ञानं प्रत्यभिज्ञासमाख्यानम् । ननूक्तं
स्वभावविरोधान्नेति, तत्किमिदानीं भवतामनुमानविज्ञानमपि नैकम् ?
तदपि हि प्रत्यक्षमप्रत्यक्षं वा विकल्पो ऽविकल्पश्च समारोपो ऽसमा-
रोपश्च । स्वाऽनुभवाऽवस्थापिताऽभेदस्य स्वरूपस्य तद्ग्राह्यभेदाऽपेक्ष-
या प्रत्यक्षत्वादीनामविरोध इति चेत् । न । इहापि साम्यात् । न
खल्वेतदपि विज्ञानं तत्तेदन्ताऽधिकरणमेकमाभ्यामनुरक्तं स्फटिकं
गोचरयति, यदभिन्नं ना नुभूयते अनुभूयते वा । एकत्वे ऽपि च वस्तुन-
स्तदनुरञ्जकतत्तेदन्ताऽभेदापेक्षया प्रत्यक्षता परोक्षते न विरोत्स्येते ।
सहसम्भवाद्विज्ञानैकत्वस्य च प्रमाणसिद्धत्वात् । न च स इति
पूर्वदेशकालसंसर्गो ऽयमिति च सन्निहितदेशकालसंसर्ग एकस्य विरु-
ध्यते । अतो युक्तं यत्पद्मरागस्य स्वरूपे परिच्छिद्यमाने तदभावो
व्यवच्छिद्यतइति । तदव्यवच्छेदे तत्स्वरूपाऽपरिच्छेदात् स्वप्रच्युति-
व्यवच्छेदस्वभावत्वात् पद्मरागभावस्य । तदव्यवच्छेदे तत्परिच्छेदा-
ऽनुपपत्तेः । कस्मात्पुनस्तदन्ये पुष्परागादयो व्यवच्छिद्यन्ते ? तदभावा-
ऽविनाभावादिति चेत्, स एव कुतः ? प्रत्यक्षेण कदा चिदपि पुष्प-
रागपद्मरागयोस्तादात्म्याऽनुपलम्भादिति चेत् । यत्र तर्हि सतस्तादा-
त्म्यप्रतीतिः तत्र न तदभावाऽविनाभावः । समस्ति च सो ऽयं
पद्मराग इति देशकालभेदाऽनुगतमेकं पद्मरागतत्त्वमवभासयन्ती
साक्षात्कारवती प्रतीतिः । तेन भवतु देशकालयोस्तत्संसर्गयोर्वा
परस्परमतदात्मत्वं न तु तदवच्छिन्नस्य पद्मरागस्य । तस्य भावात्सं-
सर्गाभ्यां चाऽन्यत्वात् । ततो ऽन्यत्वे तत्संसर्गयोः कुतस्तदीयत्वमिति
चेत् । स्वभावादेवेति संसर्गपरीक्षायां निपुणतरमुपपादयिष्यते । तस्मा-
त्तत्तेदन्ताऽऽस्पदस्य पद्मरागस्य[1] तदवभासिनो ऽनुभवस्य चैकत्वम-
नुभवाद्वा अनुमानाद्वा तदवभासलक्षणफलाऽभेदजन्मनः सिद्धम्[2] ।

१ तस्माच्चाऽभेदो नापि सादृश्यं पद्मरागस्येति २ पु. पा. ।
२ लक्षणाद्वा नाऽसिद्धम्. २ पु. पा. ।

विशदतरकार्यसिद्धौ चाऽप्रतीयमानमपि कारणं कल्पनीयं न पुनरप्रतीयमानकल्पनाभयात् कार्यवैशद्यमपह्नोतुमुचितम् । रूपादिविज्ञप्तीनामप्यपह्नवप्रसङ्गात्[1] । तदिह यद्यपीन्द्रियं केवलमसमर्थं यद्यपि च संस्कारमात्रं संस्कारसध्रीचीनं त्विन्द्रियं भावयिष्यति प्रत्यभिज्ञातद्भावाऽभावानुविधानात् प्रत्यभिज्ञाभावाऽभावयोः । न हि नाऽजीजनद्[2] बीजमङ्कुरमिति मृदादिसहितमपि न जनयति । तेन भवतु स्थिरस्य भावस्य सहकारिप्रत्यय[3]समवधानसमासादिताऽतिशयस्य कार्यकारिता, भवतु वोपसर्पणं प्रत्ययपरम्परालब्धतथात्वादभेदस्य, उभयथा ऽपि लोचनादीनां संस्कारसहितानामनुभववासनाभेदसहभुवां वा प्रत्यभिज्ञानजननसामर्थ्यसम्भवः । अनुभववासनामात्रजत्वे ऽयमित्यनुपपत्तेरिन्द्रियमात्रजत्वे वा स इति अनर्थजत्वे वा अर्थसंनिधानाऽसंनिधानाभ्यां तत्प्रतिभासभेदाऽनुपपत्तेः । न चैवमतीतकालसम्बन्धितेन्द्रियाणाम् । तदसम्बन्धे ऽप्यतीतकालतायास्तत्पारम्पर्यसम्बन्धसंस्कारद्वारेणाऽवभासोपपत्तेः । न चैवमतीतकालता न प्रत्यक्षेति साम्प्रतम् । इन्द्रियजविज्ञानविषयत्वात् तन्मात्रानुबन्धित्वाच्च प्रत्यक्षतायाः इन्द्रियसम्बन्धत्वे । तन्मात्रा[4]नुबन्धित्वे तु तज्जविज्ञानाऽविषयाणामपि तद्गन्धादीनां[5] परमात्ममनःप्रभृतीनामप्रत्यक्षत्वप्रसङ्गः[6] । तस्मान्न कारणाऽभावः । नापि सामग्रीभेदः, यतः कार्यभेदः स्यात् । तस्मिन् जनयितव्ये नियमेन तत्पूर्वभाविनां संस्कारेन्द्रियादीनामेकत्र सामग्रीभावात् । तत्सिद्धमभेददर्शनं प्रत्यभिज्ञानात्मकमेकमनेकदेशकालाऽवस्थासम्बन्धं पद्मरागादि गोचरयतीति । न चेदं स्मार्तं, पूर्वाऽपरदेशकालाऽवस्थानुगतेरधिकारात्[7] । न च विकल्परूपतया ऽस्याऽप्रामाण्य,मभिलापसंसर्गयोग्यप्रतिभास.

१ ज्ञप्तीनामप्यपह्नवप्रसङ्गात्.
२ जनयति २ पु· पा· ।
३ एकप्रत्यय २ पु· पा· ।
४ इन्द्रियसंबन्धमात्र· २ पु· पा· ॥
५ अपि तत्सम्बन्धवताम् २ पु· पा· ॥
६ प्रसङ्गात् ३ पु· पा· ॥
७ अवस्थाऽवगतेरधिकारार्थत्वात् २ पु· पा· ॥

प्रामाण्ययोरविरोधात् । समारोपितगोचरत्वस्याऽसति बाधकेऽनुपपत्तेः । न चैतदनुसन्धानमात्रं यथा भिन्नानामपि यजमानानामेकीभूता वयमिह सत्रे इति व्यपदेशमात्रं तत्त्वेन चिदुपाधिना न त्वेकत्वाभ्यगमः । इह तु देशकालाऽवस्थासंसर्गभेदेऽपि पश्यन्त्येकं पद्मरागतत्त्वमभिन्नदेशकालमिव लौकिकपरीक्षकाः । तत्सिद्धमभेदप्रतिभासनादिति ।

नन्वस्त्वभेदप्रतिभासो, न पुनरयमक्षणिकतामावहति भावादीनाम् । बाधके सति समारोपितगोचरत्वात् । अस्ति हि बाधकं यत् सत्तत् क्षणिकं यथा घटादि । संश्च विवादाऽऽस्पदीभूतः शब्दादिरिति स्वभावहेतुः । भावमात्राऽनुबन्धिसाध्यविषयत्वात् । कथं पुनरिह सत्तामात्राऽनुबन्धसिद्धिः क्षणिकतायाः पूर्वाऽपरभागविकलकालमात्राऽवस्थितिलक्षणायाः ? । इत्थम् । तथा हि । सर्वोपाख्यारहितविपरीतरूपनिरूपणा सत्ता भावानां नाऽर्थक्रियाकारिताया अतिरिच्यते । नो खलु समस्ताऽर्थक्रियाऽनुपयोगिभावसंभवः । तथा हि—स्वरूपमात्राऽनुबन्धिसार्वज्ञविज्ञानगोचरो न वा ? अगोचरश्चेन्निरुपाख्यो न भावः । तद्विषयताव्याप्तस्य वस्तुरूपस्य तन्निवृत्तौ निवृत्तेः । तद्गोचरत्वे वा कथमनालम्बनम् ? आलम्बनं चेत् कथमप्रत्ययः ? प्रत्ययश्चेत्कथमर्थक्रियायां नोपयुज्यते ? तदर्थक्रियाकारितैव सत्ता भावानाम् । सा च क्रमाऽक्रमाभ्यां व्याप्ता । तृतीयप्रकारविरहात् ।

तथा हि । भावानां तासु तास्वर्थक्रियासु क्रमाऽक्रमौ परस्परपरिहारवन्तौ प्रत्यक्षत एव लक्षितौ । तथा च प्रकारान्तरमपि क्रमाऽक्रमात्मकमीदृशाभ्यामेवाऽनुभूताऽवसिताभ्यां क्रमाऽक्रमाभ्यां व्यतिरिक्तमङ्गीक्रियेत, ततो दृश्यमानयोस्तयोरपि क्रमाऽक्रमयोः परस्परसङ्करप्रसङ्ग इति दृश्यमानः क्रमोऽक्रमात्मकोऽक्रमश्च क्रमात्मक इति तथैवाऽनुभवक्रिये प्रसज्येयाताम् । तदेवं परस्परपरि-

हारवन्तौ क्रमाऽक्रमौ परिच्छिन्दत् प्रत्यक्षमेव प्रतिक्षिपति, न मृष्यति च प्रकारान्तरमीदृक्क्रमाऽक्रमसंकीर्णमेकम्। तदनुपलम्भश्च दृश्यविशेषणरहितोऽपि दृश्यमानतादात्म्यनिषेधात्मकतया तदभावव्यवहाराय कल्पते। दृश्यमानस्तम्भतादात्म्येन स्वयमदृश्यानां पिशाचप्लवङ्गमादीनामविशेषेणाऽनुपलम्भमात्रेणाऽसद्व्यवहारसिद्धेः। अनेवंभूतक्रमयौगपद्यव्यतिरेकवति तु प्रकारान्तरे क्रमयौगपद्ये एव न संभवतः। ननु मा भूतामत्वन्य एव क्रमाऽक्रमाऽभिधानयौगपद्यादन्यप्रकारो यमास्थाय अर्थक्रियासूपयोक्ष्यतइति चेत्। नन्वेषां प्रकारान्तरवत्किमर्थक्रिया पिशाचायमानैव? तथा चेत्किं नश्छिन्नम्। दृश्यमानास्त्वनुभूताऽवसितपरस्परव्यावृत्तक्रमयौगपद्यरूपप्रकारद्वयसमालिङ्गितशरीरा अर्थक्रिया न प्रकारान्तराद् भवितुमीशते। न च तदपि। तथा हि। यच्च यत्प्रकारव्यवच्छेदेन यदितरप्रकारव्यवस्थानं तच्च प्रकारान्तरसंभवः। तद्यथा नीलप्रकारव्यवच्छेदेनाऽनीलप्रकारव्यवस्थानं पीते। अस्ति च क्रमयौगपद्ययोरन्यतरव्यवच्छेदेन तदितरप्रकारव्यवस्थानं व्यवच्छिद्यमानप्रकारान्तरऽविषयीकृते अर्थक्रिया सर्वत्र कार्यकारण[1] इति विरुद्धोपलब्धिः। निषिध्यमानप्रकारान्तरसम्भवविरुद्धं हि द्वयोरन्यतरनिषेधेऽन्यतरव्यवस्थानमिति प्रकारान्तराऽभावाद् भावानामर्थक्रिया क्रमाऽक्रमाभ्यां व्याप्ता, तौ च स्थिराद्व्यावर्तमानौ अर्थक्रियामपि व्यावर्तयतो वृक्षतेव शिंशपात्वमेकशिलामयादचलप्रदेशात्।

तथा हि। न तावत्क्रमेणाऽर्थक्रियासम्भवः, स्वेनैव हि रूपेण भावा अर्थक्रियासूपयुज्यमाना दृश्यन्ते यतो[2] यद्यत्कार्यान्वयव्यतिरेकाऽनुविहितभावाऽभावं तत्तत्कार्यप्रसवसमर्थं, रूपं च तेषां कार्येणाऽनुकृताऽन्वयव्यतिरेकमिति तदेव समर्थम्। तच्च द्वितीयादिष्विव क्षणेषु प्रथमेऽपि क्षणे सदिति द्वितीयादिक्षणजन्यं कार्यक-

१ विषयीकृते सर्वकार्यकारण २ पु॰ पा॰। २ तेनोपायात् पु॰ पा॰ ॥

त्वादनित्यत्वाच्च न विशेषोऽपि । नापि समवायः । सम्बन्धत्वेनाऽनवगमादनित्यत्वाच्च ॥

नापि गुणः चतुर्विंशतावनन्तर्भावात् । नीलरूप एवास्यान्तर्भाव इति चेत् । न । नीलं

मान्यत्वादिति विवक्षितत्वात् । अतिरिक्तवृत्तिसामान्यत्वप्रत्यवस्थानस्यापि तथैव वाच्यत्वेन तन्निराकरणस्यापि तथैवोचितत्वात् । न च व्याघातोपि षष्ठ्योर्व्यधिकरणत्वेन सामान्यवत्पदस्य भावपरत्वेनान्यस्य सामान्यवत्त्वाभावादित्यर्थात् । प्रत्यक्षत्वादिति । लौकिकप्रत्यक्षत्वादित्यर्थः । अनित्यत्वादिति । ननु परिशेषस्याभाववादिनो यावत्तेजःसंसर्गाभावरूपे तमसि हेत्वप्रसिद्धिः । ध्वंसात्यन्ताभावयोस्तदयोगात् । प्रागभावमात्रस्य वा तमस्त्वादिति चेत् । न समानकालीनतेजोविशेषासमानाधिकरणतेजःप्रागभावस्तदित्यभ्युपगमेनाभिधानात् ॥

नापि गुण इति । गुणत्वावच्छिन्नप्रतियोगिकान्योन्याभाववदित्यर्थः । यद्यप्युत्तरत्रिकस्येव पूर्वत्रिकस्यापि निराकरणं युक्तम् । सूचीकटाहन्यायेनाल्पनिरूपणस्य कर्मणो वा प्रथमं तथापि सतोन्यथाक्रमस्य पुरुषाभिसन्धिवैचित्र्यमेव शरणम् । दृष्ट्वा चेदमल्पायाससाध्यं यदा कदापि से स्यतीत्यभिसन्धिना पुंसामायाससाध्येपि प्रथमं प्रवृत्तिरिति । चतुर्विंशतावनन्तर्भावादिति । रूपादियावद्विशेषान्यत्वादित्यर्थः । रूपं गुणो रसो गुण इत्यादौ तादात्म्यव्यवस्थापकतया दृष्टस्य सामानाधिकरण्यस्य नीलरूपतमसोरपि दर्शनात् तमसोनीलरूपतादात्म्यसिद्धेर्हेत्वसिद्धिरिति नीलपदे जातिशब्दत्वभ्रमवान् शङ्कते । नील-

रूपं तम इति प्रत्ययाभावात् । एतेनारोपितं नीलं रूपं तम इति तदपि[1] परास्तम् । अन्यत्रापि नीलीद्रव्योपरक्तेषु वस्त्रचर्मकम्बलादिषु[2] तमोव्यवहारप्रसङ्गात् । गुणे शुक्लादयः पुंसीति

रूप एवेति । सत्यमेतत् । तादात्म्यनियतसामानाधिकरण्यमिति तदेव तु तमसो नीलरूपेणासिद्धम् । तद्धि सामान्योपक्रमे प्रयोगे विशेषोपक्रमे वा तृतीयप्रकारासम्भवात् । तत्र न तावदाद्य इत्याह । नीलं रूपं तम इति । रूपसामान्योपक्रमेण विधीयमानं तमस्त्वं मातिप्रसङ्क्षीदिति सामान्यस्य विवक्षितविशेषे विश्रान्त्यै नीलपदोपादाने नीलं रूपं तम इति स्यात् न च तथास्ति कथञ्चिदिति भावः । अत्रान्तरे दूषणातिदेशसौकर्यादारोपितं नीलं रूपं तम इति कन्दलीकारमतं दूषयिष्यन्नालोकाभावे यत्र क्वचिद्वारोपितं तत् तम इति विकल्प्याद्ये दूषणमाह । एतेनेति । नीलं रूपं तम इति प्रत्ययाभावेनेत्यर्थः । द्वितीय आह । अन्यत्रापीति । इह वस्त्रादिषु तम इति व्यवहारप्रसङ्गादित्यर्थः । अस्तु तर्हि विशेषोपक्रम इति द्वितीयः पक्षः । न चात्रापि स एव दोषः । नीलेन विशेषेणाक्षेपादेव रूपत्वसामान्यप्रतीत्युपपत्तेस्तद्वाचकरूपपदात् प्रयोगोपपत्तेरित्याशङ्क्य तथापि नीलं तम इतीष्यमाणः प्रयोगो न स्यादेवेत्याह । गुणे शुक्लादय इति । गुणे रूपादौ विशेष्ये वर्तमानाः शुक्लत्वादिजात्यवच्छिन्नविशेष्यताके रूपादौ वर्तमाना इति यावत् । शुक्लादयः शुक्ल-

(१) आरोपितं रूपं तदिति–पा० १ पु० ।

(२) पटादिषु–पा १ पु० ।

कृत्वा नीलस्तम इति प्रयोगप्रसङ्गाच्च। किं चा-यमन्धकारोऽसमवेतो वा द्रव्यान्यसमवेतो वा द्रव्यसमवेतो वा[1] असमवेतोऽपि जातिमान्न वा। आद्ये द्रव्यं स्यात् न गुणः। द्वितीये समवायाभा-

शुभ्रशुचिश्वेतेत्युपक्रान्ताः शब्दाः पुंसि काकस्य कृष्णो घन-स्य नील इति यथेत्यर्थः। तेन शुक्लं रूपमित्यादौ नातिप्रस-ङ्गः। शुक्लशब्दस्य गुणोपस्थापकत्वेऽपि शुक्लत्वस्य विशेष्य-तानवच्छेदकत्वात्। न च पटस्य शुक्लं रूपमित्यादौ पटाद्य-पेक्षया विशेष्यतायाः शुक्लत्वेनावच्छेदाच्छुक्लपदे पुंस्त्वप्रसङ्ग इति वाच्यम्। तत्र पटान्वितरूपं प्रति विशेषणताया एव शुक्लत्वेनावच्छेदाच्छुक्लत्वावच्छिन्नविशेष्यताके गुणे शुक्ल-पदप्रवृत्तेरभावात् भावे त्विष्टापत्तिरिति। नन्वत्रापि नीलस्य तमोविशेषणत्वादनुक्तलिङ्गविशेषणपदानां च वि-शेष्यलिङ्गताया औत्सर्गिकत्वात् नीलं रूपमितिवन्नपुंसक-लिङ्गोपपत्तिरिति चेत्। न नीलस्य सामान्यस्य तमो-लक्षणविशेषाव्यवच्छेदकतया नीलपदस्य विशेषणपदत्वा-भावात्। विशेषणविशेष्यभावे कामचाराभिधानस्य पर-स्परव्यभिचारितदुभयविषयत्वात्। क्वचित् तथाभूतस्थले विशेषणसमासस्य च बहुलवचनैकसाध्यताया अभियुक्तै-रेवाभिधानात्। न च सहप्रयोगानुपपत्तिः सामान्योप-क्रमे प्रयोगे नीलरूपस्य सामान्यस्यातिप्रसक्ततया तमसः तद्विशेषणत्वेन सहप्रयोगसम्भवात्। विशेषोपक्रमे च तस्यैवाभावादिति भावः। अन्ये तु पर्यायत्वेन विशेषण-

(१) स्यात्—इत्यधिकं १ पु०।

वयोरन्यतरत्वप्रसङ्गात् । तथापि गुणत्वव्याघातः । नापि द्वितीयः । गुणत्वव्याघातात् । नापि तृतीयः । पृथिव्यादिषु नवस्वसमवेतत्वात्[1] । तथाहि नायं दिक्कालमनसां गुणः प्रत्यक्षत्वात् । नाप्यात्मसमवेतः चाक्षुषत्वात् । अत एव न नभोनभस्वतोः । नापि तेजसः तेन समं

विशेष्यभावानुपपत्तिमुक्त्वा वृक्षः पादप इतिवदर्थप्रकाशनपरत्वेन सह प्रयोगोपपत्तिमाहुः । आद्ये ऽसमवेतत्वे सति जातिमत्त्वे। द्वितीये असमवेतत्वे सति जातिशून्यत्वे । अस्तु तर्हि समवाय इत्यत आह । तथापीति । तथा च तव प्रतिज्ञासंन्यास इति भावः। द्वितीये द्रव्यान्यसमवेतत्वे। तृतीयः द्रव्यसमवेतत्वपक्षः । प्रत्यक्षत्वादिति । लौकिकप्रत्यक्षत्वादित्यर्थः । एवं चाक्षुषत्वादित्यत्रापि । अत एवेति । लौकिकचाक्षुषधीविषयत्वादेवेत्यर्थः । यद्यपि परनये नभोनीलिम्नि व्यभिचारस्तथापि स्वसिद्धान्तदार्ढ्याभिमानेनेदम्। तेन समं विरोधादिति । स्वसमानकालीनप्रौढप्रकाशकतेजोऽव्यधिकरणत्वादित्यर्थः । प्रौढप्रकाशकेति विशेषणाच्छायायां सुवर्णसंवलितान्धकारे च नासिद्धिः । न चासिद्धिवारकविशेषणवैयर्थ्यं विशिष्टतेजोधिकरणाधिकरणकभिन्नत्वस्य तेजोधिकरणाधिकरणकभिन्नत्वादन्यत्वात्। न च तेजोधिकरणभूतलाद्यनधिकरणतयाऽव्यासज्यवृत्तितद्गुणेषु व्यभिचारः । तेजोधिकरणस्य परम्परया तेजोगुणानामप्यधिकरणत्वात्। गेहे केतकीगन्ध

(१) नवस्वनवकाशात्—पा॰ १ पु॰ ।

विरोधात् । तेजोरूपाविषयकचाक्षुषप्रतीतिवि-

---

इत्यादेर्गुणयाश्रये ऽपि गुणप्रतीतेर्बहुलमुपलम्भात् । ईदृशतेजोऽधिकरणाधिकरणकभिन्नत्वन्नस्यैव चात्र विवक्षितत्वात् असिद्धिनिवृत्त्यै स्वसमानकालीनेति । तेजोरूपाविषयेति । उक्तस्पर्शे व्यभिचारनिरासाय चाक्षुषेति । प्रभात्मनि तेजोरूपे व्यभिचारनिरासाय रूपपदम् । तमःप्रतीत्या नीलरूपस्यापि विषयीकरणादसिद्धिमप्रसिद्धिं वा वारयितुं तेजःपदम् । प्रभातेजस्त्वपक्षे रूपपदं स्वरूपार्थकमिति कश्चित् । तन्न । उत्तरग्रन्थस्वरसविरोधात् । अखण्डाभावेन वैयर्थ्यमिति सम्प्रदायविदः । वयं तु ब्रूमः । परिशेषकर्तुस्तार्किकस्य मते तमःप्रतीतेः तत्प्रतियोगिभूतरूपवत्तेजोविशेषविषयत्वेनासिद्धिः स्यादित्यविषयत्वमजन्यत्वमेव इति स्थिते ऽसति रूपपदे तेजोऽजन्यचाक्षुषसाक्षात्कारविषयत्वस्य पर्यवसितस्य हेतोरप्रसिद्धिः स्याच्चक्षुषैव तेजसा तज्जननादिति तद्वारणाय रूपपदम् । न च व्यञ्जकतेजोरूपत्वेन चक्षूरूपस्यापि जनकत्वात् तदजन्यचाक्षुषसाक्षात्काराप्रसिद्धितादवस्थ्यम् । उद्भूतरूपतेजस्त्वेन तेजस इव तेजोगतोद्भूतरूपत्वेन तेजोरूपस्य व्यञ्जकत्वात् । अथ गौरवादत्रोद्भूतत्वत्यागः । न चोष्मणापि तमसि चाक्षुषत्वापत्तिः । व्यञ्जकस्योद्भूतरूपतेजसोऽभावादिति चेत् । हन्तैवं तेजोव्यञ्जकतायामेवोद्भूतत्वत्यागः तेजोगतोद्भूतरूपत्वमेव रूपस्य व्यञ्जकतावच्छेदकमास्तामिति विपरीतमपि सुवचम् । न चैवं तमसि प्रत्यक्षतापत्तिः । व्यञ्जकस्य तेजोगतोद्भूतरूपस्याभावादित्यस्य सुवचत्वात् । किं चैवं व्यञ्जकरूपत्वमेव रूपस्य व्यञ्जकतावच्छेदकमास्तां कृतं गुरुणा तेजोभागेनापीति

षयत्वाच्च । न च तेजोरूपमेव तमः शुक्लभास्वर-त्वानाश्रयत्वात् । इन्द्रनीलप्रभावदाश्रयसम्पर्क-वन्नीलबुद्धिरत्रेति चेत् । न । तथाभूताश्रयस्यान-नुविधानात् तद्वत्परप्रकाशकत्वप्रसङ्गाच्च । नापि पृथिवीजलयोः तद्रूपे ऽन्धकारव्यवहाराभावात् ।

शरीरगोलकादिरूपस्यापि व्यञ्जकतापत्तिः । तस्मात् विनिगमकाभावादुभयत्रोद्भूतत्वप्रवेशावश्यकतया चक्षूरूपस्याव्यञ्जकत्वादिति । ननु तेजसोरूपमेव तम इत्यसिद्धो हेतुरित्याशङ्क्याह । न चेति । शुक्लत्वानाश्रयत्वात् भास्वरत्वानाश्रयत्वादिति हेतुद्वयं तेन न व्यर्थविशेषणतेति द्रष्टव्यम् । इन्द्रे नीलनीलात्मकबलवत्सजातीयसम्बन्धात् प्रभारूपे शुक्लत्वाग्रहे नीलत्वारोपवत्तमोलक्षणे तेजोरूपे सत एव शुक्लत्वस्याभिभवादग्रहे नीलत्वारोप इति हेत्वसिद्धिं शङ्कते । इन्द्रनीलेति । वैधर्म्येण परिहरति । तथाभूतेति । आवरकत्वाभिमतस्याधिकरणस्य वा नीलत्वानियमादिति भावः । किं च कल्प्यमानोप्यभिभवः सुवर्णवद्रूपस्यैव वा तदनभिभवे ऽपि वह्नाविव शुक्लत्वस्यैव वा । नाद्यः । तमस एवानुपलम्भप्रसङ्गादित्यभिप्रेत्य न द्वितीय इत्याह । तद्वदिति । उद्भूतानभिभूततेजोरूपत्वस्यैव व्यञ्जकताप्रयोजकत्वादिति भावः । तेजोगुणत्वं निराकृत्य पृथिवीजलगुणत्वं निराकरोति । नापि पृथिवीजलयोरिति । पृथिव्या जलस्य चेत्यर्थः । गुण इत्यनुषज्यते । न रूपमिति समासस्यैकदेशत्वात् । तद्गुणो भवन्नयं रूपमेवेति शङ्कते गुणमात्रमिति वेति विकल्प्याद्ये तमो न पृथिवीरूपमन्धकारतया प्रमीयमाणत्वादिति विवक्षिते हेतावपेक्षितं यत्तद्रूपं

न चोपलभ्यमानरूपातिरिक्तमेव पृथिव्या जलस्य वा रूपम् एकत्रैकदा रूपद्वयासमावेशात् । आलोकं विना तद्रूपचाक्षुषताविरोधाच्च । तेजो-

न तदन्धकारतया प्रमीयते यथा घटादिरूपमिति व्यतिरेकव्याप्तिमाह । तद्रूपेति । न चासाधारण्यं शब्दोऽनित्यः शब्दत्वादितिवददोषत्वादिति भावः । अस्तु तर्ह्यभयवादिसिद्धपृथिवीरूपान्यरूपवती पृथिवीत्याशङ्क्याह । न चोपलभ्यमानेति । अत्र विवक्षितस्य पृथिवीत्वहेतोर्विशेषदर्शनेनासाधारण्यं निरसितुं तदुपपादकमाह । एकत्रेति । पाकक्रमेण रूपद्वयसमावेशदर्शनादाह । एकदेति । न द्वितीयः । आलोकाजन्यलौकिकचाक्षुषज्ञानविशेष्यकत्वादित्याह । आलोकं विनेति । तद्रूपे पृथिवीजलगुणस्वरूपे प्रत्यक्षस्वसामान्यपरित्यागेन चाक्षुषतोपादानादयं तद्गुणत्वनिषेध एव हेतुर्विवक्षित इति गम्यते । तत्रैव गन्धादिव्यभिचारनिरासाय तदुपादानस्यावश्यकत्वात् । अन्ये त्वर्थैकदेशपृथक्चाक्षुषत्वजातेरखण्डत्वादविशेषं मन्यमाना नापीति प्रभृत्येतदन्तं पृथिवीजलरूपत्वनिराकरणमेवेत्याहुः । घटादिरूपव्युदासायाह । आलोकं विनेति । आरोप्यनीले व्यभिचारनिरासाय विशेष्यत्वम् । न च तमसि नीलिमेति प्रत्ययमादाय दोषतादवस्थ्यम् । तस्य मानसत्वात् । प्रमेयत्वादिप्रकारकतमःसाक्षात्कारविशेष्ये घटादिरूपे व्यभिचारनिरासाय लौकिकेति । न च पेचकबिडालतस्करादिचाक्षुषसाक्षात्कारविशेष्ये तद्गुणे व्यभिचारः । तेषामपि चक्षुःसहकार्यालोककल्पनात् । भावचाक्षुषज्ञानत्वावच्छिन्ने आलोकत्वेन कारणत्वावधारणात् । न चास्या-

ऽभावग्रहे तेजोपेक्षया विरोधेन परिहृतत्वात् ॥

नापि कर्म । चलनात्मकतयानुपलम्भात् । अन्धकारवति गेहादौ चलतीति प्रत्ययप्रसङ्गाच्च ॥

नापि द्रव्यं पृथिव्यादिनवकबहिर्भूतत्वात् । ननु नीलरूपवत्त्वेन पृथिव्यामेवास्यान्तर्भवतु । उद्भूतरूपस्य पार्थिवस्योद्भूतस्पर्शाव-

---

नुद्भूतरूपत्वेन व्यञ्जकता उद्भूतरूपत्वे तमादायान्येनाप्यन्धतमसे वस्तुग्रहापत्तिरिति वाच्यम् । फलबलेन प्रतिनियतसहकारित्वस्यैव कल्पनात् । अनीदृशमेव तद्विवक्षितमित्यप्याहुः । नन्वेवं घटाद्यभावग्रहे ऽपि बाह्यालोकसहकृतस्यैव चक्षुषः सामर्थ्यावधारणादभावत्वे ऽपि तमसः कथं तदनपेक्षेण चक्षुषा ग्रहः स्यादित्याशङ्क्याह । तेजोभावेति । तथा च व्याघातभयेन गर्भैव व्याप्तिरेष्टव्येति भावः ॥

अन्धकारवतीति । यद्यपि पुरुषादिकर्मवति गेहे गेहं चलतीति प्रत्ययाभावस्तुल्यस्तथापि तमःकर्मत्वे तत्समवायि नातीन्द्रियं किञ्चिद्वाच्यं तमसोप्यतीन्द्रियत्वप्रसङ्गात् । किं तु तदधिकरणतया सम्प्रतिपन्नं गृहादिकमेव । यच्च तत्समवायि तच्चलतीति प्रतीयते यथा घटादीत्यतो गेहं चलतीतिधीः स्यादिति भावः ॥

पृथिव्यादीति । अतिरिक्तस्य च द्रव्यत्वे प्रमाणाभावादिति भावः । हेत्वसिद्धिं शङ्कते । ननु नीलेति । ननु तमो न पृथिवी यावत्पृथिवीविशेषान्यत्वात् । तथा हि न तावदियमनुद्भूतरूपा पृथिवी चाक्षुषत्वात् । नाप्युद्भूतरूपा अनु-

त्वनियमो[1]ऽसिद्ध एव। इन्द्रनीलप्रभासहचरितनीलभागेन व्यभिचारात्। तदीयस्पर्शस्यायोग्यत्वे ऽपि नीलरूपस्य योग्यत्वात्। न चोद्भूतस्पर्शेन्द्रनीलमणिरूपमेव प्रभायामारोप्यत इति युक्तम्। इन्द्रनीलग्रहव्यतिरेके ऽपि तत्प्रभायां नीलप्रत्ययदर्शनादिति। मैवम्। एवम्भूतोदाह-

द्भूतस्पर्शत्वात्। न चोद्भूतपीतरूपे पित्तधातौ व्यभिचारः। रूपपदेन नीलस्यैव ग्रहणादित्याशङ्क्याह। उद्भूतरूपेति। प्रभावारणाय पार्थिवपदम्। परमाणुवारणायोद्भूतेति। पित्तवारणाय रूपपदं नीलपरम्। अत एव स्थलान्तरे व्यभिचारमाह। इन्द्रनीलेति। तमेव स्फुटयति। तदीयेति। अयोग्यत्वे ऽनुद्भूतत्वे। योग्यत्वादुद्भूतत्वात्। यदत्रोद्भूतरूपपार्थिवमिन्द्रनीलं तदुद्भूतस्पर्शमेवेति न व्यभिचार इति मन्वानं प्रत्याह। न चेति। इन्द्रनीलाग्रहणे तद्रूपप्रत्यक्षासम्भवेनानुभूयमानारोपानुपपत्तेस्तज्जन्मन्यपरिचितेन्द्रनीलतद्रूपस्य स्मर्यमाणारोपस्याप्यनुपपत्तेर्नीलभागकल्पनमावश्यकमिति तत्र व्यभिचारात् पूर्वोक्तनियमासिद्धौ युक्तः पृथिव्यामन्तर्भाव इत्याशयेनाह। इन्द्रनीलग्रहेति। इन्द्रनीलाग्रहकालीनस्य तत्प्रभानीलप्रत्ययस्यैवासम्प्रतिपत्तेः क तन्निर्वाहकनीलभागकल्पना क तरां तत्र व्यभिचार इत्याह। एवम्भूतेति। कुड्यादिव्यवहितस्य दीपस्येवेन्द्र-

(१) स्पर्शवत्तानियमो–पा० १। २ पु०।

णासिद्धेः। सिद्धावपीन्द्रनीलस्यान्यस्य वा स्पर्य-
माणस्यैव रूपस्यारोपेणान्यथासिद्धौ तत्सहचर-
तथाभूतनीलभागाकल्पनात्। न च जालान्तर्ग-
तमरीचिस्थोद्भूतरूपसूक्ष्मपार्थिवेन व्यभिचारः।
वस्त्रपाटनानन्तरमुपलभ्यमानजालमरीचिस्थ-
सूक्ष्मभागवत् तस्याप्युद्भूतस्पर्शवत्तानुमानात्।
तर्हि त्रसरेणुस्पर्शः किमिति नोपलभ्यते। मह-

---

नीलस्याप्युपरिभागे प्रभादर्शनसम्भवान्न तत्र नीलप्रत्ययी सम्प्रतिपत्तिरित्यत आह। सिद्धौ वेति। तथा च व्यभिचाराभावान्नियमसिद्धौ न तमोनुद्भूतस्पर्शा पृथिवीति भावः। जालमरीचिस्थोद्भूतनीलरूपसूक्ष्मभागे व्यभिचारमाशङ्क्य निराचष्टे। न च जालान्तर्गतेति। जालान्तर्गतमुपलभ्यमाननीलं सूक्ष्मम् उद्भूतस्पर्शम् उद्भूतनीलरूपात् जालमरीचिस्थपाटितनीलपटसूक्ष्मावयववत्। न च दृष्टान्ते साध्यवैकल्यम्। उद्भूतस्पर्शवस्त्रारम्भानुपपत्त्या तन्निरासादित्याशयेनाह। वस्त्रपाटनेति। उभयवादिसिद्धयावत्स्वसाक्षात्कारकारणसमवहितस्तत्स्पर्शः किञ्चित्समवधानव्यतिरेकप्रयुक्तसाक्षात्कारविषयताव्यतिरेकः लौकिकप्रत्यक्षाविषयत्वाद् अन्धकारस्थघटवदिति प्रयोगमभिप्रेत्य तत्राप्रयोजकत्वं निरस्यति। तर्हीति। यद्वा व्यापकानुपलम्भबाधं शङ्कते। तर्हीति। ननूद्भूतापि परमाणुस्पर्शवदयोग्यत्वान्नोपलभ्यत इत्यत आह। महत्त्वेति। अत्र प्राचां मतमाश्रित्य पूर्वानुमाने ऽसिद्धिं व्यापकानुपलम्भासिद्धिं

त्वसमानाधिकरणोद्भूतस्पर्शस्य योग्यत्वादिति चेत् । न गृह्यत एव विविच्य तु न गृह्यते सूक्ष्मत्वादिति प्राञ्चः । अनेन रूपेण स्पार्शन-योग्यतैव नास्ति किं तु महत्त्वविशेषसामा-नाधिकरण्येन स च विशेषः कार्यैकोन्नेयः ।

चाह । गृह्यत एवेति । तर्हि त्रसरेणुं स्पृशामीति कदाचिद्धीः स्यादत आह । विविच्येति । प्रमाणाभावादत्रापरितुष्यता-मर्वाचां मतेन पक्षविशेषणासिद्धं सिद्धसाधनं चाह । अने-नेति । यद्वोपलम्भस्योद्भूतत्वव्यापकत्वमेवासिद्धमित्याह । अनेनेति । कोऽसौ विशेष इत्यत आह । स चेति । शृङ्गग्राहि-कयाख्यातुमशक्यत्वे ऽपि प्रत्याख्यातुमशक्य इति भावः । ननु तथाप्यप्रयोजकमिदम् उद्भूतरूपस्यानुद्भूतस्पर्शत्वे बाध-काभावात् सहचारमात्रात् तथात्वे प्रभापि नानुद्भूत-स्पर्शा स्यात् । पृथिव्यां तथा नियम इति चेत् । न पित्ते व्यभिचारात् । उद्भूतनीलरूपस्य तथा नियम इति चेत् । न पित्तस्येव नीलस्यापि पक्षे व्यभिचारे बाधकाभावात् । अन्यथोद्भूतरूपपृथिवीमात्रे तथा नियमकल्पने पित्तमपि न पृथिवी स्यात् । उद्भवानुद्भवयोः कार्योन्नेयनिमित्तभेदो-पाधिकतया पित्ते पीतरूपोद्भवे ऽपि स्पर्शानुद्भवेन विरोध इति चेत् । नीले ऽपि तुल्यम् । यच्च जालमरीचिस्थनीलभागे व्यभिचारनिरासायोद्भूतस्पर्शानुमानं तदपि दृष्टान्तास-म्प्रतिपत्तेरयुक्तम् । पाटितपटावयवानामनुद्भूतस्पर्शानामेव निमित्तभेदसंसर्गादुद्भूतस्पर्शपटारम्भकतासम्भवात् । तप्त-तैलस्थादनुद्भूतरूपादपि वह्नेरुद्भूतरूपवह्न्यारम्भस्वीका-रात् । न चोद्भूतरूपभागान्तराकर्षणपक्षे तदसम्प्रतिप-

अत एव हि त्रसरेणुस्पर्शस्यायोग्यत्वात् त्रसरेणुर्न स्पार्शन इति केचित् । जलादित्रिकव्यतिरेकस्तु स्फुट एव । न च तेजोविशेष एव तमः सूर्यादितेजसा सह विरोधात् । तद्विरोधितेजोन्तर-

त्तिः । तस्यैव निःप्रमाणकत्वात् । साक्षात्कारप्रतिबन्धकतयानुद्भवजातिकल्पनपक्षे परमाणौ महत्त्वाभावादेव साक्षात्काराप्रसक्तेस्तत्प्रतिबन्धकतया नानुद्भवकल्पनमिति सर्वपरमाणूनामुद्भूतगुणत्वे तदारभ्य कार्यमात्रे गुणानुद्भवस्य निमित्तभेदादन्येनोपपादयितुमशक्यत्वात् तदभ्युपगमे वास्य वैयर्थ्यात् । साक्षात्कारप्रयोजकतयोद्भवजातिकल्पनपक्षेऽपि परमाणुगुणेष्वतीन्द्रियेषु तत्कल्पने मानाभावेन तेषामनुद्भवेन तत्कार्यपरम्परायां गुणोद्भवस्य निमित्तभेदैकोपपाद्यत्वात् । अस्तु वोद्भूत एवाभिभूतस्तमःस्पर्शः यथायथं जलतेजोनिलस्पर्शसम्बन्धादेव तदग्रहोपपत्तेरतः पृथिव्येव तम इति चेत् । न आलोकानपेक्षचक्षुर्ग्राह्यतानुपपत्तेरेव मूलबाधकत्वात् तस्याश्चोपपादयिष्यमाणत्वात् । जलादित्रिकेति । नीलत्वादिति भावः । ननु तमस्तेजोव्यञ्जकालोकनिरपेक्षचाक्षुषनीलज्ञानविशेष्यत्वादिन्द्रनीलप्रभावदिति शङ्कमानं प्रति किमिदं सौरादितेजोरूपमुत तदतिरिक्तमेवेति विकल्प्य नाद्य इत्याह । न च तेजोविशेष एवेति । सौरादितेज एवेत्यर्थः । तथा च तमो न सौरं तेजः समानकालीनतदनधिकरणत्वात्[१] सौरालोकवदिति व्यतिरेकितस्तत्तद्विशेषान्यत्वसिद्धिरिति भावः । द्वितीयं शङ्कते । तद्विरोधीति । अनन्यगतिकतया तथा कल्पनादिति

(१) समानकालीनतदधिकरणाधिकरणाभिन्नत्वात्—पा० ६ पु० ।

मेवेदमिति चेत् । न सप्रभेषु रत्नादिषु छायारूपं तमो न स्यात् । रत्नादिप्रभया समं विरोधात् । अनभिभूतया तया सह विरोधः सा चाभिभूतेति चेत् । न पृथिव्यादिना तेजसोऽनभिभवात् । तेजोन्तरस्य तदभिभावक(१)स्यानुपलम्भात् । न च छाययैव तदभिभवः(२) । बहलतमे तमसि तद-

भावः । किमिदं तेजोमात्रविरोधि उतानभिभूततद्विरोधीति विकल्प्याद्यं दूषयति । सप्रभेष्विति । न हि निःप्रभतैव रत्नादीनां रात्रौ तदुपलम्भात् । न वा दिवान्यत्र गमनं प्रभाया अन्यत्र तदनुपलम्भात् । न च नाशः । तत्सामग्र्यभावात् । रात्रौ पुनरुपलम्भाय पुनरुत्पादकल्पनागौरवाच्चेति भावः । न स्यादिति । अनुभूयते च दिवेति भावः । द्वितीयं शङ्कते । अनभिभूतयेति । फलबलेन तथा कल्पनादिति भावः । अभिभवोधिकरणत्वाभिमतेन पृथिव्यादिना तेजोन्तरेण वाच्छाययैव वेति विकल्प्याद्ये दोषमाह[३] । पृथिव्यादिनेति । व्यङ्ग्यस्य व्यञ्जकाभिभावकत्वे नित्यमनुपलम्भप्रसङ्गाद्रात्रौ तत्रैव प्रभाप्रतीतेश्चेति भावः । न द्वितीय इत्याह । तेजोन्तरस्येति । बलवत्तेजोजातीयोपलम्भकृतानुपलम्भ एवेहाभिभवो वाच्यः । न चेह तेजोजातीयोपलम्भ इति भावः । तृतीयं प्रत्याह । न च छाययैवेति ।

(१) अभिभावुक—पा० १ पु० ।
(२) प्रभाभिभवः—पा० १ पु० ।
(३) विकल्प्य० नाद्य इत्याहि—पा० ६ पु० ।

ग्रहप्रसङ्गात्। न च तेजोन्तरमेव तस्याभिभावकम् तस्यानुपलम्भात्। तेजोऽभिभावकस्य छायाभिभावकत्वापाताच्च॥

तस्यास्तेजोन्तरत्वपक्षे प्रभातुल्यन्यायतया यावदिन्द्रनीलसन्निहितत्वात् तया प्रभाभिभवे कदाचिदपि न सा गृह्येतेत्यर्थः। छायायामिष्टापत्तिवारणायाह। बहलतम(१) इति। न चानभिभूतया छाययाभिभवः। सा च बहलतमेन तमसाभिभूतैवेति वाच्यम्। अभिभावकाभिभावकेन तेनैव छायाया इव प्रभाया अप्यभिभवापत्तेरिति भावः। ननु बलवत्सजातीयसम्बन्ध एवाभिभवः लाघवात् स च तेजोन्तरस्यानुपलम्भे ऽपि नात्रानुपपन्न इत्याशङ्कमानं प्रत्याह। न चेति। न ह्यतीन्द्रियसूक्ष्मचक्षुरादि तदभिभावकं किं तु योग्यं यच्च योग्यानुपलब्धिबाधितमिति क्व तत्सम्बन्धरूपोऽप्यभिभव इति भावः। अपरे तु दोषान्तरविवक्षयां पूर्वोक्तमेव दूष्यं पुनः स्मारयति न चेतीत्याहुः। तन्न। तस्यानुपलम्भादित्यस्य वैयर्थ्यात्। ननु छायासहचरसौरादितेजस एवान्वयव्यतिरेकसिद्धप्रभाभिभावकस्योपलम्भादनुपलम्भासिद्धिरित्यत आह। तेजोभिभावकस्येति। उपरितनतरणिकिरणेषु प्रभाच्छायोभयाभिभावकतया दर्शनाच्छायासहचरसौरप्रभाया अपि पद्मरागप्रभाभिभाविकायाश्छायाभिभावकत्वप्रसङ्गादित्यः। नन्वभावत्वे ऽपि कथं छायायाः प्रभासमानदेशत्वं तेजोविरोधित्वाविशेषात्। अथ तेजोविशेषेण तस्याविरोधो न

(१) बहुलतमे–पा॰ ६ पु॰। एवमग्रे ऽपि।

नापि विभुचतुष्कम्। अव्यापकत्वादनित्यत्वाच्च। न मनः प्रत्यक्षत्वात्। तस्माद्यावद्विशेषबाधाद्भावत्वमेवास्य बाधितमिति। नैवम् रूपवत्त्वक्रियावत्त्वपरिमाणवत्त्वादिना द्रव्यत्वस्यैवोचितत्वात्। न च पृथिव्यादिनवकानन्तर्भावात् बाधितमस्य द्रव्यत्वमिति वाच्यम्। अन्यथानुपपत्त्या दशमद्रव्यपरिकल्पनात्। अ-

---

तेजोमात्रेण तर्हि मत्पक्षे ऽपि यस्यावरणे छाया तेनैव तेजोविशेषेण तस्याविरोध इति तुल्यमिति चेत्। न अनुद्भूतरूपत्वे ऽचाक्षुषत्वप्रसङ्गात्। उद्भूताभिभूतरूपत्वे सत्यालोके प्रकाशानुपपत्तेः। रूपवृत्तिशुक्लत्वस्यैवाभिभवे वह्निवत्परप्रकाशकतापत्तेरिति भावः॥

अव्यापकत्वादिति। यावन्मूर्तासंयोगित्वादित्यर्थः। प्रत्यक्षत्वादिति। लौकिकप्रत्यक्षत्वादित्यर्थः। भावभेदसाधनं निगमयति। तस्मादिति। न चैवेतिनियमस्यानन्यथासिद्धावध्यक्षेण बाधाद्यावद्विशेषबाधः स्वरूपासिद्ध इति भेदः परिहरति। नैवमित्यादिना। उचितत्वादिति। तावत्प्रत्यक्षभ्रान्तत्वकल्पनापेक्षया द्रव्यत्वकल्पनायामेव लाघवादिति भावः। ननु यावद्द्रव्यविशेषबाधाद्बाधितं तमसः द्रव्यत्वमित्याशङ्क्याह। न चेति। द्रव्यत्वेन शङ्क्यमानात् स तस्मादेवानन्यतमयावद्द्रव्यविशेषान्यत्वासिद्धेरित्याशयेनाह। अन्यथानुपपत्त्येति। ननु परिनिष्ठितद्रव्यभावपृथिव्यादिनवकान्यत्वेनैवास्तु तत्सिद्धिरित्यत आह। अन्यथेति। पृथिवीति। पृथिव्या द्रव्यत्वसन्देहद-

न्यथा जलत्वादिबाधात्[1] पृथिव्यपि न द्रव्यान्तरं स्यात्। न च विषयसंस्कारकबाह्यालोकसहकृतचक्षुर्ग्राह्यत्वाभावात् द्रव्यत्वमस्य बाधितमिति वाच्यम्। तेजस्येव व्यभिचारात्। अन्ये

शायां जलादौ परिनिष्ठितद्रव्यत्वेन तदन्यत्वस्य पृथिव्यामपि सुवचत्वादिति भावः। व्यापकविरुद्धोपलब्ध्या द्रव्यत्वबाधमाशङ्क्याह। न चेति। छायातमसि भागासिद्धिवारणाय विषयसंस्कारेति। छायाप्रतीतौ तु विषय एवालोको न संस्कारक इति न तत्तादवस्थ्यम्। नवासिद्धिवारकतया वैयर्थ्यम्। अखण्डाभावे तदभावात्। आत्मव्यावृत्त्यै चक्षुरिति। अप्रसिद्धिवारणायालोकेति। बाह्यपदं तु न हेतुप्रविष्टं किं तु विषयसंस्कारकतोपपादनाय। यदि हि चक्षुःसंस्कारक एवालोकः स्यात् तदा तद्देशे गोलकसंसृष्टतयोपयुज्येत न चैवम् अन्धकारवदपवरकस्थेनापि चक्षुषा बाह्यघटादिसंसृष्टालोकसहकृतेनापि तज्ज्ञानजननादिति। वस्तुत उभयोः पर्यायेण हेतुद्वयं द्रष्टव्यम्। बाह्यपदस्यापि ग्राह्यबाह्यार्थकतया तुल्यप्रयोजनकत्वात्। न चाभावस्यानुपलब्धिवेद्यत्वात् परमते दृष्टान्तासिद्धिः। तच्चाक्षुषतासाधनाभिमानेनोक्तत्वात्। न चातीतादिज्ञानविषये द्रव्ये व्यभिचारः। विषयसंस्कारकालोकजन्यभिन्नचक्षुषज्ञानविषयत्वस्य हेतुत्वादिति भावः। अस्य चक्षुषाध्यक्षस्य तमस इत्यर्थः। अतो नासिद्धिरिति भावः। तेजस्येवेति। चाक्षुषतेजस्येवे-

(१) जलत्वव्याघातात्—पा॰ १ पु॰।

लापं प्रथमे एव क्षणे जनयेत् समर्थस्य क्षेपाऽयोगादिति नाऽक्षणिकस्य क्रमवद्व्यापारसम्भव: ।

स्यादेतत् । असमर्थोऽपि क्रमवत्सहकारिसंनिधानात् क्रमेण करोतीति । तदनुपपन्नम् । विकल्पाऽसहत्वात् । किमस्य सहकारिण: किंचिदुपकारमादधति न वा ? आदधाना अपि भावाद्भिन्नमभिन्नं वा ? तत्र भिन्नोपकाराऽऽधाने भावरूपे सत्यप्यलब्धजनने सत्यप्यस्मिन्ननुपलब्धेरुत्पन्निमत एवोपकारात्कार्यस्य निष्पत्तेर्न तत्कारीभाव: स्यात् । न चोपकारसहकारिण: कार्यजननमिति साम्प्रतम् । उपकारस्योपकारान्तरजनने ऽनवस्थापातात् । तत एव चोपकार्यस्योत्पत्तेर्भावस्याऽतत्कारित्वप्रसङ्ग इत्युक्तम् । अभिन्नोपकाराधाने भाव एवाऽभिधीयेत, न च स प्राक् सिद्ध: शक्य आधातुम् । अनुपकारकत्वे वा सहकारिणो भावेन नाऽपेक्ष्येरन्निति उत्पन्नमात्रमेव बीजमङ्कुरं जनयेत् । अनपेक्षस्य क्षेपाऽयोगात् । क्षेपे वा पश्चादपि न जनयेत् । यदि मन्येत अनुपकारका अपि भवन्ति सहकारिण:, यस्मात्तै: सहभाव: कार्यं करोति । न च नाऽपेक्ष्यन्ते । तैर्विना कार्यस्याऽनुत्पत्तेरिति । तन्न । स्वरूपेण चेत्कार्यजनको भाव: कस्मान्नेतानन्तरेण जनयति ? । तेभ्य: प्रागपि रूपसद्भावात् । सहकारिरूपेण वा जनकत्वे तएव जनका न भावा: । अन्यरूपेण वाऽन्यस्य जनकत्वे गगननलिनस्यापि सत्त्वेन सद्व्यवहारगोचरत्वप्रसङ्ग: । न चोभयभावाऽभावाऽनुविधानादर्थक्रियाभावाऽभावयोरेकैकस्माच्च व्यभिचारादन्यादुभयाऽधीनजन्मेति साम्प्रतम् । चरमभाविनि सति हेतौ उत्पत्तिमति कार्योत्पत्तेरवश्यम्भावनियमेन व्यभिचाराऽभावात् । न च स्वकारणात्कतिपयकालकलाविलम्बेन कार्यजननस्वभावो भावो जात इति स्वभावादेव विलम्बकारीति साम्प्रतम् । विकल्पाऽसहत्वात् । किं कतिपयकालविलम्बेऽस्य विलम्बनकारितास्वभावो निवृत्तो न वा ? निवृत्तश्चेत् कथं

स्वभावो न निवृत्तः ? स्वभावनिवृत्तेः । अनिवृत्तौ वा कथमस्य स्वभावः ? निवृत्ताऽनिवृत्तरूपविरुद्धधर्मसंसर्गात् । अतत्स्वभावत्वे वा न विलम्बत इति जन्माऽनन्तरमेव कृतकृत्यः प्रसज्येत । अनिवृत्तौ कतिपयकालकलाऽतिक्रमे ऽपि न कार्यं जनयेत् । विलम्बकारिताया रूपस्य तादवस्थ्यात् । तदुक्तेन क्रमेण न क्रमेणाऽर्थक्रियाकारिता सम्भवति भावस्य । नापि यौगपद्येन युज्यते । तस्माद्यावत्कार्यं किमपि प्रथमे क्षणे तेनाऽक्षणिकेन स्वेनाऽऽत्मना संपादिता तावत्सर्वं द्वितीयादिक्षणे संपादयेत् । तावत्कार्यसंपादनयोग्यस्याऽऽत्मनो द्वितीयादिक्षणेषु संनिधानात् । तथा च संपादितस्य संपादनाऽनुपपत्तेः तदन्यत्वे द्वितीयादिक्षणसंपाद्यस्य न यौगपद्येन निखिलाऽर्थक्रियानिर्वर्त्तनमक्षणिकस्य युज्यते । तदनेन पर्यायेण नाऽक्षणिकस्य क्रमाऽक्रमाभ्यामर्थक्रियाकारिता कल्प्यतइति । विपक्षे अक्षणिकत्वे व्यापकाऽभावात्ततो व्यावर्त्तमानं सत्त्वं क्षणिकत्वेन व्याप्यतइति प्रतिबन्धसिद्धिः ।

स्यादेतत् । क्षणिको ऽपि भावो ऽर्थक्रियाजननस्वभावो न वा ? न चेदसन्नेव । जनकस्वभावश्चेत् किमस्य सहकारिभि ? रित्युत्पन्नमात्रमेव बीजमङ्कुरं जनयेत् । ननूत्पन्नो बीजक्षणः समर्थो जनयत्येवाऽङ्कुरं कुतः पुनस्तस्योत्पत्तिः पूर्वस्माद्बीजक्षणात् तर्हि तत्संतानपतितानां सर्वेषां बीजत्वाऽविशेषादङ्कुरजननसामर्थ्यमिति लब्धजन्ममात्रमेव बीजमङ्कुरं जनयेत् । मैवम् । पूर्वपूर्वक्षितिबीजपवनादिक्षणसमवधानोत्पन्नाऽतिशयवत्तदुत्तरोत्तरक्षणपरम्परालब्धजन्मा ऽन्यो बीजक्षणः समर्थः समर्थक्षित्यादिक्षणसहभूतो ऽनपेक्ष एवाऽङ्कुरं जनयति । न चाऽस्य क्षित्यादिसहभुवस्तदनपेक्षस्यापि तैर्विना कार्यकरणम् । तदेकसामग्र्याधानस्य तदभावे अभावात् । न चाऽसहकारितां क्षित्यादीनाम् । तैरेव सहाऽङ्कुरजननात् । तेषा-

मपि तत्पूर्वभावित्वस्य नियमवत्त्वाऽविशेषात्, तन्मात्रत्वादेव च करणतायाः । न चाऽनपेक्षाणामपि परस्परं कार्यान्तराऽऽरम्भणं, तन्मात्रस्य तेभ्य उपलब्धेः तत्रैव सामर्थ्यनियमात् । न च कृतकरत्वेतरेषामक्रिया, सहक्रियायां कृतमित्यसंभवात् । न च स्वकारणबललब्धपरस्परसंनिधयो ऽप्रेक्षावन्तः शक्यमिदमेकेनाप्यस्मासु कर्त्तुमिति कृतं संनिधिनेति निवर्त्तितुमीशते । न च सहकारिकारणभेदः कार्यभेदहेतुः, अपि तु सामग्रीभेदः । तस्मिन् सति कार्यभेदोपलब्धेः । अभिन्ना चेह सामग्रीति न कार्यभेदसम्भवः । परस्परसमवधानं चोपसर्पणप्रत्ययेभ्यः क्षित्यादीनामिति न क्षणिकस्याऽर्थक्रियाविरोधादसाधारणता हेतोः । न च साध्यधर्मिणि दृश्यमाने शब्दादौ व्याप्तिप्रसाधनादेव साध्यसिद्धेरसाधनाऽङ्गहेतुवचनम् । न खलु सर्वोपसंहारवती व्याप्तिर्दृश्यमात्रविषया भवितुमर्हति । शक्यं हि शङ्कितुं परेण दृश्यमानानां सत्त्वमक्षणिकत्वान्न व्यावर्त्तितं त्वयेति सत्त्वमनैकान्तिकं न क्षणिकत्वसाधनम् इति । तस्माद्यत्सद् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति दर्शनीया व्याप्तिः । नन्वेवमपि शब्दादेर्विवादाऽऽस्पदीभूतस्य व्याप्तिदर्शनबलादेव सिद्धा क्षणिकतेति तदवस्थमेवाऽसाधनाङ्गत्वं हेतुवचनस्य । मैवम् । असत्यपि शशविषाणादौ यत्सद् दृश्यमदृश्यं वा तत्सर्वं क्षणिकमिति यथा सर्वोपसंहारवती व्याप्तिः सिध्यति । न च शशविषाणादयो भवन्ति क्षणिकाः । एवमसत्यपि विवादास्पदीकृते शब्दादौ व्याप्तिसिद्धावपि न सिध्यति क्षणिकतेत्यवश्यं दर्शयितव्यमेव तेषां क्षणिकत्वसाधनाय सत्त्वमिति नाऽसाधनाङ्गता हेतुवचनस्य । अपि च कृतका भावाः स्वहेतुभ्य उपजायमाना विनश्वरा जायन्ते[1] अविनश्वरा वा ? विनश्वराश्चेदुदयानन्तरमेवाऽपवृज्येरन्निति सिद्धः क्षणभङ्गः । अथाऽविनश्वराः, न कदाचिदपि नश्येयुः । न खल्वविनश्वरो विनं-

१ तद्धेतुना उपजायमाना जायन्ते । २ पु० पा० ।

ष्टुमर्हति । न जातु स्वकारणादुत्पन्नं नीलं पीतं भवति । न च हेत्वन्तराऽधीनजन्मा विनाश एषामिति साम्प्रतम् । विकल्पाऽसहत्वात् । स हि हेत्वन्तरेण जन्यमानो विनाशो भावाद्भिन्नो ऽभिन्नो वा । न तावदभिन्नः कारणभेदात् । भिन्नत्वे तु भावस्य तादवस्थ्यात् पूर्ववदुपलब्ध्यादिप्रसङ्गः । तेन भावस्तिरोधीयतइति चेत् । न । तिरोधानस्यापि भेदे भावतादवस्थ्यम् । अभेदे वा हेतुभेदाऽनुपपत्तिः । तस्मादभावस्यापि समस्तरूपविरहिणो विकल्पितस्य क्रियाऽनुपपन्नेति अभावं करोतीति करोतिक्रियाया अभावेन निःस्वभावेन संम्बन्धाऽनुपपत्तेः । नञा सह सम्बन्धो भावं न करोतीति । यश्च न करोति तस्याऽकारकस्याऽहेतुत्वमिति न विनाशहेतवः ।

केचित् तु तस्मात्स्वहेतोरयमेकक्षणस्थितिधर्मा भावो जात इति द्वितीयक्षणे स्वयमेव न भवति, न पुनश्च हेतुमपेक्षते । न खलु स्वकारणतः स्वभावव्यवस्थितं नीलमुपजायमानमपीतादिभावे हेतुमपेक्षते पर्यनुयुज्यते चेति । अपि च कृतकानां भावानामवश्यम्भावी विनाशः प्रतीयते तेनापि शक्या क्षणिकता ऽनुमातुम् । तथा हि । यद्येषां ध्रुवं भावि तन्न तेषां हेत्वन्तराऽपेक्षा नास्ति यथा रूपादीनां लोहमयत्वे । ध्रुवभावी च कृतकानां भावानां विनाश इति विरुद्धव्याप्तोपलब्धिर्विनाशस्य हेत्वन्तरायत्ततां प्रतिक्षिपति । ध्रुवभाविता हि निषिध्यमानहेत्वन्तराऽपेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्त्या लब्धा हेत्वन्तराऽनपेक्षत्वमुपस्थापयति । तच्च स्वविरुद्धं हेत्वन्तराऽपेक्षत्वमपाकरोति । तथा हि । ये ये हेत्वन्तरापेक्षाः न ते ध्रुवभाविनः यथा वाससि रागादयः । तथा यदि भावा अपि स्वहेतुभ्यो हेत्वन्तरं विनाशं प्रत्यपेक्षेरन् ततस्तस्य संनिधाननियमप्रमाणाऽभावात् कश्चित्कृतको ऽपि न विनश्येत् । सोऽयमवश्यम्भावी क्षणिकानां भावानां विनाशः स्वहेतुभ्य एवैकक्षणाऽवस्थायि-

नामुत्पत्तिं सूचयति । तथा च स्वयमेव न भवन्ति भावा द्वितीये क्षणे इति सिद्धः क्षणभङ्ग एतेषाम् ।

सदृशपराऽपरोत्पत्तिविलब्धबुद्धयस्तु क्षणानामन्योन्यस्य भेदमपश्यन्तोऽज्ञादिवदर्वाग्दृशस्तदेवेदं स्तम्भादीत्यध्यवस्यन्तीत्याशङ्क्याह—क्षणिकत्वप्रतिषेधात् ।

इदमाकूतम् । नैव तावत्सत्त्वं क्षणिकत्वसाधनसमर्थं क्षणिकत्वे व्यवस्थाऽनुपपत्तेरसाधारणत्वात् । तथा हि । अन्त्यक्षणप्राप्तानां क्षणानां कार्यजननमुपेयते । तत्रेदं भवान् पृष्टो व्याचष्टां किमेकस्मादेकं कार्यमुपजायते उताऽनेकम्? एवं किमनेकस्मादेकं कार्यमुताऽनेक? मिति । न तावदेकस्मादेककार्येण खल्वनुकृताऽन्वयव्यतिरेकं कारणं तदुच्यते यस्य कार्योत्पादात्प्राङ् नियमवान् भावः । अनुकारयन्ति च बहव एव क्षितिबीजादयः स्वाऽन्वयव्यतिरेकावङ्कुरं यत् नियमेन तदुत्पादस्य पुरस्तात् सहभवन्तः । काकतालीयन्यायेन तु क्षित्यादिक्षणानां प्राग्भावो न नियमवान् भवेत् । न चाऽङ्कुरमात्रं बीजक्षणस्य परस्तादवश्यम्भावि । क्षित्यादीनामपि तथाभावात् । तान्यपि खल्वङ्कुरइव बीजक्षणस्य परस्तादवश्यम्भावनियतानि । न च पौर्वापर्यनियमादन्यः कार्यकारणभावः । अपि च एकैककारणत्वाऽभावे न नियमेनाङ्कुरादिसहभुवो भूम्यादयो भवेयुः । तस्मादनेकस्मादेकं[1] ? यदाह 'न किं चिदेकमेकस्मा'दिति । नाप्येकस्मादनेकम्, अनेकक्षितिबीजतेजोऽनिलसलिलाऽनन्तरभावनियमादङ्कुरादीनामनेकेषाम् । नाप्यनेकस्मादेकस्यैवाऽङ्कुरस्य जन्मेति साम्प्रतम् । अङ्कुराद्भिन्नानां भूम्यादीनां तेन सहैकहेतुकत्वाऽभावे तत्सहभावनियमाऽभावप्रसङ्गात् । तत्सहभावनियमस्य चाऽङ्कुरवत्तेषामप्यविशेषात् । तदनेकस्मादनेकोत्पत्तिः परिशिष्यते ।

तत्रेदमालोचनीयम् । किं पूर्वक्षणा उत्तरेषां क्षणानां परस्पर-

१ तस्मादेकम् । २ पु॰ पा॰ ।

निरपेक्षा यत्र जनका आहो स्वित्सापेक्षा ? इति । ननूक्तमन्त्यक्षणप्राप्ताः परस्परनिरपेक्षाः कार्याणि जनयन्तीति तत्किमनभ्युपेतारोपितप्रतिषेधप्रपञ्चेन । तत्किमिदानीं समर्थबीजक्षणजनको ऽपि तज्जनने इति कृतं सहकारिभिः । ननूक्तं नैते प्रेक्षावन्तः किं तु स्वप्रत्ययाऽधीननियतसंनिधयो न व्यवधेरीशते इति । किमयं कृषीवलो ऽपि न प्रेक्षावान् यः कुसूलादपनीय बीजमावपति भूमौ परिकर्मितायां क्षित्यादिसहभाविन एवाऽतिशयोत्पादपरम्परया ऽङ्कुरजननसामर्थ्यदर्शनात् । बीजस्य कुसूलस्थाद् वत्सरशतेनापि तददर्शनात् । तत्रावपतीति चेत् । अथ किमयं न स्वसंतानमात्रप्रभवसमर्थो बीजक्षणः ? तथा चेत् कथं संतानान्तरं सहकारि नापेक्षेत कार्यकरणे ? नन्वपेक्षतएव चैष स्वोत्पादे न स्वकार्ये तत्र चाऽस्याऽनपेक्षत्वमुच्यते न तु स्वोत्पत्तौ । ननूत्पत्तावप्यस्य स्वसंतानवर्ती[1] जागर्ति पूर्व एव निरपेक्षः क्षणः । एवं तस्य पूर्वः पूर्वः स्वसंततिपतित एवाऽनपेक्षो जागर्ति जनने इति कुसूलनिहितबीजे एव स्यात्कृती कृषीवलः, कृतमस्य प्रेक्षावतः कृषिकर्मणा दुःखाकरेणेति ।

यदि मन्येत द्विविधमिह कार्यम् । एकं सहकारिभिराहिताऽतिशयविशेषमपरम्पराप्रसवधर्मकं द्वितीयं तु सह कार्यातिशयनिरपेक्षजननम् । तत्राऽङ्कुरे आहिताऽतिशयविशेषं पराऽपेक्षजन्म । आद्यो ऽतिशयस्तु सहकारिकृताऽतिशयपरम्परानिरपेक्षोत्पादः । न चैतदुभयविधमपि कार्यं बीजस्य संतानमात्रादुत्पत्तुमर्हतीति क्षित्यादिसंतानान्तराऽपेक्षमेव स्वसंतानवर्तिभिन्नसंतानवर्ति[2]त्वात्कादाचित्कं कार्यं करोतीति कल्प्यते कृषिकर्म । संतानान्तराणि तु कादाचित्ककार्योत्पत्तौ ये सहकारिप्रत्ययाः तएव यथा ऽङ्कुरोत्पत्तौ सहकारिणो बीजस्य सामर्थ्यप्रबोधहेतवः कदा चित्त्वेषां क्षित्यादीनां ये

१ वर्ती । २ पु· पा· ।

मेलनहेतवस्तएव सामर्थ्याऽवबोधहेतवो भवन्ति तथा बीजानामाद्याऽतिशयोत्पादने सामर्थ्यप्रबोधहेतव उपसर्पणप्रत्ययाः। सर्वथा संतानान्तरैरनाहिताऽतिशयसामर्थ्यं न बीजं कार्यविशेषं कादाचित्कं करोति । सामर्थ्यप्रबोधहेतवश्च द्वये सहकारिप्रत्यया उपसर्पणप्रत्ययाश्चेति ।

तदनुपपन्नम् । तथा हि । भवतु द्विविधं कार्यम्, अस्तु च तत् कादाचित्कत्वात्संतानान्तराऽपेक्षम् । अपेक्षाऽर्थस्तु वक्तव्यः । कारणस्य स्वसामर्थ्यप्रबोध इति चेत् । ननु सामर्थ्यतत्प्रबोधयोः समर्थभावतत्प्राकट्याऽव्यतिरेकात् समर्थप्रत्ययोत्पाद इत्युक्तं स्यात् । तथा च स्वोत्पादे अपेक्षेत कारणं सहकारिप्रत्ययात् । सत्यम् । नाऽभ्युपगम एव दोषत्वेन चोद्यते । अथाऽयमङ्कुरसमर्थो वा क्षण आद्याऽतिशयो वा किं निरपेक्षेण स्वसंतानमात्रजन्मना पूर्वबीजक्षणेन जन्यते निरपेक्षेण न पुनः स्वसंतानमात्रजन्मना । तस्यापि पूर्वस्मादेव पुञ्जादुत्पत्तेः । ननु समानकुसूलजन्मसु बहुषु बीजसंतानेषु कस्मात्किं चिदेव बीजं परम्परया ऽङ्कुरजननाऽनुगुणमुपजनयति बीजक्षणं, नाऽन्ये बीजक्षणा भिन्नसंताने पतिताः । न खलु उपसर्पणप्रत्ययात्प्राक्तेषां समानाऽसमानसंतानवर्त्तिनां कश्चित्परस्पराऽतिशयो बीजक्षणानाम् । अथोपसर्पणप्रत्ययात्प्राक् न तत्संतानवर्त्तिनो जनयन्ति परम्पयाप्यङ्कुरजनना्ऽनुगुणं बीजक्षणम् । बीजमात्रजननानु तेषां कस्य चिद्बीजक्षणस्योपसर्पणप्रत्ययसहभुव आद्यातिशयोत्पादः । हन्त तर्हि तदभावे सत्युत्पन्नोऽपि जनयेदेव । न चाऽस्योपसर्पणप्रत्ययेन सहभावनियमः । तत्सन्तानानां कुसूलवर्त्तिनां बीजक्षणानां तेन सह समानयोगक्षेमाणामप्युपसर्पणप्रत्ययसहभावाऽभावात् । क्षणस्य चैकस्य क्षणान्तरेणैकेन कार्यकारणभावनिश्चयाऽयोगात्सामान्यविषयत्वादन्वयव्यतिरेकयोस्तत्रैवोपपत्तेः । न खलु कारण-

भेदेन। तथा च केवलानां व्यभिचारसम्भवादाद्याऽतिशयोत्पादमङ्कुरोत्पादं वा प्रति क्षित्यादीनां परस्पराऽपेक्षाणामेवोत्पादकत्वमकामेनाप्यङ्गीकरणीयम्।

अपि चाऽन्त्यक्षणप्राप्तं बीजमनपेक्ष्यमङ्कुराऽवनिपवनपाथस्तेजांसि जनयेत्। किं येनैव रूपेणाङ्कुरं जनयति तेनैव तदितराण्यपि किं वा रूपान्तरेण? न तावत्तेनैव। क्षित्यादीनामप्यङ्कुरस्वाभाव्यापत्तेः। न खलु कारणाऽभेदे भेदवत्कार्यं भवितुमर्हति। कार्यभेदस्याऽऽकस्मिकत्वप्रसङ्गात्। यदाह 'अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माऽध्यासः कारणभेदश्चे'ति। नापि सामग्रीभेदः। तस्या अप्येकत्वात्। अन्यथा सहभावे नियमाऽभावात्। रूपान्तरेण तदितरेषां जनकम्। तथा हि। बीजमङ्कुरादि जनयदुपादानं तद्विक्रियया तदुपपत्तेः। तदितरेषु पुनरस्य सहकारिप्रत्ययता। तेषां तु पूर्वे पवनादयो यथास्वमुपादानानि, तद्विक्रियया तदुत्पादादिति चेत्। ननु सहकारितोपादानतेति किमेकं तत्त्वं नाना वा? एकं चेत्कथं रूपान्तरेण जनकम्? नानात्वेप्यनयोर्बीजाद्भेदो ऽभेदो वा? भेदे कथं बीजस्य जनकत्वम्? ताभ्यामेवाऽङ्कुरादीनामुत्पत्तेः[1]। अभेदे वा कथं बीजस्य नानात्वं? भिन्नतादात्म्यात्। एतयोर्वैक्यमेकतादात्म्यात्।

यद्युच्येत क्षित्यादौ जनयितव्ये तदुपादानभूतमेव क्षित्यादिबीजस्य रूपान्तरमिति। न तर्हि बीजं तदनपेक्षं क्षित्यादीनां जनकम्। तदनपेक्षत्वे तेषामङ्कुराद्भेदाऽनुपपत्तेः। न चाऽनुपकारकाण्यपेक्ष्यन्तइति त्वयैवोक्तम्। न च क्षणिकस्योपकारसंभवो ऽन्यच जननात्। तस्याभेद्यत्वात्। तथा चाऽर्थक्रियाकारिताया एक ऽनेकत्ववत् साऽपेक्षाऽनपेक्षत्वव्याप्तत्वात् तृतीयप्रकारविरहादनयोरन्यतरनिषेधस्याऽन्यतरविधाननान्तरीयकत्वात् क्षणिकत्वे च तद्व्यापक-

१ अङ्कुरत्वापत्तेः।'२ पु॰ पा॰।

येऽरेकाऽनेकत्वप्रकारयोरभावादुक्तेन क्रमेण सत्त्वं न निवृत्तमित्यसाधारणाऽनैकान्तिकं गन्धवत्त्ववदिति।

यदि मन्येत अनुपकारका अपि भवन्ति सहकारिणो ऽपेक्षणीय इच कार्येणाऽनुविहितभावाऽभावत्वात्सहकार्यकरणाच्च। नन्वनेन क्रमेणाऽक्षणिको ऽपि भावो ऽनुपकारकानपि सहकारिणः क्रमवतः कार्येणाऽनुकृताऽन्वयव्यतिरेकानपेक्षिष्यते करिष्यते च क्रमवत्सहकारिसमवधानवशात्क्रमेण कार्यणीति व्यापकाऽनुपलब्धेरसिद्धेः संदिग्धव्यतिरेकमनैकान्तिकं सत्त्वं क्षणिकत्वसिद्धाविति। नन्वयमक्षणिकः स्वरूपेण कार्यं जनयति। तच्च स्वरूपं तृतीयादिष्विव क्षणेषु द्वितीये ऽपि क्षणे सदिति तदा ऽपि जनयेत्। अकुर्वन्वा तृतीयादिष्वपि न कुर्वीत स्थिरस्य तादवस्थ्यात्। अतादवस्थ्ये वा तदेवास्य क्षणिकत्वमिति।

अत्रोच्यते। सत्यं स्वरूपेण कार्यं जनयति, न तु तेनैव, सहकारिसहितस्य तस्य जनकत्वात्। क्रमवत्स्वप्रत्ययाऽपेक्षिणस्तत्सहकारिसमवधानस्य द्वितीये क्षणेऽभावात् स्वरूपवत् सहकारिसमवधानमप्यात्मनो ऽन्वयव्यतिरेकावनुकारयति तत्कार्योत्पादने। न चैतावता सहकारिसमवधानादेवोत्पत्तिमतः कार्यसिद्धेः कृतमेतेषां स्वरूपेणेति साम्प्रतम्। तत्सहितादेव ततस्तदुत्पत्तिदर्शनाद्रूपे सत्यप्यनुत्पादात्। समवधाने तु उत्पादादेव कार्यस्य तदेव हेतुः न पुना रूपमपीति चेत्। नन्वेवमहेतुत्वे समाने ऽपि बीजे रूपस्य रासभादिभिः सह कस्माद्बीजरूपे सत्येवाङ्कुरोत्पादो न रासभादिषु? सत्स्वेव बीजादिस्वरूपसमवधानस्यैव हेतुत्वादिति चेत्? तद्धेतुत्वे कथं तन्निवेशि स्वरूपमपि न हेतुः? अहेतुत्वे वा कथं न रासभादितुल्यता? न चाऽवर्जनीयतया रूपनिवेशः। समवधानमात्रस्य तदन्तरेणापि भावात्। विशेषस्तु रूपमेव। तस्य दाघोभया-

ऽधीननिरूपणा व्याप्तिर्व्यापकस्य व्याप्ये भाव एव, नाभाव इति व्याप्यस्य तु व्यापकएव भावो, नाऽन्यत्रेति निरूपप्यते तथा कार्यकारणभाव उभयाधीननिरूपणो ऽपि कारणस्य कार्यात्प्रागभावएव नाभाव इति कार्यस्य कारणे सत्येव नाऽसति भात्र इति अनुभवाऽनुसारान्निश्चीयते। तथैव लौकिकपरीक्षकाणां कार्यकारणभावाऽवगतेः। न च कारणतैव सत्तास्वरूपं नीलादेरनुभवाऽवसितम्। तद्धि तेनैव स्वरूपेण स्वभावव्यवच्छिन्नं तासु तास्वर्थक्रियासूपयुज्यते, न पुनस्तत्कारितैवास्य रूपम्। मा भूदपर्यायेणाऽनेकार्थक्रियाकारणे रूपभेदः, मा च भूदुपाध्यपेक्षमस्यापि निरूपणं कार्यत्वस्यैव सत्त्वस्य शुद्धस्यैव निरूप्यमाणत्वात् कारणत्वे तु सत्त्वे यथा कार्यत्वं भावस्वभावोऽपि वस्तुतः कारणाधीननिरूपणं तथा कारणत्वमपि स्वसम्बन्धिकार्यमन्तरेणाऽशक्यनिरूपणमिति सत्त्वं शुद्धं न निरूप्येत। ततश्चोपाध्यपेक्षः शुद्धो वा नाशे कार्यत्वसत्त्ववदिति व्याहन्येत। तथा च यद्यस्ति सर्वज्ञः तथाऽपि सिद्धं सद्रूप एव भावस्तद्विज्ञानालम्बनप्रत्ययत्वमनुभविष्यति। अथ नास्ति, तथाऽपि स्वस्वहेतुतो लब्धस्वरूप एवापाततोऽकिञ्चित्करः समर्थोऽपि तत्तत्सहकारिसंनिधेस्तासु तास्वर्थक्रियासूपयोक्ष्यते। न च प्रथमतः कार्याऽनुपलब्धेरसामर्थ्यं, तथा सति रासभादेरपि क्षित्यादिसमवधानादङ्कुराद्युत्पत्तिप्रसङ्ग इत्युक्तम्। ननु जनकत्वमजनकत्वं च विरुद्धौ धर्मौ कथमेकत्र समाविशतः? तथैकत्रैव बीजे ऽङ्कुरजनकत्वं तदजनकत्वलक्षणं च क्षित्यादिजनकत्वं कस्मान्न विरुद्धे? विरोधिनी चेत्कथमभेदः? भेदश्चेन्नैकं जगति किंचिदिति नाऽनेकमपि स्यादिति सुनिरूपितमत्रभवता भावानां तत्त्वम्। सकृदुपलभ्यमाने कार्यभेदे ऽपि बीजरूपस्य जनकस्याऽभेदावगतेः प्रत्यक्षेणाऽभेद इति चेन्न। इहापि समानत्वात्। न खल्वत्रापि क्रमवत्कार्यभेदे ऽपि बीज-

रूपमन्यदन्यदपेक्ष्यते । न च नञः प्रयोगाऽप्रयोगमात्राभ्यां विरोधाऽवगतिः । अतिप्रसङ्गात् । न च बीजस्यापि यदेव जनकत्वं तदेवाऽजनकत्वम् । न च जनकत्वमस्य स्वभावो ऽपि तु बीजं जनकत्वं न तदितरप्रत्ययसमवधानं वा सामर्थ्यं वा धर्मभेदः । समवधानं चोपसर्पणप्रत्ययाऽधीनमस्य । न च न धर्म्मधर्मिणोर्भेदः । तस्य ततो ऽन्यत्वात् । अन्यत्वे ऽपि च तदाश्रितत्वात्तस्योपलब्धेः । तेन च सहकार्यकरणात्तत्सम्बन्धः । तत्सिद्धमक्षणिकस्यापि क्रमाक्रमाभ्यामर्थक्रियाकारितोपपत्तेः सन्दिग्धव्यतिरेकित्वादनैकान्तिकं सत्त्वमसाधनाङ्गं क्षणभङ्गुरत्वे भावानामिति ।

यच्च विकल्पितं, स्वभावतो भावा विनश्वरा अविनश्वरा वा जायन्तइति, तत्रोच्यते । न वयं विनश्वरत्वमविनश्वरत्वं वा जानीमः, किन्तु सन्तः स्वहेतुभ्यो जायन्ते, ध्वसन्ते च हेत्वन्तरेभ्यः स्वप्रत्ययाऽधीनसंनिधानेभ्य इति । ध्वंसश्च ध्वंस्यमानाऽभिन्नो हेतुभेदात्स्वभावभेदाच्च । उपपादितश्च स्वभावभेदो नियोगपरीक्षायाम् । नन्वस्मिन्नुत्पन्ने ऽपि भिन्नमूर्त्तौ किमायातं भावस्य ? न किं चिदायातम् । अस्त्वयमायुष्मान् भावः । अस्तु स्वकारणाधीनजन्मना, तदभावेन तत्स्वरूपविरहलक्षणेन स्वलक्षणशालिता स्वाऽनुरूपं व्यवहारं प्रवर्त्तयता निरस्तसमस्तार्थक्रियः किं नश्छिन्नम् ? न च ध्रुवभाविता विनाशस्य हेत्वन्तरानपेक्षतामावहति । असिद्धत्वादनैकान्तिकत्वाच्च । इदं हि भवान्निरूपयतु, किं घटसन्तानात्संविभागा कपालसंसन्ति ध्रुवभाविनी न वा ? । न चेद्विनाशो ऽपि घटस्याऽध्रुवभावी । न खलु संविभागक्षणोत्पादमन्तरेण घटविनाशमीक्षामहे ऽपिहितचक्षुषः । तथा चाऽसिद्धा ध्रुवभाविता विनाशस्य । अथ ध्रुवभाविनी, तस्यामेव विभागसंततौ ध्रुवभाविन्यामपि मुद्गरापेक्षित्वमनैकान्तिकं ध्रुवभावित्वं नाऽनपेक्षत्वेन व्याप्तमिति हेत्वन्तराऽपेक्षत्वं निषेद्धुमर्हति ।

अपि च मनोवैगुण्ये चक्षुराद्यभावे च रूपाद्यवेदना-दुभयवेद्यता ऽवसीयते। केवलमनोवेद्यता तु कुतः? द्वितीय-क्षणोपलब्धेरिति चेत्। न। तत्र चक्षुरादीनां सामर्थ्यपरिक्षये हेत्वभावात्। तज्ज्ञानधारावाहिकत्वदर्शनाच्च। स्मरणे तु प्रतीतमेव पारतन्त्र्य, मनुमानादिषु लिङ्गाद्यभावे प्रत्ययात् पारतन्त्र्यमिति न क चिदप्यन्तरे मनःसाक्षात्स्वतन्त्रं प्रवर्त-

तस्मात् क्षणिकत्वसाधनाऽनुमानप्रतिक्षेपादबाधितं प्रत्यभिज्ञानं स्था-पयति भवानिति सिद्धम्।

तदेवं क्षणिकत्वप्रतिक्षेपान्नेन्द्रियजविज्ञानसमयभावी तद्विष-यजन्मा क्षणो ऽस्ति यो मनोविज्ञानगोचरः स्यादित्युक्तम्। अस्तु वा, तथाप्ययमपि चाक्षुषो, न तु मनोमात्रगोचरः। उभयभावाऽनु-विधानात्तद्विज्ञानभावाऽभावयोरित्याह—अपि चाऽन्यविषयव्यावृत्तम-नसां मनोवैगुण्ये ऽप्रणिहितमनसामन्धादीनां चक्षुराद्यभावे च रूपा-द्यवेदनात् इतरथा च वेदनात् उभयवेद्यता ऽनुमीयते। केवलम-नोवेद्यता कुतः? शङ्कते—प्रथमे एव क्षणे इन्द्रियसामर्थ्योपक्षयात् द्वितीयक्षणोपलब्धेः केवलमनोवेद्यता ऽनुमीयते इति चेत्? निरा-करोति—न। कुतः? तादृशतज्जातीयक्षणावधृतसामर्थ्यानां चक्षुरादीनां सामर्थ्यपरिक्षये हेत्वभावात् न चैकस्मिन्नेव क्षणे सामर्थ्यमेतेषां येन क्षणान्तरे तन्न स्यादित्याह—तज्ज्ञानधारावाहिकत्वदर्शनाच्च। ननु स्मरणे केवलमेव मनः प्रवर्तते, अन्धादीनामपि रूपादिस्मरणोपल-ब्धेरित्यत आह—स्मरणे तु प्रतीतमेव पारतन्त्र्यं मनसः। प्रमाणा-न्तराऽधिगतगोचरत्वात्। प्रमाणान्तरजन्माऽनुभवाऽऽहितभावना-सहितं हि न मनः स्मरणे हेतुः, न निरपेक्षमित्यर्थः। न चा-ऽनुमानादिज्ञानेषु स्वातन्त्र्यमित्याह—अनुमानादिषु लिङ्गाद्यभावे प्रत्य-

तइति आन्तरएव साचाद्विषयस्तत्रैव साक्षाद् वृत्त्या प्रकर्षमनुभवेत् नाऽविषये ।

यात्पारतन्त्र्यं मनसः प्रतीतमिति । तस्मान्न क्वचिदन्तरे मनः साचात्स्वतन्त्रं प्रवर्ततइत्यान्तर एव सुखादिरस्य साचादव्यवधानेन संयुक्तसमवायलक्षणेन संनिकर्षेण स्वतन्त्रस्य विषयो न तु बाह्यम्। तेन साचाच्चचुरादिवदसंम्बन्धादस्वतन्त्रत्वाच्च । तेन तन्मनस्तत्रैव साचाद्वृत्त्या प्रकर्षमनुभवेद् न तदविषये बाह्ये । तत्सिद्धमेतत् विवादाध्यासितानि चक्षुरादीनि नाऽतीताऽनागतविषयविज्ञानजनकानि विषयसहकारित्वात् तत्कार्यजनकत्वाद् यद्यत्सहकारि यत्कार्यजनकं तत्तदभावे न कार्यं जनयति यथा बीजमङ्कुरजनकक्षित्यादिसहकारिक्षित्यादावतीते ऽनागते वा नाऽङ्कुराय कल्पते । न चाऽर्थसहकारित्वमिन्द्रियाणामसिद्धं, विज्ञानजनने तदसहकारित्वे ऽस्मदादीनामप्यतीताऽनागतार्थत्वप्रत्यक्षत्वप्रसङ्गात् । सिद्धौषधमन्त्रतपःसमाधीनां चक्षुराद्यतिशयाधायकत्वे ऽपि न स्वविषयाऽतिलङ्घनमित्युक्तम् । न च संदिग्धव्यतिरेकिता । तथा हि । सहकारित्वमपेक्षणीयतया व्याप्तं तदभावे तु कार्यजनने ऽनपेक्षणीयत्वं विरुद्धमनपेक्षणीयत्वं व्यापकविरुद्धोपलब्ध्या सहकारितामपि निवर्त्तयतीति प्रतिबन्धसिद्धिः । एवं विवादाऽऽस्पदं मनो न चक्षुरादिनिरपेक्षं बाह्ये प्रवर्तते तत्तन्त्रप्रवृत्तित्वाद्यद् यत्तन्त्रप्रवृत्ति न तत्तन्निरपेक्षं तत्र प्रवर्तते यथाऽऽलोकापेक्षं चक्षू रूपे न संतमसे इति विरुद्धोपलब्धिः । न च बाह्ये न चक्षुरादितन्त्रं मन इति साम्प्रतम् । अन्धबधिराद्यभावप्रसङ्गात् इति विपश्चितम् । ननु मा भूदिन्द्रियजं मानसं च प्रत्यक्षं सर्वविषयं, भावनामयं तु भविष्यति । तथा हि । श्रुतम-

येन विज्ञानेन समस्तवस्तुविषयनैरात्म्यादि गृहीत्वा युक्तिमयेन च भूततामस्य व्यवस्थाप्याऽसकृच्चेतोनिवेशनरूपभावनाप्रकर्षपर्यन्तजन्मप्रत्यक्षं विज्ञानमंशद्वयेनाऽऽत्मादिरूपविश्वालम्बनं करतलाऽऽर्द्रवृन्दविषयमिवाऽतिविशदं भावयिष्यति तथागतः। न चाऽयमीदृशः प्रत्ययो न सम्भवति भावनाप्रकर्षात्। तथा हि। भावनाऽभावाद्वा तत्प्रकर्षाऽभावाद्वा तत्सामर्थ्याऽभावाद्वा न भवेद्। न भावात् सर्वधर्मनैरात्म्यभावनाऽसम्भवः। स खल्वेवं न भवेद् यदि जगति दुःखं नाम न स्यात्, सद्वा न जिहासितं स्यात्, जिहासितं वा न शक्यहानम्, अशक्यहानता च तन्नित्यत्वाद्वा, तदुपायाऽपरिज्ञानाद्वा, उपायाऽपरिज्ञाने ऽपि च शक्यहानत्वे ऽपि च नैरात्म्यभावनाया अनुपायत्वाद्वा, लघुतरोपायान्तरसम्भवाद्वा। न तावत् दुःखं नाम नास्ति जगति, परिणामतापसंस्कारैः खल्वनवयवेन पञ्चापि स्कन्धा भवन्ति संसारिणाम्। न चैते स्वस्य परेषां वा नाऽपनिनीषिताः। श्रावकबोधिप्रतिनियतेन वा नैसर्गिककरुणापराधीनचेसा वा पुरुषधौरेयकेण परदुःखदुःखिना प्रतिकूलवेदनीयत्वात्। नाप्यशक्यहानता। न हि नित्यो नाम भावः संभवी, तस्य समस्तक्रियाविरहिणो व्योमोत्पलायमानत्वात्। नाप्युपायाऽपरिज्ञानम्। तथा हि। दुःखस्य समुत्पादका दोषाः रागद्वेषादयो मदमानादयश्च ते चोत्पादका अपि तदवयवान्निवर्तमानास्तदपि निवर्त्तयन्ति, यथा कफोद्भवो ज्वरः कफनिवृत्त्या निवर्त्तते। दोषाश्च नित्यात्मादिदर्शनजन्मानः तदवयवास्तदविभागवर्तिनस्तदभावे न भवन्ति। तदभावहेतुर्न तत्प्रतिपक्षसाक्षात्कारादन्यः। तस्यैव तद्विरोधित्वात्। तथा हि। यत्र यद्विरुद्धसमवधानं तत्राऽवश्यं तदितरनिवृत्तिः। यथा विरुद्धवह्निसंनिधाने शीतनिवृत्तिः। संभवति च चित्ते स्थिराऽऽत्मदर्शनविरुद्धसर्वधर्मनैरात्म्यस्वात्मीभाव इति स्व-

भावविरुद्धोपलब्धिः । एवं च तद्धेतुरागादीनामप्यत्यन्तनिवृत्तिः । तथा हि । ये संभवत्स्वहेतुविरुद्धाऽत्यन्तविवृद्धयः ते संभवदत्यन्तसमुच्छेदाः यथेन्द्रलुप्तनितान्तविवृद्धयः केशाः । संभवत्स्वहेतुविरुद्धात्यन्तविवृद्धयश्च रागादय इति स्वभावहेतुः । सर्वधर्मनैरात्म्यं च तत्प्रतिपक्षस्तत्साक्षात्कारश्च न भावनाप्रकर्षादन्यतः । न चाऽसौ भावनामन्तरेणेति । न च सर्वधर्मनैरात्म्यविज्ञानं प्रति च समर्थो भावनाप्रकर्षः ।

तथा हि । यन्मनोविज्ञानं सम्भवद्भावनाप्रकर्षं तद्भावनाऽऽधेयधेयाऽऽकारं वैशद्यं यथाकामतोद्यवस्थासु मनोविज्ञानं कामिनीवस्त्वाद्यालम्बनं भावनाप्रकर्षे ऽऽधेयविशदभावम् । सम्भवद्भावनाप्रकर्षश्च नैरात्म्यविकल्प इति स्वभावहेतुः, भावनाप्रकर्षमात्रनिमित्तत्वात् । प्रतिभासवैशद्यस्य यस्य भावनाप्रकर्षस्तस्य विशदप्रतिभासत्वं नियतसंनिधानमिति सम्भवद्भावनाप्रकर्षमात्रानुबन्धिनी विशदप्रतिभासतेति सत्यपि भावनाप्रकर्षसम्भवे यदि प्रतिभासवैशद्यं नोत्पद्येत निमित्तान्तरसापेक्षं स्यात् । निरपेक्षतया च व्याप्तः प्रकर्षो दृष्टः, ततो व्यापकविरुद्धोपलब्ध्या विपक्षाद्व्यावर्तमानो भावनाप्रकर्षो वैशद्येन व्याप्यतइति न संदिग्धव्यतिरेकः । नाप्यसिद्धः । कारुण्येन दुःखभयाद्वा भावनाप्रकर्षप्रारम्भसम्भवात् । न च लङ्घनोदकतापवद्व्यवच्छिन्नोत्कर्षता सर्वधर्मनैरात्म्ये चेतसो येन क्वचिन्न विवादः सम्भवेत् । यतो यः स्थिराऽऽश्रयो धर्मो यत्र यथोत्पन्नो यथाहितस्य भागस्य प्रवृत्तये न पुनर्यत्नमपेक्षते सो ऽत्यन्तं निष्ठां तत्र गच्छति । तद्यथा कलधौतस्य पुटपाकप्रबन्धाऽऽहिता विशुद्धिः रक्तसारताम् । स्थिराश्रयश्च सर्वधर्मनैरात्म्यबोधे उत्पन्ने विशेषे पुनः प्रयत्नाऽनपेक्षः सम्भवदत्यन्ताऽभ्यासः पुंसामिति स्वभावहेतुः स्थिराश्रयत्वं परलोकसिद्धेः । अप्रधानमपि भावाद्भिन्नमभिन्नं वा ?

तत्राऽभिन्नोपकाराऽभावरूपे सत्यप्यलब्धजन्मनः सत्यप्यस्मिन्ननुपलब्धेरुत्पत्तिमत एवाऽपकारात् कार्यनिष्पत्तेरशक्ताद्भावः स्यात् । न चोपकारिणः कार्यजननमिति साम्प्रतम् । उपकारस्योपकारान्तरजननेऽनवस्थापातात् । तत एव कार्यस्योत्पत्तेर्भावस्याऽतत्कारित्वप्रसङ्ग इत्युक्तम् । अभिन्नोपकाराऽऽधाने वा भाव एवाधेयः । न च स प्राक्सिद्धः शक्य आधातुम् । अनुपकारित्वे वा सहकारिभावेन नापेक्षेरन्नित्युत्पन्नमात्रमेव बीजमङ्कुरादि जनयेत् । अनपेक्षस्य क्षेपाऽयोगात्क्षेपे वा पश्चादपि न जनयेदविशेषात् । यदि मन्येताऽनुपकारका अपि भवन्ति सहकारिणो यस्मात्तैः सहभावः कार्यं करोतीति । न च नाऽपेक्ष्यन्ते, तैर्विना कार्यस्याऽनुपपत्तेरिति । तत्र स्वरूपेण चेत् कार्यस्य जनको भावः तस्मान्नैवाऽभावयोरेकैकस्माद् व्यभिचारादुभयाऽधीनजन्मतेति साम्प्रतम् । हेतोरुक्तकार्योत्पत्तेरवश्यम्भावनियमेन व्यभिचाराऽभावात् । न च स्वकारणात् कतिपयकालकलाविलम्बेन कार्यजननस्वभावो भावो जात इति स्वभावादेव विलम्बकारीति साम्प्रतम् । विकल्पाऽसहत्वात् । किं कतिपयकालकलाविलम्बनकारितास्वभावो निवृत्तो न वा ? निवृत्तश्चेत् कथं भावो न निवृत्तः ? स्वभावनिवृत्तेः । अनिवृत्तौ बाधकमस्य स्वभावो निवृत्तरूपविरुद्धधर्मसंसर्गात् । अनन्तस्वभावत्वे वा न विलम्बत इति जन्मानन्तरमेव भावः कृतकृत्यः प्रसज्येत । अनिवृत्तौ कतिपयकालकलातिक्रमेऽपि न कार्यं जनयेत् । विलम्बकारितायाः रूपस्य तादवस्थ्यात् । तदुक्तं 'न क्रमेणाऽर्थक्रियाकारिता सम्भवति भावस्य नापि यौगपद्येन युज्यते यस्माद्यावत्कार्यं किमपि प्रथमे क्षणे तेनाऽक्षणिकत्वेनात्मना सम्पादितं तावत्सर्वं द्वितीयादिक्षणेषु सम्पादयेत् तावत्कार्यम् । क्षणिकस्य तु क्रमाऽक्रमाभ्यामर्थक्रिया कल्पत, इति । विपक्षे क्षणिकत्वे व्यापकाभावात्ततो व्यावर्तमानं सत्त्वं क्षणिकत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः ।

contained to something other than the other factor, that we have what is known as '*yutasiddhi*'; *e.g.* the relationship between the organ of Touch and the Body, where we find that the Body has an existence in its other parts, apart from the organ of Touch. Consequently the relationship in this latter case, would be one of *Conjunction*, and not of *Inherence*.

In the case of two eternal substances, '*yutasiddhi*' would mean *separate existence, the capability of moving or going separately*; and those that are devoid of this capability would be '*ayutasidda*'; and the relationship of these would be what is known as 'Inherence;' *e. g.* the relationship between *Ākāra*, and the general character of 'Substance.'

If Inherence were defined merely as the relationship subsisting between two things that are incapable of separate existence, then the relationship between *Virtue* and *Pleasure*—which is one of cause and effect,—would also become 'Inherence'; as neither of the two has any existence apart from the self wherein both of them inhere. Hence with a view to exclude this, the Text adds—'*standing to one another in the character of the container and the contained*',—which is not added (as some people have supposed) for the purpose of excluding the relationship of *Ākāça* and the *flying bird*; as the latter is excluded by the expression of '*Āyutasiddhi*' (the *Ākāça* having an existence independently of the bird).

In the same manner, the relationship between *Ākāça*, and the word '*Ākāça*'—which is one of the denoter and the denoted—would be mistaken as 'Inherence'; hence with a view to exclude this, the Author adds: 'the basis of the idea of that *this is in that*.' In the case of the relationship of the denoter and the denoted, the idea that we have is that *this word expresses such and such a meaning*, and not that *it is in this*.

In as much as the two qualifications, '*Ādhārādhāryabhūtānām*' and '*ihapratyayahētuh*,' could not exclude the relationship

between the pit and the fruit fallen in it,—the author has added '*ayutasiddhānām.*'

Some people put forth two alternative explanations of the word '*ayutasiddhi*' (in order to show that its use is not admissible); what they say is this: "Does the word mean that the *two things* are *not recognised as joined together*, or that they are *recognised as not joined together* (but one and the same)? In the former case, what could be their relationship, they themselves being *not recognised?* and in the latter also, what could the relationship be, when they would not be distinct from each other? As it is only when two objects are distinct that they are related, *e. g.* in the case of the *fruit* and the *pit* wherein it falls."

Others do not accept this; and this is what they say: '*Uçutam na siddhan*' does not mean that they are not *fully accomplished* objects; because we do not admit of any Inherence between nonentities. Nor does the compound mean 'recognised as not joined together;' as if the two things were identical, there would be one object only, and not two; as *duality* consists in the negation of identity between two things. In the case of Inherence, the two things are not *one* in reality; as their forms are always recognised as distinct from each other; and "Difference' only consists in the cognisability by two distinct ideas; otherwise there would be no proper differentiation between Difference and Non-difference. Consequently '*Ayutasiddhi*' cannot mean 'identity.'

What the word '*ayutasiddhānām*' actually means is *those that have no substratrum apart from the other correlative.* In this case there would be no discrepancy in the relationship; as there would always be a certain difference in the forms of the two objects; and as between two distinct objects—*e. g.* in the case of *fire* and the *ball of iron*—no mutual contact would be possible, without some sort of a relationship. The only difference however between ordinary relationship and Inherence is this:

It is after it is produced that the fire becomes related to the ball of iron; while in the case of Inherence, it is during the process of production that one thing becomes related to the other by the peculiar nature of the potency of its cause; *e. g.* in the case of the *action of cutting* and the *object cut.* We cut short this discussion here.

---

*Question*:—"How is it that only six catagories are mentioned, and not others?"

*Answer*:—Simply because it is only these six that exist, and no others—this non-exitence being ascertained from the fact of their not being known by any of the means of knowledge exactly like the horns of a hare.

Thus then the general definition applying to the six categories is the *capability of being predicated*; and the following are the specific definitions of each of them: (1) Substance is the substrate of Qualities; (2) Quality is that which has a general character, is devoid of qualities, and which never appears as the independent cause of conjunction or disjunction; (3) Action is that which resides in one substance, is devoid of qualities, and which is the independent cause of Conjunction and Disjunction; (4) Generality is that which serves as the basis of inclusive cognition; (5) Individuality is the basis of absolute differentiation (or exclusion); and (6) Inherence is the relationship of the container and the contained subsisting between two things that have no existence apart from one another.

---

(1) The relationship of the container and the contained must be *natural* and not *adventitious* says the *Kiraṇāvalī.*

(2) "*Samavāya* etymologically means the act of coming together closely, and is therefore used to denote a kind of 'intimate union' between two things which are rendered inseparable". But as the word 'union' conveys the idea of conjunction, and not of inseparability, it has been thought fit to use the word 'Inherence' for '*Samavāya*', specially as this word and its cognates are found convenient in places where the word '*Samavēta* or '*Samavāya*' occur in compounds.

(3) The word '*Ayutasiddha*' means that which is *known* (*siddha*) as *not separate* (*a-yuta*)—the word '*yuta*' being derived from the root '*yu*' to separate.

(4) Though Kaṇāda ( Sutra VII.—ii- 26 ) has defined *Samavāya* as that re-

lationship between the cause and its effects, whereby the one is cognised as residing in the other,—yet later writers have developed the theory to a great extent, applying the name to the following five relationships : (*a*) That between the whole and its parts ; (*b*) between the quality and the substance it qualifies, (*c*) the motion and the moving; (*d*) the individual and the class to which it belongs ; (*e*) the Individuality and the eternal substance wherein it resides.

(5) *Samavāya* is regarded as eternal and non-producible in order to guard against the *regressus ad infinitum* that would be caused by admitting its productibility which would necessitate the assumption of an endless series of *Samavāya* upon *Samavāya*.

(6) The doctrine of *Samavāya* is very important and may in one sense be said to be the corner-stone of the Nyāya Philosophy. It is the Samavāya that explains the phenomenon of causality as conceived by the Naiyāyikas ; and it is this theory that makes them so intensely realistic in marked opposition to idealistic schools like the "*Vēdānta*" (Athalye).

The Bhātta-Mimansakas, the Vedantis and the Sānkhyas are all opposed to the Samavāya-theory. Çankarācārya in his Bhāshya on the Brahmasūtras II—ii.—23 in course of his refutation of the atomic theory of the Vaiçēshika which is a necessary corrollary to the Samavāya theory, has found in this the weakest point of the theory and has very strongly put forward the reasoning that there can be no finality in the theory, as it would always be necessary to assume a relationship whereby the *Samavāya* would reside in the *Samavāyi*, the thing related in the *Samavāya* relationship. The Vedanti admits of no union except that of *Sanyoga*, Conjunction, and the relationship between the cause and effect they hold to be one of *identity*. Kumārila has dealt with the theory briefly in his *Çloka-Vartika* (Trans. p. 94); and in one of the *Karikas* he says—"If *Samavāya* is something different from the *class* and the *individual* (that resides in the class by *Samavāya*), then it (that Samavāya) could not exist in them as a relation ; on the other hand if it be identical with them, then these two would be identical—by the law that things that are identical to the same thing are identical to themselves."

---

Text (10) : *So far we have mentioned the objects without saying anything as to their properties.*

## Commentary.

In as much as a treatment of the properties could not be commenced before the objects themselves had been described the Author now proceeds to explain the properties ; and with a view to this, he shows the connection of what has gone before The sense is that in the foregoing portion of the work, we have simply mentioned by name, the objects, without saying anything as to their properties ; and it is these latter that we are going to speak of now.

Though Substance and the rest have had their several subdivisions mentioned, yet, in as much as these too have been mentioned merely by name, these also become included in the "mere mention."

The *Kiraṇavalī* says that the text is in answer to the objection as to why only so many categories have been mentioned, no mention having been made of such others as 'Potency,' 'Similarity' and the like; the sense of the text being that it is only the *objects* that have been mentioned; while 'Potency, and the rest are mere properties.

## CHAPTER. III.

## Similarities and Dissimilarities among Categories.

Text *(11) To all the six categories belong the properties of being-ness, predicability, and cognisability.*

### Commentary.

Though the properties are nothing beyond the six categories, and it is these themselves that become objects and properties with reference to another,—yet, in order to show the categories in the character of *objects*, that the text refers to them as 'to all the six categories.'

'*Being-ness*'—*i. e.* the property of existing in a particular form—is common to all the six categories; as it is the natural form of an object that constitutes its '*being*.'

'*Predicability*'—capablity of being predicated or spoken of also is a form of the thing itself; as it is only the positive form of an object that, under certain circumstances, is known as 'cognisability,' and under others as 'predicability.'

---

*Astitva*—Beingness—consists in the fact of the thing being an object of positive cognition, that is to say, in its capability of being perceived independently of any counter-entity.

*Predicability*—is the capablity of being expressed in words. '*Cognisability*'—capablity of being known.

Though the last two belong to *negations* also, yet all that is meant here is that these belong to the six categories, and not that they do not exist anywhere else. (*Kiranavali*).

Though 'beingness' would seem to belong to Abhāva also, and as such the mention of 'six' categories only would appear incorrect,—yet when we bear in mind the fact that our author has enumerated only six categories, the incongruity ceases; as to mention 'six' categories, as having 'beingness' is as much as to say that it belongs so *all things*. And any thing that exists is also capable of being 'predicated.'

Text (12): *The character of being dependent (upon some thing else) belongs to all things except the eternal substances.*

## Commentary.

By '*āçritatva*'—*being dependent*—is meant the fact of the thing being always perceived as depending upon something else; and this 'dependence' is not of the character of 'inherence.' (That is to say it does not mean that the thing is always found to be *inhering* in something else); because as a matter of fact this character of '*āçritatva*' does not belong to *Inherence.*

"*Except the eternal substances*"—That is to say the character does not belong to the four kinds of atoms, or to *Akāça, Time, Space, Self* and *Mind.*

There are certain people who hold that properties are something absolutely distinct from the objects in which they inhere. For these people, after they have once postulated the property of '*Astitva*' (existence) as the one basis of the single notion of 'being' including all things in the world, it would be absolutely useless to speak of '*sattā*' (Being) as the common property of Substance, Quality and Action alone (as is done below).

As it is not these three alone that have *existence,* and *existence,* as a property, is held by these people to be as distinct from these three as from any thing else,—*Samavāya f. i.*—and the '*astitva*' having afforded the necessary comprehensive notion,—there would be nothing left for which *sattā* could be postulated. If the '*astitwa*' should be distinct with each individual then, there would be no necessity of postulating any such all-comprehensive form as '*astitva*'; as the idea of 'existence' (that a certain thing 'is') could be got at from '*sattā*' (being), and also from the particular '*sattā*' (of each individual thing).

For those however, who hold '*astitva*' to consist in a particular form of a *positive entity, sattā* would not be useless; as no *particular form* could ever afford any comprehensive notion of all existing things. Nor would it be unnecessary to postulate

'*astitva*'; as *sattā* could not inhere in anything devoid of a positive form (and it is this positive form that is '*astitva*). And thus in accordance with this view both '*sattā*' and '*astitva*' are found necessary.

---

Samavāya is a particular form of relationship; and as such being an abstract entity, is one only: and hence it can have no plurality. Nor does it reside in any thing by the relation of inherence. As any such residence would involve the postulating of endless "Inherences."

---

*Text (13): To the five, Substance and the rest, belong the characters of inherability and plurality.*

**Commentary.**

The author now points out the simlarity among Substance, Quality, Action, Community, or Generality and Individuality.

"*Inherability*" *i. e.* existence in a thing by the relation of inherence.

"*Plurality*"—the character of being distinct from one another,—that is to say, having forms differentating them from one another.

If the Author had said merely 'of Substance and the rest it would have included *Inherence* also; hence he restricts the number to '*five*.' If he had said only 'five,' it would not be clear what particular categories were meant, hence he specifies them as '*substance and the rest*.'

---

That which would be dependent upon some thing else would not be eternal; as to be eternal a thing must be self-sufficient. Hence the character of being dependent upon something else would be common only to noneternal Substances.

---

*Text (14): To the five, Quality and the rest, also belong the character of being devoid of qualities, and that of being without action.*

**Commentary.**

The author now points out the points of simlarity among Quality, Action, Community, Individuality and Inherence.

"*Being devoid of qualities*"—*i. e.* being qualified by an absence of qualities.

"*Being without action*" *i. e.* being qualified by an absence of action.

(As to how *absence*, a negative entity, can be a qualification of a positive entity) a negative entity can serve as the qualification of a positive entity, simply on account of its bringing about a qualified cognition, exactly in the same way as a positive entity can qualify a negative one; *e. g.* we have such an idea as '*aghaṭam* bhūtalam' [the '*jar-less* place,' where '*jarlessness*,' a negative entity, qualifies the positive entity 'place'.]

*Question:* "As there is no relationship between a positive and a negative entity, how could a negative entity serve as the qualification?"

*Answer:* There is no doubt that we have such a qualified cognition (as '*aghatam bhūtalam*'); and on the strength of this notion we could assume the necessary relationship, if you consider it absolutely necessary for the qualification to be related to the qualified.

According to the *Vaiçēshikas*, a quality can reside in Substances only. At first sight it appears difficult to see the correctness of this notion; as we often make use of such expressions as 'bright colours,' 'pleasant taste' &c. where qualifications of *brightness* and *pleasantness* are found to be spoken of with reference to *Colour* and *Taste*, which are qualities. But what the Vaiçēshika will say is that the lightness or pleasantness has for its substrate, the bright-coloured *Substance*, and not the *colour*.

By 'Action' here is meant chiefly *motion*; and there can be no motion apart from a Substance.

---

*Text (15): To the three, Substance and the rest, belong the relationship with Being, the character of having Communities and Individualities, that of being denoted by the word 'artha' as a technicality of the Vaiçēshika system, and that of being the cause of virtue and vice.*

## Commentary.

The three, Substance, Quality and Action, are related to the class 'Being,' by the relationship of Inherence (*i. e.* the three inhere in that class); and this constitutes one point of simlarity among them. As to how these are related to Being, we have

श्रीगणेशाय नमः ।

# मीमांसान्यायप्रकाशः ।

## आपदेवकृतः ।

(१) यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दम्भक्तवत्सलम् ॥ १ ॥
अनन्तगुणसंपन्नमनन्तभजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥ २ ॥

(२) इह खलु परमकारुणिकेन भगवता जैमिन्यृषिणा ऽथातोधर्मजिज्ञासेत्यादिना द्वादशस्वध्यायेषु धर्मो विचारितः । तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा यागादिः । स हि 'यजेत स्वर्गकाम' इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते ।

(३) तथा हि यजेतेत्यत्रास्त्यंशद्वयम्, यजिर्धातुः [1]प्रत्ययश्च । तत्र प्रत्ययेऽप्यस्त्यंशद्वयम्, आख्यातत्वं लिङ्त्वं च । आख्यातत्वं च दशसु लकारेषु विद्यते । लिङ्त्वं च पुनः केवलं लिङ्येव । तत्राख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते । भावना[2] नाम भवितुर्भवना-

---

१ "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्" इति नियमेनाख्यातविशेषवाचकप्रत्ययपदेन भावना प्रतीयत इति तत्त्वम् ।

२ 'भवितुः' उत्पद्यमानस्य 'भवनानुकूलः' उत्पत्त्यनुकूलो 'भावयितुः' उत्पादयितुः प्रयोजकस्येति यावत्, व्यापारविशेषो भावना । यथोत्पद्यमानस्यौदनस्यो

नुकूलो भावकव्यापारविशेषः। सा च द्विविधा, शाब्दी भावना आर्थी भावना चेति।

(४) तत्र पुरुषप्रवृत्त्यनुकूलभावकव्यापारविशेषः शाब्दी[1] भावना। सा च लिङ्त्वांशेनोच्यते, लिङ्श्रवणे 'ऽयं मां प्रवर्त्तयति' 'मत्प्रवृत्त्यनुकूलव्यापारवानयम्' इति नियमेन प्रतीयमानत्वात्। यच्च यस्मात्प्रतीयते[2] तत्तस्य वाच्यम्, यथा गोशब्दस्य गोत्वम्। स च प्रवृत्त्यनुकूलव्यापारविशेषो लोके पुरुषनिष्ठोऽभिप्रायविशेषः, वेदे तु [3]पुरुषाभावात् लिङादिशब्दनिष्ठ एव

(५) न हि वेदः पुरुषनिर्मितः।

'वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा।'

(श्लोकवार्तिके वाक्याधिकरणे श्लो॰ ३६६)

इत्यादिना वेदापौरुषेयत्वस्य साधितत्वात्। 'यः कल्पः स कल्पपूर्व' इति न्यायेन[4] संसारस्यानादि-

---

त्पत्त्यनुकूलो यज्ञदत्तस्य व्यापारविशेषो भावना। यथा वोत्पद्यमानाया देवदत्तप्रवृत्तेरुत्पत्त्यनुकूलः प्रवर्तकस्य चैत्रादेरभिप्रायविशेषः। प्रकृते तूत्पद्यमानस्य धात्वर्थस्य स्वर्गस्य वोत्पत्त्यनुकूलः स्वर्गकामस्य व्यापारः। उत्पद्यमानायाश्च स्वर्गकामप्रवृत्तेरुत्पत्त्यनुकूलो लिङो व्यापारविशेषो भावना। एवञ्च अन्योत्पादानुकूलः प्रयोक्तुर्व्यापारविशेषो धात्वर्थातिरिक्तः सर्वधात्वर्थानुयायि भावनासामान्यमिति निर्गलितोऽर्थः।

१ परिस्पन्दपरिणामविलक्षणः पुरुषप्रवृत्त्यात्मकार्थभावनोत्पत्त्यनुकूलो लिङादिशब्दस्य व्यापारविशेषः शब्दभावना।

२ नियमेनेत्यनुवर्तते।

३ निर्मातुरभावादिति भावः।

४ पूर्वकल्पीयवेदस्मरणपूर्वकैतत्कल्पतदुपदेशसम्भवान्नाभिनवरचनावत्त्वं वेदानामिति भावः।

त्वादीश्वरस्य च सर्वज्ञत्वादीश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वा उपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनानुपपत्तेश्च ।

(६) ततश्च पुरुषाभावाच्छब्दनिष्ठैव सा । अत एव शाब्दीभावनेति व्यपदिशन्ति ।

(७) सा च शाब्दी भावनाऽंशत्रयमपेक्षते,साध्यं साधनमितिकर्त्तव्यतां चेति । तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेताऽऽर्थीभावना साध्यत्वेन संबध्यते, [1]एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः । यद्यपि संख्यादीनामप्येकप्रत्ययगम्यत्वं समानं तथाऽप्ययोग्यत्वान्न तेषां भाव्यत्वेनान्वयः । करणाकाङ्क्षायां लिङादिज्ञानं करणत्वेन संबध्यते । तस्य च करणत्वं न [2]भावनोत्पादकत्वेन,[3]सन्निकर्षस्येव रूपादिज्ञाने सन्निकर्षात्प्राक् रूपज्ञानस्येव लिङादिज्ञानात्प्राक् शब्दध-

---

१ यजेतेत्यत्र 'त' प्रत्ययगम्यत्वेनेत्यर्थः । "ननु स्वर्गकामो यजेत इत्यत्राप्यार्थीभावनायामिव स्वर्ग एव कथन्न साध्यत्वेन स्वीक्रियत"—इत्याशङ्कायामाह एकेति । शाब्दीभावनाया आर्थीभावनायाश्च 'त'प्रत्ययबोध्यत्वेन परस्परान्तरङ्गत्वम् । अत एव समानप्रत्ययोपात्तेन आर्थीभावनारूपेण साध्येनैवाकाङ्क्षायां निवृत्तायां भिन्नपदेन भिन्नप्रत्ययेन वोपात्तस्य स्वर्गस्य साध्यत्वानुपपत्तिरिति भावः ॥ अभिधीयतेऽनेनेति 'अभिधानम्' शब्दः शब्दांशो वा, समानेन एकेनैव अभिधानेन श्रुतिः व्युत्पादनम्, तस्मात् हेतोरिति योजना ॥

२ लिङादिज्ञानात् पूर्वमपि शाब्द्या भावनायाः शब्दनिष्ठत्वान्न तेषाम्भावनानिर्वर्त्तकत्वमिति भावः ।

३ नयनसन्निकर्षाद्यभावे यथा न रूपाद्युपलब्धिरेवं शब्दभावनाया लिङादिजन्यत्वे ततः पूर्वमभावप्रसङ्गः । मूले "रूपादिज्ञाने"—इत्यस्यानन्तरम् "कारणत्वात्" इति, "रूपज्ञानस्येव"—इत्यस्यानन्तरम् "अभावात्" इति योजनीयम् ।

र्भावनाया अभावप्रसङ्गात्, किं तु भावनाभाव्यनिर्वर्तकत्वेन। लिङादिज्ञानं हि शब्दभावनाभाव्यार्थीभावनां निर्वर्तयति, कुठार इव च्छेदनम्[1]। अतो लिङादिज्ञानस्य करणत्वेनान्वयः। इतिकर्त्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानमितिकर्त्तव्यतात्वेन सम्बध्यते। तच्च प्राशस्त्यज्ञानं "वायुर्वै क्षेपिष्ठा देवता" इत्यर्थवादैर्जन्यते[2]।

(८) ते ह्यर्थवादाः स्वार्थप्रतिपादने प्रयोजनमनुपलभमाना लक्षणया कृतेः प्राशस्त्यं प्रतिपादयन्ति, स्वार्थमात्रपरत्वे आनर्थक्यप्रसङ्गात्। न चेष्टापत्तिः, [3]अध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तेः। तथा हि "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिः सकलस्य वेदस्याध्ययनकर्त्तव्यतां बोधयन् सर्वो वेदः प्रयोजनवदर्थपर्यवसायीति सूचयति, निरर्थकस्याध्ययनानुपपत्तेः[4]।

(९) स च वेदो विधिमन्त्रनामधेयनिषेधार्थवादात्मकः। तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान्। स

१ कुठारस्य यथा छिदिक्रियासाध्यद्वैधीभावज्ञापकत्वेन छिदिभावनाकरणत्वम्, तथाऽत्रापि लिङादिज्ञानस्य शब्दभावनाभाव्यर्थभावनाज्ञापकत्वेन शब्दभावनायां करणत्वमिति।

२ यतो वायुः क्षिप्रफलन्ददाति ततो वायव्यः पशुः प्रशस्तइति तात्पर्यम्।

३ अर्थवादा अपि स्वाध्यायेऽन्तर्भूताः स्वाध्यायस्य चाध्ययनं विध्युपात्तम्। अतो नार्थवादानामानर्थक्यम्।

४ निरर्थकवेदवाक्याध्ययनस्य विधिबोधितत्वानुपपत्तेरित्यर्थः।

चाप्राप्तमर्थं विधत्ते। यथा 'ऽग्निहोत्रं जुहुयात्स्वर्गकामः' इति विधिरप्राप्तं प्रयोजनवद्धोमं विधत्ते, 'अग्निहोत्रहोमेन स्वर्गं भावयेदिति'। यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रविधानम्। यथा 'दध्ना जुहुयात्' इत्यत्र होमस्य 'अग्निहोत्रं जुहुयात्' इत्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम् 'दध्ना होमं भावयेदिति'। यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते। तदुक्तम्—[1]'न चेदन्येनशिष्टा' इति (जै. सू. १।४।९)। 'शिष्टा' उपदिष्टा इत्यर्थः। यथा 'सोमेन यजेत' इत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम्,'सोमवता यागेनेष्टं भावयेदिति'। न चोभयविधाने [2]वाक्यभेदः, विशिष्टस्यैकत्वात्।

(१०) विशिष्टविधौ च मत्वर्थलक्षणा। यथा सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति। न हि मत्वर्थलक्षणां विना सोमस्यान्वयः सम्भवति। यदि तावत्सोमयागयोरैक्यरूपेण भावनायां करणत्वेनैवान्वयः 'सोमेन यागेनेष्टं भावयेत्' इति—तत उभयविधाने वाक्यभेदः, सोमस्य यागवत्फलभावनाकरणत्वेन[3] प्रत्यक्षविरोध-

---

१ तद्गुणास्तु इत्यादिसूत्रशेषभूतमिदं वाक्यम्।

२ 'सोमेन यागम्भावयेत्'—'यागेन स्वर्गम्भावयेत्'—इत्येवं रूपो वाक्यभेद इत्यर्थः।

३ 'सोमेन यागेनेष्टम्भावयेत् इत्यत्र दृष्टरूपे फले सोमस्य यागस्य च भावना करणत्वेन प्रतीयमानत्वात्॥

श्च। न हि सोमो यागो भवितुमर्हति । प्राधान्यप्रसङ्गापातश्च [1]यागार्थत्वानुपपत्तिश्च यागे द्रव्यानुपपत्तिश्च प्रत्ययवाच्यभावनायाः समानपदोपात्तेन यागेन करणाकाङ्क्षानिवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात् ।

(११) यदि च[2] वैयधिकरण्येनान्वयः,तत्र न तावत् 'यागेन सोमम्' इत्यन्वयः समानपदोपात्तत्वात्प्रत्ययवाच्यफलभावनायां करणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेः, यागस्य सोमार्थत्वापत्तेश्च । न चेष्टापत्तिः, अदृष्टद्वयापत्तेः[3] । न हि यागस्य सोमार्थत्वं दृष्टद्वारेण सम्भवति, व्रीहिष्ववघातेनेव यागेन सोमे कस्यचिद् दृष्टस्याजननात् । अतस्तेन तावत्सोमे किञ्चिददृष्टं जननीयम्, प्रोक्षणेनेव व्रीहिषु । तथा यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः । भावनाकरणत्वं च भावनाभाव्यनिर्वर्तकत्वेनेत्युक्तम् । न च सोमो ऽदृष्टमन्तरेण फलं जनयितुं समर्थः, 'ग्रहैर्जुहोति'इति वाक्यविहितहोमेन तस्य भस्मीभावात्[4] । अतो ऽदृष्ट-

१ सोमेनैवेष्टसिद्धौ यागस्यानर्थक्यप्रसङ्गः ॥

२ 'वैयधिकरण्यम्' भिन्नकारकम् तेनान्वय इति विग्रहः । "यागेन सोमम्भावयेत्" इत्यादिरूप इति भावः ।

३ सोमजनकमेकमदृष्टम्, स्वर्गजनकमपरम् ।

४ ग्रहाः सोमपात्राणि तेषु च हुतेषु तत्रस्थसोमो दह्यत एव ॥

द्वयापाताान्न यागस्य सोमार्थत्वमिति न 'यागेन सोमं भावयेत्' इत्यन्वयः सम्भवति, करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तेश्च ।

(१२) अथ 'सोमेन यागं भावयेत्' इत्यन्वयः,—तत्र यद्यपि सोमस्य करणत्वेन यागार्थत्वाद्यागनिर्वृत्तिर्दृष्टमेव प्रयोजनं लभ्यते इति नादृष्टद्वयापत्तिः, नापि करणत्वेनोपस्थितस्य सोमस्य साध्यत्वान्वयानुपपत्तिः करणत्वेनैवान्वयात्,—तथाऽप्यप्राप्तत्वाद्भावनाकरणत्वेनान्वितस्य यागस्य साध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव ।

(१३) "ननु यजेतेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थितिः तद्वाचकतृतीयाद्यभावात्, किन्तु भावनायां यागसम्बन्धमात्रं प्रतीयते । यागस्य च भावनासम्बन्धः करणत्वेन साध्यत्वेन च सम्भवति । तत्र करणत्वांशमादाय फलसम्बन्धः साध्यत्वांशमादाय गुणसम्बन्धश्च स्यात्" इति चेत्—

(१४) नैवम् । यद्यपि भावनया यागस्य सम्बन्धमात्रं प्रतीयते तथाऽपि करणत्वेनोपस्थितिदशायां न साध्यत्वेनोपस्थितिः सम्भवति विरोधाद् विरुद्धत्रिकद्वयापत्तेश्च[1] । तदवश्यं 'यागेन स्वर्गं भावयेत्' इति

[1] विरुद्धस्य त्रिकद्वयस्य विधेयत्वानुवाद्यत्वोपादेयत्वोद्देश्यत्वगुणत्वमुख्यत्वादिरूपस्यापत्तेरित्यर्थः ।

करणत्वेनान्वये सति पश्चात् 'सोमेन यागं भावयेत्'-इति साध्यत्वेनान्वयो वक्तव्यः। ततश्च वाक्यभेदः। न च प्रत्ययाभिहितभावनास्वरूपे यागस्वरूपमात्रमन्वेतीति वक्तुं युक्तम्, कारकाणामेव क्रियान्वयात्। तत्सिद्धं सोमस्य न यागे सामानाधिकरण्येन वैयधिकरण्येन वाऽन्वयः सम्भवतीति।

(१५) "ननु यजेतेत्यत्र प्रत्ययाभिहितभावनायाः करणाकाङ्क्षायां यथा यागः करणत्वेनान्वेति तथेतिकर्त्तव्यताकाङ्क्षायां सोमस्येतिकर्त्तव्यतात्वेन भावनायामेवान्वयोऽस्तु, किं [1]मत्वर्थलक्षणया" इति चेत्—

(१६) नैवम्। सोमेनेति तृतीयया करणत्ववाचिन्या सोमस्येतिकर्त्तव्यतात्वानभिधानात्। तत्र यदीतिकर्त्तव्यतात्वं [2]लक्षणयोच्यते ततो वरं सोमपद एव प्रकृतिभूते मत्वर्थलक्षणा। 'गुणे त्वन्याय्यकल्पनेति' न्यायात्[3] (९।३।१५)

(१७) अथ 'वेदो वा प्रायदर्शनात्' (३।३।५) इत्यधिकरणोक्तासंजातविरोधित्वन्यायेनान्त्ये प्रत्यय एव लक्षणेति चेत्,—तथाऽपि[4] सोमस्येतिकर्त्तव्यतात्वेना-

---

१ सोमेनेत्यस्य सोमवतेत्यर्थकरणेनेत्यर्थः।

२ अभेदलक्षणयेत्यर्थः।

३ जैमिनीयसूत्रे नवमाध्यायस्यतृतीयपादस्य पञ्चमाधिकरणानुसारेणाप्रधाने एव लक्षणादिकल्पना युक्ता। प्रकृते करणत्वस्येतिकर्तव्यतापेक्षयाऽप्राधान्यात् सोमपद एव लक्षणा न्याय्या॥

४ एतदधिकरणसिद्धान्तानुसारेणासञ्जातविरोधिनि प्रत्यय एव लक्षणां स्वीकृत्यापि शङ्कते तथाऽपीति। अनुत्पन्नविरोधितया प्रत्ययस्यैवान्तरङ्गत्वम् प्रथमोपस्थितिश्च

ज्ञाने काञ्चनमयः पर्वतो वह्निमानिति ज्ञानस्य वह्निव्याप्यधूमवान् काञ्चनमयःपर्वत इति ज्ञानस्य चानुपपत्तेः ।

पक्षे हेतुत्वेनाभिमताभावः स्वरूपासिद्धः । यथा ह्रदो धूमवान् वह्नेरित्यादौ । एतद् ज्ञानं परामर्शे प्रतिबन्धकम् ।

हेतुत्वेनाभिमते व्याप्त्यभावो व्याप्यत्वासिद्धः । धूमवान् वह्नेरित्यादौ । साध्ये साध्यतावच्छेदकाभावरूपसाध्याप्रसिद्धः । साधने साधनतावच्छेदकाभावरूपसाधनाप्रसिद्धिरपि व्याप्यत्वासिद्धिः । एतज्ज्ञानस्यापि व्याप्तिज्ञाने प्रतिबन्धकत्वात् ।

पक्षे साध्याभावो बाधः । तज्ज्ञानमनुमितौ विरोधि ।

ननु साध्यवदवृत्तित्वादिरूपासाधारणज्ञानवत् तद्व्याप्त्यज्ञानस्य व्याप्तिज्ञाने विरोधित्वात्तस्य हेत्वाभासत्वे च कथं हेत्वाभासानां पञ्चत्वम् । न च तत्तद्धेत्वाभासव्याप्यानां तत्तद्धेत्वाभासेऽन्तर्भावान्नाधिक्यमिति वाच्यम् । सत्प्रतिपक्षस्यापि बाधेऽन्तर्भावेण पञ्चविधत्वानुपपत्तेरिति चेत् ? न । बाधभिन्नहेत्वाभासव्याप्यस्योक्तलक्षणाक्रान्तस्य बाधभिन्नहेत्वाभासेऽन्तर्भावात् । उक्तलक्षणाक्रान्तस्येति विशेषणात् तत्प्रतिपक्षव्याप्यस्योक्तलक्षणानाक्रान्तस्य न हेत्वाभासत्वम् । बाधभिन्नत्वविशेषणाद्बाधव्याप्यसत्प्रतिपक्षस्य न बाधेऽन्तर्भावः ।

न चोक्तलक्षणाक्रान्तस्य तत्तद्धेत्वाभासव्याप्यस्य तद्धेत्वाभासेऽन्तर्भावात् सत्प्रतिपक्षस्य बाधेऽन्तर्भावेण हेत्वाभासचतुष्टमेवास्त्विति वाच्यम् । स्वतन्त्रस्य महर्षेरिच्छाया एव नियामकत्वात् । न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारस्तदसत्त्वे स्वरूपासिद्धिरिति वाच्यम् ।

उत्पत्तिकालावच्छिन्नघटो गन्धवान् पृथिवीत्वादित्यादौ पक्षतावच्छेदकावच्छेदेनानुमितौ बाधस्यैव विरोधित्वात् । यत्र सुखव्याप्यात्मत्ववानीश्वर इति परामर्शानन्तरं बाधान्नानुमितिस्तत्र बाधस्यैव हेत्वाभास वाच्च ।

नन्वीश्वरसद्भावे किं मानम् । न च क्षितिः सकर्तृका कार्यत्वात् घटवदित्यनुमानात्तत्सिद्धिरिति वाच्यम् । कुलालादिना सिद्धसाधनात् । न च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यकत्वेन नांशतः सिद्धसाधनमिति वाच्यम् । तत्तत्कार्यविशेषं प्रति तत्तत्कर्तुर्वैशिष्ट्यहेतुत्वस्या वश्यकत्वेन कार्यत्वावच्छिन्नं प्रति कर्तृत्वेन कारणत्वे मानाभावादितिचेत् । न । समवायेन पटत्वावच्छिन्नं प्रति विशिष्यतया कृतेर्हेतुत्वेन यत्र महापटनाशो वायुसंयोगप्रयोज्यस्तदनन्तरं खण्डपटोत्पत्तिस्तत्पटजनककृताश्रयस्येश्वरस्य सिद्धेरप्रत्यूहत्वात् । स पटः कृतिजन्यः पटत्वात्कुविन्दजन्यपटवदित्याहुः ।

परे तु कुविन्दादिकृतेः पटादिजनकत्वं न साक्षात् किं तु तन्त्वादिविलक्षणसंयोगसम्पादनेन । खण्डपटादावपि तत्सत्त्वेन कुविन्दादिजन्यत्वान्नोक्तरीत्येश्वरसिद्धिः किं त्वागमादेवेत्याहुः ।

इत्यनुमानपरिच्छेदः समाप्तः ॥

## अथोपमानं निरूप्यते ।

उपमितिकरणमुपमानम् । उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः । तत्करणं च सादृश्यादिविशिष्टे विशिष्यागृहीतशक्तिकपदवाच्यताज्ञानम् । तत्स्मृतिर्व्यापारः । गवयत्वादिविशिष्टे गवादिसादृश्यादिज्ञानं सहकारि गवयत्वादिविशिष्टविशेष्यकगवयादिपदवाच्यत्वप्रकारकोपमितौ समवायेन गवयत्वादिविशिष्टे गोसादृश्यादिज्ञानं गोसादृश्यादिविशिष्टे गवयादिपदवाच्यताज्ञानं च हेतुः । अत्राप्यव्यवहितोत्तरत्वं कार्यतावच्छेदके निवेश्यं तेनान्यसादृश्यज्ञानाद्गवये गवयपदवाच्यत्वोपमितौ न व्यभिचारः । न तु गोसदृशो गवयपदवाच्य इत्याकारा नापि गवयपदप्रवृत्तिनिमित्तगवयत्ववानित्याकारोपमितिः । समानप्रकारकशक्तिग्रहस्य पदार्थोपस्थितौ शाब्दबोधे च हेतुत्वेन तादृशशक्तिग्रहस्य गवय इत्याकारके शाब्दबोधेऽनुपयोगितापत्तेः । ननु गोसादृश्यज्ञानस्य द्रव्यत्वविशिष्टेऽपि सत्त्वात् द्रव्यत्वविशिष्टे गवयपदशक्यत्वग्रहापत्तिरिति चेन्न । पटादौ गवयपदाप्रयोगनिर्णयेन द्रव्यत्वस्य गवयपदशक्यतावच्छेदकत्वस्य बाधादेवाग्रहात् । इयं च नानुमितिः गवयत्वविशिष्टे गवयपदवाच्यव्याप्यवत्ताज्ञानस्याभावेऽपि जायमानत्वात् । न शाब्दबोधोऽपि । गवयो गवयपदवाच्य इत्याकारकशब्दस्याभावात् । सर्वाप्युपमितिः शक्तिग्राहिकेति प्राञ्चः ।

परे तु मुद्गपर्णसदृश्यौषधी विषहन्त्रीत्यतिदेशवाक्यजन्यज्ञानजन्याया उपमितेः शक्तिपरिच्छेदकत्वाभावः । किन्तुविषनाशजनकत्वपरिच्छेदकत्वं तथा च शक्तिविषयकत्वं प्रायश इति दिक् ।

इत्युपमानपरिच्छेदः ।

# अथ शब्दो निरूप्यते ।

शाब्दप्रमितिकरणं शब्दः । शाब्दत्वं च शाब्दयामीति प्रतीतिसाक्षिको जातिविशेषः । इदं च प्राचीनमतेन । वस्तुतोऽतीतानागतशब्दज्ञानाच्छाब्दबोधस्य जायमानत्वाच्छब्दज्ञानं करणम् । वृत्त्या तज्जन्यपदार्थोपस्थितिर्व्यापारः । योग्यतादिज्ञानं सहकारि ।

अपरे तु प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम् । अर्थज्ञानजन्यः शब्दः प्रमाणमित्युक्ते वह्निना सिञ्चेदिति वाक्ये वह्निकरणकः सेक इति भ्रमजन्येऽतिव्याप्तिरिति तत्त्वपदोपादानम् । तस्यार्थप्रमाजन्यत्वाभावात् । ब्राह्मणप्राणत्राणकारकमनृतं वक्तव्यमिति वेदवाक्यार्थतत्त्वज्ञानाधीनानृतवचनेऽतिव्याप्तिवारणाय प्रयोगहेतुभूतेति । प्रयोगहेतुभूतेत्यर्थविशेषणं प्रयोगजन्यज्ञानविषय इत्यर्थः । ननु वाक्यार्थज्ञानस्य विवक्षोपक्षीणत्वेन वाक्याहेतुत्वेऽपि संवादिवाक्ये ईश्वरज्ञानमादाय लक्षणासम्भवे विसंवादिवाक्ये स्वप्रतिपाद्यार्थज्ञानजन्यत्वमेव नास्तीति तत्त्वपदोपादानवैयर्थ्यमिति चेन्न । बाधितवाक्यार्थविषयकस्य बाधितवाक्येष्टसाधनताज्ञानस्य बाधितवाक्ये हेतुत्वात्तत्रातिव्याप्तिवारणाय तत्त्वपदोपादानादित्याहुः । तन्न । वह्निना पयसा सिञ्चतीति समूहालम्बनशाब्दज्ञानमादाय वह्निना सिञ्चतीत्यत्रातिव्याप्तेः । न च यद्विशेष्यकयत्प्रकारकशाब्दबोधत्वं स्वजन्यतावच्छेदकं तत्प्रकारकतद्विशेष्यकप्रमाजन्यत्वस्योक्तत्वान्नोक्तदोष इति वाच्यम् । घटादिवृत्तित्वेन ज्ञातपदानां तत्तज्ज्ञानानां वा घटादिशाब्दत्वस्यैव कार्यतावच्छेदकत्वे

नासम्भवात्। तत्तत्प्रकारकतत्तद्विशेष्यकशाब्दत्वस्य योग्यताज्ञानादेरेव कार्यतावच्छेदकत्वादिति दिक्।

यद्यपि संयोगादिशाब्दत्वं न संयोगादिवृत्तित्वेन ज्ञातपदज्ञानस्य कार्यतावच्छेदकं, संसर्गविधया संयोगादेः शाब्दबोधे व्यभिचारात्। तथापि सांसर्गिकविषयतान्यविषयताकशाब्दत्वं कार्यतावच्छेदकं द्रष्टव्यम्।

केचित्तु जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीप्रमा शाब्दप्रमा तत्करणत्वं शब्दप्रमालक्षणम्। प्रथमशून्यान्तं प्रत्यक्षानुमितिस्मृतीनां वारणाय, जातिशून्यत्वमनुभवत्वाव्यापकजातिशून्यत्वं जन्यपदधीशून्यत्वव्यभिचारिजातिशून्यत्वं चासम्भवि। तत्रानुभवत्वादीनां सत्त्वात्। पदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वं चानुमितावपि। अनुमितित्वस्येश्वरपदधीजन्यत्वाव्यभिचारात्। अतः समुदितमुपात्तम्। उपमितावतिव्याप्तिवारणाय द्वितीयशून्यान्तम्। जात्यादावतिव्याप्तिवारणाय धीपदम्। शाब्दभ्रमेऽतिव्याप्तिवारणाय प्रमापदं भ्रमभिन्नत्वपरमित्याहुः। तन्न। मुद्गपर्णसदृशौषधी विषहन्त्रीत्यतिदेशवाक्यार्थज्ञानजन्यायामियमौषधी विषहन्त्रीत्याद्युपमितावुपमितित्वस्य सत्त्वेन तस्य जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातित्वेन सत्यन्तेनैवोपमितिवारणसम्भवे विशेष्ये शून्यान्तवैयर्थ्यात्। किं चोपमितित्वस्योक्तोपमितौ सत्त्वेन पदविषयत्वस्य व्यभिचारितया पदविषयत्वाव्यभिचारिजात्यप्रसिद्ध्या संभवः। न चैकाक्षरनिघण्ट्वादिभिः सर्ववर्णानां शक्ततया श्रावणत्वस्य पदविषयत्वाभिचारितया नासम्भवित्वमिति वाच्यम्। ध्वनिसाक्षात्कारेऽपि श्राव-

णत्वसत्त्वेन तस्य पदविषयत्वव्यभिचारित्वात् । न चात्र पदपदं शब्दपरमिति वाच्यम् । तथापि वैयर्थ्यानुद्धारात् । किं च पूर्वदले पदस्थाने शब्दप्रवेशेनैवोपपत्तौ पदपर्यन्तं धावनानुपपत्तिः । अत एवेष्टापत्तिरपि निरस्तेति दिक् ।

ननु तथापि शब्दो न मानं यस्मिन् सत्यविलम्बेन प्रमा तदेव मानम् । न च शब्दे सति प्रमा । आकाङ्क्षादिज्ञानाभावेन प्रमाया अभावात् । अत्र प्रमितिकरणत्वाभावेन प्रमितिकरणत्वाभावस्य साध्यत्वान्न साध्याविशेष इति चेन्न । प्रमास्वरूपयोग्यकारणत्वाभावस्य हेतुत्वे स्वरूपासिद्धेः । आकाङ्क्षादिज्ञानासहकृतस्यापि शब्दस्यालोकासहकृतचक्षुरादिवत् प्रमास्वरूपयोग्यत्वात् । नापि प्रमाफलोपहितकारणत्वाभावेन हेतुना प्रमास्वरूपयोग्यकरणत्वाभावः साध्यः आलोकादिरहितचक्षुरादौ व्यभिचारात् । न च प्रमाफलोपहितकरणत्वाभाव एव तेन हेतुना साध्य इति वाच्यम् । आकाङ्क्षादिज्ञानासहकृतस्य शब्दस्य पक्षत्वे सिद्धसाधनात् । आलोकासहकृतचक्षुरादेरिव तादृशशब्दस्यापि नैयायिकैः प्रमाफलोपहितकरणत्वानङ्गीकारात् । आकाङ्क्षादिसहकृतस्य पक्षत्वे स्वरूपासिद्धेः । तादृशस्य प्रमाफलोपहितकारणत्वाङ्गीकारादिति दिक् ।

वैशेषिकास्तु चैत्रवाक्यादमुमर्थं प्रत्येमीति प्रत्ययादस्तु विशिष्टार्थप्रत्यायकत्वं शब्दस्य, न तु स्वातन्त्र्येण । स्वतन्त्रप्रमाणकल्पने गौरवात् । किन्तु अनुमानविधयैव । न च शब्दस्याकाशवृत्तित्वेन भूतलादिवृत्तिपदार्थव्याप्यत्वात् कथं तेनानुमानमिति वाच्यम् । भूतलं तात्पर्यविषयसंसर्गेण घटवत्तात्पर्यविषयीभूतसंसर्गेण घटपदेन योग्यतावद्भूतलपदस्मारितत्वादित्याद्यनुमानसम्भवात् । न चैवं

शाब्दयामीत्यनुभवसिद्धज्ञानस्यैतादृशानुमानजन्यत्वे घटः कर्मत्वमित्यादावपि कर्मत्वं घटीयं घटपदेन योग्यतावत्पदस्मारितत्वादित्याद्यनुमानस्य तत्रापि सम्भवेन तत्रापि तादृशज्ञानापत्तिः । इष्टापत्तावनुभवविरोध इति वाच्यम् । घटादिप्रकारककर्मत्वादिविशेष्यकशाब्दबोधात्मकानुमितिविशेषे घटादिपदोत्तरकर्मत्वादितत्तद्विभक्तिज्ञानजन्यकर्मत्वाद्युपस्थितेर्हेतुत्वात् । अतो घटमानयेत्यादौ घटादिविशेष्यकः कर्मत्वादिप्रकारको न बोधः । विभक्त्युपस्थाप्यकर्मत्वादिविशेष्यकतत्तत्प्रकारकशाब्दबोधे तत्तद्विशेषाणां हेतुत्वम् । परं त्वतिरिक्तप्रमाणकल्पने गौरवाल्लिङ्गविधयैव तत्र शाब्दस्य हेतुत्वाच्छाब्दत्वमनुमितित्वव्याप्यम् । न च तत्रानुमितित्वस्वीकारे व्याप्तिज्ञानकारणत्वस्य च स्वीकारे गौरवाद्विपरीतमेव गौरवमिति वाच्यम् । वह्न्यादिलौकिकप्रत्यक्षसामग्र्याः वन्ह्यनुमितौ वह्निशाब्दबोधे च प्रतिबन्धकत्वकल्पने गौरवापत्तिभिया शाब्दत्वस्यानुमितित्वव्याप्यत्वस्वीकारेण वह्न्याद्यनुमितित्वावच्छिन्न एव वह्निलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वकल्पनात् । किं च भवन्मते वह्न्यनुमितिशाब्दबोधसामग्र्योः परस्परं प्रतिबध्यप्रतिबन्धकभावकल्पने गौरवं, न मन्मते शाब्दबोधसामग्र्याऽनुमितेरिति वदन्ति तन्न । पर्वतादिविशेष्यकवह्न्यादिप्रकारकनिश्चयस्य वह्न्यादिप्रकारकपर्वतादिविशेष्यकाऽनुमितौ विरोधित्वम् । त्वन्मते तादृशनिश्चयेऽपि शाब्दबोधात्मकतादृशाऽनुमितेर्जायमानत्वेन शाब्दबोधान्यतादृशाऽनुमितौ तस्य प्रतिबन्धकत्वकल्पने गौरवापत्तेः। शाब्दबोधेऽप्यनुमितित्वसत्त्वादनुमिनोमीत्यनुव्यवसायापत्तेश्च । किं च यत्र विषयविशेषस्य नानुमितिः किं तु शाब्दबोध एव तत्र विषयविशे-

षशाब्दबोधे व्याप्तिज्ञानादेः कारणत्वकल्पने गौरवापत्तिः। अपि च घटात् पृथगितिशब्दात् घटावधिकपृथक्त्वप्रकारक-शुद्धाश्रयबोधोऽनुभवसिद्धः । न च त्वन्मते नुमानात्ता-दृशबोधः सम्भवति । आश्रयं पक्षीकृत्य पृथक्त्वसाधने-चाश्रयत्वप्रकारकोऽपि स्यान्न तु केवलपृथक्त्वप्रकारक एव । अपि च लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यत-द्वत्ताज्ञाने तदभावनिश्चयाभाव एव हेतुर्लाघवान्न तु योग्यताज्ञानमपि। तथा च योग्यताज्ञानं विनाऽपि शाब्द-बोधो न तु भवदभिमतानुमितिः। योग्यताविनाकृतहेतु-ज्ञानं तु व्यभिचारज्ञानदशायामपि शाब्दबोधस्यानुभवि-कत्वात् । किं च घटो नास्तीत्यादौ अनुयोगितासम्बन्धेन घटानुमितिस्त्वया वाच्या सा च न सम्भवति वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वेन सम्बन्धे व्या-प्त्यभावात् । सत्त्वे पि वा तादृशव्याप्तिज्ञानस्य कुत्रा-प्यनुमितिहेतुत्वाकल्पनात् । पर्वते वह्निमनुमिनोमीति-वदभावे घटमनुमिनोमीति प्रतीतेरभावात् । किं च शा-ब्दबोधस्यानुमितित्वे वह्निव्याप्याभाववान् पर्वतो वह्नि-मानिति शाब्दबोधो न स्यात् । तत्र वह्निव्याप्यवत्ता-धियो हेतुत्वात्तस्याश्च वह्निव्याप्याभावधीविरोधित्वादि-त्यादिकं द्रष्टव्यमिति दिक् ।

ननु यदि स्वातन्त्र्येण शब्दो मानं तदा यजेतेत्यादितः पामराणामर्थप्रत्ययः स्यादिति चेन्न । शब्दज्ञानस्य शाब्द-बोधे करणत्वेन वृत्तिज्ञानजन्यपदार्थोपस्थितेर्व्यापारत्वेन पामराणां यज्यादिपदे शक्तिलक्षणान्यतररूपवृत्तिज्ञाना-भावेन तेषां व्यापाराभावात् । शक्तिलक्षणयोः स्वरूपं त्वग्रे वक्ष्यामः ।

ननु तथापि घटः कर्मत्वमानयनं कृतिरित्यादितो-

ऽपि घटादिप्रकारककर्मत्वादिविशेष्यकबोधः स्यात्। शब्दज्ञानस्य वृत्तिज्ञानजन्यपदार्थोपस्थितेश्च सत्त्वादिति चेन्न। आकाङ्क्षायाः शाब्दबोधे कारणत्वाङ्गीकारात्। सा च न तात्पर्यविषयान्वयानुभवाभावः। घटः कर्मत्वमित्यादावपि तत्सत्त्वात्। नापि तदुच्चारणजन्यशाब्दबोधाभावः। अयमेति राज्ञः पुत्रः पुरुषोऽपसार्यतामित्यादौ राजपदार्थस्य पुत्रान्वयकाले पुरुषान्वयापत्तेः।

किं तु यत्पदं येन पदेन सह यादृशान्वयानुभवजनकं तस्य पदस्य तेन पदेन समभिव्याहारस्तादृशान्वयबोधे आकाङ्क्षा घटादिपदं कर्मत्वादिवाचकस्वोत्तरविभक्तिपदेनैव घटादिप्रकारककर्मत्वादिविशेष्यकान्वयबोधकं ततो घटादिपदस्य स्वोत्तरतादृशविभक्तिसमभिव्याहारस्तादृशबोधे आकाङ्क्षा। अत एव घटः कर्मत्वमित्यादितस्तादृशविभक्तिसमभिव्याहारस्तादृशबोधे आकाङ्क्षा। अत एव घटः कर्मत्वमित्यादितस्तादृशबोधो न। घटप्रकारककर्मत्वविशेष्यकशाब्दबोधे घटपदोत्तरकर्मत्ववृत्तिविभक्तिरूपायाः कर्मत्ववृत्तित्वेन तादृशविभक्तिज्ञानरूपाया वा काङ्क्षाया अभावात्। इयं च स्वरूपसती हेतुर्न तु तज्ज्ञानम्। घटः कर्मत्वमित्यत्र कर्मत्वपदे द्वितीयात्वभ्रमेण तादृशबोधापत्तेः। एवमानयनादिप्रकारकवृत्यादिविशेष्यकशाब्दबोधे आनयनादिबोधकधातूत्तरः कृत्यादिबोधक आख्यात आकाङ्क्षा। अत एवानयनं कृतिरित्यादितो न तादृशबोधः।

न च द्वितीयायामगृहीतशक्तिकस्य घटमित्यानुपूर्वीकं शृण्वतो घटः कर्मत्वमित्यादितः पदार्थोपस्थितौ घटप्रकारककर्मत्वविशेष्यकशाब्दबोधापत्तिस्तादृशसमभिव्यवहारस्य सत्त्वादिति वाच्यम्। घटप्रकारककर्मत्वविशेष्यकबोधे घटपदोत्तरविभक्त्या वृत्तिजन्यकर्मत्वोपस्थिति-

रूपासत्तिविरहेणैव तादृशधाभावात् । अत एवासत्तिरपि शाब्दबोधे कारणम् । न चैवमासत्तिविरहेणैव घटः कर्मत्वमित्यादौ तादृशबोधाभावे उक्ताकाङ्क्षायाः शाब्दबोधे हेतुत्वे मानाभाव इति वाच्यम् । घटमित्यत्र कालिकसम्बन्धेन घटप्रकारककर्मत्वविशेष्यकबोधवारणाय घटप्रकारकनिरूपितत्वसंसर्गककर्मत्वविशेष्यकबोधे उक्ताकाङ्क्षाया हेतुत्वं वाच्यम् । तथा च घटः कर्मत्वमित्यतस्तादृशाकाङ्क्षाया अभावेन निरूपितत्वसंसर्गकघटप्रकारककर्मत्वविशेष्यकबोधाभावेऽपि कालिकसम्बन्धेन घटप्रकारककर्मत्वविशेष्यकबोधापत्तिवारणाय सामान्यतो घटप्रकारककर्मत्वविशेष्यकबोधे घटपदोत्तरविभक्तिजन्यकर्मत्वोपस्थितिरूपासत्तेर्हेतुत्वान्न घटः कर्मत्वमित्यतस्तादृशो बोधः । एवं विभक्त्यर्थकर्मत्वादिप्रकारकधात्वर्थविशेष्यकबोधे कर्मत्वादिवृत्तविभक्त्युत्तरधातुरूपाकाङ्क्षायास्तादृशधातुजन्योपस्थितिरूपाया आसत्तेश्च हेतुत्वम् ।

न चैवं सति घटं तण्डुलं जानाति पचतीत्यत्र तण्डुलकर्मत्वपाकादेः परस्परमन्वयबोधो न स्यात् । कर्मत्ववृत्तविभक्त्यव्यवहितोत्तररूपाकाङ्क्षादेरभावादिति वाच्यम् । तत्र योजनयाऽव्यवधानं सम्पाद्य वाक्यान्तरादेव बोध इति केचित् ।

अन्ये तु विशेष्यतया कर्मत्वादिप्रकारकबोधे धातुजन्योपस्थितेर्धातोश्च हेतुत्वं न त्वव्यवधानस्याकाङ्क्षासत्त्योः प्रवेश इत्याहुः ।

परे तु अव्यवधानं च तदर्थं स्वार्थान्वयबोधं जनयत्विति तात्पर्यविषयत्वम् । तच्च तत्राप्यस्तीत्याहुः ।

नन्वयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्रा-

जपदस्य पुरुषपदेन सहान्वयापत्तिरिति चेन्न । राजपदार्थस्य पुरुषपदार्थान्वये तात्पर्याभावेन तात्पर्यज्ञानाभावात् । सति तात्पर्यज्ञाने त्विष्टत्वाच्च । इतोऽपि तात्पर्यज्ञानस्यापि शाब्दबोधे हेतुत्वम् । अत एव तात्पर्याभावेऽपि तज्ज्ञानाद्बोधः । न चैवमेकशाब्दबोधोत्तरं पुनस्तथैवाव्यवधानेन शाब्दबोधापत्तिरिति वाच्यम् । तत्तन्मुख्यविशेष्यकतत्प्रकारकशाब्दबोधे तादृशशाब्दबोधेच्छाविरहविशिष्टतादृशशाब्दबोधस्य प्रतिबन्धकत्वात् । मुख्यविशेष्यकेति विशेषणाद्रक्तो दण्ड इति शाब्दबोधोत्तरं रक्तदण्डवान् पुरुष इति शाब्दबोधेऽपि नक्षतिरिति दिक् ।

ननु यस्य घटः कर्मत्वमित्यादिवाक्ये व्युत्पत्तिः तस्य ततोऽन्वयबोधो न स्यादिति चेन्न । तादृशशाब्दबोधे क्लृप्तकारणभावेनेष्टत्वात् ।

केचित्तु घटप्रकारककर्मत्वविशेष्यकबोधे घटपदोत्तरकर्मत्ववृत्तविभक्तिस्तज्जन्यकर्मत्वोपस्थितिश्च कारणमिति ज्ञानवतस्तादृशबोधे घटपदोत्तरकर्मत्ववृत्तविभक्तेस्तज्जन्यकर्मत्वोपस्थितेश्च कारणत्वाद् घटः कर्मत्वमित्यादौ व्युत्पन्नस्य घटः कर्मत्वमित्यादितो घटप्रकारककर्मत्वविशेष्यकबोधेऽपि न क्षतिरिति वदन्ति ।

वन्हिना सिञ्चेदित्यादिनान्वयबोधाभावाद्योग्यताज्ञानं शाब्दबोधे कारणम् । सा च येन सम्बन्धेन यत्र यस्यान्वयस्तत्र तस्य संसर्गः । तेन सम्बन्धेन तद्वत्त्वं वा । तस्यास्संशयनिश्चयसाधारणज्ञानत्वेन ज्ञानं हेतुः । अत एव तद्भ्रमेणाप्यन्वयबोधः ।

न च तत्तद्विशेष्यकतत्तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावनिश्चयस्य तत्तल्लौकिकप्रत्यक्षान्यपित्तादिदोषाजन्यतत्तद्विशेष्यकत्वेन तेन सम्बन्धेन तत्तत्प्रकारकज्ञाने

प्रतिबन्धकत्वकल्पनात्, तदभावादेवायोग्यवाक्याच्छाब्दबोधानुत्पत्तौ किं योग्यताज्ञानकारणत्वेनेति वाच्यम् । यत्र यस्य शाब्दबोध एव जातः, अयोग्यताज्ञाननिश्चये सति न जातस्तत्र तस्य शाब्दबोधे योग्यताज्ञानस्यैव लाघवेन हेतुत्वात् । तदभावनिश्चयाभावकारणत्वेन गौरवापत्तेः । यत्र च यस्याभावनिश्चयो न जातस्तत्र तच्छाब्दबोधे न योग्यताज्ञानमपि हेतुः, गौरवात् । घटमानयेत्यादावयोग्यतानिश्चयाभावस्यैव हेतुत्वं न तु योग्यताज्ञानस्य गौरवात् ।

न चाभिधेयत्वप्रकारकशाब्दबोधे तदभावनिश्चयाप्रसिद्ध्या कथमयोग्यत्वनिश्चयाभावस्य हेतुतेति वाच्यम् । अभिधेयत्वप्रतियोगिकत्वेन ज्ञानाभावनिश्चयाभावस्यैव हेतुत्वात् । एकपदार्थेऽपरपदर्थनिष्ठात्यन्ताभावाप्रतियोगित्व-अपरपदार्थनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वरूपयोग्यताज्ञानं न हेतुः, गौरवात्। अत एव सजातीयान्वयदर्शनमन्वयप्रयोजकरूपवत्त्वं वा न योग्यता । येन केनापि सजातीयेऽन्वयदर्शनस्यायोग्येऽपि सत्त्वात् । पदार्थतावच्छेदकरूपेण सजातीयेऽन्वयदर्शनस्य तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिशाब्दबोधे सत्त्वाच्च । अन्वयप्रयोजकरूपवत्त्वस्य द्रवद्रव्यत्वस्य सेकानन्वयिनोऽग्नेः सत्त्वेन तदभिप्रायके जलेन सिञ्चतीत्ययोग्यवाक्येऽपि सत्त्वाच्चेत्याहुः ।

अन्ये तु तत्तत्प्रकारकशाब्दप्रमात्वावच्छिन्ने तत्तत्प्रकारकप्रमाया एवं तत्प्रकारकशाब्दप्रमात्वावच्छिन्ने तत्तत्प्रकारकाप्रमाया योग्यताऽप्रमारूपाया निश्चयसंशयसाधारण्या हेतुत्वं वाच्यम् । अन्यथा योग्यतानिश्चयाभावदशायां बाधितवाक्याच्छाब्दप्रमापत्तेश्च । एवं च सिद्धे विशिष्य हेतुत्वे यद्विशेषयोरिति न्यायात्तत्तत्प्रकारकशा-

ब्दत्वावच्छिन्नं प्रति तत्तत्प्रकारकज्ञानस्य हेतुत्वम् । न चैवं योग्यतासंशयाच्छाब्दो नित्योऽनित्यो वेति वाक्यात् संशयात्मकशाब्दबोधापत्तिरिति वाच्यम् । अनायत्या तदभावशब्दसामाग्र्यास्तत्तादृशशाब्दबोधेविरोधित्वकल्पएवं वैपरीत्येऽपि । सामग्री तु पदार्थोपस्थित्यादिकारणरूपानात् । विशिष्य ग्राह्या न तु फलोपहिता । यद्वा विप्रतिपत्तिवाक्यादाहत्य संशयस्वीकारात् संशयात्मकशाब्दबोधोऽपि इष्ट एवेति वदन्ति । तन्न । तत्तत्प्रकारकशाब्दप्रमात्वावच्छिन्ने सामान्यतस्तत्तत्प्रमात्वावच्छिन्ने क्लृप्तकारणतायास्तत्तद्विशेष्यसम्बन्धविशेषणाद्युपस्थितेस्तत्त्वेन हेतुत्वमस्तु लाघवान्न तु योग्यताज्ञानस्य गौरवादित्याहुः ।

केचित्तु शाब्दबोधे न योग्यताज्ञानं हेतुः नाप्ययोग्यतानिश्चयो विरोधी । अत एव प्रहसनस्थले कलहादौ चायोग्यतानिश्चयसत्त्वेऽपि शाब्दबोधः । तेन च दुःखाद्युत्पत्तिः । न च तत्र शब्दात्पदार्थस्मृतिमात्रं स्मृत्या च मानसज्ञानादेव दुःखाद्युत्पत्तिरिति वाच्यम् । परकीयशब्दं विनापि स्वीयतादृशमानसज्ञानादपि दुःखाद्युत्पत्त्यापत्तेरित्याहुः । तन्न । कलहादिवद्धास्यस्थलेऽपि तादृशशब्दस्य श्रवणेन दुःखोत्पत्त्यापत्तेः । अत एव दैववशसंपन्नतादृशशब्दश्रवणान्न दुःखम् । अत एव तादृशार्थे तात्पर्यज्ञानं दुःखहेतुरित्यपि परास्तम् ॥

वस्तुतस्तु तत्र द्वेष्टृत्वज्ञानेऽपि तादृशशब्दोच्चारणाभावे तथा दुःखानुत्पत्तेर्न तज्ज्ञानं दुःखजनकम् अपि तु मदीयदुःखोत्पादोद्देश्यकदुःखानुकूलव्यापारत्वेन तदीयशब्दज्ञानस्य दुःखहेतुत्वम् । अत एव स्वीयविलक्षणदुःखोद्देश्यकव्यापारत्वेन शब्दादेर्ज्ञानात् । स्वीयविलक्षणदुःखोत्पत्तिरिति दिक् ।

आसत्तिः पदाव्यवधानम् । अत एव गिरिरग्निमान् भुक्तं देवदत्तेनेत्यासन्नम् । आसत्तिज्ञानं शाब्दबोधे हेतुः। अत एव तद्भ्रमाच्छाब्दबोधः । न चैवं काष्ठैरोदनं पचति देवदत्त इत्यत्र काष्ठैरित्यस्य पाकेऽनासन्नतापत्तिरोदनमित्यनेन व्यवधानादिति वाच्यम् । प्रकृतान्वयबोधाननुगुणव्यवधानाभावस्य विवक्षितत्वात् । ओदनपदं च काष्ठकरणकौदनकर्मकपाककृतिमान् देवदत्त इति बोधेऽनुगुणमेव। न चैवं श्लोकादेरन्वयबोधो न स्यात् । व्यवहितत्वेन प्रत्यक्षसिद्धपदेषु अव्यवहितत्वेन भ्रमासम्भवादिति वाच्यम् । तत्र श्लोकस्य पदान्नान्वयबोधः । किं तु योजनावाक्यान्तरादेवेति केचित् । तन्न । आकाङ्क्षादिसत्त्वेऽर्थतात्पर्यज्ञाने च सति व्यवहितादप्यन्वयबोधान्न तज्ज्ञानं हेतुर्मानाभावादिति । अत एवाव्यहितपदज्ञानतात्पर्यमासत्तिः तच्चैतत्पदमेतत्पदाऽव्यहितोत्तरमभिसंदधातु इत्यभिसंधापयितुरिच्छा । अत एव मौनिश्लोके वक्तुरभावेऽपि अभिसंधापयितृसत्त्वादासत्तिः । शुकादिवाक्ये भगवत्तात्पर्यसत्त्वादिति परास्तम् । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्राकाङ्क्षादिसत्त्वेऽर्थतात्पर्यज्ञाने सति व्यवहितत्वेन निश्चितेभ्योऽपि शाब्दबोधात्, वक्तुरीश्वरस्यापि तादृशाभिसंधानाभावेन तादृशेच्छाभावेन शाब्दबोधाभावापत्तेश्च।

वस्तुतस्तु समूहालम्बनरूपपदज्ञानाच्छाब्दबोधात् पदज्ञानोत्तरत्वेनैतत्पदज्ञानाव्यवहितोत्तरत्वेन वा परपदज्ञानाभावान्न तादृशज्ञानेतात्पर्यमासत्तिः । अत एवैतत्पदज्ञानाव्यवहितापरपदज्ञानतात्पर्यमपि नासत्तिरिति द्रष्टव्यम् ।

कश्चित्तु वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः स्व-

रूपसती कारणमित्याह। तन्न। तस्याः पदज्ञानव्यापारत्वेन कारणत्वाविवादात्। आसन्नानासन्नविभागाभावापत्तेश्च। किन्तु घटप्रकारककर्मत्वविशेष्यकबोधे घटपदोत्तरकर्मत्ववृत्तिविभक्तिजन्यकर्मत्वाद्युपस्थितिर्हेतुः। सा च स्वरूपसती हेतुः। आकाङ्क्षा तु घटपदोत्तरद्वितीया रूपा। अनयोः पृथक् पृथक् कारणत्वं प्रागेवोक्तम्।

वस्तुतस्तु प्रागुक्ताकाङ्क्षासत्त्वयोः कार्यतावच्छेदकयोः विनिगमनाविरहः घटमानयेत्यत्र कालिकसम्बन्धेन घटप्रकारकशाब्दबोधे तात्पर्यसत्त्वे इष्टापत्तौ चाकाङ्क्षायाः हेतुत्वं मृग्यमिति दिक्।

ननु घटमानयेत्यादौ कथं तावत् क्रियाकारकादिघटितवाक्यार्थबोधः। तावत्पदज्ञानानां तावत्पदार्थस्मृतीनां च नष्टत्वादिति चेन्न। तावत्पदानां समूहालम्बनस्मरण आकांक्षादिविषयकतावत्पदार्थस्मरणात्, द्वितीयक्षणोत्पन्नाकाङ्क्षादिज्ञानसहिताद्वा पदार्थस्मरणात् द्वितीयक्षणे तृतीयक्षणे वा तावत्पदार्थानामन्वबोधस्वीकारात्। अयमेव खले कपोतन्यायेनान्वयबोधः। तदुक्तम्।

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति।

तथैव सर्वे युगपत्पदार्थाःपरस्परेणान्वयिनो भवन्ति।

युगपदन्वयित्वं च। क्वचिद्विशेष्ये विशेषणं तत्र च विशेषणान्तरस्य क्वचिदेकविशेष्ये सर्वविशेषणानाम्। नन्वेतावतापि राजपुरप्रवेशन्यायेन जायमानो विशिष्टवैशिष्ट्यावगाहिशाब्दबोधो न स्यात्। न चेष्टापत्तिः। तस्याप्यनुभवसिद्धत्वात्। अत एव

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥

पीश्वरावतारत्वं श्रुत्यादिषूच्यते । तेषामपि ते लीलाऽवतारा एव । अत एव "न तस्य कार्यं करणं च विद्यत"इत्यादिश्रुत्या, "अनादिमत्परं ब्रह्म सर्वदेहविवर्जितमि"ति स्मृत्या, चेश्वरस्य कार्यकारणाख्यशरीरद्वयप्रतिषेधोपपत्तिरिति दिक् । ननु नित्यमुक्तस्य नित्यतृप्तस्य पुरुषार्थाभावात्प्रवृत्त्यनुपपत्तिरिति चेन्न । तत्प्रवृत्तेर्नित्यतया निमित्तानपेक्षत्वात् । किं च तस्येश्वरस्य स्वोपकाररूपात्मानुग्रहाभावेऽपि दैनंदिनप्रलयरू कल्पप्रलयप्राकृतप्रलयरूपमहाप्रलयेष्वपि स्वकारणगामित्वरूपसंसारवतः पुरुषान् ज्ञानधर्मोपदेशेनोद्धरिष्यामीत्येव भूतानुग्रहरूपप्रयोजनेन प्रवृत्त्युपपत्तेः । तृणारणिमणिन्यायेन स्वेष्टसाधनताज्ञानपरानुग्रहयोर्विजातीयेच्छां प्रति फलबलेन हेतुतायाः सिद्धेः । तज्ज्ञानेच्छाप्रवृत्तेर्नित्यत्वं प्रवाहानादित्वानन्तत्वाभ्यामेवेति बोध्यम् । न चैवमपि "भक्तानेवानुगृह्णामी"ति वैषम्यमीश्वरस्येति वाच्यम् । अग्नेरुष्णत्वस्वाभाव्यवद् विशुद्धसत्त्वस्य भक्तवशतास्वाभाव्यस्यापर्यनुयोज्यत्वात् । रागद्वेषाभ्यामेव वैषम्यं भवति न प्रवृत्तिमात्रेण । एवं कर्मवशतास्वभावं च तत् । किं च दुःखबहुललोकसर्जनमपि परस्परदर्शनेन तेषां वैराग्यदार्ढ्यायेति दिक् । उक्तं च पञ्चशिखाचार्यैः । "आदिविद्वान् स्वयंभूर्भगवान् विष्णुर्योगबलेन स्वनिर्मितचित्तं प्रविश्य कपिलाख्यपरमर्षिर्भूत्वा कारुण्याज्जिज्ञासमानायासुरये साङ्ख्यसूत्राख्यं तन्त्रं प्रोवाचे"ति, अनेन स्वार्थाभावेऽपि परार्था प्रवृत्तिर्दर्शिता ॥

ईश्वरगतं विशेषान्तरमाह ।

**स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥ २६ ॥**

स एष ईश्वरः पूर्वेषां ब्रह्मविष्णुप्रभृतीनामपि, अपिना

अन्येषां जीवानां, प्रधानस्य, च गुरुः पिता, ऽन्तर्यामिविधया ज्ञानचक्षुःप्रदश्च प्रवर्त्तकश्च कालेनानवच्छेदादित्यर्थः । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इतिश्रुतेः । न च प्रकृतिस्वातन्त्र्यक्षतिः । अस्य निमित्तकारणत्वेन तत्स्वातन्त्र्याविघातकतया वक्ष्यमाणत्वात् । पूर्वे हि गुरवो ब्रह्मादयः कालेन द्विपरार्धादिना परिच्छिद्यन्ते, अस्य च परिच्छेदार्थं कालो न प्रवर्त्ततेऽन ईदृशं विना तेषां तत्प्रवृत्तेश्चासम्भवादसौ तेषामपि गुरुः, यथा चास्य वर्त्तमानसर्गस्यादौ तद्गुरुत्वेन प्रकर्षगत्या ज्ञानोत्कर्षेण स्वतः सिद्धस्तथाऽतिक्रान्तसर्गादावपि प्रत्येतव्यम् । अत्रेश्वरस्य तत्पितृत्वान्तर्यामित्वरूपगुरुत्वोक्त्या जीवानामपीश्वर आत्मेति सूचितं यो हि यस्याधिष्ठाता स तस्यात्मेति दृष्टं, यथा सूर्यश्चक्षुषो, जीवो वा देहस्य । एवं सर्वजीवपितृत्वेन पितापुत्रवज्जीवब्रह्मणोरंशांशिभावोऽपि सूचितः । "अग्निविस्फुलिङ्गवच्च", "जीवोऽसौ खात्पृथग् बुद्ध" इति स्मृतेश्च । अभेदश्च दुग्धजलयोरिवाविभागः । स च स्वरूपसम्बन्धविशेष आधारतावल्लक्षणानन्यत्वं वा । तत्त्वं तूक्तमेवेति दिक् ॥

अथ तत्प्रणिधानाङ्गं मन्त्रमाह ।

**तस्य वाचकः प्रणवः ॥ २७ ॥**

तस्येश्वरस्य प्रणवो वाचकः । एवमेवेश्वरेण सङ्केतकरणादित्यर्थः ।

अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः ।

तस्योङ्कारः स्मृतो नाम तेनाहूतः प्रसीदतीतिस्मृतेः ।

अदृष्टेति, अश्रुतेत्यपि बोध्यम् । भावो भक्तिः । मनस्तुल्यकारणोपाधिरित्यर्थः । एवं चेश्वरः प्रणवस्य वाच्य इति फलितम् ।

नन्वीदृशः सङ्केतोऽयुक्तो वाचकत्वस्य सङ्केतकृतत्वात् । न च स्वाभाविकं वाचकत्वं सङ्केतेन बोध्यते । यच्च तन्नास्ति तच्च सङ्केतेनाव्यङ्ग्यत्वापत्तेः । अविद्यमानघटस्य दीपेनाव्यञ्जनात्तस्मात्सङ्केतकृत एव वाच्यवाचकभावः शक्तिविशेषरूप इति चेन्न । दीपस्य प्रकाशवत्स्थित एवास्य वाच्यस्य वाचकेन सहाविभागरूपः सम्बन्धस्तदेव वाचकत्वम् । अन्योन्याध्यासरूप ईश्वरस्य सङ्केतस्त्वनादिवासनासिद्धं स्थितमेव तं प्रकाशयति । यथा विद्यमान एवं पितापुत्रयोः सम्बन्धोऽयमस्य पिताऽयमस्य पुत्र इति सङ्केतेन प्रकाश्यते । यद्यपि शब्दार्थविषयेऽन्योन्याध्यासरूपं सङ्केतं तृतीये वक्ष्यति भाष्यकृत्तथाऽपि राहोः शिर इति वदयमस्य वाचकोऽयमस्य वाच्य इति च सङ्केत इत्यत्रत्यभाष्याल्लभ्यते । अनेन शब्दार्थयोर्भेदाभेदौ दर्शितौ । सङ्केत एव वाचकत्वमिति तु न युक्तं जनकत्वादेरपीश्वरसङ्केतरूपत्वापत्तेः । एवं च योऽयं शब्दः सोऽर्थ इत्यध्यासविषयस्तन्मूलं चाविभागरूपं तादात्म्यमेव शक्तिरिति बोध्यम् । यच्च चेश्वरसङ्केतः स वाच्य इतरो लक्ष्य इत्यादिव्यवस्थाः । प्रलये च शब्देषु प्रधानसाम्यमुपगतेष्वपि संस्कारवशात्सर्गान्तरे पूर्ववच्छक्तियुक्तानामाविर्भावाद्वाच्यवाचकशक्त्यपेक्षः सङ्केत ईश्वरेणापि पूर्ववत्तथैव क्रियत इति न कदाचिदीश्वरसङ्केतभेदेनार्थभेदः प्रणवस्य । ननु प्रलये नाशे नित्यः शब्दार्थसम्बन्ध इत्यसङ्गतं स्यादिति चेन्न । व्यवहाररूपसम्प्रतिपत्तिनित्यतया नित्यः शब्दार्थसम्बन्ध इत्यागमिनां प्रतिज्ञासत्त्वादिति दिक् ॥

एवं पूर्वोक्तसङ्केतेन विज्ञातवाच्यवाचकभावस्य योगिनः प्रणिधानं दर्शयति ॥

तज्जपस्तदर्थभावनम् ॥ २८ ॥

प्रणवस्य जपस्तेन सह तदभिधेयस्येश्वरस्य ध्यानरूपं भावनं तत्प्रणिधानमित्यर्थः । अर्थभावनस्य सङ्केतग्रहाभिव्यङ्ग्यश- क्तिज्ञानं विनाऽसम्भवात्पूर्वं सङ्केतो दर्शितः । प्रणवार्थो गारुड उक्तः ।

व्यक्ताव्यक्तौ च पुरुषस्तिस्रो मात्राः प्रकीर्तिताः ।
अर्धमात्रा परं ब्रह्म ज्ञेयमध्यात्मचिन्तकैः ॥

इति । प्रणवार्थचिन्तनं च द्वेधा । एकं स्वप्रकृतितत्कार्येभ्यो विविक्ते केवले ब्रह्मचैतन्य आत्मत्वचिन्तनमेतच्छास्त्रप्रतिपाद्यम् । अपरं चांशांशिकार्यकारणशक्तिशक्तिमदादिभिस्तप्रायः पिण्डादविभा- गलक्षणेनाभेदेन 'अहं ब्रह्म' "सर्वं खलु ब्रह्मे"त्यादिरूपम् । तदुक्तम् ।

एकः समस्तं यदिहास्ति किञ्चि-
त्तदच्युतो, नास्ति परं ततोऽन्यत् ॥
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम् ॥

इति । आद्यं 'त्वथात आदेशो नेति नेती'त्यादिश्रुतिमूल- कम् । केचित्तु ।

प्रकृतिं पुरुषे स्थाप्य पुरुषं ब्रह्मणि न्यसेत् ।
अहं ब्रह्म परं ज्योतिः प्रसङ्ख्याय विमुच्यते ॥

इति स्मृतिः । तत्र प्रकृतेः पुरुषे स्थापनं तद्वदनारम्भकत्व- सम्पादनं, पुरुषस्य च ब्रह्मणि न्यासस्तत्र लयो विलापनरूपः । अनेन च प्रकृत्यादिवज्जीवानामनात्मत्वं लभ्यते ।

तत्त्वैः सम्पादितं भुङ्क्ते पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशात्सोऽपि जडात्मा कथ्यते बुधैः ॥

इति मात्स्योक्तेश्च । तस्मात्प्रकृतिपुरुषौ विलाप्य यच्छिष्टं ब्रह्म तस्मिन्नहम्भाववचनान्न जीवे मुख्योऽहंशब्द इत्याहुः । तादृशप्रणिधानस्य किं फलमिति चेदस्य योगिनः प्रणवं जपतस्तदर्थं भावयतश्चेश्वरैकाग्रं चित्तं भवति, ततः परमात्मसाक्षात्कारादिकमिति गृहाण । तदुक्तं विष्णुपुराणे ।

स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ।

इति । योगजपयोरेकदासम्भवाद्योगस्याद्यन्तयोर्व्युत्थानकाले जप उक्तः । स्वाध्यायः प्रणवः परमात्मप्रकाशनमप्यात्मत्वेनैवेति । अत्र के चित् । एवं च जीवात्मतत्त्वज्ञानाद्बुद्धिपर्यन्तमभिमाननिवृत्तिवत्परमात्मतत्त्वज्ञानाज्जीवेष्वप्यभिमाननिवृत्तिः पञ्चविंशतितत्त्वविलापनेसोऽहमित्येवाधिष्ठानसाक्षात्कारात् । एवं च जीवानां व्यावहारिकमात्मत्वं, पारमार्थिकं तु क्षेत्रज्ञत्वरूपमीश्वरस्यैव जीवानां परतन्त्रत्वाद्धर्म्माधर्म्माद्यज्ञातृत्वाच्च । चितिशक्तिसत्तामात्रेण तु बुद्ध्याद्यपेक्षं गौणमात्मत्वम् । यथा हिरण्यगर्भादीनामीश्वरत्वं, तच्च बन्धमोक्षादिभागितया व्यवहारगोचरतया च व्यावहारिकमेव । एवमहं–शब्दोऽपि परमात्मन्येव मुख्यो न तु जीवे । तस्य स्वातन्त्र्याभावेन स्वातन्त्र्येण प्रयुक्तात्मत्वादिरूपस्याहमादिप्रवृत्तिनिमित्तस्य तत्राभावात् । यद्यपि स मुख्य आत्मा न भवति, तथाऽपि तज्ज्ञानाद्धर्म्माधर्म्मरागादिनिवृत्तिरूपो मोक्षो भवत्येव । एवञ्च व्यवहारपरमार्थभेदान्नानात्मतैकात्मतावादौ श्रुत्यादिषु दृश्यमानावविरुद्धावेवेत्याहुः ।

ईश्वरप्रणिधानस्य मुख्योपायत्वं दर्शयितुमन्यदप्यस्य द्वारा-थक्यं भवतीत्याह ।

**ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ २९ ॥**

तत ईश्वरप्रणिधानात् । ये तावदन्तराया व्याधिप्रभृतय-स्तेऽस्य न भवन्ति स्वतो नोत्पद्यन्त एवेत्यर्थः । "तस्य ह न देवाश्च नाभूत्या ईशते आत्मा येषां सम्भवती"ति श्रुतेः । प्रत्यक्चेतनस्य जीवस्य यत्स्वरूपं निर्दुःखत्वादि तात्त्विकं तस्याधिगमो दर्शनमपि भवतीत्यर्थः । यद्यपि 'प्रत्यक् प्रशान्तं भगवच्छब्दसञ्ज्ञ'मित्यादौ प्रति-वस्तु अञ्चतीति व्युत्पत्त्या ईश्वरेऽपि प्रत्यक्छब्दो दृश्यते, तथाऽप्यत्र प्रतिकूलमञ्चतीति व्युत्पत्त्या जीवपरः । अन्यप्रणिधानेनान्यसाक्षात्का-रोऽदृष्टद्वारा बोध्यः । किञ्च यथैवेश्वरः पुरुषश्चेतनः पापपुण्यवर्जि-तत्वरूपशुद्धिमान् निर्दुःखत्वरूपप्रसन्नत्ववान्केवलचिन्मात्रो जात्या-द्युभोगराहित्यरूपानुपसर्गत्ववांस्तथाऽयं बुद्धिवृत्तिप्रतिबिम्बग्राहित्वाद् बुद्धेः प्रतिसंवेद्यपि साक्षात्तदसम्बन्धात्स्वतस्तादृश इत्येवंप्रकारेण तदधिगमात्सदृशानुचिन्तनस्य सदृशान्तरसाक्षात्कारोपयोगिताया दर्श-नात् । यथैकदर्शनाभ्यासस्तत्सदृगर्थशास्त्रान्तरज्ञानोपयोगी दृष्टः ।

ननु केऽन्तराया इत्युच्यन्त इति चेत्, ये चित्तस्य विक्षेपका इति गृहाण ।

अथ किंस्वरूपास्ते कियन्तश्चेत्याकाङ्क्षायामाह ।

**व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्श-नालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरा-याः ॥ ३० ॥**

एते नव सूक्ष्मकालानाकलनात्तदुत्थदुःखगोचरवृत्तिभिस्तन्नि-

वृत्त्युपापगोचरवृत्तिभिर्वा सह भवन्ति, एषामभावे चैताश्चित्तवृत्तयो न भवन्तीत्यतश्चित्तविक्षेपका योगान्तरायास्तत्प्रतिबन्धका इत्यर्थः। विक्षेपश्चानेकवृत्तिकत्वम् । तत्र व्याधिर्धातूनां वातपित्तकफाना, माहारपरिणामात्मकानां रसानां, चक्षुरादीनां करणानां, च विसदृशभावः । स्त्यानं चित्तस्य योगानुष्ठानाक्षमत्वरूपाकर्मण्यता । संशयः गुरुशास्त्रोक्तं ज्ञानसाधनं तथा स्यान्न वेत्युभयकोटिस्पृग् ज्ञानम् । प्रमादः समाधिसाधनानामननुसन्धानरूपभावनम् । आलस्यं कफादिकृतकायगुरुत्वेन तमःकृतचित्तगुरुत्वेन च समाधिसाधनेष्वप्रवृत्तिः । अविरतिश्चित्तविषयसम्प्रयोगात्मा तत्सन्निकर्षजन्याभिलाषरूपो गर्धः । भ्रान्तिदर्शनं गुर्वाद्युक्तार्थविपरीतार्थनिश्चयः । यद्यपि संशयोऽप्यतद्रूपप्रतिष्ठत्वाद् भ्रान्तिरेव तथाऽप्युभयकोटिस्पर्शरूपावान्तरविशेषविवक्षया पृथगुक्तः । अलब्धभूमिकत्वं साधनानुष्ठाने वक्ष्यमाणमधुमत्याद्यन्यतमभूमेरप्यलाभः । अनवस्थितत्वं भूमिलाभेऽपि चित्तस्य ततो भ्रंशः । ननु तल्लाभोत्तरं भ्रंशेऽपि का क्षतिरिति चेन्न । समाधेर्ध्येयसाक्षात्कारपर्यन्तत्वरूपप्रतिलम्भपर्यन्तं तदवस्थानापेक्षणात् ।

आरूढयोगोऽपि निपात्यतेऽधः सङ्गेन योगी किमुताल्पसिद्धि'रिति स्मृतेः । एते चित्तविक्षेपा नव योगमला इति योगप्रतिपक्षा इति योगान्तराया इति च तान्त्रिकैरुच्यन्ते ।

एषां दुःखादिरूपयोगान्तरायान्तरहेतुत्वमप्याह ।

**दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ॥ ३१ ॥**

प्रतिकूलवेदनीयं दुःखमाध्यात्मिकमाधिभौतिकमाधिदैविकं च । तत्राद्यं व्याध्यादिजं कामादिजं च । द्वितीयं व्याघ्राद्युत्थम् । तृतीयं शीतोष्णाद्युत्थम् । किं च येनाभिहताः प्राणिनस्तदुपघाताय

यतन्ते तद् दुःखमिति तत्सामान्यलक्षणम् । दौर्मनस्यमिच्छाऽभिघातेन मनसश्चाञ्चल्यम् । अङ्गकम्पोऽङ्गमेजयत्वम् । पुरुषप्रयत्नं विना स्वयमेव प्राणो यद् बाह्यं वायुमाचामत्यतिशयेन स श्वासो, ऽयं समाध्यङ्गरेचकविरोधी । यच्च कोष्ठ्यमुदरस्थं वायुं बहिः करोति स प्रश्वासो, ऽयं तदङ्गपूरकविरोधी । एते विक्षेपसहभुवो व्याध्यादिविक्षेपोद्भवाः । यतो विक्षिप्तचित्तस्यैते भवन्ति विक्षेपनिवृत्तौ समाहितचित्तस्य न भवन्ति, अत इत्यर्थः ।

एतेऽन्तराया ईश्वरप्रणिधानरहितेनापि योगिनाऽभ्यासवैराग्याभ्यां निरस्यास्तत्राभ्यासविषयमाह ।

**तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥**

तस्य विक्षेपस्य प्रतिषेधार्थमेकं स्थूलादि यत्किञ्चित्तत्त्वं तदालम्बनं चित्तमभ्यसेत्पुनः पुनः कुर्यादित्यर्थः । मिश्रास्तु उक्तस्यैवोपसंहारः, एकतत्त्वशब्देन प्रकृतत्वादीश्वरः अत एव भाष्येऽभ्यासविषयमुपसंहरन्नित्युक्तमित्याहुः । ननु वैनाशिकैश्चित्तं क्षणिकं स्वीक्रियते । तथाहि प्रत्यर्थनियतमर्थादर्थान्तरं न गच्छति तादृशो यः प्रत्ययः निराधारवृत्तिमात्रं तन्मात्रं चित्तं क्षणिकं चेत्ति । तस्य मते सर्वस्यैव चित्तस्यैकाग्रत्वादुक्तविक्षिप्तचित्ताभावादेकाग्रत्वार्थोपदेशानां वैयर्थ्यमिति चेन्न । एवं हि तेषामपि स्वशिष्येभ्यः स्वशास्त्रेषु समाध्युपदेशवैफल्यापत्तेः । यदि पुनरिदं सर्वतः प्रत्याहृत्यैकत्रार्थे समाधीयते स्थाप्यते, तदा भवत्येकाग्रमिति समाध्युपदेशस्य साफल्यं स्यात्तदा न प्रत्यर्थनियतं, न च सदृशप्रत्ययप्रवाहरूपतैव चित्तस्यैकाग्र्यं तत्प्रवाहमध्ये च विसदृशत्वं विक्षेप इति वाच्यम् । एवमपि क्षणिकत्वाच्चित्तस्यैकस्याभावेनाश्रयाभावादेकाग्रता-

ऽनुपपत्तेः । नन्वतीतानागतवर्त्तमानासु स्वसदृशप्रत्ययव्यक्तिषु चित्वादिवद्व्यासज्यवृत्तिरेकाग्रता भवत्विति चेन्न । असमानकालिकासु व्यासज्यवृत्तेरसम्भवात् । क्षणिकवादे सामान्यधर्म्माभावेन सादृश्यस्य दुर्वचत्वाच्च । न च प्रवाहांशप्रत्येकव्यक्तिधर्म्मोऽस्त्विति वाच्यम् । तस्यांशस्य सदृशप्रत्ययप्रवाहान्तःपातित्वे विसदृशप्रत्ययप्रवाहान्तःपातित्वे वा प्रत्यर्थनियत्वेनैकाग्रतैवेति विक्षिप्तचित्तानुपपत्त्यैकाग्रताऽऽधानानुपपत्तेस्तदवस्थत्वात् । किञ्च स्वभावभिन्नत्वेन त्वयाऽभ्युपगतानां प्रत्ययानां निराधारत्वादेकचित्तानाश्रितत्वे कथमन्यप्रत्ययदृष्टस्यान्यः स्मर्त्ता भवेत् । तन्मते चित्तातिरिक्तात्माभावात् कथं वाऽन्यप्रत्ययोपार्जितकर्म्मणामन्य उपभोक्ता भवेत् । संस्काराऽदृष्टदोषादीनामाधाराभावेनासम्भवाच्च । न च निराधारा एव ते सन्तु एकसन्तानोत्पन्नत्वेनानुभवसंस्कारस्मृत्यादीनां हेतुहेतुमद्भावेनोक्तदोषाभावादिति वाच्यम् । गोमयं पायसं गव्यत्वादिति वदस्या युक्तेराभासतरत्वात् । एकसन्तानीयत्वहेतोरसिद्धेः सन्तानस्यैकतानिर्वाहकजात्यनभ्युपगमात् । ननु स्वभावात्तत्सन्तानान्तर्गतेन केन चिदनुभूतं तत्सन्तानान्तर्गत एव कश्चित्स्मरति स्वभावस्यापर्यनुयोज्यत्वादिति चेदेवं सत्यस्य बौद्धस्यात्मविषयकानुभवापलापः । योऽहमद्राक्षं सोऽहं स्पृशामि, योऽहमस्प्राक्षं सोऽहं पश्यामीतिप्रत्यये योऽहमिति प्रत्ययः स सर्वस्य दर्शनस्पर्शनादिरूपप्रत्ययस्यान्योन्यं भेदे सत्यपि प्रत्ययिनि धर्मिण्यभेदकारतयाऽनुभवसिद्धः । तव चायमेकप्रत्ययव्यक्तिमात्रगोचर, अतोऽभेदाकारोऽयं प्रत्ययस्तव मतेऽत्यन्तभिन्नेषु क्षणिकेषु चित्तेषु विषयतया वर्त्तमान एकं प्रत्ययिनं साधारणं न विषयीकुर्यात् । सर्वप्रत्ययाननुगतधर्मिणः स्थिरचित्तस्यानभ्युपगमात् । अस्ति चायमभेदाकारो सोऽहमिति प्रत्यभिज्ञात्मा प्रत्ययस्त-

वापि स्वानुभवग्राह्योऽसौ नापलपनीयः । ननु यत्सत् तत् क्षणिक-मित्यनुमानबाधितोऽयं प्रत्यय इति चेन्न । प्रत्यक्षसाधितार्थस्य तर्कादिशून्यप्रमाणान्तरैरनभिभवात् । प्रमाणान्तराणां तदुपजीव्यत्वात् । शङ्खः पीत इति प्रत्यक्षं तु तर्कयोगेन बलवताऽनुमानेन बाध्यते देहाद्यात्मताप्रत्यक्षमपि निर्णीतप्रामाण्येन सन्दिग्धप्रामाण्यतया दुर्बलं बाध्यते । स्थिरात्मस्वीकर्त्रास्तिकमतेऽपि प्रागुक्तात्स्मृतिसंस्कारयोरेकाश्रयतानियमात्स्थिरैकचित्तसिद्धिः तस्मादेकमनेकार्थमवस्थितं च चित्तमत एव वक्ष्यमाणपरिकर्मोपदेशः सङ्गच्छत इति दिक् ।

परिकर्मणां किं स्वरूपं किं वा फलं तत्राह ।

**मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥ ३३ ॥**

प्रसादनं स्थितिनिबन्धनमिति वक्ष्यमाणतृतीयसूत्रस्थेनान्वयः, निबन्धनत्वं स्थितिहेतुश्रद्धाऽऽद्यप्रतिबन्धद्वारा स्थित्यभ्रंशहेतुत्वं सुखादिशब्दाश्च लक्षणया, सुखताऽऽदिवाचिनः धर्मधर्म्यभेदाद्वा, भावनोत्पादनम् । प्रसादनं समाधिप्रतिलम्भकरागद्वेषाधर्मादिमलापसारणम् । तत्र सर्वप्राणिषु सुखभोगयुक्तेषु मैत्रीं सौहार्दमुत्पादयते येनेर्ष्याकालुष्यं निवर्तते, दुःखितेषु निरुपाधिपरदुःखप्रहाणेच्छारूपां करुणां भावयेत् येन परापकारचिकीर्षाकालुष्यं निवर्तते, पुण्यात्मकेषु प्रीतिरूपां मुदितां येनासूयाकालुष्यं निवर्तते, पापशीलेषु औदासीन्यरूपामुपेक्षां येनामर्षकालुष्यं निवर्तते, एवंप्रकारैरेतदुत्पादयतः पापासंभिन्नत्वात् शुक्लो धर्म उपजायते, ततो रजस्तमःक्षये निर्मलत्वाख्यप्रसादवत् चित्तं वक्ष्यमाणेभ्य उपायेभ्य एकाग्रं स्थितिपदं योगाभ्रंशयोग्यतारूपं स्थैर्यं लभत इत्यर्थः ।

प्रसादस्यैव साधनान्तरमाह ।

**प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३४ ॥**

वाशब्दोऽप्यर्थे । आभ्यामपि चित्तस्य प्रसादनं कुर्यादित्यर्थः । कोष्ठस्य वायोर्नासिकापुटयोरन्यतरेण योगशास्त्रोक्तसूक्ष्मसंचारकप्रयत्नविशेषाद्रेचनाख्यवमनरूपं प्रच्छर्दनं, ततः पूरणानन्तरं कुम्भकरूपप्राणायामाख्यं विधारणं, ताभ्यां वा प्रसादद्वारा मनसः स्थितिं संपादयेदिति ।

इन्द्रियाणां बलं प्राणास्तेषां यत्नेन निग्रहात् ।
विक्षेपहेतवोऽन्याणां दह्यन्ते दोषराशयः ॥

इति स्मृतिः । अत्र यमादिनिरपेक्ष एव प्राणायामो योगसाधनतयोत्तमाधिकारिणं प्रत्युक्तः, द्वितीये च मन्दाधिकारिणं प्रति यमादिसंहित्येन स वक्ष्यत इत्यपौनरुक्त्यम् । केचित्वनेन सूत्रेण रेचककुम्भकद्वयरूप एव प्राणायाम उक्त इत्याहुः ।

प्रसादापेक्षया स्थितिनिबन्धनं परिकर्मान्तरमाह ।

**विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ॥ ३५ ॥**

प्रकृष्टा वृत्तिः प्रवृत्तिः साक्षात्काररूपा, विषया गन्धादयः पञ्च, तद्वती तद्विषया सा स्वसाधनादुत्पन्ना स्वाविषयेष्वपि विवेकपर्यन्तेषु श्रद्धाऽद्यप्रतिबन्धहेतुतया स्थितिप्रयोजिका भवतीत्यर्थः । वाशब्दोऽत्रापि समुच्चये । मनश्चित्तं तथा हि नासिकाऽग्रे धारणां कुर्वतो योगिनो यो दिव्यगन्धसाक्षात्कारोऽल्पेनैव कालेन भवति सा गन्धप्रवृत्तिः । एवं जिह्वाऽग्रे दिव्यरससंवित् । तालुनि दिव्यरूपसंवित् । जिह्वामध्ये दिव्यस्पर्शसंवित् । जिह्वामूले दिव्यशब्दसंविद् इत्येताः

प्रवृत्तय उत्पन्नाश्चित्तं संस्कारद्वाराऽतिसूक्ष्मेष्वर्थान्तरेषु दृढस्थिति योग्यं कुर्वन्ति शास्त्रीयेऽर्थे संशयं च निराकुर्वन्ति एतच्चागमात्प्रत्येतव्यं न युक्तितः । यद्यपि तैस्तैः शास्त्रैः स्वानुमानैराचार्योपदेशैश्च ज्ञातमर्थतत्त्वं निर्णीतमेव भवतीति न तत्र संशयः तेषां परमार्थभूततत्त्वप्रतिपादनसामर्थ्यात् तथाऽपि यावच्छास्त्रार्थैकदेशः कश्चित्स्वकरणैश्चक्षुरादिभिर्न साक्षात् क्रियते तावत्सर्वशास्त्रादि व्याजोक्तिवत् सन्दिग्धतात्पर्यकं भवतीति सूक्ष्मेष्वपवर्गादिषु निश्चयात्मिकां दृढां बुद्धिं न जनयति तात्पर्यसन्देहान्निर्णीतेष्वर्थेषु संशयो भवति अतः शास्त्रानुमानाचार्योपदेशावधृतेऽर्थे संशयापसारणरूपोपोद्बलनार्थमवश्यं कश्चिदर्थविशेषः प्रत्यक्षः कार्यः तदुपदिष्टार्थैकदेशस्य च प्रत्यक्षत्वे सति सर्वमपवर्गपर्यन्तं सूक्ष्ममपि इदमित्थमेवेति विश्वस्यते । निश्चयाख्यश्रद्धोत्पादनार्थमेवेदं परिकर्मोपदिश्यत इत्यावश्यकमेतदनुष्ठानं योगस्य श्रद्धामूलत्वात् । किं च समाधौ जायमाने सत्त्वपुरुषान्यतासाक्षात्कारे वैराग्यादिद्वारोपकारिकाश्चैताः प्रवृत्तयः । तथा हि अव्यवस्थितवृत्तिषु तत्तद्गन्धादिप्रवृत्त्या तेषां दोषदर्शनात् तत्तद्विषयकवशीकारसंज्ञावैराग्ये जाते विक्षेपह्रासात् तस्य तस्योत्तरोत्तरभूमिरूपस्यार्थस्य साक्षात्काराय चित्तं समर्थं भवति यतस्तद्वैराग्ये श्रद्धावीर्यस्मृतिसमाधयोऽस्य विक्षेपाख्यप्रतिबन्धनिवृत्त्या पूर्णा भवन्ति । एवं चन्द्रादित्यग्रहमणिप्रदीपरश्म्यादिषु प्रवृत्तिरपि रूपप्रवृत्तिवद्विषयवत्येव बोध्येति दिक् ।

चित्तस्थैर्यनिबन्धनं परिकर्मान्तरमाह ।

**विशोका वा ज्योतिष्मती ॥ ३६ ॥**

प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धिनीति वर्तते यतो विगतशोकाऽतो वक्ष्यमाणा ज्योतिष्मती श्रेष्ठः स्थितिहेतुरित्यर्थः सा

द्विविधा तत्राद्या ज्योतिष्मती यथा हृदयपुण्डरीके आलम्बने चित्तं धारयतो या बुद्धिसंवित् तत्साक्षात्कारः सा यतो बुद्धिरूपं सत्त्वप्रकर्षेण भास्वरं स्वपरप्रकाशकमाकाशवद्विभु च तत्र बुद्धौ निर्मलैकाग्र्याद् या बुद्धिविषया प्रवृत्तिः सा सूर्येन्दुमणिप्रभ सदृशाकारेण विकल्पते विशेषेणोत्पद्यतेऽतो विषयस्य ज्योतिष्मत्त्वेन तद्विषयप्रवृत्तिरपि ज्योतिष्मती प्रकाशरूपा । अत्रेयं प्रक्रिया । उदरोरसोर्मध्येऽधोमुखमष्टदलं पद्मं तद्रेचकप्राणायामेनोर्ध्वमुखं कृत्वा तत्रालम्बने चित्तं धारयेत् तन्मध्ये हि सूर्यमण्डलमकारो जागरितस्थानं, तदूर्ध्वं चन्द्रमण्डलमुकारः स्वप्नस्थानं, तदूर्ध्वं वह्निमण्डलं मकारः सुषुप्ति स्थानं, तदूर्ध्वं ब्रह्मव्योमात्मकं नादस्तुरीयस्थानं यमर्धमात्रेति योगिनः तत्कर्णिकायां वष्वग्व्यापिशाखासहस्रवत्यां मनोवहनाड्या मूलं तिष्ठति यस्या ऊर्ध्वमुखी एकशाखा सुषुम्नाख्यान्तरसूर्यादिमण्डलमध्यगतया च शाखारूपया ब्रह्मनाड्या बाह्यान्यपि सूर्यादिमण्डलानि प्रोतानि सैव मनोवहा नाडी चित्तस्थानं तस्यां धारणातः चित्तसाक्षात्कारो भवति । द्वितीया यथा आत्मतत्त्वरूपास्मितायां निर्विशेषसामान्यरूपास्मिभावे विविक्तचिन्मात्ररूपे पुरुषे समापन्नं तद्रूपतापन्नं चित्तं तद्रूपापन्नत्वात् । निस्तरङ्गमहोदधिकल्पं शान्तं शोकादिजक्षोभरहितम्, अनन्तं सर्वतोऽनावृतमन्याकारशून्यतयाऽस्मीत्येतावन्मात्राकारतारूपास्मिताभावं न चैतावतैव कृतार्थं परवैराग्यार्थंतदभ्यासापेक्षणात् । एषा च स्वस्मिन् परमात्मनि च चित्तस्थितिहेतुत्वात् पूर्वतो विशिष्टा यत्रेदं पूर्वाचार्यैरुक्तं तं सूक्ष्मतमं श्रवणमननाभ्यामवधार्यास्मीत्येतावन्मात्राकारेण साक्षात्करोतीति एषाऽप्यात्मनश्चिज्ज्योतिर्मयत्वाज्ज्योतिष्मती । एषा द्वयी चित्तरूपविषयवती, अस्मितामात्रा, च विशोका ज्योतिष्मतीत्युच्यते शास्त्रकृद्भिः । आभ्यां

च योगिनश्चित्तं स्थितियोग्यतां प्राप्नोति, न चाद्या विषयवतीति पूर्वसूत्रेण सङ्गृहीतागन्धादिपञ्चक एव विषयशब्दस्य मुख्यत्वात् तत्रास्मितायां विशोकात्वं साक्षादेव, तरति शोकमात्मविदिति श्रुतेः बुद्धिसंविदस्तु सङ्कल्पसिद्ध्या विवेकख्यातिद्वारा वा तत्त्वं बोध्यम् ॥

स्थितिकारणं परिकर्मान्तरमाह ।

**वीतरागविषयं वा चित्तम् ॥ ३७ ॥**

वीतरागाणां सनकादीनां यच्चित्तं तद्रूपालम्बनेनोपरक्तं तद्धारणया तदाकारताऽऽपन्नं योगिचित्तं विरक्तं तदालम्बनान्तरेऽपि स्थितियोग्यतां लभत इत्यर्थः ।

तादृशमेव परिकर्मान्तरमाह ।

**स्वप्ननिद्राज्ञानालम्बनं वा ॥ ३८ ॥**

स्वप्नज्ञानालम्बनं प्रपञ्चे स्वप्नदृष्टिमच्चित्तं दीर्घस्वप्नमिमं विद्धीतिस्मृतेः । निद्राज्ञानालम्बनं सर्वजीवेष्वनात्मज्ञेषु सुषुप्तदृष्टिमच्चित्तं, तत्राद्यं क्षणभङ्गुरत्वज्ञानेन वैराग्यद्वारा चित्तस्थैर्यहेतुः, द्वितीयेनापि व्यवहारेषु मिथ्यात्वबुद्ध्या वैराग्यमिति दिक् ॥

परिकर्मान्तरमाह ।

**यथाऽभिमतध्यानाद्वा ॥ ३९ ॥**

यदेवाभिमतं हरिहरमूर्त्यादि तदेव ध्यायेत् तत्र ध्यानाल्लब्धस्थितिकं चित्तम् । अन्यत्रापि विवेकपर्यन्तसूक्ष्मविषयेषु विनैव साधनान्तरं स्थितियोग्यतां लभत इत्यर्थः ॥

परिकर्मनिष्पत्तेर्लक्षणमाह ।

**परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥**

अस्य परिकर्मितचेतसः परमं महत्त्वं येषां पुरुषादीनां ते

परममहत्त्वाः योगी सूक्ष्मेऽल्पपरिमाणे निविशमानस्यावतिष्ठमानस्य चित्तस्य परमाण्वन्तस्थितिपदं लभते एवं स्थूले महत्परिमाणे नविशमानस्य चित्तस्य परममहत्त्वान्तं स्थितिपदं लभते योगी ।एवं स्थूलसूक्ष्मरूपं कोटिद्वयं संचरतोऽस्य चित्तस्य योऽप्रतिघातः केनाप्यप्रतिबद्धता तद्रूपो दोषदर्शनजन्यवशीकारसंज्ञारूपाद्वैराग्यात्पर उत्कृष्टो वशीकार इत्यर्थः । तद्रूपवैराग्यानन्तरमपि चितस्याभ्यासकृतवशीकारापेक्षणात् तन्निकृष्टं तेन परेण वशीकारेण परिपूर्णं समाप्तस्थैर्यसाधनाकाङ्क्षं योगिनश्चित्तं न पुनरभ्याससाध्यं परिकर्मपरिष्कारमपेक्षतेऽत एतदुत्कृष्टं चित्तपरिष्कारकत्वाच्चैषां परिकर्मेति संज्ञा ॥

अथैतैः प्रकारैर्लब्धस्थितिकस्य चित्तस्य किं स्वरूपं किंविषया वा समापत्तिस्तत्राह ॥

**क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनतासमापत्तिः ॥ ४१ ॥**

क्षीणवृत्तेरपगतप्रत्ययान्तरस्य समापत्तेरपि प्रत्ययरूपवृत्तित्वात् समापत्तिः सम्यगालम्बनाकारत्वापत्तिः प्रत्यक्षवृत्तिरिति यावत् तत्स्थतदञ्जनता तेषु स्थितत्वेन या तदञ्जनता सम्यक् तदाकारता सा समापत्तिशब्दवाच्येत्यर्थः एवं च संप्रज्ञातफलीभूत प्रज्ञा समापत्तिरित्युच्यते क्षीणवृत्तेरित्यस्य चायमाशयः स्वतः सर्वार्थसाक्षात्कारसमर्थं यदि चित्तं विषयान्तरव्यासङ्गरूपदोषेण प्रतिबद्धं भवति अतो वृत्त्यन्तररूपप्रतिबन्धस्य निःशेषतोऽपगमे स्वत एव ध्येयवस्तुसाक्षात्कारस्तद्रूपापत्त्याख्यो भवति अभिजातस्य निर्मलस्य मणेरिवेति दृष्टान्तः । यथा स्फटिको जपाकुसुमाद्युपाधिभेदात् तत्प्रतिबन्धग्राहितया तद्रूपोपरक्तः स उपाधितुल्याकारतयैव प्रतिभासते तथा ग्राह्येणालम्बनेनोपरक्तं चित्तं ग्राह्यगतविशेषाकारत्वरूपग्राह्यस-

स्यादेतत् । क्षणिको ऽपि भावो ऽर्थक्रियाजननस्वभाव: । न चेदमत्रैव जननत्वाऽभावश्चेत् किमस्य सहकारिभिरित्युत्पन्नमात्रमेव बीजमङ्कुरं जनयेत् । ननूत्पन्नो बीजक्षण: समर्थो जनयत्येव, कुत: पुनस्तस्योत्पत्ति: पूर्वस्माद्बीजक्षणात् ? तर्हि तत्सन्तानपतितानां सर्वेषां बीजत्वाऽविशेषादङ्कुरजननसामर्थ्यमिति लब्धजन्ममात्रमेव बीजमङ्कुरं जनयेत् । मैवम् । पूर्वं क्षितिबीजपवनादिक्षणसमवधानोत्पन्नाऽतिशयवत्तदुत्तरोत्तरक्षणपरम्परालब्धजन्मा ऽन्योपि क्षणसमर्थ: समर्थक्षित्यादिक्षणसहकृतो ऽनपेक्ष एवाऽङ्कुरं जनयति । न चाऽन्यक्षित्यादिसहभुवस्तैस्तदनपेक्षितस्यापि तैर्विना कार्यकरणं, तदेकसामर्थ्याऽधीनस्य तदभावे ऽभावात् । न चाऽसहकारिता क्षित्यादीनां सिद्धेति नोदकतापवद्व्यवस्थितोत्कर्षता । तत्राऽत्यन्ततापेन तदाश्रयाणामपामुपरतेरस्थिराश्रयत्वात् । नापि लङ्घनवद्व्यवस्थितोत्कर्षम् । यत्नाहितस्य भागस्योत्पत्तौ तत्र पुनर्यत्नापेक्षत्वात् । न हि तत्र पूर्वसिद्धाऽऽलम्बनमात्रा सती[1] लङ्घनान्तराय कल्पते, अपि त्वसौ विनष्टा । लङ्घनान्तरं तु पूर्वलङ्घनवद्बलप्रयत्नाभ्यां प्रवर्तते। सर्वधर्मनैरात्म्यप्रकाशनस्वभावस्तु चेतस: स्वरसवाहीति न पुन: प्रयत्नमपेक्षते। तस्य हि पूर्वभावनाऽऽहिताऽधिकाऽधिकोत्तरविशेषप्रतिलम्भेनाऽत्यन्तप्रकर्षोत्पत्तेराश्रयस्वभावभूतत्वात् । इह प्रकर्षविशेषणं लङ्घनं तु न देहस्वभाव:। सत्यप्याश्रये पुनर्यत्नापेक्षत्वात् । एवमुदकतापेपि नोदकस्वभाव: । तद्विनाशित्वात् । भावनां वा पक्षीकृत्योच्यते । तथा हि । या या ऽऽदरनैरन्तर्यदीर्घकालाऽऽसेविता भावना सा सर्वा करतलाऽमलकायमाना ऽऽलम्बननिर्भासविज्ञानफला । तद्यथा कामातुरस्य कामिनीभावना विशेषणक्षयवती कामिनीविषयविज्ञानविशदाभताहेतु: ।

१ लम्बनमात्मनश्च २ पु० पा० ।

तथा च समस्तवस्तुनैरात्म्यभावनाविशेषप्रचयशालिनीति स्वभावहेतुः। मनोविज्ञानं हि विशदाभमियमीदृशी भावना स्वाऽन्वयव्यतिरेकावप्यनुकारयन्ती कारणान्तरनिरपेक्षा कामातुरादिषु दृष्टा। तद्यदि सत्यामप्यस्यां विशदाभत्वं समस्तवस्तुनैरात्म्यग्राहिणो विज्ञानस्य नोपजायेत, कारणान्तरसापेक्षत्वमस्याः प्रसज्येत। तथा च दृष्टं निरपेक्षत्वं भावनाया व्यापकं व्याहन्येतेति विपक्षे व्यापकविरुद्धस्य सापेक्षत्वस्य दर्शनाद्धीवैशद्यजननाद् व्यापकविरुद्धोपलब्ध्या 'व्यावर्तमाना भावना वैशद्यजन्मनियता ऽवशिष्यतइति भावनाविशेषाऽनुविधानात्स्फुटत्वोत्पादस्य न भावनामात्रानुबन्धितेति स्वभावहेतुः, हेतोश्च समग्रस्य कार्योत्पादनसामर्थ्याऽनुमानम्। तथा च सत्यामेव तस्यां सामग्र्यामप्रतिबन्धायां नियमेन फलमुत्पद्यतइति न प्राप्तिकफलसम्भवविषयत्वं सामग्र्या निश्चीयतइति निश्चयान्नाऽनुमानत्वविरोधः। न चाऽसिद्धो हेतुः। सम्भवति हि भावना विशेषप्रचयवती सांसारिकदुःखनिमित्ताद्बिभ्यतां श्रावकबोधिप्रतिनियतानां निखिलदुःखनिमित्तशमनी कारुणिकानां च सकलानेव दुःखिन आत्मतया ऽभ्युपगच्छतां दानादिपारमिताभ्यासतनूकृतान्तर्मलानां नेद्दृग्भावनाप्रकर्षजन्मविज्ञानमभ्रान्तं च। प्रमाणसिद्धवस्तुविषयत्वात्। अविकल्पश्च विशदाभत्वात्। समस्तवस्तुविषयं च तन्नैरात्म्यसाक्षात्काररूपत्वात्। न च नैरात्म्यं नाम भावेभ्यो भिन्नं किं चिदस्ति, यदप्रत्यक्षगोचरेष्वपि तेषु प्रत्यक्षगोचरं स्यात्। "विकल्पारूढं च स्फुटं नाऽविकल्प्य विज्ञानं प्रतिभासि। तदेतद्भावनाधेयवैशद्यं सद्विशदभावात्मनैव स्यात्। तथा च विश्वनैरात्म्यवैशद्यंविश्ववैशद्यमेवेति। यदिदं सार्वज्ञं तद्भूतार्थभावनाया एवाऽऽदरनैरन्तर्यदीर्घकालाऽऽसेवितायाः सर्वाऽऽकारसकलवस्तुसाक्षात्कारहेतोः सम्भवाद·

भावनामयमपि विज्ञानं श्रुताऽनुमितविषयम् । अकस्माद्भावनायोगादागमाऽनुमानपरतन्त्रम् । पूर्वज्ञानभूतार्थत्वविपर्ययाऽनुविधानात् सापेक्षत्वादप्रमाणम् ।

सिद्धो हेत्वभावो न फलाऽभावसिद्धावङ्गमित्याशङ्क्याह–भावनामयमपि विज्ञानं श्रुताऽनुमितविषयम् । कुतः ? अकस्माद्भावनाया अयोगात् । आगमाऽनुमानपरतन्त्रं तद्विषय एव साक्षाद्वृत्त्या प्रकर्षमनुभवेद् न तदविषय इति पूर्वेण सम्बन्धः । न च तदपि प्रकर्षवत्प्रमाणमित्याह–पूर्वज्ञानभूतार्थत्वविपर्ययाऽनुविधानाच्च साऽपेक्षत्वादप्रमाणम् ।

एतदत्राथैतत्त्वं विवक्षितमाचार्यस्य । सत्यं, श्रुताऽनुमानगोचरचारिणी भावना विशदाभविज्ञानहेतुरिति नाऽवजानीमहे, किं तु यद्विषयजातं तदेव विशदप्रतिपत्तिगोचरो, न जातु रूपभावनाप्रकर्षो रसविषयविज्ञानवैशद्याय कल्पते । ननु न विषयान्तरवैशद्यहेतुभावं भावनायाः सङ्गिरामहे, किं तु श्रुताऽनुमानविषयवैशद्यहेतुतामेव । तद्विषयं च समस्तवस्तुनैरात्म्यमिति तद्भावनाप्रकर्षः समस्तवस्तुनैरात्म्यं विशदयन् समस्तवस्तुविशदतामन्तरेण तदनुपपत्तेः समस्तवस्तुवैशद्यमावहतीत्[1]युक्तम् ।

सत्यमुक्तम् । अयुक्तं तु तत् । तथा हि । नाऽऽगमाऽनुमानगोचरत्वं निरात्मनां वस्तुभेदानां परमार्थसताम् । न हि ते एतेषामन्यनिवृत्तिमात्रावगाहिनी परमार्थसत्स्वलक्षणं गोचरयितुमर्हतः । नापि तद्विषया भावना तद्ग्राह्यमपि स्वलक्षणं तदध्यवसेयतया तद्विषय इति तद्योनिरपि भावना तद्विषयेति तत्प्रकर्षवैशद्यहेतुरिति चेत् । न ।

१ आदधाति । २ पु॰ पा ।

तदवसेयस्यापि परमार्थसत्त्वाऽभावात् । तथा हि । यदनुमानेन गृह्यते यच्चाऽवसीयते द्वे अप्यन्यनिवृत्ती न वस्तुनी । स्वलक्षणाऽवगाहित्वे अभिलापसंसर्गयोग्यप्रतिभासत्वाऽनुपपत्तेः ।

मा भूत्तयोः स्वलक्षणं विषयः । तत्प्रभावभावनाप्रकर्षजन्मनस्तु विशदाभस्याऽचेतसो भविष्यति कामिनीविकल्पप्रभवभावनाप्रकर्षादिव कामाऽऽतुरस्य कामिनीस्वलक्षणसाक्षात्कारः । करिकुम्भकठोरकुचकलशे हरिणशावलोचने चम्पकदलाऽवदातगात्रलते लावण्यसरसि निरन्तरलग्नललितदोःकन्दलीमूलमालिङ्गनमङ्गने प्रेयसितरे प्रयच्छ सञ्जीवय पतितोऽस्मि तव चरणनलिनयोरिति वचनकायचेष्टयोरुपलब्धेः । अस्ति च विकल्पाऽविकल्पयोः कथं चित्समानविषयतेति नाऽतिप्रसङ्ग इति । सत्यम् । सम्भवत्यनुभवो न पुनरस्याऽर्थे प्रामाण्यसम्भवः । अतदुत्पत्तेः । अतदात्मनस्तदव्यभिचारनियमाऽयोगादतादात्म्यं चाऽर्थस्य विज्ञानादतिरेकात् अनतिरेके ऽपि च विज्ञानानामन्योन्यस्य भेदतादात्म्यात् एकस्य विज्ञानस्येतरविज्ञानवेदनाऽनुपपत्तेः । विज्ञानस्वलक्षणैकत्वाऽभ्युपगमे तन्नित्यमेकमेवाऽद्वितीयं ब्रह्माऽभ्यसनीयमिति क्षणिकनैरात्म्याऽभ्यासाऽभ्युपगमो दत्तजलाञ्जलिः प्रसज्येत । तन्न तादात्म्यादस्याऽव्यभिचारः । नापि तत्कार्यत्वात् । भावनाप्रकर्षकार्यं खल्वेतन्न विषयकार्यम् ।

यद्युच्येत पारम्पर्येण तत्कार्यमनुमानवत् । यथा हि वन्हिस्वलक्षणाद् धूमस्वलक्षणं ततो धूमाऽनुभवस्ततो दहन[1]विकल्पस्ततश्चाऽनुमानमुत्पन्नमिति पारम्पर्येण वन्हिप्रतिबन्धात्प्रापकं च वन्हे-

१ धूम । १ पु० पा० ।

द्रोहपाककारिणः, तथैतदप्यनुमानजनितभावनाप्रकर्षपर्यन्तजं पारम्पर्येणाऽर्थप्रभूततया तदव्यभिचारनियमान्न प्रमाणमिति चेत् । किमनुमानेन वह्निं व्यवस्थाप्य भावयतो यद्वह्निविषयं विशदं विज्ञानं तत्प्रमाण?मिति । ओमिति ब्रुवाणस्य पर्वतनितम्बारोहणे सति इन्द्रियसंनिकर्षजन्मनो दहनविज्ञानस्य भावनाऽऽधेयविशदाभविज्ञानेन सह सम्भवादनियमप्रसङ्गः । विसंवादश्च बहुलमुपलभ्यते । लक्षणयोगिनि च व्यभिचारसम्भवे तल्लक्षणमेव बाधितमिति विशदाभमपि प्रातिभमिति संशयाक्रान्तमप्रमाणम् । तद्भावनाया भूतार्थत्वं न तज्जन्मविशदविज्ञानप्रामाण्ये हेतुर्व्यभिचारात् । एवं च प्रसर्पकस्येव सक्तुकर्करीप्राप्तिमूललाभमनोरथपरम्परानीतो द्रविणसम्भारसाक्षात्कारस्तथागतस्य निरात्मकसमस्तुवस्तुसाक्षात्कार इत्यापतितम् । सर्वार्थवस्तुभावनापरिकर्मितचित्तसन्तानवर्त्ति ज्ञानं प्रत्यालम्बनप्रत्ययत्वमर्थस्य । तथा च तदुत्पत्तेस्तदव्यभिचारनियम इति चेत् । नार्थस्याऽऽलम्बनप्रत्ययत्वं विज्ञानं प्रतीन्द्रियाऽपेक्षत्वेन व्याप्तं, तच्चाऽस्माद्विरुद्धोपलब्ध्या व्यावर्तमानमालम्बनप्रत्ययतामप्यर्थस्य निवर्त्तयति । न खल्विन्धनविशेषो धूमहेतुरिति विनापि दहनं सहस्रेणापि संस्कारैर्धूममाधत्ते । तदाधाने वा समस्तकार्यहेतुताऽनुमानोच्छेदप्रसङ्गः । भावनायाश्च भूतार्थाया अर्थाऽनपेक्षाया एव विशदविज्ञानजननसामर्थ्यमुपलब्धं कामातुरादिवर्त्तिन्या इति भूतार्थापि तन्निरपेक्षैव समर्थेति नाऽर्थस्याऽलम्बनप्रत्ययत्वं शक्यःऽवगमम् । अपि चाऽऽलम्बनप्रत्यया अपि तएवाऽस्य क्षणा युज्यन्ते, ये तस्य पुरस्तात्तना अव्यवधानाः । तथा च तएवाऽस्य ग्राह्या न पुनः पूर्वतरास्तत्काला अनागताश्चेति न सर्वविषयता । अथ दृश्यमाना धातुचयपर्यापन्नाः प्राणभृतो जन्मान्तरपरिवृत्तो यश्चाऽतीताऽनागत-

स्कन्धकदम्बकोपादानोपादेयात्मान इति तद्दर्शनं दृश्यमानतादात्म्येन तद्विशेषणतया ऽतीताऽनागतान्यपि गोचरयति। न चाऽस्मदादिदर्शनस्यापि तथा प्रसङ्गो, रागादिमलावृतत्वात्। तस्य हि भगवतो निर्मृष्टनिखिलक्लेशाऽक्लेशमलं विज्ञानमनावरणं परितः प्रद्योतमानं स्वालम्बनं प्रत्ययं सर्वाऽऽकारं गोचरयत्तस्य च साक्षात्परम्परया च कथं चित्सर्वेण सम्बन्धाद्देशकालविप्रकीर्णवस्तुविशिष्टस्वभावतया तथैव गोचरयेत्। न च सर्वग्रहणमन्तरेणेति सर्वविषयमस्य विज्ञानमनावरणं सिद्धम्।

तदनुपपन्नम्। विचाराऽसहत्वात्। तथा हि। इयमालम्बनप्रत्ययस्य सर्वविशिष्टता स्वाभाविकी चेन्न तावत्सर्वस्मिन्नालम्बनप्रत्यये चैका भवति। एकस्याऽनेकवृत्तित्वाऽनुपपत्तेः। नाना चेदालम्बनप्रत्ययाश्च सर्वे चेति तत्त्वम्। तथा च न सम्बन्ध इति न तद्ग्रहणे सर्वग्रहणविकल्पारोपितत्थात्वविकल्पकं वस्तुविषयं सर्वं च प्रतीयतइति सुभाषितम्। स्वालम्बनप्रत्ययमात्रगोचरमेवाऽविकल्पकं समस्तवस्तुविशिष्टालम्बनाऽध्यवसायजननम्। तेनाऽध्यवसायाऽनुगतव्यापारमविकल्पकमपि समस्तवस्तुविषयं भवति। यथा ऽऽह 'व्यवस्यन्ति क्षणादेव सर्वाकारं महाधिय' इति चेत्। अथ कतिपयवस्त्वालम्बनस्याऽनुभवस्य कुतः स एष महिमा? यतः समस्तवस्त्ववसाय इति। रागाद्यावरणविगमादिति चेत्तर्हि यथावस्तु तानि पश्येत्, न पुनरस्मादपार्थत्वमेवेति। तदयुक्तम्। विकल्पनिर्माणकौशलमस्य युज्यते। तत्त्वाऽऽवरकता हि मलानां क्लेशादीनां न पुनर्विकल्पनिर्माणप्रतिबन्धता। तस्माद्भावनाप्रकर्षमात्रजत्वादर्थाऽव्यभिचारनियमाऽभावाद्विशदाभमपि संशयाक्रान्तत्वादप्रमाणमप्रत्यक्षं चेति साम्प्रतम्।

यदपि सदर्थप्रकाशनं बुद्धेः स्वभावोऽसदर्थत्वं त्वागन्तुकमित्यस्ति बाधके सदर्थत्वमेवेति । तदयुक्तम् । अनुमितभावितवन्हिविषयविशदाभविज्ञानादिप्रामाण्यप्रसङ्गात् । तद्विषयस्य क्व चिद्बाधदर्शनादप्रामाण्यमिहापि समानम् । अन्यथाऽभिनिवेशात् । तदिह यदि विशदाभविज्ञानहेतुत्वं भावनाया विशेषणयोगेन साध्यते ततः सिद्धसाधनम् । भवतु तथागतस्तथाभूतविज्ञानवान्, न तत्वे तद्विज्ञानमस्यै प्रत्यक्ष,मप्रमाणत्वात् । तथा चाऽपक्षधर्मतया हेतोरसिद्धता । प्रसिद्धधर्मिणो ऽजिज्ञासितविशेषणतया ऽनुमेयत्वाऽभावात् । अथ प्रत्यक्षविज्ञानहेतुता भावनायाः परं प्रत्यक्षसिद्धा साध्यते, तथा सति साध्यविपर्ययव्याप्तेर्विरुद्धता हेतोः । विशेषणचयवत्या अपि भावनाया विशदाभभ्रान्तिविज्ञानजनकत्वात् । दृष्टान्तस्य च साध्यहीनत्वात् । यदा च भूतार्थभावनाजनितत्वेपि नाऽस्य प्रामाण्यमभूतार्थत्वात्तदा, यदुच्यते

'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधो यत्नवत्त्वेपि बुद्धेस्तत्पक्षपाततः' ॥ इति,

तदनुपपन्नम् । भूतार्थत्वे हि बुद्धेस्तत्पक्षपातिता भूतार्थः प्रतिपक्षैर्बाधो न भवेत् । अभूतार्थो त्वियं स्वात्माऽभावमापन्नाप्यात्मीयदृष्टिरिव सम्भवद्बाधा । तस्मात्प्रतिपक्षविवृद्धिमात्रम् । न चाऽऽत्यन्तिकी विवृद्धिः सम्भवति । यथा समूलकाषं कषिता दोषा न पुनरुद्भविष्यन्ति अत एवाऽस्थिराश्रयत्वे ऽप्यपुनर्यत्नापेक्षित्वेप्यस्य नाऽऽत्यन्तिकी निष्ठा सम्भवति । आत्मीयदृश इव विरोधिप्रत्ययसम्भवात् । तत्सम्भवश्चाऽभूतार्थत्वात् । तच्च न । अनुमितविषयं तु प्रत्यक्षं न सम्भवत्येव । तयोः परोक्षरूपाऽवगाहित्वात् । प्रत्यक्षस्य च तद्विपरीताऽर्थत्वात् । तद्गतभूतार्थत्वाऽनुविधायित्वेन

ननु न कालतो नियमश्चक्षुरादीनाम् । अवर्तमानरजता-स्वविषयये श्रुताऽनुमानज्ञानापेक्षतया प्रामाण्याऽनुपपत्तेश्च । तत्सिद्ध-मेतद्भूतार्थभावनाप्रकर्षपर्यन्तजं विज्ञानमप्रत्यक्षम्, अर्थे प्रमाणत्वात् यदप्रमाणं तदप्रत्यक्षमर्थे । यथा कामाऽऽतुरस्य कामिनीविज्ञानम् । अप्रमाणं च तत् । नितान्तविशदाभत्वे सति भावनाजन्यत्वात् । यन्नितान्तविशदाभत्वे सति भावनाप्रकर्षजं विज्ञानं तदप्रमाणं,यथा ऽनु-मितभावितवन्हिविषयविशदाभविज्ञानमिति समानहेतुकत्वं समान-रूपतया व्याप्तम् । यथाह 'तदतद्रूपिणो भावास्तदतद्रूपहेतुजा' इति । तदस्याः प्रामाण्यं निवर्तमानं तुल्यहेतुजत्वमपि निवर्तयति । न चैषा भूतार्थे भावनाप्रकर्षपर्यन्ता ऽतीन्द्रियसंनिकृष्टाऽनुमितभावितवन्हिवै-शद्ये च निरात्मकसमस्तवस्तुवैशद्ये ऽपि च विशिष्यते । न च रागा-द्यावरणविरहो वा विशेषः । न खल्वेते कम्बलादिवदावरका विज्ञानस्य, किं तु तदाक्षिप्तमना विविधविषयभेदतृष्णादपरिप्लुतो न शक्नोति भावयितुमिति भावनाऽऽदरमात्र एव तद्विरहोपयोगः । अस्ति चेहापि शिशिरतरसंभूतजडिममन्थरतरकायकाण्डस्याऽनुमितवन्हिभावना-भियोग इति न हेतुभेद इति प्रतिबन्धसिद्धिः । न चैकपार्थिवा-ऽणुसमवायिकारणजन्मभिर्भिन्नाश्रयाऽपेक्षैकवन्हिसंयोगाऽसमायिका-रणैर्गन्धरसरूपस्पर्शैर्नानाभावैर्व्यभिचारः । सामर्थ्यवैचित्र्यादेकत्वे ऽपि पार्थिवस्य परमाणोः । तद्वैचित्र्यं च कार्यवैचित्र्योपलम्भात् । तच्च नित्यसमवेतं नित्यं कारणसामर्थ्यक्रमेण च पार्थिवाऽवयविनि कार्ये जायतइत्यवदातम् । परिशिष्टं ग्रन्थव्याख्यानसमये वक्ष्यामः । तदास्तां तावत् ।

सम्प्रति व्यवस्थापितोन्मूलनेन कश्चित्प्राभाकरगन्धी प्रत्यव-तिष्ठते—ननु न॰ कालतोऽपि नियमश्चक्षुरादीनाम् । कुतः ? इदं

द्युपलब्धेः । न हि सा शुक्तिकाद्युपलब्धिः । अन्याकारसंविदो ऽन्यविषयत्वाऽयोगात् अनाश्वासात् ।

अधिगतस्वातन्त्र्यं च मनः स्वप्ने । न च स्वप्नज्ञानं स्मृतिः । अतद्रूपत्वात् । नैतत्सारम् । तथा हि–

रजतमित्यवर्तमानरजताद्युपलब्धेः । नन्विदं रजतमिति पुरोवर्तिनीं शुक्तिमवलम्बमाना कथमसंनिहितदेशकालरजतोपलब्धि? रित्यत आह–न हि सा शुक्तिकाद्युपलब्धिः । कस्मात्? अन्याऽऽकारायाः संविदो ऽन्यविषयत्वाऽयोगात् । तद्योगे विषयत्वस्याऽनियमात् । सर्वं विज्ञानं सर्वविषयमित्ययत्नसिद्धा सर्वज्ञता स्यादिति फलितं तथागतमनोरथेन । तस्माद्यदाकारविज्ञानं[1] स एवास्य विषय एषितव्यो नियमाय । रजताऽऽकारं चेदमिति तदेवास्य विषयो न पुनः शुक्तिः । अवेदनात् अनाश्वासाच्च । यदि ह्यन्याऽऽकारा संविदन्यविषया भवेत्तदा संविदः स्वार्थव्यभिचारात् सर्वत्रैवाऽनाश्वासप्रसङ्ग इति न प्रेक्षावान् क्व चित् कुतश्चिद्वा प्रवर्तेत निवर्तेत वा । तस्मादपि रजतविषयमेव । न चेदं रजतमिति सामानाधिकरण्यप्रत्यय,मपि त्वसामानाधिकरण्याऽग्रहो दोषवशात् । न च स्मृतिः । साक्षात्काराऽऽस्पदत्वात् । न च नास्ति । स्वसंवेदनसिद्धत्वात् । तदस्य क्लृप्तसामर्थ्यं चक्षुर्वा मनो वा कारणमकामेनाऽप्यभ्युपगन्तव्यम् । न च रजतं वर्तमानमित्यवर्तमानमपि चक्षुर्मनो वा गोचरयति । तथा च न कालतो ऽपि नियमः ।

परतन्त्रं बहिर्मन इत्याशिपति–अधिगतस्वातन्त्र्यं च मनः स्वप्ने । तेनाऽन्यत्रापि बाह्ये स्वतन्त्रमेव । यद्युच्येत स्वप्नेऽपि पूर्वाऽनुभवभावनासहकारि स्मृतिं जनयति मनः, तेनाऽस्वतन्त्रमेवेति,

१ यदाकारविषयं विज्ञानम् । २ पु. पा. ।

अर्थाऽपेक्षा मुधा तुल्यमन्याकारप्रवेदनम् ।
देहिनो वर्तमानाभा स्वप्ने स्पष्टाऽपि हि स्मृतिः ॥

चक्षुरादयस्तावद्वर्त्तमानमेव शुक्तिकाशकलाद्यर्थं दर्शयन्ति, तदपेक्षणात् । अन्यथा वैकल्यात् तत्सन्निधेः तदसन्निधावपि रजतवेदनप्राप्तेः । रजतताऽवभासनं यदि न शुक्तिविषयं वर्तमानाभासनमपि तर्हि नाऽवर्त्तमानगोचरम् ।

तत्राह—न च स्वप्नज्ञानं स्मृतिः । कस्मात् ? अतद्रूपत्वात् । अनुभूतविषयाऽसंप्रमोषो हि स्मृते रूपम् । असंप्रमोषश्चानुभूततयाऽनुभाव्यस्यानुसन्धानम् । न चैवंविधं स्वप्नज्ञानं, तस्मान्न स्मृतिः । न च चाक्षुषं, चक्षुर्व्यापाराऽभावात् । तत्सिद्धमेतद्बाह्ये मनः स्वतन्त्रमिति ।

तदेतन्निराकरोति—नैतत्सारम् । तथा हि ।

अर्थाऽपेक्षा मुधा तुल्यमन्याकारप्रवेदनम् ॥
दोषतो वर्त्तमानात्वं स्वप्ने स्पष्टा ऽपि हि स्मृतिः ॥

यत्तावदुक्तम् अनीताऽविषयं चक्षुरादीति, तत्राह—चक्षुरादयस्तावद्वर्त्तमानमेव शुक्तिकाशकलाद्यर्थं दर्शयन्ति । कुतः ? तदपेक्षणात् । शुक्तिकाद्यपेक्षणात् । अन्यथा तदनपेक्षणे वैफल्यात्तत्संनिधेः शुक्तिसंनिधानस्य । कुतोस्य वैफल्यप्रसङ्ग ? इत्यत आह—शुक्तिकाऽनपेक्षणे तदसंनिधावपि रजतवेदनप्राप्तेः । अयमभिसंधिः । न तावच्चक्षुरादिवद्रजतविज्ञानं कारणतामात्रेणाऽपेक्षते शुक्तिशकलम् । चक्षुराद्यभाववदिव तदभावे ऽन्यत्र रजतसंनिधावपि रजतविज्ञानाऽभावप्रसङ्गात् । तस्माद्विषयतयैवाऽपेक्षते रजतविज्ञानं शुक्तिशकलमिति ।

यच्चोक्तमन्याऽऽकारा संविन्नाऽन्यविषयेति, तत्राह—रजतताव-

भासनं यदि न शुक्तिविषयं वर्तमानाभासनमपि तर्हि नाऽवर्तमानगोचरम्[1] ।

अयमभिसन्धिः । अतीतरजतगोचरं चेदेतद्विज्ञानमतीततयैवाऽस्मिन् रजतं प्रपद्येत, तथा च तत्प्रेप्सवो न प्रवर्तेरन्, अतीतस्य प्राप्त्यभावात् । न खल्वतीतं तत्तया ऽवगम्य शब्दाद्वदान्यश्रेष्ठं युधिष्ठिरं बुभुक्षामात्मा ऽपि भिक्षुको याचितुं प्रवर्तते । अतीतस्यापि रजतस्य दोषतस्तत्ताऽनवभासनाद्वर्तमानस्य च शुक्तिकेयम्[2]इति तत्तया गृहीतस्य रजतसाधारणरूपवेदनात् । तद्भेदहेतुशुक्तिकात्वसामान्यविशेषाऽनवभासाच्च । समीहितसंनिहितरजतमतितुल्यताभेदाऽनध्यवसायसामर्थ्याऽभ्यासात्[3] । ततश्च रजतमिदमिति समानाधिकरणव्यपदेशः समीचीनं संनिहितरजतप्रत्ययतुल्यव्यवहारप्रवर्तनं च शुक्तिकेयमिति भेदधियः स्वविषयविरुद्धभेदाऽग्रहनिवारणेन पूर्वप्रत्ययप्रसञ्जितरजतोचितव्यवहारनिराकरणाद्बाधकता ऽप्युपपन्नेति चेन्न । भेदाऽग्रहमात्रस्य तथाभूतव्यवहारप्रवर्तकत्वाऽनुपपत्तेः । सन्निहितरजताऽवभासो हि तद्व्यवहारहेतुर्न पुनरतथाऽनवभासः । तत्तुल्यतया सोपि तद्व्यवहाराय कल्पते । भेदाऽनवभासश्च तत्तुल्यतेति चेत् । यद्येवमवर्तमानाऽवभासनया ऽतीतरजताऽवभासविज्ञानतुल्यता ऽप्यस्यास्तीति तत्तुल्यव्यवहारप्रवृत्तिरप्येतस्य स्यात् । तदयं रजतविज्ञानवात् पुरोवर्तिनि शुक्तिकाशकले प्रवर्तेत निवर्तेतेति तव विरुद्धं क्रियाद्वयमापन्नम् । पुरोवर्तिवस्त्ववभास एव रजतविज्ञानादगृहीतभेदः समीचीनसंनिहितरजताऽवभाससदृशस्तत्सदृशव्यवहारहेतुरिति नाऽयं प्रसङ्ग इति चेत् । अथ रजतं तदिदं तु शुक्लभास्वरमिति बुद्धेर्व्यवहारं कस्मान्न प्रवर्तयति ? यथैव हि समीचीनसंनिहितरजतधीतुल्यतया ऽस्य भेदाऽनध्यवसायात्तथा तद्रजतमिदं तु

१ वर्तमानगोचरः—१ पु· पा· ।
२ न शुक्तिकेयम्—२ पु· पा· ।
३ सामर्थ्यात्—२ पु· पो· ।

शुक्लभास्वरमितीत्येततुल्यता ऽप्यभेदानध्यवसायात् । न चाऽध्यवसाययोः कश्चिद्विशेषः, येनैक एव स्वोचितं साम्यं संपादयति नाऽपरोऽपीति । सो ऽयमस्य तदवस्थ एव विरुद्धक्रियाद्वयस्य समावेशप्रसङ्गः । न च चेतनव्यवहारोपायतुल्यता ज्ञानोपायानां, येन ज्ञानहेतोरेव चरमेवस्तुव्यवहार इत्युच्येत । अजातरूपतत्कार्यतत्संबन्धानामपि चक्षुरादीनां ज्ञानोपायत्वदर्शनात् । चेतनव्यवहारस्य तु विज्ञानजत्वनियमेन पर्यनुयोगाऽनर्हत्वात् । तत्सिद्धमेतद्विवादाध्यासितं रजतविज्ञानं दृश्यमानपुरोवर्त्तिवस्तुगोचरं तदुपायाऽविषयत्वेऽपि सति तदर्थिनस्तत्रैव नियमेन प्रवर्तकत्वात् । तदुपायाऽविषयं सद्यत्रैव यदर्थिनं प्रवर्तयति तत्तद्विषयं, यथोभयसिद्धसमीचीनरजतविज्ञानमिति । तथा ह्ययं प्रवृत्तिनियमो हेतुमत्तया व्याप्तः स चाऽतद्विषयत्वाद्व्यावर्तमानः स्वव्याप्यं प्रवृत्तिनियममपि व्यावर्त्तयति तद्विषयत्वे एव व्यवस्थापयतीति प्रतिबन्धसिद्धिः । न चाऽसावतद्विषयत्वे ऽपि भेदाऽग्रहमात्राद्भवितुमर्हति । अभेदाग्रहणस्यापि स्वोचितव्यवहारप्रवर्तनेन विरोधिक्रियासमावेशेन व्यवहर्तुः प्रवृत्तिनिवृत्तिप्रसङ्गादित्युक्तम् । तस्मादन्यस्याऽन्यथाग्रहणमेषितव्यम् । एवं च वर्तमानतया ऽवभासनमुपपद्यते । तथा च रजताऽवभासनं यदि न शुक्तिविषयम् अन्यत्वाद्वर्त्तमानाऽवभासनमपि तर्हि नाऽवर्त्तमानगोचरम् । अन्यत्वतादवस्थ्यात् ।

यद्युच्येत, अवर्त्तमानगोचरं भविष्यति वर्तमानाऽवभासं विज्ञानदोषसामर्थ्यात् । न च दोषाणां कार्यकारणसामर्थ्यविहतिमात्रे व्यापारो न कार्यान्तरविषयशक्त्याऽऽधाने, न जातु यवबीजमुपहतं दोषैः शाल्यङ्कुराय कल्पते इति साम्प्रतम् । भस्मकादिदोषवशादुदरजस्य वह्नेर्बहुविधाऽन्नपानपाचनोपलम्भात् व्यभिचा-

दोषतस्तथात्वमितरस्यापि तुल्यम् । वर्तमाने चाऽवर्तमानाऽवभासो नाऽवर्तमाने वर्तमानाऽवभासः । अर्थसन्निधेः साफल्यात् । नेदं रजतमिति च प्रसक्तस्य प्रतिषेधोपपत्तेः ।

रात् । अशितपीताहाररसभावः कार्यमुदरजस्य तेजसस्तत्प्रतिघातेन भस्मकस्यापि दोषभाव इति न व्यभिचारइति चेत् न । इहापि समानत्वात् । इन्द्रियादीनामपि परमार्थविज्ञानजननसामर्थ्यं स्वाभाविकमपबाध्य विपर्ययविज्ञानहेतुतामादधाना दोषा न च्यवन्ते तत्तायाः । न चाऽनवभासनात् अवर्तमानं न विषय इति युज्यते । विकल्पाऽक्षमत्वात् । किमवर्तमानं रजतमवर्तमानतया न विषय इति साध्यते आहो स्वित् रजततया ऽपि न विषय? इति । तत्र प्रथमे कल्पे न विप्रतिपद्यामहे । रजततया त्वविषयत्वे साध्ये तत्त्वेनाऽनवाभासनमसिद्धं न हेतुर्भवति । तथोक्तमाचार्येण 'आभासते कथं चिच्च तन्नात्यन्तं न भासते, तेन नावेद्यिके'ति । तस्माद्दोषवशादवर्त्तमानमपि वर्तमानतया प्रतीयतएवेत्याह—दोषतस्तथात्वमवर्तमानगोचरस्य विज्ञानस्य वर्तमानाऽवभासनमितरस्यापि शुक्तिकागोचरस्यापि रजताऽवभासनं तुल्यमेव ।

एवमापाततस्तुल्यतामभिधाय स्वाऽभिमतस्याऽस्य विशेषमाह—वर्तमाने शुक्तिशकले चाऽयमवर्त्तमानरजतावभासो नाऽवर्त्तमाने रजते वर्तमानाऽवभासः । पुरोवर्त्तिवस्तुविषयं नाऽतीतविषयं रजतमिदमिति विज्ञानमित्यर्थः । कस्मात् ? अर्थसंनिधेः साफल्यात् । कुतश्च नेदं रजतमिति प्रसक्तस्य प्रतिषेधोपपत्तेः । अङ्गुलीनिर्देशेन शुक्तिकाशकलमेव रजततया प्रतिषेधन्ति विप्रतिपत्तारः । तत्र

पत्तेः। तैमिरिकस्य केशोण्ड्राभं ज्ञानमालोकांशेष्विति नाऽ-र्थापेक्षो व्यभिचारः। स्वप्ने ऽपि किं स्मृतेर्वर्त्तमानाऽवभास-त्वम्, उत मनसः स्वातन्त्र्य? मिति स्मृतेर्वर्तमानाऽवभासता युक्ता। अनन्तरदिवसाऽनुभूतस्याऽविकलाऽनधिकस्य वि-स्पष्टस्मृतेः वर्तमानवद्वेदनाद्दोषोपप्लवेन। न त्वदृष्टं मनसः स्वातन्त्र्यम्। दोषतश्च न सामर्थ्याऽतिरेको, दोषस्य तदप-रजतं प्रसञ्जितं पूर्वविज्ञानेनेति गम्यते। न च विवेकाऽग्रहणेन तत्प्र-सञ्जनं, जीवत्यविवेकाऽग्रहे परिपन्थिनि। तस्म द्विपरीतग्रहे तत्प्र-सञ्जकं कल्पते नाऽन्यथा। न च पुरोवर्त्तिचमनेनाऽतीते प्रसञ्ज-नम्। इदन्तया तस्य प्रतिषेधाऽसम्भवात्। तत्पुरोवर्तिवस्तुविषयमेव तद्विज्ञानमित्यवदातम्।

ननु तैमिरिकस्य केशाभविज्ञानमुपजायते। न च तत्रास्ति केशानां संनिधिः। नाप्यन्यस्य कस्य चित्। येन तत्तदालम्बनं भवेत्। तस्मादसंनिहितकेशाऽवलम्बनमेषितव्यं तद्विज्ञानम्। तत-श्चाऽर्थाऽपेक्षो व्यभिचारश्च तुरादीनामित्यत आह—तैमिरिकस्य केशोण्ड्राभं विज्ञानमालोकांशेष्विति नाऽर्थापेक्षो व्यभिचारः।

यच्चोक्तमधिगतस्वातन्त्र्यं मनः स्वप्नाऽवस्थायां बाह्यइति तन्निराचिकीर्षुर्विमृशति-स्वप्ने ऽपि किं स्मृतेर्वर्त्तमानाऽवभासित्व-मुत तस्मिन्मनःस्वातन्त्र्य? मिति विमृश्य स्वपक्षं प्रतिजानीते—स्मृते-र्वर्त्तमानाऽवभासिता युक्ता। हेतुमाह—अनन्तरद्दिवस ऽनुभूतस्य कल्पनाऽधिकस्यापि स्पष्टस्मृतेर्वर्त्तमानवद्वेदनाद्दोषोपप्लवेन। न त्व दृष्टं मनसः स्वातन्त्र्यं बाह्ये युक्तम्। अथ कस्माद्दोष एव मनसो नाधत्ते तथाविधसामर्थ्याऽतिशयं? येन बाह्ये स्वतन्त्रमेव तद्वर्ततेत्यत आह—दोषतश्च न सामर्थ्याऽतिशयो दृष्टो येन मनः स्वतन्त्रं

नयनहेतुत्वात्। सत्यस्वप्नदर्शनं तु यदि वर्तमानस्य तथा-ग्रहणात्तददृष्टम्। प्रबोधे स्वप्नाख्यानार्थसंवाददर्शनाद् दृष्टमिति चेत्। न। आख्यानसंवादाऽभावात्। आख्या-तद्ग्राह्ये तत्त्वज्ञानं प्रसुवीत। विपर्यासस्तु संस्कारतन्त्रादेव मनस इत्युक्तम्। कस्मान्न दोषतो मनसः सामर्थ्याऽतिरेक इत्यत आह—दोषस्य तदपनयनहेतुत्वात्। तदिति तच्च विज्ञानजन-सामर्थ्यं परामृशति।

यदि मन्येत अस्ति खलु सत्यं स्वप्नदर्शनमपि। तद्यथा। वल्लभालिङ्गितमात्मानमभूय स्वप्ने जागरायामपि तथैव पश्यति। न चेयं वर्तमानाऽवभासा स्मृतिरिति साम्प्रतम्। असति बाधके तद-नुपपत्तेः। तदभावश्च संवाददर्शनात्। तस्माद्च मनसः स्वात-न्त्र्यमुपेतव्यमिति, तत्राह—सत्यस्वप्नदर्शनं तु यदि वर्तमानस्य तथाग्रहणात् तददृष्टम्। न खल्वयमपि प्रत्ययः संवादी। तथा हि। स्वप्ने जागराऽवस्थाऽऽपन्नमयमात्मानं वल्लभाबाहुकदलीवल-यितमुपलब्धवान्, विनिद्रनयनोत्पलस्तु पश्यन्नपि प्रियाऽऽलिङ्गनं नि-द्राणोऽहमासं सम्प्रत्येव प्रबुद्ध इत्यवगच्छति। कुतोऽस्य स्वप्न-दृष्टाऽर्थसंवाद? इत्यर्थः।

शङ्कते—प्रबोधे स्वप्नदृष्टार्थसंवाददर्शनान्मनसः स्वातन्त्र्यं दृष्टमिति चेत्। यदा खलु स्वप्ने शुक्लमाल्याम्बरधरो ब्राह्मणायन-माह 'सोमशर्मन्नायुष्मन् पञ्चमेऽहनि प्रातरेव भूपतिरुर्वराप्रायभुवा ग्रामवरेण मानयिष्यति त्वामिति, स च पञ्चमेऽहनि प्रातरेव तथा संमानितः सोमशर्मा भवति सत्यस्वप्नवानित्यर्थः। निराकरोति—न। कस्मात्? आख्यानसंवादाऽभावात्। आख्यानेन हि प्रबुद्धः सोम-शर्मा स्मरन्नप्याख्यातारं ब्राह्मणायनं न पश्यति तत्प्रणीततां चा-

नसंवादस्तु काकतालीयः । भविष्यतस्तु वर्तमानवद्दर्शनं कथं सत्यम् ? मा भूत् सत्यम् । अस्ति तावत् स्वातन्त्र्यं मनसः । तदपि तद्विधस्याऽनुभूतस्य स्मरणम् । इतरथा मनसो ऽदृष्टसामर्थ्यस्य कल्प्यत्वात् । धर्मविशेषश्चेद्यथार्थदर्शनप्रसङ्गात् । तस्य कार्यं प्रत्यदृष्टसामर्थ्यस्य कल्प्यऽऽख्यानस्य स्मृत्यारूढस्य मन्यते इति । मैवं भूदाख्यानसंवादः स्वप्नस्यास्तीति, तथा च सत्यतेत्यत आह—आख्यानसंवादस्तु काकतालीयो दैवप्राप्तो न स्वप्नज्ञानं प्रमाणयति, तथाविधस्यैव तत्सामयिकस्य विसंवादवतो बहुलमुपलब्धेः । संवादस्य दैवाधीनत्वात् । ननु यथाऽतीतस्य वर्तमानवद्भासनं तच्च संस्कारतन्त्रमस्तु मनो भावनायोनि पूर्वाऽनुभवात् । यच्च पुनरनागत एव वर्तमानतया ऽवभासते स्वप्ने कुतस्तदनुभवः कुतस्तरां च तद्भावना कुतस्तमां च मनसः स्वतन्त्रते ? त्यत आह—भविष्यतस्तु वर्तमानवद्दर्शनं कथं सत्यम् ? चोदक आह—मा भूत्सत्यमस्ति तावत्स्वन्त्र्यं मनसः संस्कारस्य भविष्यत्यसम्भवात् । समाधाता स्वाऽभिप्रायमुद्घाटयति—तदपि तद्विधस्यान्यथाऽनुभूतस्य स्मरणम् । न हि सर्वथा ऽननुभूतमुपलभ्यते स्वप्ने । परस्परविरुद्धानामपि क्वचित्कदाचित्कथंचिदुपलब्धानां सहानुभवविभ्रमसम्भवः । कस्मात्पुनः क्लेशेन सर्वत्र स्मरणमाश्रीयते ? इत्यत आह—इतरथा मनसो ऽदृष्टस्वातन्त्र्यकल्पनाप्रसङ्गात् ।

यद्युच्येत स्वप्ने ऽपि प्रेयसीसंभोगजन्मनः सुखोद्भवस्योपलब्धेरस्ति समुदाचारद्वृत्ति[1]रस्य धर्मः, तेन तद्विशिष्टमेव मनः प्रियानुभवं भावयिष्यतीति कृतं संस्कारेणेति, तत्राह—धर्मविशेषश्चेद् यथार्थदर्शनप्रसङ्गात् । धर्मविशेषो हि यथार्थदर्शनहेतुरवगत

१ समुदाचरप्रवृत्ति-पा० २ पु० ।

एवं चान्नमयादीनां पुच्छान्तानवयवानुक्त्वाऽऽनन्दमयस्यापीतरावयवोक्तौ पुच्छस्य बुद्धौ सन्निधानादपुच्छमपि ब्रह्म पुच्छमित्युक्तं श्रुत्या । न हि ब्रह्मणो मुख्यं पुच्छत्वमानन्दमयस्य परमात्मत्वपक्षे युक्तं, स्वं प्रति स्वस्य पुच्छत्वानुपपत्तेः । तस्माद्ब्रह्म पुच्छवत्पुच्छं सर्वाधिष्ठानं प्रतिष्ठा परायणं लौकिकस्यानन्दजातस्याधार इत्यर्थः । सर्वाधारत्वात्प्रतिष्ठापदसमभिव्याहारादाधारलक्षणा युक्तेति । इतश्च पुच्छशब्देनाधारो लक्ष्यतइत्याह । "तद्धेतुव्यपदेशाच्च" । तस्य ब्रह्मणो विकारजातं प्रति हेतुत्वेने"दं सर्वमसृजते"ति वाक्यव्यपदेशादित्यर्थः । न हि स्वविकारमानन्दमयं प्रति ब्रह्मणोऽवयवत्वं सम्भवति । मुख्यत इति स्वप्रधानं ब्रह्म पुच्छं ज्ञेयत्वेन विवक्षितमिति । "मान्त्रवर्णिकमेव च गीयते" । य"त्सत्यं ज्ञान"मित्यादिमन्त्रवर्णप्रकाशितं ब्रह्म त"द्ब्रह्म पुच्छं प्रतिष्ठे"ति ब्राह्मणवाक्येस्वप्राधान्येनगीयते मन्त्रब्राह्मणयोरैक्यार्थादित्यर्थः । इतश्चानन्दमयोऽत्र न प्रतिपाद्यस्तस्य वैषयिकप्रियाद्यवयवयोगेन स्रष्टृत्वाद्यनुपपत्तेरित्याह । "नेतरोऽनुपपत्तेः" । "ब्रह्मपुच्छं प्रतिष्ठे"त्यत्र ब्रह्म स्वप्रधानं नेतरत्, कुतः अनुपपत्तेः । ब्रह्मणोऽवयवत्वेऽवयव्यानन्दमयोऽत्रप्रतिपाद्य इति वक्तव्यम् । न हि तत्सम्भवति सावयवस्याग्रिमवाक्योक्तस्रष्टृत्वाद्यनुपपत्तेरित्यर्थः । अतो ब्रह्म स्वप्रधानम् । इतश्चात्र पुच्छवाक्ये ब्रह्म स्वप्रधानमित्याह । "भेदव्यपदेशाच्च" । "रसंह्येवायं लब्ध्वाऽऽनन्दी भवति" । अयमानन्दमयोजीवोरसशाब्दितं ब्रह्मानन्दं प्रतिबिम्बितं लब्ध्वाऽऽनन्दीभवतीति लब्धृलब्धव्यरूपेण भेदव्यपदेशादित्यर्थः । इतश्च ब्रह्मपुच्छक आनन्दमयोऽत्र-

न प्रतिपाद्य इत्याह । "कामाच्चनानुमानापेक्षा" । काम्यत-इति काम आनन्दस्तस्य ब्रह्मत्ववद्दृष्टेर्नानुमानेनानन्दमय-स्यापि ब्रह्मत्वमपेक्षितव्यं विकारार्थकमयड्विरोधादित्यर्थः । अनुमानप्रकारस्तु । आनन्दमयशब्दो ब्रह्मपर आनन्दम-यशब्दत्वा "दानन्दो ब्रह्मे"त्यत्रत्यानन्दशब्दवदिति । इतोऽपि ब्रह्मपुच्छवाक्ये ब्रह्मस्वप्रधानमित्याह । "अस्मिन्नस्य च तद्योगंशास्ति" । अस्मिन्पुच्छवाक्योक्ते ब्रह्मणि प्रबु-द्धस्यानन्दमयस्य जीवस्य "यदाह्येवैष एतस्मि"न्नित्यादि शास्त्रं तद्योगं मुक्तिं शास्तीत्यर्थः । तस्मादानन्दमयस्याऽ-त्राऽप्रतिपाद्यत्वात्पुच्छं ब्रह्मैव स्वप्रधानं निर्विशेषं ज्ञेय-मिति सिद्धम् ॥

## अन्तस्तद्धर्मोपदेशात् ॥ १ । १ । २० ॥

पूर्वत्र ब्रह्मपदमानन्दमयपदपदाभ्यासौ चेति मुख्य-त्रितयात्मकबहुप्रमाणवशान्निर्गुणब्रह्मनिर्णयो यथा तद्व-द्रूपवत्त्वादिबहुप्रमाणात्संसारीहिरण्मयः पुरुषोऽस्त्विति पूर्वसिद्धान्तयुक्त्या पूर्वपक्षोत्थानाद्दृष्टान्तरूपावान्तरस-ङ्गत्या पूर्वसिद्धनिर्गुण ब्रह्मणस्समन्वयापवादकमिदमार-भ्यते । फलं च पूर्वोत्तरपक्षयोरुपास्तिरेव पादसमाप्तिपर्य-न्तम् । छान्दोग्ये श्रूयते "अथ यएषोऽन्तरादित्येहिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथाकप्यासम्पुण्डरीकमेवाक्षिणी तस्यो दिति नाम स एष सर्वेभ्यः पाप्मभ्यउदित उदेतिहवै सर्वेभ्यः पाप्मभ्योय एवं वेदेत्यधिदैवतमथाऽध्यात्मम-थय एषोऽन्तरक्षिणि पुरुषो दृश्यत"इत्यादिः । उपास्ति-प्रस्तावार्थोऽ"थ"शब्दः । य एष शास्त्रप्रसिद्ध आदित्य-मण्डलमध्यवर्ती । स्थानाद्यवयवकथनं परमात्मन उपा-

स्त्यर्थं द्रष्टव्यम् । हिरण्मयो ज्योतिर्मयः । तत्रायहितधियामनुभवं प्रमाणयति "दृश्यत" इति । हिरण्यपदं ज्योतिःपरं सुवर्णपदमपि । आप्रणखान्नखाग्रात् । चक्षुषो विशेषमाह "तस्ये" ति । कपेर्मर्कटस्यासः पृष्ठभागोऽत्यन्तं तेजस्वी, तत्तुल्यं पुण्डरीकं तथाऽत्यन्तं तेजस्वि, तथाऽस्य देवस्याक्षिणी नेत्रे । ध्यानार्थमेव नामकरोति "तस्ये" ति । नामनिर्वक्ति "स" इति । उदितउद्गतस्सकार्यसर्वपापास्पृष्ट इत्यर्थः । ध्यानफलमाह "उदेति" । अधिदैवतं देवतामधिकृत्योपास्तिवाक्यमित्यर्थः । अधिदैवतध्यानोक्त्यनन्तरमात्मानं देहमधिकृत्याऽपि तदुक्तरीत्याऽऽह "अथे" ति । एतादृशं स्थानद्वयस्थं पुरुषमधिकृत्य रूपवत्त्वश्रुत्या सर्वपापास्पर्शश्रुत्या च संशयः । किमयं पुरुषो विद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारी, उत नित्यसिद्धः परमेश्वर इति । किं तावत्प्राप्तं संसारीति । कुतः । हिरण्यश्मश्रुरित्यादिरूपवत्त्वश्रवणात्, अक्षिपुरुषस्यापि "तस्यैतस्य तदेवरूपं यदमुष्यरूप" मिति श्रुत्या रूपवत्त्वश्रवणात्, "येचामुष्मात्पराञ्चोलोकास्तेषां चेष्टेदेवकामानां चे" त्यादित्यपुरुषस्य "स एषयेचैतस्मादर्वाञ्चोलोकास्तेषां चेष्टेमनुष्यकामानां चे" त्यक्षिपुरुषस्य चैश्वर्यमर्यादाश्रवणाच्च । न हि परमात्मनोमर्यादावदैश्वर्यं युक्तं "स एष सर्वेश्वर" इति श्रुतेः । स आदित्यपुरुषोऽमुष्मादादित्यादूर्ध्वगानां लोकानामीशिता देवकामानां देवभोगानां चेत्यर्थः । एतस्माच्चक्षुषोऽर्वाग्गतानां लोकानामीशिताऽक्षिपुरुषो मनुष्यभोगानां चेत्यर्थः । तस्मान्नादयादित्ययोरन्तः पुरुषः परमेश्वर इति प्राप्ते, उच्यते । "अन्तस्तद्धर्मोपदेशात् । "य एषोऽन्तरादित्ये" "य एषोऽन्तरक्षिणी" ति

च श्रूयमाणः परमेश्वर एव न संसारी । कुतः । तद्धर्मोपदेशात्तस्य परमेश्वरस्य ये धर्मास्तेषामस्मिन्वाक्य उपदेशादित्यर्थः। तद्यथा। "तस्योदिति नामे"त्यादिना सर्वपाप्मविरहेणादित्यपुरुषस्य नामोक्त्वा तदेव नामाक्षिपुरुषस्यातिदिशती "यन्नामतन्नामे"ति । तत्सर्वपापराहित्यं न्नह्मधर्मः । एवं "सैव ऋक्तत्साम तदुक्थंतद्यजुस्तद्ब्रह्मे" त्यृगाद्यात्मत्वं निर्धारयति श्रुतिः । तच्च सर्वात्मकं ब्रह्मण उपपद्यते । "सैवर्गि"त्यादेरयमर्थः । तच्छब्देन पुरुषपरामर्शः । विधेयापेक्षयाऽन्यलिङ्गव्यपदेशः । उक्थं शास्त्रविशेषः । तत्साहचर्यात्सामस्तोत्र मुक्थादन्यच्छास्त्रम् । ऋग्ब्रह्मत्रयोवेदा इति । एवं सर्वगानगीयमानत्वं श्रुतौ निर्दिष्टं "तद्य इमे वीणायां गायन्त्येतमेव ते गायन्ती"त्यादौ हिरण्यश्मश्रुकेशादिकं मायिकं परमेश्वरस्य लोकानुग्रहार्थमुपपद्यत इति न तेन विरोधः । तस्मादक्ष्यादित्ययोरन्तः परमात्मा ॥

किञ्च-

भेदव्यपदेशाच्चान्यः ॥ १ । १ । २१ ॥

आदित्यादक्ष्णोरन्तः श्रूयमाणः पुरुष आदित्यशरीराभिमानिनो जीवादन्यः । कुतः । भेदव्यपदेशात् । आदित्यशरीराभिमानिनो जीवादन्यस्य परमात्मनोऽन्तर्यामितयाऽन्तर्यामिब्राह्मणे भेदेन व्यपदेशादित्यर्थः । "य आदित्येतिष्ठन्नादित्यादन्तरोयमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत" इत्यादिश्रुत्यन्तरे तयोर्भेदव्यपदेशादत्राप्यन्तर शब्दश्रुत्या प्रत्यभिज्ञानात्परमेश्वर एवाक्ष्यादित्ययोरुपास्य इति सिद्धम् ॥

## आकाशस्तल्लिङ्गात् ॥ १ । १ । २२ ॥

पूर्वमव्यभिचारिब्रह्मलिङ्गेनापहतपाप्मत्वादिना रूपवत्त्वादिकमन्यथा नीतम् । इह तु लिङ्गादाकाशशब्दश्रुतिरन्यथानेतुं न शक्यते, लिङ्गापेक्षया श्रुतेः प्रबलत्वादिति प्रत्युदाहरणसङ्गत्येदमारभ्यते । छान्दोग्ये श्रूयते "अस्य लोकस्य कागतिरित्याकाश इति होवाच सर्वाणि ह्वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशोह्येवैभ्यो ज्यायानाकाशः परायण" मिति । तत्रोभयत्राकाशशब्दप्रयोगदर्शनात्संशयः, किं भूताकाशोऽत्राकाशशब्देनाभिधीयत उत परं ब्रह्मेति । "यदेष आकश आनन्दो न स्या"दित्यादिवेदे ब्रह्मण्याकाशशब्दप्रयोगो भूताकाशो रूढ इति । विषयवाक्यार्थस्तु । शालावत्यनामकः कश्चिदृषिर्जैवलिं राजानं पृच्छत्य "स्ये" ति । सर्वस्य प्रपञ्चस्य किमधिकरणमिति प्रश्नार्थः । जैवलिरुत्तरमाहा "काश" इति । कथंभूत आकाशस्सर्वजगत्प्रतिष्ठा, तत्राऽह "सर्वाणी"ति । भूताकाशव्यावृत्तये हेत्वन्तरमाहा "काशो ही"ति । तत्रैवहेत्वन्तर "माकाश" इति । अयं सिद्धान्तार्थः । तत्र रूढ्या भूताकाशइति युक्तं न च वाक्यशेषानुपपत्ति "राकाशाद्वायु"रित्यादौ तस्याऽपि वाय्वादिकारणत्वश्रवणात्, तस्माद्भूताकाशइति प्राप्ते ब्रूमः । "आकाशस्तल्लिङ्गात्" । आकाशशब्देन ब्रह्मणो ग्रहणं युक्तम् । कुतः । तल्लिङ्गात्तस्य ब्रह्मणो यल्लिङ्गं महाभूतस्रष्टृत्वादिकं तस्यास्मिन्वाक्ये दृष्टत्वादित्यर्थः । नन्विदं भूताकाशस्यापि वाय्वादिकारणत्वं दर्शितमिति चेन्न । मूलकारण ब्रह्मणोऽपरिग्रहे"आकाशादेवे"त्यवधारणं "सर्वाणी"ति च भूतविशेषणं "आकाशं प्रत्यस्तं यन्ती"ति

कारणे लयप्रदर्शनं चाननुकूलं स्यात् । ज्यायस्त्वपरायण-त्वप्रदर्शनं च ब्रह्मण्येव समञ्जसम् । श्रुत्यन्तरं च स्पष्टं ब्रह्मण एव परायणत्वं दर्शयति "विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायण"मिति । राते र्धनस्य दातुर्यजमानस्य । "राति"रिति पाठे रातिबन्धुरित्यर्थः । किञ्च "स एषपरोवरीयानुद्गीथः स एषोऽनन्त" इत्युद्गीथ आकाशरूपदेवताधर्मान्परत्वादीनुपसंहरतिजैवलिः । तद्भूताकाशे न युज्यते । न हि तस्यानन्त्यं सम्भवति । श्रुतौ परत्वं गुणत उत्कृष्टत्वं वरीयस्त्वं कालतो वस्तुतश्चापरिच्छिन्नत्वमनन्तत्वं देशतोऽपरिच्छिन्नत्वं द्रष्टव्यम् । यत्तु लिङ्गाच्छ्रुतिर्बलीयसीति, तन्न । "त्यजेदेकं कुलस्यार्थे" इति न्यायेन बह्वीनामनवकाशलिङ्गश्रुतीनामनुग्रहायैकस्या आकाशश्रुतेर्बाधस्य युक्तत्वात् । तस्मादाकाशशब्दं ब्रह्मैवात्रदेवतोद्गीथ उपास्येति सिद्धम् ॥

## अत एव प्राणः ॥ १ । १ । २३ ॥

अत्र चातिदेशत्वान्न पृथक्सङ्गत्यपेक्षा । यद्वा पूर्वत्राकाशश्रुतेरव्यभिचारिब्रह्मलिङ्गोपबृंहितत्वाद्बाधोयुक्तः, इह तु श्रूयमाणसम्वेशनादिलिङ्गस्य प्राणेऽपि सम्भवेनाव्यभिचारिब्रह्मलिङ्गसहचाराभावात्प्राणश्रुतिबाधोनयुक्त इति प्रत्युदाहरणासङ्गतिः । तत्रैवाकाशवाक्यानन्तरं श्रूयत उद्गीथे 'प्रस्तोतर्यादेवता प्रस्तावमन्वायत्तातां चेदविद्वान्प्रस्तोष्यसि मूर्धाते विपतिष्यतीति कतमासादेवतेति प्राण इति होवाच सर्वाणिहवा इमानि भूतानि प्राणमेवाभिसम्विशन्ति प्राणमभ्युज्जिहते सैषादेवता प्रस्ताव मन्वायत्ते"त्यादि । अस्यार्थः । उद्गीथाधिकारे प्रासङ्गिकं प्रस्तावध्यानमिति वक्तुमुद्गीथ इत्युक्तम् । कश्चिदृषिश्चा-

क्रायणनामा धनाय राज्ञोयज्ञं गत्वाज्ञानवैभवं स्वस्य प्रकटय-न्प्रस्तोतारमुवाच । हे प्रस्तोतर्या देवता प्रस्तावं सामभक्ति-विशेषमन्वायत्ताऽनुगता सा । प्रस्तोताऽधीतस्सन्चाक्रायणं पप्रच्छ "कतमे"ति । तस्य प्रतिवचनं "प्राण" इति । मुख्य-प्राणवायुं व्यावर्तयति "सर्वाणी"ति । सम्विशन्ति ली-नानि भवन्तिलयकाले । अभ्युज्जिहते जन्मकाले प्राणम-भिलक्ष्योद्गच्छन्तीति । तत्र "प्राणबन्धनं हि सौम्यं मनः प्राणस्य प्राणं"मित्यादौ ब्रह्मणि प्राणशब्दप्रयोगात्प्राण-वायौ च प्रसिद्धतरत्वात्संशयः, किमत्रप्राणशब्देन ब्रह्मा-भिधीयत उतवायुविकार इति । मनः शब्दलक्षितं तत्सा-क्षिचैतन्यं प्राणं परस्मिन्नैक्येनस्थितमित्यर्थः । प्राणस्य पञ्चवृत्तेर्वायुविकारस्य प्राणसत्तास्फूर्तिदमात्मानं येविदु-स्ते ब्रह्म जानन्तीत्यर्थः । तत्र प्रसिद्धिबलाद्वायुविकारइति प्राप्त आकाशन्यायमतिदिशति भगवान्सूत्रकारोऽ"त एव-प्राण" इति । अत एव पूर्वसूत्रोक्त "तल्लिङ्गा"दिति हेतो-रेव प्राणशब्दं ब्रह्मेत्यर्थः "सर्वाणिहवा इमानि भूतानि प्राणमेवाभिसम्विशन्ती"त्यादिना महाभूतसम्वेशनादिकं ब्रह्मलिङ्गं प्राणवाक्ये श्रूयते । न चवै "यदा पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणं श्रोत्रं स यदा प्रतिबुध्यते प्राणादेवाधि पुनर्जायन्त" इति श्रुत्या-वायुविकारेऽपि सम्वेशनादि श्रूयत इति वाच्यम् । न हि तत्र महाभूतसम्वेशनादि श्रूयते, किन्त्विन्द्रियसंवेशनादि-कमेव । श्रुत्यर्थस्तु । तर्हि तस्यां सुषुप्त्यवस्थायामित्यर्थः । वाक्पदमनुक्तकर्मेन्द्रियलक्षकम् । चक्षुः श्रोत्रे धीन्द्रिया-णामुपलक्षणम् । तस्मादनन्यथासिद्धब्रह्मलिङ्गात्प्राण शब्द-वाच्यं ब्रह्मैवोपास्यं प्रस्तावे देवतेति सिद्धम् ॥

## ज्योतिश्चरणाभिधानात् ॥ १ । १ । २४ ॥

पूर्वं प्राणवाक्ये ब्रह्मलिङ्गसत्त्वाद्भवतु ब्रह्मपरता । इहास्य वाक्ये तदभावान्न ब्रह्मपरतेति प्रत्युदाहरणसङ्गत्येदमारभ्यते । छान्दोग्येश्रूयते "अथ यदतः परो दिवोज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वावतद्यदिद मस्मिन्नन्तः पुरुषेज्योति"रिति । अस्यार्थः । गायत्र्युपाधिब्रह्मोपास्त्यनन्तरमुपास्त्यन्तरोक्त्यर्थोऽथशब्दः । अतो दिवोद्युलोकात्परः परस्ताद्यज्ज्योतिर्दीप्यते तदिदमित्यौदरज्योतिष्यध्यस्यते । कुत्रतद्दीप्यते तत्राह "विश्वत"इति । विश्वस्मात्प्राणिवर्गादुपरीत्यर्थः । विश्वशब्दस्य कतिपयार्थकत्वं व्यावर्तयति "सर्वत" इति । सर्वस्माद्भूरादिलोकात्सर्वसंसारमण्डलादुपरीत्यर्थः । उत्तमानविद्यन्ते येभ्यस्तेऽनुत्तमास्तेषु । इदंशब्दार्थं स्फुटयति "यदि"ति । लोकवेदयोर्भौतिकतेजसि ब्रह्मणि च प्रयोगात्संशयः. किमिह ज्योतिश्शब्देनादित्यादिकं तेजोऽभिधीयत उतब्रह्मेति । किन्तावदत्रयुक्तिः । भौतिकमिति । कुतः । प्रसिद्धत्वा "दतो दिव" इत्यादिना मर्यादादिश्रवणाच्च । न हि सर्वव्यापिनो ब्रह्मणो मर्यादादिकं युक्तम् । तस्माद्भौतिकं ज्योतिरिति प्राप्ते ब्रूमो "ज्योतिश्चरणाभिधाना"दिति । अत्र ज्योतिश्शब्दग्राह्यं ब्रह्मैव । कुतः । चरणाभिधानात्पादाभिधानादित्यर्थः । तथा हि ज्योतिर्वाक्यात्पूर्ववाक्ये चतुष्पाद्ब्रह्मनिर्दिश्यते "तावानस्य महिमा ततो ज्यायांश्चपुरुषः पादोस्य सर्वा भूतानि त्रिपादस्या मृतं दिवी"ति । एतदर्थस्तु । "गायत्री वा इदं सर्व" मित्यत्र भूतपृथिवीशरीरहृदयवाक्प्राणैः षड्विधा चतुष्पदागायत्रीति यदुक्तं तद्गायत्र्युपाधिब्रह्मणो महिमा विभूतिस्ता वान्यावा नय प्रपञ्चः । स्वयं

पुरुषस्ततोज्यायान्। तदेवाह"पाद"इति। सर्वाणिभूता-न्यस्यैकः पादएकदेशः। त्रिपादमृतं दिविद्योतनवति स्वात्मनि स्थितमिति॥ एवं च "यदतः पर" इत्यत्र यच्छ-ब्दस्य सर्वनामत्वेन प्रसिद्धार्थवाचकत्वात्पूर्ववाक्ये द्युस-म्बन्धित्वेन प्रसिद्धं ब्रह्मात्रापि द्युसम्बन्धाद्यच्छब्देनप्रत्य-भिज्ञायते, न प्रकृतं लौकिकं तेजः। "अतः पर"इत्यादिना श्रुतं ब्रह्मणोमर्यादादिकमुपासनार्थमित्युक्तम्। ज्योति-श्शब्दो ब्रह्मण्यपि प्रसिद्धो वेदान्तेषु। तस्मादिह ज्योति-श्शब्दं ब्रह्म॥

## छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनि-गदात्तथा हि दर्शनम्॥ १। १। २५॥

यदुक्तं सर्वत्रगायत्र्याख्यच्छंन्द उपाधिकब्रह्मण उक्त-त्वात्तदत्र प्रत्यभिज्ञायत इति तन्न, "गायत्रीवा इदं सर्वं भूतं यदिदं किञ्चे"ति गायत्र्याख्यच्छन्दसः प्रकृतत्वा-त्तस्यैव "पादोऽस्य विश्वाभूतानी"ति भूतपादव्यपदेशो न ब्रह्मण इति। पूर्ववाक्ये छन्द एवाभिधीयते नब्रह्मेति चेन्न, गायत्र्याख्यच्छन्दोद्वारेण तदनुगतब्रह्मणिसर्वात्मकत्वं प्र-तिपाद्यते। "गायत्री वा इदं सर्व"मित्यादिना न ह्यक्षरस-न्निवेशमात्राया गायत्र्याः सर्वात्मकत्वं समञ्जसम्। तस्मा-द्गायत्र्यां विकारे यदनुगतं ब्रह्म तदेव"गायत्री वा इदं सर्व" मित्यादिना प्रतिपाद्यत इति। निष्कृष्टार्थस्तु। छन्दोऽभि-धानाद्गायत्र्याख्यच्छन्दस एवपूर्ववाक्ये प्रकृतत्वान्न ब्रह्म-णः प्रकृतत्वमिति चेन्न। कुतः। तथा छन्दोद्वारेण तद्गते ब्रह्मणि चेतोऽर्पणस्य चित्तसमाधानस्य निगदादभिधानात्। तत्र दृष्टान्तः। तथा हि दर्शनम्। अन्यत्राऽपि विकारद्वा-

रेण ब्रह्मोपासनं दृश्यतइति। दर्शनं दृष्टमित्यर्थः। "एतं ह्येव बह्वृचा महत्युक्थेमीमांसन्तएतमग्नाबध्वर्यवगतं महाव्रते छन्दोगा" इति। तदर्थस्तु। एतमेवात्मानमृग्वेदिनो महत्युक्थे प्रधाने शास्त्रे तदनुगतमुपासते,यजुर्वेदिनोऽग्नौक्रतौ, सामवेदिनो महाव्रताख्येक्रतौ तदनुगतं ब्रह्मानुसन्दधतइत्यैतरेये दृष्टमित्यर्थः। एवं गायत्रीशब्दो ब्रह्मलक्षकइति पूर्ववाक्ये ब्रह्म निर्दिष्टम्। यद्वागायत्रीशब्दो ब्रह्मणि गौणः। तथा च सूत्रे सिद्धान्तभागस्यायमर्थः । यथा गायत्री षडक्षरैः पादैश्चतुष्पादेवं ब्रह्माऽपि चतुष्पादिति गायत्रीशब्देन भिधीयते। चतुष्पात्त्वं गुणयोगात्। तथा गायत्री सादृश्येना चेतोऽर्पणस्य ध्यानस्य निगदाद्विधानादिति। "तथा हि दर्शन" मिति छन्दोऽभिधायिशब्दस्य सादृश्यादन्यत्र प्रयोगे दृष्टान्तः। तथा हि "ते वा एते पञ्चान्ये पञ्चान्येदश सन्तस्तत्कृत" मित्युपक्रम्याह "सैषा विराडि"ति। अस्यार्थः। सम्वर्गविद्यायामधिदैवमग्निसूर्यचन्द्राम्भांसि वायौलीयन्तेऽध्यात्मं प्राणे वाक्चक्षुः श्रोत्रमनांसीत्युक्तम्। ते वायुना सहपञ्चाधिदैविका अध्यात्मिकेभ्यः प्राणादिभ्योऽन्ये, तथा प्राणादयः पञ्चाधिदैविकेभ्योऽन्ये। एवं ते सर्वे दश सन्तः कृतमित्युच्यन्ते । कृतापरपर्यायचतुरायनामकद्यूतगतचतुरङ्कवच्चत्वारः पदार्थाः प्रकृते सन्ति, त्र्यङ्कायवत्त्रयो, द्व्यङ्कायवद्द्वौ, एकाङ्कायवदेकश्च। एवं कृतेदशके सर्वान्तर्भावात्तज्जये सर्वजयो भवति। यथा कृतेजिते त्रेतादिसंज्ञानिच्यङ्कायादीनिजितानि भवन्ति, तद्वत्तत्र चतुरायकापरपर्याय चतुरङ्कायनामकद्यतस्य कृतमिति संज्ञा। स च चतुरङ्कायोदशात्मकश्चतुर्ष्वङ्केषु त्रयाणां, त्रिषु द्वयो, स्तयोरेकस्य चान्तर्भावात् । वाय्वादयोऽपि दश। तथा

च दशत्वसंख्यासादृश्याद्धास्वादयः कृतमित्युच्यन्ते । एवमेव "दशाक्षरा विरा"डिति श्रुत्या "विराट्" नामकच्छन्दसो दशात्मकत्वाद्धाय्वादौ विराट्शब्दप्रयोग इति यथा तद्वद्ब्रह्मणश्चतुष्पात्त्वसाम्याद्गायत्रीशब्दप्रयोग इति दृष्टान्तार्थः । तस्मात्पूर्ववाक्ये ब्रह्मैव निर्दिष्टं न च्छन्द इति सिद्धम् ॥

## भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ १ । १ । २६ ॥

इतश्च गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमित्यभ्युपगन्तव्यमि"त्येव" शब्दार्थः । कुतः । भूतादिपादव्यपदेशोपपत्तेः । भूतपृथिवीशरीरहृदयैश्चतुष्पदा गायत्रीति व्यपदेशस्य ब्रह्मण्येवोपपत्तेरित्यर्थः । न ह्यक्षरसन्निवेशरूपगायत्र्यां भूतादिपादव्यपदेशः सम्भवति । किञ्च "तेवा एते पञ्च ब्रह्मपुरुषा"इति श्रुतिः पूर्वं ब्रह्मणः प्रकृतत्वे सङ्गच्छते । तथा हि गायत्र्याख्य ब्रह्मणो हार्दस्योपास्त्यङ्गत्वेन द्वारपालादिगुणविध्यर्थं "तस्य हवा एतस्य हृदयस्य पञ्च देवसुषय" इत्यादि वाक्यम् । तत्र "ते वा एते पञ्च ब्रह्मपुरुषा"इति श्रुतम् । तथा चोपास्त्यङ्गानां द्वारपालानां हृदयच्छिद्रेषुस्थितानां प्राणादिवायूनां ब्रह्मपुरुषत्वोक्तेर्हृदयच्छिद्रेष्वपि ब्रह्मसम्बन्धोऽवगम्यत इत्यतोऽस्ति पूर्ववाक्ये ब्रह्मप्रकृतम् । न हि गायत्रीमात्रस्यैवोपास्यत्वे तदङ्गानां ब्रह्मपुरुषत्वं युक्तम् । अतो हृदयच्छिद्रेषु ब्रह्मसम्बन्धात्तत्रस्थवायूनां ब्रह्मपुरुषत्वमिति ब्रह्मपुरुषश्रुत्युपपत्तेरिति । श्रुत्यर्थस्तु । हृदयस्य पञ्चदेवच्छिद्राणि । आदित्यादिनामकैः प्राणादिवायुभिर्देवैः परिपाल्यत्वाद्देवसुषित्वं छिद्राणामुपचर्यते । तानि हृदयच्छिद्राणि हृदयस्य प्राङ्मुखदक्षिणमुखप्रत्यङ्मुखोदङ्मुखोर्ध्वमुखरूपाणि ।

तत्स्थाः प्राणापानव्यानसमानोदानात्मका वायवः क्रमेणादित्यचन्द्राग्निपर्जन्याकाशनामकाः पञ्च ब्रह्मपुरुषा इति । तस्माद्गायत्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति ज्योतिर्वाक्ये द्युसम्बन्धात्तदेव प्रत्यभिज्ञायत इति सिद्धम् ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ १ । १ २७ ॥

ननु पूर्वस्मिन्वाक्ये "त्रिपादस्यामृतं दिवी"ति सप्तम्या द्यौराधारत्वेन निर्दिश्यते । 'अथ यदतः परो दिवो ज्योति"रित्यत्र पञ्चम्याऽवधित्वेन द्यौर्निर्दिश्यते । तथा च विभक्तिभेदेनोपदेशभेदाज्ज्योतिर्वाक्ये प्रत्यभिज्ञा न सम्भवतीति चेन्न । कुतः । उभयस्मिन्नप्यविरोधात् । विभक्तिभेदेनोपदेशद्वयेऽपि प्रत्यभिज्ञाया अविरोधादित्यर्थः । प्रधानप्रातिपदिकार्थेन प्रत्यभिज्ञाया गुणभूतविभक्त्यर्थो न प्रतिबन्धक इति भावः । तस्मात्परं ब्रह्मैव कौक्षेयकाग्नावुपास्यं ज्योतिःशब्दं नान्यद्भौतिकं तेज इति सिद्धम् ॥

प्राणस्तथाऽनुगमात् ॥ १ । १ । २८ ॥

पूर्वस्मिन्नधिकरणे यदतः पर" इत्यत्र यच्छब्दस्य प्रसिद्धार्थवाचकस्य बलवत्त्वात्तत्सहकृतं ब्रह्मलिङ्गं तेजोलिङ्गापेक्षया बलवदित्युक्तं, न तथेह किञ्चिद्बलवत्त्वसम्पादकमस्तीति प्रत्युदाहरणसङ्गतिरस्याधिकरणस्य । यद्वा पूर्वं दिविदेव इत्यत्र प्रधानप्रकृत्यर्थानुरोधाद्गुणभूतप्रत्ययार्थोऽन्यथानीतो यथा तद्वदिहापि स्वतन्त्रप्राणादिपदार्थभेदप्रतीतौ तत्सापेक्ष्यब्रह्मरूपैक्य वाक्यार्थप्रतीते र्गुणरूपाया अपलापो युक्तइति दृष्टान्तसङ्गतिः । पदार्थप्रतीतेः

स्वातन्त्र्यं जनकत्वेन, वाक्यार्थप्रतीतेर्गुणत्वं तज्जन्यत्वेनेति बोध्यम् । अस्तिकौषीतकीब्राह्मणोपनिषदि "इन्द्रप्रतर्दनाख्यापि का प्रतर्दनो हवैदैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चे"त्यारभ्याम्नाता । तस्यां श्रूयते "सहोवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपस्वे"ति । तथोत्तरत्रापि "अथ खलुप्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति तथा न वाचं विजिज्ञासीत वक्तारं विद्या"दित्यादि । अन्ते च "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत"इत्यादि । अस्यार्थः । दिवोदासस्यापत्यं पुमान्दैवोदासिः प्रियं प्रेमास्पदं धामगृहम् । तद्गतौ हेतु 'युद्धेने'ति । तत्कारणेन पुरुषकारप्रदर्शनेन च प्रतर्दनो राजेन्द्रस्य गृहं जगामेत्यन्वयः । तं दृष्ट्वेन्द्रउवाच "प्रतर्दन वरन्ते ददामि" । सहोवाच प्रतर्दनो "हे इन्द्र त्वमेववरं वृणीष्वयं त्वं मनुष्यायहिततमं मन्यस" इति । तत इन्द्र उवाच "प्राणोऽस्मी"ति । मुख्यप्राणं व्यावर्तयति "प्रज्ञात्मे"ति । निर्विशेषचिन्मात्रं व्यावर्तयति "तं मा" मिति । इदं च प्राणस्येदंरूपदेवतात्वेलिङ्गम् । प्राणस्य मुख्यप्राणरूपत्वेलिङ्ग "मथ खल्वि"त्यादि । वागादीनां देहधारणशक्त्यभावनिश्चयानन्तर्य "मथ" शब्दार्थः । प्राणवायोर्देहधारणं तदुत्थापनं च कार्यमिति प्रसिद्धमिति "खल्वि"त्युक्तम् । प्राणस्य जीवत्वेलिङ्गं "न वाच"मिति । प्राणस्य परमात्मत्वेलिङ्गं "स एष" इत्यादि । एव च प्राणशब्दस्येन्द्रप्राणवायुजीवपरमात्वपरत्वेन लिङ्गानां विद्यमानत्वात्संशयः किंपरः प्राणशब्द इति । तत्र प्रसिद्धत्वात्प्राणवायुपर इति प्राप्त उच्यते "प्राणस्तथाऽनुगमात्" । तत्र प्राणो ब्रह्मैव । कुतः । तथाऽनुगमात्तथा

ब्रह्मपरत्वेनाऽनुगमात् । अवगमादित्यर्थः । तथाहि प्रतर्दनः खलु हिततमं पुरुषार्थं पृष्टवान् । तस्य परमपुरुषार्थकामस्य प्राण उपास्यत्वेनोपदिश्यते "प्राणोऽस्मी"त्यादिना । एवं च परमपुरुषार्थत्वेनोपदिश्यमानः प्राणः कथं प्राणवायुः स्यात् । तथा "सयोहमां वेद न हवै तस्य केन च न कर्मणा लोकोमीयते न स्तेयेन न भ्रूणहत्यये"त्यादिब्रह्मपरिग्रहे घटते, "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टेपरावर"इत्यादिना ब्रह्मज्ञानिनः कर्मक्षयश्रवणात् । तदर्थस्तु योऽधिकारी मां ब्रह्मरूपं साक्षादनुभवति तस्य विदुषो लोको मोक्षो न मीयते न हिंस्यते महतापि पापेन, ज्ञानमाहात्म्येनसर्वस्यापि पापस्य दग्धत्वादिति भावः। एवं प्रज्ञात्मत्वं च ब्रह्मण एव युक्तम् । एवमुपसंहार "आनन्दोऽजर" इत्यपि ब्रह्मपरत्वे घटते । तथा "सनसाधुना कर्मणा भूयान्भवति नो एवासाधुना कनीयानेषह्येव साधुकर्म-कारयत्येषउएवा साधुकर्म कारयत्येष लोकाधिपतिरेषलोकपाल एष लोकेश" इति च ब्रह्मण्येव समञ्जसम् । अत्र हि धर्माद्यसंस्पृष्टत्वं तत्कारयितृत्वं तदीशितृत्वं च ब्रह्मणोऽसाधारण लिङ्गमस्तीति । तस्मात्पूर्वपरपर्यालोचनया ब्रह्मपरमेव प्राणपदमिति ॥

## न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमाह्यस्मिन् ॥ १ । १ । २९ ॥

नन्नु यदुक्तं प्राणो ब्रह्मेति तदयुक्तमिति नञर्थः । कुतः । वक्तुरात्मोपदेशाद्वक्तुरिन्द्रस्यात्मत्वेनोपदेशादित्यर्थः । तथाहि । वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान्देवताविशेषः स्वमात्मानं प्रतर्दनायोपदिशति "मा मेव

विजानी ही"त्युपक्रम्य "प्राणोऽस्मिप्रज्ञात्मे"त्यहङ्कारवादेन । किञ्च देवतायाः प्राणत्वे लिङ्गान्तरमस्ति "अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छ"मिति । "रुन्"वेदान्तवाक्यं तद्येषां मुखे न वर्तते तेऽरुन्मुखाः । शालावृकेभ्योऽरण्यश्वभ्यः । न हीदं ब्रह्मणो युक्तम् । एवमिन्द्रपरत्व इतरद्यथासम्बन्धं योजनीयमिति । अत्रोच्यते "अध्यात्मसम्बन्धभूमाह्यस्मि"न्निति । हि यस्मादस्मिन्नध्यायेऽध्यात्मसम्बन्धस्य भूमाबाहुल्यमुपलभ्यत इत्यर्थः । तद्यथा "यावद्ध्यस्मिन् शरीरे प्राणोवसति तावदायु"रिति प्रमाणस्यैव प्रज्ञात्मनः परमात्मभूतस्यायुःप्रदानोपसंहारयोः स्वातन्त्र्यं दर्शयति, न पराचीनस्येन्द्रस्य । एवमस्ति:वे "प्राणानां निश्रेयस" मिति श्रुतिरात्मानमिन्द्रिय श्रयं प्राणं दर्शयति । प्राणस्यास्तित्वे स्थितौ प्राणानामिन्द्रियाणां निश्रेयसंस्थितिरिति श्रुत्यर्थः । एवमेव "न वाचं विजिज्ञासीद्वक्तारं विद्या"दिति परमात्मानं वक्तारमुपक्रम्य "तद्यथारथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत" इति वाक्यं विषयेन्द्रियव्यवहारानभिभूतं प्रत्यगात्मानमेवोपसंहरति । श्रुत्यर्थस्तु । तत्तत्र भूतमात्रादीनां नानात्वं नेत्यर्थेदृष्टन्तः । यथालोके प्रसिद्धस्य रथस्यारेषु मध्यवर्तिषुशलाकासु चक्रोपान्तनेमिरर्पिता, नाभैाचक्रपिण्डकायामरा अर्पितास्तद्वद्भूतानि पृथिव्यादीनि । मात्राः शब्दादयो विषयाः । मीयन्त इति मात्राः । प्रज्ञामात्रासुस्वस्वबोधकेष्विन्द्रयेषु बुद्धिद्वाराऽर्पिताः । कर्मेन्द्रियेष्वपि तद्विषया अर्पितास्तदधीनत्वात्तद्व्यवहारस्य । ताश्च प्रज्ञा-

मात्राः प्राणे परस्मिन्नर्पिताः । प्राणस्य ब्रह्मत्वे लिङ्गं "स एष"इति । तस्मादध्यात्मसम्बन्धबाहुल्यात्प्राणात्मकब्रह्मोपदेश एवायं न देवतात्मोपदेश इति सिद्धम् ॥

कथं तर्हि वक्तुरात्मोपदेश इत्याशङ्क्याह ।

## शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ १ । १ । ३० ॥

इन्द्रस्य वक्तुर्मामेव विजानीही त्युपदेशः शास्त्रदृष्ट्या ज्ञातव्यः । अहमेव परंब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः । "वामदेवव"दिति । यथा वामदेवः शास्त्रदृष्ट्या "अहं मनुरभवं सूर्यश्चे"त्याह तद्वदित्यर्थः । यदुक्त"मिन्द्रोयती" नित्यादिदेवतापरत्वे लिङ्गमिति, तन्न । यद्वेदान्तवाक्योत्थज्ञानप्रभावादहमेवं भूतोऽस्मीतीदृशवेदान्तवाक्यान्यध्येयानि, नोचेदरण्यश्वभ्यः प्रायच्छमित्येतदर्थकत्वेनाविरोधात् । तस्मात्प्राणात्मकब्रह्मपरमेतद्वाक्यमिति सिद्धम् ॥

## जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगात् ॥ १ । १ । ३१ ॥

ननु यदुक्तमध्यात्मसम्बन्धबाहुल्यान्न देवतात्मा प्राण इति तत्सत्यम् । तथापि न ब्रह्मपरमेवेदं वाक्यं किं तु जीवमुख्य प्राणवायुपरमपि । कुतः । जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च । " न वाचं विजिज्ञासीत वक्तारं विद्या- दि " ति जीवलिङ्गं वागादिकरणैर्वेष्टितस्य वक्तुर्जीवस्य सुविशेषत्व पलभ्यते । एवं " प्राण एव प्रज्ञात्मेदं- शरीरं परिगृह्योत्थापयती " ति प्राणलिङ्गं, देहधारणस्य प्राणलिङ्गत्वात् । तथा हि प्राण संवादे श्रूयते ।

already explained that under *Text* 7. What we have got to deal with here is the following. —

*Question:* "Is the *relationship with Being* with something that *is*, or with that which *is not*? If the former, then, in as much as this thing will already have an *existence* (*a being*) before the relationship of 'Being,' there would be no use for this latter; while in the other case, the thing being non-existing we could have *Being* even in such non-existing things as the hare's horn."

The reply to this is that in the case of eternal things we do not admit of any *precedence* or *sequence* (and hence there can be no such specification as '*before* or *after* the relationship of Being with regard to eternal objects; while in the case of non-eternal (transitory) things, it is actually the *previous non-existence* that serves as the (instigative) cause of the *being* (or coming into existence of that thing) [*i. e.* it is only what does not exist at all that can be brought into existence].

Nor could this apply to the case of such absolute non-entities as the 'hare's horn' and the like; as we do not know of anything having the power of *bringing into existence* any such thing (so in the case of these the *previous non-existence* could have no causal efficiency).

There is another point of similarity among Substance, Quality and Action; *It is the character of having communities and individualities*: In as much as the generic classes of substance and the rest serve as the basis of inclusive (or comprehensive) as well as of exclusive cognitions, they are spoken of as 'Communities,' and 'Individualities;' and it is to these three classes of 'Substance,' 'Quality' and 'Action' that belong the three categories of Substance, Quality and Action.

*The character of being denoted by the word 'artha' as a technicality of the Vaiçēshika system.* The doctors of the Vaiçēshika system have a conventional technicality among themselves, that the word '*artha*' should be taken as

denoting Substance, Quality and Action; and it is for this reason that these three are also spoken of by means of the word '*artha*' without any prefix or affix.

*The character of being the cause of Virtue and Vice.* These three are the causes that bring about virtue and vice. For instance, earth ( Land which is a substance ) when given away becomes the source of virtue, while when taken away (forcibly) gives rise to vice; similarly *Conjunction* or Contact (which is a *Quality*) is a source of virtue (or purity) when appearing in connection with the cow, and a source of vice (or impurity) when happening in connection with dead human bones; so again 'going' (which is an *Action*) is a source of virtue (purity) when it is towards a sacred place, and a source of impurity, when tending towards a grogshop. Other similar instances may be cited. In the expression *Dharmādharmakartṛtvam*' the affix '*tva*' indicates that substances have an inherent faculty in themselves, of producing Virtue and Vice.

It might be argued that in this way 'class' ( which is *Sāmanya* ) also could be shown as the cause of vritue and vice. But the function of a class is restricted to the differentiation of its substratum from those of other classes; and its existence being fully justified by this, we do not refer any other to it.

For the distinction made between '*Astitva*,' '*Sattāsambandha*' and '*Svātmasattva*'—see note under Text (19).

---

*( Text 16 ):—The character of being an effect and that of being non-eternal, belong only to those ( Substances, Qulities and Actions) that have causes.*

## Commentary.

Those things that have a productive cause,—such for instance as Substance and the rest—have the common character of *being an effect* and *being non-eternal.*

Some people have defined '*being an effect*' as *inherence in the cause* or *inherence in 'Being' prior to non-existence.* But none

to these is correct; as of none of these would apply to 'Destruction' which is as good an *effect* as anything else. Hence we must define the character of *effect* as consisting in the fact of its having its existence (manifestation or appearance) dependent upon the action of a cause: as this is the definition that is found to apply to all effects.

'*Non-eternality*' has been defined by some as *existence qualified by previous non-existence and subsequent destruction.* But this is not correct; for the simple reason that 'non-eternality' is never known in this form; in ordinary parlance what people understand by 'non-eternal' is *destructible*; and they do not understand it as qualified by any sort of *existence.*

Others again define it as *liability to production and destruction.* But there is not much in this definition either; as *Prāgabhāva* (Previous non-existence, which is *non-eternal)* is never *produced.*

For these reasons we must accept *non-eternality* to consist of the *destruction of the particular form of the thing;* as has been declared elsewhere—"Non-eternality is said to be the action of destruction in general." Though there is no destruction at the time that the thing is actually existing, yet ( there could be nothing objectionable in having *destruction* as its qualification, as ) we do admit of *destruction* as the qualification of a thing, when its possibility is proved by other means of knowledge than direct perception (even though it may be not actually perceptible at the time). And as a matter of fact we do find one and the same man cognising the *jar* (an entity) *as non-eternal;* similarly also, such notions as—'the destructible body,' 'the unpermanent objects'—are very common. [ In all these cases the object itself is what is directly perceived, the qualification being always recognised by other means of knowledge.]

---

Text (17) :—*The quality of being the cause belongs to all* (Substances, Qualities and Actions) *except the 'atomic measure' &c.*

## Commentary.

The *etcetera* includes—(1) the dimension of the diad, (2) the omnipresence of *Akāça*, Time, Space and Self, (3) the 'final' sound, (4) the dimension of the mind, (5) Posteriority and Priority, (6) Dual Separateness, and (7) Dimension of the ultimate bodied substance. Barring these, to all Substances, Qualities and Action, belongs the character of the cause material and non-material.

Though Substance is never the *non-material* cause, and Qualities and Actions never appear as *material* causes,—yet the similarity spoken of consists in the fact of these appearing as causes *other than the Instrumental.*

---

NOTES :—Under '*Pārimāndalya*,' the *Kiraṇāvali* includes the following :—

(1) The Largest Dimension, (2) The colour, Taste, Odour, Touch and Dimension, of the ultimate bodied substance, (3) Dual separateness, (4) Distance, (5) Proximity, (6) The Conjunction, Disjunction, Speed and Action of substances in the state of destruction, (7) The Final sound, (8) The Final Faculty, or potency.

*Parimāṇas*, Dimensions have the nature of causing or bringing about a *parimāṇa* or dimension of a degree higher than themselves ; and it is for this reason that no ultimate *Parimāṇas* can ever be causes.

*Cause.*—That is the cause, on the existence of which something else exists, and on the non-existence of which this latter does not exist. (*Nyāyavārtika* p. 24.) Causes are of two kinds—Principal and Secondary. To the former kind belong the three classes of cause—*viz.* (1) the *Samavāyi* or material cause, as the atoms of the universe, (2) the *asamavāyi*, or non-material cause, *e. g.* the *conjunction of the atoms*, and (3) the *nimitta* or Instrumental cause, *e. g.* God's wish to create. This according to the *Naiyāyika* and the *Vaiçeshika.*

The Vedānti admits of only two kinds of cause—(1) the *nimitta, e. g.* Brahma of the universe ; (2) the *upāddna* or material cause *e. g.* the atoms directly, and Brahma indirectly. According to the Sānkhyas, Prakrti is both the *nimitta* and the *upādāna kāraṇa* of the universe. It may be remarked in passing that the *nimitta-kāraṇa* includes the 'efficient' 'Formal' and 'final' cause of Aristotle, as the *Upādāna* or *Samavāyi Kāraṇa* includes his 'material' cause.

---

*Text (18) : The character of subsisting in substances* ( belongs to Substances, Qualities and Actions ) *with the exception of the eternal substances.*

## Commentary.

*Question.*—"It has been said before that *dependence* belongs to the six (categories) ; and as such the present sentence would appear to be a useless repetition."

In answer to this some people explain that what is spoken of

here is *dependence on, or subsistence in, substances.* But this explanation is not satisfactory; as such existence in substances would belong to Generality and the rest also; and hence the sentence in question could not be rightly taken as showing a point of similarity between Substance, Quality and Action only.

Hence we must explain the sentence in the following manner: In the clause '*anyatra nityadravyēbhyaḥ*', the word '*dravya*' should be taken as including also the ultimate Individualities of these; the sense of the sentence thus comes to be this: the character of subsisting in Substances *alone* is common to the three (Substance, Quality and Action), with the exception of the eternal substances and the Individualities of these.

---

NOTES:—The '*Subsistence*' here spoken of indicates that these have Substance for their inherent or material cause. And the meaning is that this is a character that is common to all substances, qualities and actions, except those substances and qualities that are eternal. The presence of '*ca*' in the Text indicates another common character, which consists of their having qualities for their non-material causes; this character also is common to all substances, qualities and actions, except those that are eternal, and also the first conjunction and disjunction. *Kiranāvalī.*

---

*Text* 19: *The three beginning with Generality have the character—of having their sole being within themselves, having Buddhi or the Cognitive Faculty as their sole indicator, of not being an effect, of not being the cause, of having no particular generalities, of being eternal, and of not being expressible by the word* '**artha**.' (I—ii—10,12,14,16,3; VII—ii—26).

## Commentary.

The existence of Generality, Individuality and Inherence, lies in their own individual specific forms, and not in any relationship to any such generic entity as 'Being.' What is meant by this is that these three categories have the common character of being devoid of any generalities. This is accepted because of the absence of any notions to the contrary. Nor can there be any such Generality as 'Being' in Generality itself, as the consequences of such a postulate would be very undesirable (as the presence of a Generality in Generality would lead to an un-

necessary *regressus ad infinitum*, an endless series of Generalities.)

In the case of Individualities (Ultimate Individualities) also, if we had any Generality applying to them, in as much as there would always be a doubt as to the particular Generality to which a number of Individualities with similar properties would belong, it would be necessary to follow up the series of Individualities, step by step; and this would lead us to an endless series of these individualities.

"The contradiction lies in the fact of the difference in the form."

True; such a contradiction does exist; yet it is not wrong to admit of the *variegated* colour; specially as its existence is directly perceived by all men, as originating from various coloured materials.

*Objection*:—"In the case of a multi-coloured piece of cloth, in which colours appear only on one side of the cloth, there would, in accordance with what you say, be a possibility of the perception of the variegated colour even on the plain side of the cloth; as the colour belongs to the *cloth,* which is perceptible on that side as well, and which is one only."

*Reply*:—This could not be; because what is known, on the ground of invariable concomitance and non-concomitance, as the basis of the perception of the veriegated colour, is the perception of the various colours belonging to the constituent parts of the coloured object,—a perception which is recognised as one of the causes of the perception of the *variegated colour;* and as the constituent parts of the cloth on the plain side are devoid of any colours, there could be no perception of the *variegated* colour on that side.

"In that case there could be no perception of the variegated colour in any substance; as all such substances would be made up of the diads of various colours; and these diads having the *invisible* atoms for their constituent parts, the colours in question could not be perceived; as there could be no perception of the colours of these atoms that go to make up the diads."

Who says it is not so? It is quite true that we cannot distinguish the colours of extremely subtle things; it is only in the case of those substances whose colour can be distinguished, that we have a perception of the colours of their constituent parts.

There are some people who hold that in the case of the multi-coloured object, what we see are the *several variegated* colours extending only over certain parts of the object; but for these people there would be no colour in a cloth where the two threads are yellow and blue; as the colour of neither of these two constituent threads could bring about the '*variegated*' colour. It might be argued that in this case the two colours give rise to a single 'variegated' colour. But then, this could be said of all cases equally: For instance, we can say that 'the substance of variegated colour, that forms the subject of discussion, is related to a single-coloured object, because it is a substance, like other substances': and again, 'the colour of that substance is *one* only because it is the colour of a material object, like the colour of other material substances,'; and hence the multicoloured object cannot be said to have *several variegated* colours, each extending over a portion of the object certain.

*Taste is of six kinds*—to be explained as before.

**Page31.]** The pointing out of the various kinds of odour would be an indirect mention of the forms of Earth; hence the Author says: *Odour is of two kinds.* 'These two kinds are—*the Good and the Bad.* What is meant by '*Asurabhi*' (Lit: *non-good-smell*) is not a mere *negation of good* smell, but a distinct odour, contrary in its nature to good odour, inhering in certain substances, and perceived as something undesirable; because it is always perceived in a positive form, in its varying grades.

मापन्नत्ववद् आत्मीयरूपमपिधाय ग्राह्यरूपाकारेण निर्भासते चेतने प्रतिबिम्बितं भवति । ग्राह्यं च त्रिविधम् । तथा हि तन्मात्रादिप्रकृतिपर्यन्तसूक्ष्मोपरक्तं तत्समापन्नं तत्स्वरूपाभासं भवति । एवं पञ्चमहाभूतरूपस्थूलोपरक्तमित्यादि पूर्ववत् । तथा स्थावरजङ्गमाद्यवान्तरभेदरूपविश्वभेदोपरक्तमित्यादि प्राग्वत् । यद्यपि सूत्रे ग्रहीतृग्रहणग्राह्येष्विति क्रमः उक्तस्तथाऽप्युत्पत्तिक्रमानुरोधाद् ग्राह्यमारभ्य व्याख्यातम् । एवं व्याख्यानेऽपि विश्वभेदस्थूलसूक्ष्मेष्विति क्रमो ज्ञेयः । गृह्यतेऽनेनेति ग्रहणमिन्द्रियं तत्रेन्द्रियालम्बनोपरक्तमिन्द्रियसमापन्नत्ववच्चित्तमिन्द्रियस्वरूपाकारेण निर्भासते । अत्रापि विश्वभेदस्थूलसूक्ष्मरूपं त्रैविध्यं द्रष्टव्यम् । अत्र विश्वभेदः स्थावरजङ्गमानां चक्षुरादिविशेषाः, स्थूलं सामान्यं चक्षुरादिकं, सूक्ष्मं बुद्ध्यहङ्कारौ, ग्रहीता पुरुषो ग्रहीतृत्वं ग्रहणफलोपहितत्वं ग्रहीतृपुरुषोपरक्तं तत्समापन्नं ग्रहीतृपुरुषस्वरूपाकारेण निर्भासते । अत्र ग्रहीतृपुरुषप्रतिबिम्बश्चित्तगतं तेन शब्देनोक्तम् । एवं मुक्तपुरुषालम्बनिका, ईश्वरालम्बनिका च समापत्तिर्ग्रहीतृपदेनैव सूत्रेण गृहीता । अस्यां च न स्थूलसूक्ष्मरूपो विशेषः ।

अतो ग्राह्यग्रहणसमापत्त्योर्विशेषानाह—

**तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा**
**सवितर्का समापत्तिः ॥ ४२ ॥**

तृतीयसूत्रे सूक्ष्मविषयाया वक्ष्यमाणत्वेनात्र सूत्रद्वये स्थूलविषयकत्वं परिशेषात् । स्थूलं पञ्च महाभूतान्यहङ्कारकार्येन्द्रियाणि च । तत्र विकल्पिकाया एतद्विषयसमापत्तेरिदं लक्षणं, गौरिति शब्दो, गौरित्यर्थो, गौरिति ज्ञानमित्येवमभेदेन वस्तुतो भिन्नानामपि विकल्पाख्यं ज्ञानं लोके दृष्टम् । न चाभेदो वास्तव एवास्तीति

वाच्यम् । यतः परीक्षकैर्विविच्यमाना एते तारत्वमन्दत्वादिधर्मवत्त्वादर्थज्ञानाभ्यां भिन्नाः शब्दाः, जडत्वमूर्तत्वादिधर्मवत्त्वादन्येऽर्थाः, प्रकाशामूर्तत्वादिधर्मवत्त्वादन्यदेव ज्ञानमिति एषां स्वरूपभेदोन्नायको धर्माणां मिथो व्यावृत्तस्वरूपो मार्गः । अभेदविकल्पे बीजं तु परस्पराविभाग एव । न च विकल्परूपैव समापत्तिरतो विकल्पैः संकीर्णेत्यनुपपन्नमिति वाच्यम् । गवादौ स्थूलभूतेन्द्रियेषु समाहितचित्तस्य योगिनः समाधिप्रज्ञायां समारूढो यो गवाद्यर्थः स यदि गौरयं भासत इत्येवं शब्दार्थज्ञानानामभेदभ्रमरूपेण विकल्पेन विषयीकृतो भवति तदा तस्या विकल्पविषयीभवदर्थविषयकत्वमात्रेण विकल्पसङ्कीर्णत्वोक्तेः । अत्र हि गौरयमित्यंशे शब्दार्थयोर्विकल्पो, भासत इत्यंशेऽर्थज्ञानयोः, भासत इत्यस्य हि प्रकाशत इत्यर्थः । विषयस्य ज्ञानकर्तृत्वं चाभेदरूपमेव ज्ञानाकारत्वस्यैव विषयत्वात् । इयं च समापत्तिः सवितर्केति सविकल्पिकेति चोच्यते लोकेऽपीदृशमेव सविकल्पकमित्युच्यते । इयं च समापत्तिरपरं प्रत्यक्षमित्युच्यते ऽविद्यासम्बन्धात् । अत्रेदं बोध्यम् । श्रुतस्यानुमानेन कृतमननस्यार्थस्य समाधिविषयता । तत्र श्रवणं शब्दसङ्केतस्मरणपूर्वकं, सङ्केतश्चायं गौरिति शब्दार्थयोरितरेतराध्यासात्मक एतद्वैतत्परमपरं च ब्रह्मयदोङ्कार इत्यादिश्रुतेः । अमरा निर्जरा देवा इत्यादिकोशेषु च सङ्केतस्य विकल्पिताभेदरूपत्वावधारणादतस्तत्समानाकार एव शाब्दबोधस्तन्मूलकमनुमानं च तथैव भवतीति तन्मूलिका समाधिप्रज्ञाऽपि प्रथमा तादृश्येव भवति । यदा तु तदनन्तरमर्थमात्रादरवता चेतसा सङ्केतस्मृतेः परिशुद्धिस्त्यागः क्रियते तदा तत्स्मृतिनिमित्तकः श्रुतानुमानज्ञानकालिकविकल्पशून्यायां समाधिप्रज्ञायां स्वरूपमात्रेणावस्थितोऽर्थः स्वरूपाकारेणैव भासत आरोपगन्धस्याप्यभावात्सा निर्वितर्का

समापत्तिः । आरोपसंपर्काभावादेव तत्परं प्रत्यक्षमित्युच्यते । तच्च श्रवणमननयोर्बीजम् । तादृशप्रत्यक्षवतो गुरोर्हि ते भवतः । अशेषविशेषसाक्षात्काररहितेन गुरुणाऽसंदिग्धाविपर्यस्तवस्तूपदेशासंभवात् । अतः सवितर्काऽनधिगतविशेषविषयत्वादस्या एवानधिगतार्थगन्तृत्वरूपं प्रामाण्यम् । न च तादृशगुरूपदेशादेव तत्सिद्ध्या इयं व्यर्था । गुरोर्विशेषज्ञत्वेऽपि इक्षुक्षीरादिमाधुर्यविशेषवद् गुरुणाऽपि तस्य विशेषतो वक्तुमशक्यत्वेन श्रुतानुमानयोस्तत्समानाकारत्वासम्भवात् ।

तस्मात्प्रमाणान्तरासङ्कीर्णं योगिनो निर्वितर्कसमाधिजं दर्शनमतो निर्वितर्कां समापत्तिं लक्षयति ॥

## स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४३ ॥

शब्दसङ्केतस्मृतिजन्या श्रुतानुमानरूपे ज्ञाने या विकल्परूपा स्मृतिः सवितर्ककाले ऽनुवर्तमाना तत्परिशुद्धौ तदपगमे सति स्वं रूपं ग्रहणात्मकं प्रख्यरूपं तच्छून्येव तदग्रहणात् । एवं च ग्राह्यार्थमात्रनिर्भासा तन्मात्रस्वरूपापन्नेव सा निर्वितर्का समापत्तिरित्यर्थः । अस्या एव निर्विकल्पेत्यपि व्यवहारः । वितर्कविचारेति सूत्रे यः स्थूलविषयकाभोगो वितर्क उक्तः स एवात्रेत्थं द्विधोक्तः । नन्वस्या विषया यद्यवयवास्तर्हि वक्ष्यमाणनिर्विचारसमापत्त्या सङ्करो यद्यवयवी तदा तस्य कल्पितत्वेनास्या विकल्पशून्यत्वानुपपत्तिरिति चेन्न, गवादिर्घटादिर्वा लोकोऽवयवातिरिक्तावयविरूप आलम्बनमिति पूर्वाचार्यैर्व्याख्यातत्वात् । न चातिरिक्तावयविनि न प्रमाणम् । एको गौरिति बुद्ध्या तत्सिद्धेः । अवयवानामनेकत्वेनैतद्बुद्ध्यनिर्वाहकत्वात् । न चैकमेकं विज्ञानमेवावयविव्यवहारहेतुरस्तु दृश्यस्वरूपत्वरूपार्थात्मकत्वात् । विज्ञानस्य

कर्तृकर्मविरोधेन स्वदृश्यत्वानुपपत्तेः । न चावयवेभ्योऽवयविनो भेदे कपालं घटो जात इत्यभेदप्रत्ययानुपपत्तिः । तन्मात्रकार्याणां परमाणुरूपाणामणूनामेव प्रचयाख्यो यः संयोगस्तन्निमित्तकविशेषपरिणामरूपत्वात् । एतेन परमाणव एव नानाऽऽत्मनो निर्विकल्पविषया इत्यपास्तम् । तेषां योगिनो योग्यत्वेऽपि महत्त्वसमानाधिकरणैकत्वग्राहिप्रत्ययविषयात्वायोगात् । न च परमार्थसत्सु परमाणुषु प्रातिभासिकं स्थौल्यम् । असति बाधके वस्तुत्वेन प्रतीयमानस्यापलापायोगात् सामान्यविशेषयोश्च भेदाभेदाङ्गीकारान्नाभेदप्रत्ययानुपपत्तिः । अन्योन्याभावस्य दुग्धजलयोरिवाविभागरूपाभेदस्य चाविरोधात् । न चावयविनः पटस्यैकावयवनाशे नाशापत्त्याऽनुपलब्धिप्रसङ्ग इति वाच्यम् । ससंस्थानविशेषरूपस्थूलोऽवयवी स्वकारणभूतसूक्ष्माणां साधारणः प्रत्येकपरिसमाप्तो धर्मो न तु द्वित्वादिवद्व्यासज्यवृत्तिः एकावयवव्यवधानेऽप्यप्रत्यक्षत्वापत्तेः । एवं चैकावयवनाशेऽवयवान्तरे तदवस्थित्या तदुपलब्धिसम्भवात् । विजातीयावयवविभाग एव तन्नाशकः फलबलात्कल्प्यते । न चासदुत्पादे शशशृङ्गादिकमपि स्यात् । तस्य सदैव सूक्ष्मभूतेष्वनुगतत्वेन तदात्मभूततयाऽसदुत्पादानङ्गीकारात् । तदात्मभूतत्वे चाभिव्यक्तिलक्षणं कार्यमेवानुमापकम् । असदभिव्यक्तौ सर्वेच सर्वाभिव्यक्त्यापत्तेः । न चैवं सर्वदाऽभिव्यक्त्यापत्तिः । स्वाभिव्यक्तिहेतुनिमित्तकारणसहकारेण स्ववर्तमानावस्थाप्राप्तिरूपप्रादुर्भावाङ्गीकारात् । मुद्गरघातादिना कपालादिरूपधर्मान्तरोदयेऽतीतावस्थारूपतिरोभावाङ्गीकारात् । स एषोऽवयवानां धर्मोऽवयवीत्युच्यते । अतीतानगतावस्थे एव च ध्वंसप्रागभावौ । घटो वर्तमान इति व्यवहारस्त्वभिव्यक्त्या । अभिव्यक्तेरभिव्यक्तिस्तूत्पत्तेरुत्पत्तिवद्, अभावेऽभाववत्, तत्स्वरूपैवेति नानवस्था । यद्वा सत एवाभि-

व्यक्तिरित्येव सत्कार्यवादिनां नियमः अभिव्यक्तेरभिव्यक्त्यन्तरास्वीकारेणासत्या एवोत्पादेऽपि न क्षतिः कार्याणामनागतावस्थैवाभिव्यक्तेरनागतावस्था सैव तदुत्पत्तौ नियामिकाऽतः शशशृङ्गादिवैलक्षण्यम् अभिव्यक्तेर्घटस्वरूपत्वं तु न घटोऽतीत इति व्यवहारानुरोधेन स्वीकृता अतीतावस्थघटेनाभिव्यक्तिव्यवहारोपपत्तेरिति दिक्। सोऽवयवी एको महान् कार्यैः परमसूक्ष्मत्वाभावात् स्पर्शवांश्च क्रियावांश्चानित्यश्चेत्यतो नावयवरूपोऽवयवविलक्षणजलाहरणादिव्यवहारकारी च। यत्तु वैनाशिक आह। स प्रचयनिमित्तको विशेषो ऽवयवी अवस्तुकस्तुच्छः। तथा हि यत्सत्तदनवयवं यथा विज्ञानं, किं च यत्सत्तद्विरुद्धधर्मसंसर्गरहितम्, अस्ति चावयविनि विरुद्धधर्मसंसर्गस्तद्देशत्वातद्देशत्वरक्तत्वारक्तत्वादिरूपइतिसत्त्वव्यापकविरुद्धोपलब्ध्या सत्त्वाभावे तुच्छत्वं पर्यवसन्नमिति। तन्न। यतस्तस्यावयवाख्यकारणस्य सूक्ष्मत्वेनाप्रत्यक्षत्वाद् अवयविनश्च तुच्छत्वात् सर्वमेव ज्ञानं मिथ्याज्ञानं स्यात्। अतद्रूपप्रतिष्ठस्यैव मिथ्याज्ञानत्वाद्। एवं च विषयाभावात् सम्यग्ज्ञानविलयापत्तिः उपलम्भविषयस्यावयवित्वाक्रान्तत्वात्। अवयवानामप्रत्यक्षत्वात् तज्ज्ञानं सम्यग् ज्ञानमिति वक्तुमशक्यमेव। अवयविविषयकत्वेन पराभ्युपगतज्ञानस्यापि रूपादिवन्मिथ्यात्वेन ज्ञानज्ञानं सम्यग् ज्ञानमित्यपि वक्तुमशक्यम्। सर्वं ज्ञानं भ्रमो ज्ञानत्वादित्यनुमानसंभवाच्च। यदुक्तं विरुद्धधर्मसंसर्गरहितत्वं सत्वव्याप्तमिति तन्न। अर्थक्रियाकारित्वरूपं सत्त्वं घटादीनामिष्यते तच्च न स्थूलत्वादन्यत् तस्य च तथात्वाभावात्। न च सद्व्यावृत्तिरेव सत्त्वं तच्च तद्व्याप्तमेव, अगृहीतपरमसूक्ष्मत्वा निरन्तरसंबद्धा रूपपरमाणव एवानुभवविषया इति वाच्यम्। गन्धरसस्पर्शपरमाणुभिः परस्परं सर्वेषां सान्तरत्वात्। एवं चान्तरालाग्रहेण जायमानस्यास्य विकल्परूपत्वात्

तद्गृहीतसत्त्वस्यानवयवत्वसाधकत्वाभावाद्, उक्तयुक्त्या परमाणूनां ज्ञानविषयत्वासंभवाच्च । तस्मादस्यत्यावयवी यो महत्त्वादिव्यवहारविषयो निर्वितर्कायाः समापत्तेर्विषय इति ।

सूक्ष्मविषयत्वेऽपि द्वैविध्यमतिदिशति ।

**एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४४ ॥**

एतया सवितर्कनिर्विकल्परूपस्थूलविषयसमापत्त्या सूक्ष्मविषयाऽपि सविचारनिर्विचारत्वाभ्यां द्वयी व्याख्याता, अन्योपरागानुपरागसाम्येनेत्यर्थः । सूक्ष्मविषयकाभोगो विचार इत्युक्तस्तस्येदं द्वैविध्यं मन्तव्यं, भूतानाम्, इन्द्रियाणां यत्सूक्ष्मकारणं तन्मात्रादिप्रकृतिपर्यन्तं तेषु वर्तमानधर्मविशिष्टेषु देशकालनिमित्तैर्विशिष्टतयाऽनुभूयमानेषु वा समापत्तिः सा सविचारेत्युच्यते । देश उपर्य्यधःपार्श्वादिः, कालो वर्तमानः, निमित्तं परिणामप्रयोजकः पुरुषार्थविशेषः । अत्राप्येकबुद्धिनिर्ग्राह्यं वर्तमानधर्मविशिष्टं भूतसूक्ष्मं तन्मात्राद्यवयविरूपं सूक्ष्ममालम्बनं समाधिप्रज्ञायामारूढं भवति । एवं च स्थूलकार्योपरागेण सूक्ष्मे समापत्तिः सविचारा कार्यकारणविचारघटितत्वात् तत्र हि स्थूलकार्यघटादिवैशिष्ट्यं तत्र चाणूनामुपर्यधोदेशावच्छिन्नत्वं गृह्यते, तत्र पार्थिवपरमाणौ गन्धतन्मात्रप्रधानपञ्चतन्मात्रानुगमः । आप्ये गन्धतन्मात्रं विहाय रसतन्मात्रप्रधानचतुरनुगमः । तैजसे तद्द्वयं विहाय रूपतन्मात्रप्रधानत्र्यनुगमः । वायवीये स्पर्शशब्दतन्मात्रानुगमः । नाभसे शब्दतन्मात्रानुगम इत्येवं विशिष्टा बुद्धिरुपजायते, तन्मात्रं च गन्धाद्यणुप्रचयात्मकावयविरूपं, या पुनः सर्वैः स्वरूपैर्देशकालाद्यनवच्छेदेन सर्वधर्मानुगतेषु सर्वधर्माश्रयेषु च भूतसूक्ष्मेषु अतीतवर्तमानभविष्यद्धर्मानवच्छिन्नत्वेन समापत्तिः

सा निर्विचारा, उक्तस्वरूपं हि भूतसूक्ष्मं कार्यानवच्छिन्नत्वेन शुद्धस्व-स्वरूपेण समाधिप्रज्ञायामालम्बनं सतेनैव रूपेण तामुपरञ्जयति प्रज्ञा च स्वस्वरूपेणापि शून्यार्थमात्रा यदा भवति तदा निर्विचारा, एत-योर्विकल्पत्यागात्यागाभ्यां न भेदद्वयं निर्वितर्करूपायां पूर्वभूमिकायां त्यक्तविकल्पस्योत्तरभूमिकायामसंभवादिति दिक् ।

तच्च सूक्ष्मो विषयः कियत्पर्यन्त इत्याकाङ्क्षायामाह ।

**सूक्ष्मविषयत्वञ्चालिङ्गपर्यवसानम् ॥ ४५ ॥**

सूक्ष्मत्वं तत्त्वान्तरप्रकृतित्वं तेन पार्थिवादिपरमाणवो न सूक्ष्माः, ते हि उत्तरभूतेष्वाधारकारणानि न तु प्रकृतयः, अष्टौ प्रकृतय इति सिद्धान्तात् । एवञ्च केवलविकृतत्वं स्थूलत्वं परमाणु-साधारणम् । अलिङ्गं प्रकृतिस्तत्पर्यन्तं पञ्चतन्मात्रमारभ्य सूक्ष्मविषत्व-मित्यर्थः । तथा हि पार्थिवस्याणोर्गन्धतन्मात्रं सूक्ष्मं तत्र पार्थि-वावयवेनया गन्धतन्मात्रं समापत्तेः सूक्ष्मो विषयः । यद्यप्यसौ पञ्चतन्मात्रारब्धस्तथाऽपि गन्धतन्मात्रस्य प्राधान्यात्तदेव तस्य सूक्ष्म-मुक्तम् । एवमाप्यस्य रसतन्मात्रं, तैजसस्य रूपतन्मात्रं, वायवीयस्य स्पर्शतन्मात्रम्, आकाशस्य शब्दतन्मात्रं, यद्यप्यहंकारविशिष्टस्यैवास्य तत्कारणत्वं तथाऽप्युक्तन्यायेनास्यैव तत्सूक्ष्मत्वमुक्तं तेषां तन्मात्रा णामहङ्कारः सूक्ष्मः, एवमिन्द्रियाणामपि स सूक्ष्मः, उभयकारणत्वात् । अहंकारस्यापि लिङ्गमात्रं महत्तत्त्वं सूक्ष्मो विषयः तद्धि स्वकारणप्रकृ-त्यनुमापकमात्रत्वल्लिङ्गमात्रमङ्कुरवत् प्रकृतिगतसर्वविशेषाणामहंका-रादिष्वेव प्रकटीभावात्, यथा यत्र काण्डादिभिर्बीजगतविशेषाभिव्य-क्तिनोङ्कुरमात्रेणेति तस्याप्यलिङ्गं प्रधानं सूक्ष्मो विषयः अकार्यत्वेन कस्याप्यननुमापकत्वात् । ततः परसूक्ष्माभावात् । नन्वस्ति पुरुष-

स्ततोऽपि सूक्ष्मो निधर्मकत्वादिति चेन्न । यथोपादानतया लिङ्गपेक्षं सौक्ष्म्यं प्रधानस्य तादृशस्य पुरुषेऽभावात् । उपादानतया सूक्ष्मत्वस्यैवात्र विवक्षितत्वात् । स च न महदाद्युपादानकारणम् । किन्त्वधिष्ठानकारणरूपं निमित्तकारणमेव तस्य तादृशहेतुत्वमादायैव "यतो वा इमानि भूतानी"त्यादिश्रुतिः । श्रुत्याऽपि अधिष्ठानत्वरूपमेवोपादानत्वेनोच्यत आकाशस्य वायूपादानत्ववत् । "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचर"मिति गीतोक्तेः पुरुषस्य विकारित्वापत्तेश्च जीवपुरुषाणां महदादिसृष्टिहेतुत्वं संयोगमात्रेण नोपादानत्वेन पुरुषार्थे प्रकृतेः प्रवृत्त्यभ्युपगमादिति दिक् । अतः प्रधाने निरतिशयं सौक्ष्म्यमुक्तम् । एवं ग्राह्यग्रहणसमापत्त्योः स्थूलसूक्ष्मविषयभेदेन विशिष्टाविशिष्टरूपतश्चतुर्धा विभाग उक्तः । ग्रहीतृसमापत्तौ यः सविकल्पकरूपो विशेषः स एतास्वेव चतसृष्वन्तर्भूतः चेतनोपरागेणैवाचेतनयोग्रस्य व्यवस्थापितत्वात् ।

इदानीं यथोक्तसमापत्त्याख्यकार्यमुखेन सबीजपरिभाषापूर्वकं संप्रज्ञातलक्षणमाह ।

**ता एव सबीजः समाधिः ॥ ४६ ॥**

ता एव ग्रहीतृग्रहणग्राह्येषु समापत्तयः सबीजः संप्रज्ञातयोग इत्युच्यत इत्यर्थः । समापत्तिरूपसाक्षात्कारहेतुत्वाद्योगोऽपि समापत्तिः, आनन्दोऽपि बुद्धिधर्मत्वात् ग्राह्यमध्य इति आनन्दानुगतस्यापि संग्रहः । एषां सबीजत्वं च बहिर्वस्तुभूतानात्मधर्मसंस्कारधर्मादिरूपबीजजनकसमापत्तिसम्बन्धित्वात्संप्रज्ञातयोगस्यापि संस्कारहेतुत्वात् धर्ममेघत्वाच्च ताश्च वितर्कानुगतादिरूपतया प्रागुक्ताश्चतस्रः सवितर्कनिर्वितर्कौ स्थूलानुगतत्वाद्वितर्कानुगतः, सविचारनिर्विचारौ च सूक्ष्मानुगतत्वाद्विचारानुगतः, आनन्दानुगतास्मितामात्रे

चेति । यत्त्विमैरानन्दानुगतास्मितामात्रयोर्विकल्पाविकल्पभेदावनियतौ स्त इत्युक्त्वा सबीजस्याष्टविधत्वमुक्तं तच्चिन्त्यम् ।

निर्विचारायां कञ्चिद्विशेषमाह ।

**निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ ४७ ॥**

वैशारद्यं च रजस्तमोवृद्धिकारणपापाद्यात्मकाशुद्धिरूपावरणलक्षणमलापेतस्य प्रकाशस्वभावस्य बुद्धिरूपसत्त्वस्य कारणाभावादेव रजस्तमोऽनभिभूतोऽतः स्वच्छो ध्येयगताशेषप्रतिबिम्बग्राही एकाग्रताधाराद्रूपो यः स्थितिप्रवाहः स । यदा च निर्विचारस्य समाधेरुक्तं वैशारद्यं जायते तदाऽऽत्मनि बुद्धौ पुरुषे च भूतार्थविषयको युगपत्सर्वार्थग्राही प्रत्यक्षरूपो यः प्रज्ञाऽऽख्य आलोको जायते सोऽध्यात्मप्रसादः । तदुक्तम् ।

प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुपश्यतीति ॥

"तरति शोकमात्मविदिति" श्रुतेरहं दुःखीत्यादिरूपैरशोच्यः सर्वान् जनान् शोचतो दुःखितान्पश्यति स्वयं शोच्यो हि स्वापेक्षया किञ्चित् सुखितमिव पश्यति मोहात्, अशोच्यस्त्वमूढत्वात्सर्वं दुःखसमुद्रमग्नमेव पश्यतीत्यर्थः । एवं च निर्विचारवैशारद्ये जाते स्वयमेव प्रकृतिपुरुषविवेको वा परमेश्वरतत्त्वं वा साक्षात्क्रियते न तु तदर्थं पुनर्योगापेक्षेत्यस्या उत्कर्षः ।

सबीजयोगे जायमानप्रज्ञायास्तान्त्रिकीं सञ्ज्ञामाह ।

**ऋतम्भरा तत्र प्रज्ञा ॥ ४८ ॥**

तत्र सबीजयोगे समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरा सञ्ज्ञा सत्यमेव बिभर्त्ति न तु तस्या विपर्यासरूपज्ञान-

लेशोऽप्यस्तीत्यन्वर्था सा तत्रेत्यनेन पूर्वसूत्रोक्तस्य न परामर्शः उत्तर-सूत्रतोऽत्र समाधिप्रज्ञासामान्यपरत्वस्यैव लाभात्, अतः तच्छब्देन सबीजस्य चरमा कक्षाऽस्मितामात्ररूपा विवक्षिता अन्वर्थत्वबलात् । आद्यत्रयेऽविद्यालेशसम्पर्कादिति बोध्यम् । तदुक्तम् ।

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममिति ॥

ध्यानस्य चिन्तनस्याभ्यासे यो रस आदरस्तेन श्रवणमनन-निदिध्यासनैस्त्रिभिर्हेतुभिर्योगकाले प्रकर्षेण विपर्यासराहित्येन प्रज्ञां कल्पयन्नुत्पादयन् तत्प्रज्ञया परवैराग्यद्वारेणोत्तमं योगं निर्बीजं लभत इत्यर्थः ।

ननु श्रुतानुमानाभ्यामेवार्थतत्त्वग्रहणे किं योगेनेत्यतआह ।

**श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ ४९ ॥**

सा तु श्रुतानुमानरूपप्रज्ञाभ्यां श्रवणमननाभ्यां भिन्नविषया विशेषार्थविषयकत्वादित्यर्थः । तथा हि श्रुतमागमजं ज्ञानं हि सामान्यविषयं तस्य विशेषाभिधानेऽसमर्थत्वात् पदार्थताऽवच्छेदकघटत्वा-द्यवच्छिन्ने हि संकेतग्रहः शब्दस्य, न तु विशेषे तेषामनन्तत्वात् श्रुतेऽप्यर्थे विशेषसंशयदर्शनाच्च । अनुमानमपि व्यापकताऽवच्छेदक-गतित्वादिसामान्येनैव भवति, न तु क्रियाऽऽदिगतविशेषरूपेणेति तदपि सामान्यविषयमेवेत्युक्तं प्रमाणलक्षणे । यद्यपि परमाणव आत्मा-नश्च प्रातिस्विकविशेषशालिनो, द्रव्यत्वे सति परस्परं व्यावर्तमान-त्वाद् इत्यनुमानेन विशेषवत्ता गृह्यते तथाऽपि विशेषत्वेनैव रूपेण न तु तत्तद्रूपेणेति बोध्यमतः श्रुतानुमानविषयो न कोऽपि विशेषः । न च लौकिकप्रत्यक्षेणैव तर्हि विशेषो गृह्यतां किं योगेनेति वाच्यम् ।

सूक्ष्मव्यवहितविप्रकृष्टविशेषाणां लौकिकप्रत्यक्षागोचरत्वात् । न चेदृशो विशेषोऽप्रामाणिकत्वान्नास्त्येवेति वाच्यम् । प्रमाणस्य प्रमेयसत्ताव्यापकत्वाभावाद् अप्रामाणिकेऽपि चन्द्रवर्त्तिहरिणे प्रामाणिकानां सन्देहदर्शनादिति मिश्राः । किञ्च न हि निर्विशेषं सामान्यमिति न्यायेन सर्ववस्तुनिर्विशेषसिद्धेः, योगिप्रत्यक्षसिद्धत्वाच्च । अतः परिशेषात्स विशेषः समाधिप्रज्ञानिर्ग्राह्य एव प्रकाशस्वभावस्य सर्वदर्शनसमर्थस्यापि चित्तस्य तमसा । वृतत्वाद्यत्र तमसोद्घाटनं क्रियते तत्रैव ग्राहकत्वं यदा त्वभ्यासवैराग्याभ्यां रजस्तमोमलयोरपगमः तदा प्रकाशानन्त्यात्सर्वविषयग्राहकत्वसम्भवः । यद्यपि स्थूलगतो विशेषः कदा चिल्लौकिकप्रत्यक्षगोचरोऽपि तथाऽपि भूतसूक्ष्मगतस्य पुरुषगतस्य च तद्ग्राह्यत्वमेव पुरुषगतविशेषाश्चातीतानागतवर्त्तमानाः स्वस्वोपाधिप्रतिबिम्बा । एवं मुक्तामुक्तसाधारणाखिलपुरुषेष्वन्योन्यं बोद्धव्याः । अन्तःकरणस्य विभुत्वेनातीतादीनां स्वरूपतः सत्वेन सर्वार्थसन्निकर्षो यद्यप्यस्ति तथाऽपि व्यवहितातीतादिज्ञानप्रतिबन्धकतमोनिरासार्थं योगजधर्मापेक्षेति दिक् । एतेन दशमस्त्वमसीति वत् शब्दादेवात्मनः साक्षात्कारो निर्विशेषत्वेन चात्मनो न विशेषग्रहार्थमपि योगजप्रत्यक्षापेक्षेति चिन्त्यम् । एवं समाधिप्रज्ञाऽतिलम्भे योगिनः प्रज्ञाकृतो नवो नवः संस्कारो जायत इति दिक् ।

नन्वेवमपि प्रज्ञापर्यन्तं योगापेक्षाऽस्तु तत्परम्परायाः किं फलमत आह ।

**तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥ ५० ॥**

प्रतिबन्धः कार्यविरोधित्वं समाधिप्रज्ञाभवः संस्कारो व्युत्थानजमनुद्बुद्धसंस्काररूपं संस्काराशयं बाधते । उद्बोधप्रतिबन्ध एव

बाधः उद्बुद्धस्य बाधसम्भवात् । अन्यथा, ऽनादिना निरूढेन निबिडेनातिबलीयसा वात्याप्रदीपपरिमाणुरिवायमभिभूयेत । नन्वेकप्रज्ञाव्यक्त्योत्पादितसंस्कारेण व्युत्थानसंस्कारबाधसंभवे पुनः पुनः संप्रज्ञातानुष्ठानं व्यर्थमिति चेन्न । एकदा संप्रज्ञातेन व्युत्थानसंस्कारबाधाभावात् । श्रुतिस्मृतिसिद्धस्य पुनः पुनर्व्युत्थानस्यानुत्पत्तेः । किन्तु संप्रज्ञातपरम्पराजन्यदृढतरसंस्कारेणैव तद्बाधः, अदृढैस्तु प्राथमिकैः संप्रज्ञातसंस्कारैस्तेषां तनुतापरम्परैव क्रियते । एवञ्च संस्कारदार्ढ्यार्थं प्रज्ञासंस्कारचक्रापेक्षणाददोषः भूतार्थपक्षपाताया बुद्धेर्यावत्तत्त्वप्रतिलम्भमेव भ्रमणं, तत्प्रतिलम्भे तु तत्र स्थिरपदाऽनादिमपि तादृशं व्युत्थानसंस्कारं बाधत एव । तदुक्तं बाह्यैरपि ।

निरुपद्रवभूतार्थस्वभावस्य विपर्ययै ।
न बाधोऽनादिमत्त्वेऽपि बुद्धेस्तत्पक्षपाततइति ॥

तदुक्तं भाष्ये व्युत्थानसंस्काराणां तनूकरणक्षयाद् अभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति तत्प्रत्ययनिरोधे समाधिरुपतिष्ठते निरन्तरो भवति ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कार इति नवो नवः संस्काराशयो जायते ततः प्रज्ञा ततश्च संस्कारा इति । न च प्रज्ञा साक्षादेव व्युत्थानसंस्कारबाधिकाऽस्तु एकप्रज्ञयैव तद्बाधे व्युत्थानानुपपत्तेः तज्जसंस्कारे दृढतरत्वरूपवैजात्यसम्भवेन तस्यैव व्युत्थानसंस्कारबाधकताऽवच्छेदकत्वान्नानुपपत्तिः । न च प्रज्ञासंस्कारातिशयेऽपि चित्तस्य स्वकार्यजननक्षमत्वरूपसाधिकारत्वनिवृत्तौ मानाभावेन पुनर्जन्मापत्तिः तेषामेव समाधिप्रज्ञाप्रसवहेतूनां सत्त्वात् । एवञ्च संप्रज्ञातजन्यज्ञानमात्रेणापि प्रारब्धसमाप्त्यनन्तरं मोक्षाभ्युपगमो विरुध्येतेति वाच्यम् । प्रज्ञाकृतसंस्काराणां जन्मकारणवि-

द्यादिक्लेशक्षयहेतुत्वेन चित्तस्य स्वकार्यभोगचमत्वरूपाधिकारवैशिष्ट्याकारकत्वात् कर्मनाशाच्च । किञ्च चित्तस्य विवेकख्यातिपर्यन्तमेव व्यापारेण विवेकख्यातिनिष्पत्तौ सत्यां प्रवर्तकपुरुषार्थाभावेन चित्तस्य स्वकार्यादवसादात् । एवं । च भोगाधिकारप्रशान्तिः प्रज्ञासंस्काराणां फलमित्युक्तं भवति ।

इदानीमसंप्रज्ञातस्य फलादि वदन्नेव चित्तस्य प्रज्ञाप्रवाहरूपस्वकार्याकरणे हेत्वन्तरमाह ।

**तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥ ५१ ॥**

पूर्वपूर्वसंप्रज्ञाते तावत्प्रज्ञैव निरुध्यते प्रज्ञासंस्कारस्य तु तानवं क्रमेण तस्यापि प्रज्ञाकृतसंस्कारस्याप्यसंप्रज्ञातपरंपरया निरोधेऽत्यन्ताभिभवे जायमाने प्रज्ञातत्संस्काराणां सर्वेषां निरोधादत्यन्तविलापना दुःखबीजसंस्कारादिशून्यत्वेन प्रज्ञाप्रवाहजनकप्रज्ञासंस्कारशून्यत्वेन च निर्बीजः समाधिरसंप्रज्ञाताख्य इत्यर्थः । एवञ्च चरमासंप्रज्ञातव्यक्तिर्निर्बीजयोगस्य परा काष्ठा पूर्वपूर्वासंप्रज्ञातव्यक्तीनां तु क्रमेण बीजतानवकरणाद् गौणं निर्बीजत्वम् । एवञ्च चरमासंप्रज्ञाते सर्वसंस्कारक्षयान्ते चित्तस्य साधिकारत्वं न कुर्वन्ति स च संप्रज्ञाताद्देव परवैराग्यद्वारेण जायते एतेनासंप्रज्ञातपरपरायाः प्रज्ञातसंस्कारात्यन्तलयः फलमुक्तं तदुक्तं भाष्ये स निर्बीजयोगः समाधिप्रज्ञाविरोधिनः परवैराग्याज्जायमानो न केवलं समाधिप्रज्ञाया विरोधी किन्तु प्रज्ञाकृतसंस्काराणामप्यभिभावकः । न चैवं सकृदसंप्रज्ञातेनैव सर्वसंस्कारबाधे व्युत्थानानुपपत्तिरिति कुतः स बाधकः निरोधसंस्कारस्यनिरोधपरंपरायादृढतरत्वरूपवैजात्यवत एव समाधिजसंस्कारबाधकत्वात् न तु साक्षादेव संस्कारविलापकत्वं तस्येत्यां दोषादिति । एतेन वैराग्यजं ज्ञानं प्रज्ञामात्रं बाधतां संस्कारं त्वज्ञान

रूपं कथं बाधते दृष्टा हि जाग्रतोऽपि स्वप्नादिदृष्टार्थस्मृतिरित्यपि परास्तम् । संस्कारस्यैव विरोधिसंस्कारबाधकत्वात् । ननु निरोधस्य संस्कारशेषचित्तावस्थामात्ररूपत्वेन ज्ञानरूपत्वाभावाद् ज्ञानस्यैव च संस्कारजनकत्वात् कथं संस्कारजनकत्वमिति चेन्न । असंप्रज्ञातनिरोधे मुहूर्ताहोरात्रमासादिक्रमेण कालवृद्ध्यनुभवेन निरोधावस्थचित्तजन्यसंस्कारास्तित्वानुमानात् । संस्कारवृद्धिव्यतिरेकेण " तन्नियामकाभावात् संप्रज्ञातकालवृद्धिस्तु प्रज्ञासंस्कारतारतम्येनैवेत्यतो न संप्रज्ञातीयनिरोधस्य संस्कारस्य हेतुता । नन्वेवमपि निरोधसंस्कारासमुच्छेदकाभावान्मोक्षानुपपत्तिः । किं च प्रलीनानामपि संस्काराणां कदाचिद्योगीश्वरसंकल्पादिना दग्धबीजस्येव पुनरुद्बोधोऽपि स्यादिति चेन्न । ज्ञानसामान्यरूपव्युत्थानासंप्रज्ञाताख्यनिरोधसमाधिप्रभवैः कैवल्यपर्यन्तस्थापित्वरूपकैवल्यभागीयैः संस्कारैः कैवल्यहेतुकर्मसंस्कारैश्च सहितं चित्तं दग्धेन्धनाग्निवत्स्वस्यां प्रकृतौ प्रधानेऽत्यन्तं लयं गच्छति परिणामस्वाभाव्यात् इत्यतो दोषात् । भोगहेतुविसदृशपरिणामन्तु नापद्यते तद्धेतोः पुरुषार्थस्याभावात् । तस्मिंश्च निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठो दुःखादिवृत्तिप्रतिबिम्बराहित्येन शुद्ध उपाधिसंयोगाख्यबन्धराहित्यात् केवलो मुक्त इत्युच्यते स्वत्वसंबन्धेन पुण्यपापराहित्यमेव तस्य मुक्तिः भोगसाधनत्वस्यैव स्वत्वतया कूटस्थस्यापि संसारदशायां स्वत्वाभ्युपगमात् । एतादृशमुक्तेश्च साध्यतया सा योगस्य मुख्यं फलमित्युच्यत इत्यनेन भाष्येण पारमार्थिकदुःखकर्मादिसंबन्धो लेपाख्यसंयोगरूपो वा बन्धस्तन्मुक्तिश्च बुद्धेरेव न कूटस्थासंगस्य पुरुषस्येति सूचितं पुरुषार्थत्वं च मुख्यमेव, दुःखं मा भुञ्जीयेति प्रार्थनादिति शिवम् ।

एतस्य सांख्यप्रवचनत्वं तु सांख्योक्तस्यैव प्रकर्षेण वचनात् । तत्र ह्यभ्युपगमवादेनेश्वरं प्रतिषिध्यासंप्रज्ञातनैरपेक्ष्येण च जीवतत्त्वज्ञानादेव मोक्ष उक्तः । अत्र तु निरुपद्रवासंदिग्धैच्छिकमुक्तिनियमाय परमेश्वरविद्या आशुमोक्षहेतुरसंप्रज्ञातश्च दर्शित इति शिवम् ।

इति सांख्यप्रवचनपातञ्जलसूत्रवृत्तौ योगशास्त्रे समाधिपादः प्रथमः ॥ १ ॥

रूपं कथं बाधते दृष्टा हि जाग्रतोऽपि स्वप्नादिदृष्टार्थस्मृतिरित्यपि परास्तम् । संस्कारस्यैव विरोधिसंस्कारबाधकत्वात् । ननु निरोधस्य संस्कारशेषचित्तावस्थामात्ररूपत्वेन ज्ञानरूपत्वाभावाद् ज्ञानस्यैव च संस्कारजनकत्वात् कथं संस्कारजनकत्वमिति चेन्न । असंप्रज्ञातनिरोधे मुहूर्ताहोरात्रमासादिक्रमेण कालवृद्ध्यनुभवेन निरोधावस्थचित्तजन्यसंस्कारास्तित्वानुमानात् । संस्कारवृद्धिव्यतिरेकेण "तन्नियामकाभावात् संप्रज्ञातकालवृद्धिस्तु प्रज्ञासंस्कारतारतम्येनैवेत्यतो न संप्रज्ञातीयनिरोधस्य संस्कारस्य हेतुता । नन्वेवमपि निरोधसंस्काराणासमुच्छेदकाभावान्मोक्षानुपपत्तिः । किं च मलीनानामपि संस्काराणां कदाचिद्योगीश्वरसंकल्पादिना दग्धबीजस्येव पुनरुद्बोधोऽपि स्यादिति चेन्न । ज्ञानसामान्यरूपव्युत्थानासंप्रज्ञाताख्यनिरोधसमाधिप्रभवैः कैवल्यपर्यन्तस्थापित्वरूपकैवल्यभागीयैः संस्कारैः कैवल्यहेतुकर्मसंस्कारैश्च सहितं चित्तं दग्धेन्धनाग्निवत्स्वस्यां प्रकृतौ प्रधानेऽत्यन्तं लयं गच्छति परिणामस्वाभाव्यात् इत्यतो दोषात् । भोगहेतुविसदृशपरिणामन्तु नापद्यते तद्धेतोः पुरुषार्थस्याभावात् । तस्मिंश्च निवृत्ते पुरुषः स्वरूपमात्रप्रतिष्ठो दुःखादिवृत्तिप्रतिबिम्बराहित्येन शुद्ध उपाधिसंयोगाख्यबन्धराहित्यात् केवलो मुक्त इत्युच्यते स्वत्वसंबन्धेन पुण्यपापराहित्यमेव तस्य मुक्तिः भोगसाधनत्वस्यैव स्वत्वतया कूटस्थस्यापि संसारदशायां स्वत्वाभ्युपगमात् । एतादृशमुक्तेश्च साध्यतया सा योगस्य मुख्यं फलमित्युच्यत इत्यनेन भाष्येण पारमार्थिकदुःखकर्मादिसंबन्धो लेपाख्यसंयोगरूपो वा बन्धस्तन्मुक्तिश्च बुद्धेरेव न कूटस्थासंगस्य पुरुषस्येति सूचितं पुरुषार्थत्वं च मुख्यमेव, दुःखं मा भुञ्जीयेति प्रार्थनादिति शिवम् ।

एतस्य सांख्यप्रवचनत्वं तु सांख्योक्तस्यैव प्रकर्षेण वचनात् । तत्र ह्यभ्युपगमवादेनेश्वरं प्रतिषिध्यासंप्रज्ञातनैरपेक्ष्येण च जीवतत्त्वज्ञानादेव मोक्ष उक्तः । अत्र तु निरुपद्रवां दृढैच्छिकमुक्तिनियमाय परमेश्वरविद्या आशुमोक्षहेतुरसंप्रज्ञातश्च दर्शित इति शिवम् ।

इति सांख्यप्रवचनपातञ्जलसूत्रवृत्तौ योगशास्त्रे समाधिपादः प्रथमः ॥ १ ॥

प्रथमे पादे योगारूढचित्तस्योत्तमाधिकारिणोऽभ्यासवैराग्यमात्रेणैव वक्ष्यमाणक्रियायोगादिनिरपेक्षेण योग उक्तः ।—

आसनस्थानविधयो न योगस्य प्रसाधकाः ।

शिशुपालः सिद्धिमाप स्मरणाभ्यासगौरवादिति गारुडात् ।

येषान्तु अभ्यासवैराग्ये न झटिति भवतः स योगारुरुक्षुर्व्युत्थितचित्तः केनोपायेन योगयुक्तः स्यादित्याकाङ्क्षायां तदुपायप्रदर्शनाय द्वितीयः पाद आरभ्यते । तत्र योगारूढलक्षणं गीतायामुक्तम् ।

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते ।

सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यत इति ।

तत्राऽभ्यासश्चित्तस्य निश्चलैकाग्रताधारारूपस्थितौ ध्येयाद्बहिर्गच्छतः पुनः पुनरभ्यासः । वैराग्यं च तत्र तत्रालंबुद्धिरूपेपेक्षेत्युक्तम् । आरुरुक्षुर्वानप्रस्थादिः । तत्र ।

अरुरुक्षुयतीनां च कर्मज्ञाने उदाहृते ।

आरूढयोगवृद्धाणां ज्ञानत्यागौ परौ मताविति स्मृतिः ।

त्यागोऽत्र योगान्तरायस्य क्रियायोगरूपस्य बाह्यकर्मणः यथा जडभरतादेः । तत्रारुरुक्षोः कर्माह ।

## तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥

योगोपायत्वाद्योगः क्रियारूपो योग इत्यर्थः । ईश्वरप्रणिधानरूपो भक्तियोगोऽप्यत्र क्रियायोगमध्य एव प्रवेशितः । यद्यपि यमादयोऽपि क्रियायोगस्तथाऽप्येतत्त्रयेण केवलेनापि तीव्रतरेण योगसिद्धाऽस्य प्रकृष्टत्वात् पृथङ्निर्देशः । ज्ञानयोगस्तु ध्यानधारणासमाधिरूपोऽग्रे वक्ष्यते । न च तपस इन्द्रियशोषणात्मकस्य चित्तक्षोभकत्वेन योगविरोधित्वात्कथं तदुपकारकत्वम् । अनादिक्लेशकर्मवासनाभिर्नानाप्रकारायाः पापाख्याया अशुद्धेर्विषयजालप्रत्युपस्थापकत्वेन योगविरोधि-

त्वात् । यदि च न स्मृतिः स्वप्नज्ञानं प्रमाणं तर्हि न प्रमाणमपि । बहिस्तथा ग्राह्यस्याऽभावात् । न तर्हि बहिरर्थे स्वतन्त्रं मनः । स्वप्ने तस्याऽग्राह्यत्वात् । ग्राह्यत्वे वाऽनुभूतस्य ग्रहणं, तथा दृष्टत्वात् । न दोषतोऽदृष्टसामर्थ्याऽतिरेककल्पनेत्युभयथा न स्वतन्त्रं बहिर्मनः । एतेन तिमिरतः केशादिदर्शनं प्रत्युक्तम् ।

आगमतः कथं मिथ्याज्ञानाय कल्पते ? अपि च लौकिकं कारणमसाधारणमाश्रित्य स्वकार्यं जनयति । न च तन्मनसः स्वातन्त्र्यं प्रति किंचिदुपलभ्यते । तेन धर्मविशेष एवा सहायः कारणमिति कल्पनीयं, तच्चाऽदृष्टप्रमाणेनेत्याह—तस्य धर्मविशेषस्य मनःस्वातन्त्र्यं कार्ये प्रत्यदृष्टसामर्थ्यस्य कल्पनाप्रसङ्गात् । यदि च न स्मृतिः स्वप्नज्ञानं भवन्मते प्रमाणं तर्हि स्वतन्त्रस्य मनसस्तद्विषये प्रवृत्तिः । अथ न प्रमाणमपि । कुतः ? स्वप्नज्ञाने भासते वस्तु, तस्य बाधके सति बहिस्तथा ग्राह्याऽभावात् ।

उत्तरं—न तर्हि बहिरर्थे स्वतन्त्रं मनः, स्वप्ने तस्य तथाविधस्याऽग्राह्यत्वात् । प्रकारभेदरहितवस्तुरूपग्राह्यत्वे वा भावनैव जागर्ति स्मरणहेतुः । तस्याश्च पूर्वाऽनुभवमन्तरेणाऽसम्भवादनुभूतस्य ग्रहणम् । तथा निद्रोपप्लववशात्संस्कारतन्त्रस्य मनसो बाह्यस्मृतेः कारणत्वेन दृष्टत्वात् । न तु दोषतोऽदृष्टसामर्थ्याऽतिरेककल्पना । तस्माद्यदि ग्राह्यत्वं बाह्यस्य यदि वाऽग्राह्यत्वमुभयथाऽप्यस्वतन्त्रं बहिर्मनः । एतेन मनसः स्वप्नविज्ञाने स्वातन्त्र्यप्रदर्शनमार्गेण तिमिरतः केशादिज्ञानं मानसमिति प्रत्युक्तम् । आलोकांशालम्बनतया तद्विज्ञानस्य दोषवल्लोचननिमित्तत्वात् ।

यत्तूक्तमनाश्वासादिति तदन्यथाऽऽचार्येण

'बोधादेव प्रमाणत्वमिति मीमांसकस्थितिम् ।
विदन्नव्यभिचारेण तां व्युदस्यत्यपण्डितः' ॥

इत्यादिना प्रबन्धेन दूषितमिति नेह दूषितम् । तथापि दूषणकणिकेह सूच्यते ।

किमव्यभिचारितैव प्रामाण्यमथ तत्कारणं तद्व्यापिका वा ? येन क्वचिद्व्यभिचारदर्शनात्तदभावे सति ज्ञानमात्रे ऽनाश्वासः स्यात् । न तावदव्यभिचारितैव प्रामाण्यम् । अव्यभिचारिणामपि वन्ह्यादौ धूमादीनां कुतश्चिन्निमित्तादनुपजनितकृशानुप्रत्ययानामप्रामाण्यं स्यात् । व्यभिचारिणामपि चक्षुरादीनां नीलादिभेदे तद्विषयविज्ञानहेतूनां प्रामाण्यमिति साम्प्रतम् । प्रमितिक्रियां प्रति साधकतमत्वसम्भवात् । अन्यथा काष्ठादीनामपि पाकादावपि असाधनत्वप्रसङ्गात् । नापि प्रामाण्यकारणम् । अत एवाऽन्यथा चक्षुरादीनां नीलादिभेदव्यभिचारिणां तत्प्रमितिहेतूनामप्रामाण्यप्रसङ्गात् । केचिदेव हि धूमादयो वन्ह्यादिबोधजननायाऽव्यभिचारमपेक्षन्ते, नाऽपेक्षन्ते च चक्षुरादयः । स्वभावनियमात् । एतेन व्यापकत्वमव्यभिचारितायाः प्रामाण्यं प्रत्युक्तं वेदितव्यम् । ज्ञानेनाऽव्यभिचारो ऽपेक्ष्यते स्वकार्ये इति चेत् । न । विकल्पाऽसहत्वात् । अथापि स्यादव्यभिचारितोपेतं विज्ञानं प्रमाणं तस्याऽभावस्तत्क्षम् । तद्धि तथाविधं सत्स्वकार्ये पर्याप्तं मिथ्याज्ञानस्य तत्राऽसामर्थ्यादिति । तन्नास्ति । विकल्पाऽनुपपत्तेः । तथा हि । विज्ञेयाऽवभासो ऽस्य कार्यमुच्यते स्वगोचरोचितव्यवहारप्रवर्त्तनं वा । तत्र न तावत् ज्ञेयाऽवभासे ऽस्य स्वभावप्रतिलम्भमात्राऽधीनजन्मनि सम्भवत्यव्यभिचारग्रहाऽपेक्षा । न हि वयमुत्पन्नविज्ञानविषयाऽवभासायाऽस्य स्वविषयस्य स्वविषयाऽव्यभिचारमुदीक्षमाणाः स्मः । भूतिरेव हि विज्ञानस्य विषयाऽवभासे क्रियेति । यथाह 'तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते । तदेव च प्रमारूप'मिति ।

'न हि तत् क्षणमप्यास्ते जायते वा प्रमात्मकम् ।
येनाऽर्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत्' ॥ इति च ।

अथ 'स्वगोचरोचितव्यवहारप्रवर्त्तने ज्ञानमव्यभिचारिताम-

पेक्षते । न हि विज्ञानं विज्ञानमित्येवं व्यवहारं प्रवर्तयति, मिथ्याज्ञानादपि तत्प्रसङ्गात् । तस्मान्मिथ्याज्ञानाद्व्यावृत्तमस्य संवादकत्वमर्थक्रियाप्रापणसामर्थ्यमव्यभिचारितालक्षणप्रेक्षावत्प्रवृत्त्यङ्गमवगन्तव्यम् । न खल्वव्यभिचारमन्तरेण ततस्तत्प्राप्तिः स्वार्थव्यभिचारश्च । ततोऽन्यस्य ज्ञानस्य तस्मादनुत्पत्तेः । अन्यथाऽतिप्रसङ्गात् । यथाह ।

'अर्थस्याऽसंभवे भावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबन्धस्वभावस्य तद्धेतुत्वे समं द्वयम्' ॥ इति ।

तद् द्विविधं प्रत्यक्षज्ञानम् । अर्थक्रियासाधननिर्भासकं प्रवर्तकं प्रमाणम्, अभ्यासदशाऽऽपन्नं तद्विपरीतं च । तच्च तद्विपरीतस्याऽर्थक्रियानिर्भासाद्विज्ञानात्प्रामाण्यमभ्युपगन्तव्यम् । यथाह 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाण'मिति । तथा 'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः, अविसंवादन'मिति । तदर्थनान्तरीयकाऽर्थान्तरदर्शनादभ्यासदशापन्नात् । तद्यथा । आराद्वह्निविज्ञानस्य वह्निकिंशुकनिचयसंशयेन निरोहितप्रामाण्यस्य धूमाऽदर्शनात् प्रामाण्यविनिश्चयः । अर्थक्रियानिर्भासस्य ज्ञानस्याऽगृहीतप्रामाण्यस्य न प्रवर्तकविज्ञानप्रामाण्यनिश्चायकत्वं, गृहीतप्रामाण्यस्य वा[1] तन्निश्चायकत्वेनाऽनवस्थाप्रसङ्ग इति चेत् न । अर्थक्रियानिर्भासस्य ज्ञानस्य स्वरूपेणोपेक्षमाणतया फलत्वेनाऽप्रवर्तकतया प्रमाणलक्षणाऽयोगितया व्यभिचारनिश्चयस्याऽनुपयोगात् । तद्रूपस्य च स्वसंवेदनसिद्धस्य शङ्काऽनास्पदत्वात् । यदाह—'स्वरूपस्य स्वतो गति'रिति । निबन्धारोऽप्याहुः ।

'अर्थक्रिया सुखाद्यात्मज्ञानमेव तथाविधम् ।
प्रमाणलक्षणाऽयोगि स्वतोऽधिगतशक्तिकम्' ॥ इति ।

अन्योन्यसंश्रयान्नैवमिति चेत् । न । प्रवृत्तिद्वैविध्यात् । तथेतरस्यात् । अर्थक्रियानिर्भासाद्विज्ञानाच्चेदव्यभिचारनिश्चयश्चेतसस्तदेव

१ प्रमाणकस्य० १ पु० पा० ।

कुतः ? प्रेक्षावतां प्रवर्तकविज्ञानान्निश्चिताऽव्यभिचारादिति चेत् प्राप्तमन्योन्यसंश्रयमिति तच्च प्रेक्षावत्प्रवृत्तिद्वैविध्यात् । द्वयी खल्विह प्रवृत्तिः प्रेक्षावतां, तत्राऽऽद्या प्रवर्तकविज्ञानपरीक्षार्था, द्वितीया तु परीक्षितसाधननिर्भासस्य विज्ञानस्य तज्जातीयाद्विज्ञानादर्थक्रिया-प्राप्त्यर्था । यथा किल कृषीवलस्य कर्परस्थितायां कृषिपरिकर्मितायां बीजाऽऽवपनलक्षणा प्रवृत्तिराद्या बीजपरीक्षार्था । स तु तत्राऽङ्कुरोत्पा-दनादवगतबीजतत्त्वः सस्याऽधिगमकाम्यया द्वितीयां प्रवृत्तिमारभते परिकर्मितायां भुवि तज्जातीयबीजाऽऽवपनलक्षणां, तथेयमपि प्रवृ-त्तिर्द्वयीति नाऽन्योन्यसंश्रयः । न च प्रेक्षावत्त्वव्याघातः । परीक्षो-पाये प्रवर्तमानस्याऽनुपाये संदिग्धोपाये वा ऽप्रवृत्तेः । प्रवर्तता वोपा-यसंदेहादपि तथापि न प्रेक्षावत्त्वविघातः । अर्थसंशयस्य प्रेक्षावत्प्र-वृत्त्यङ्गत्वात् निवृत्त्यङ्गत्वाच्चाऽनर्थसंशयस्य । अभ्यासदशापन्नस्य तु प्रत्यक्षस्य प्रापिताऽर्थक्रियाज्ञानसाधर्म्यादनुमानात् प्रामाण्यविनिश्चयः । अनुमानस्य तु नान्तरीयकाऽर्थदर्शनजन्मतया निश्चितव्यभिचारस्य स्वत एव प्रामाण्यनिश्चयः । तत्स्वगोचरोचितव्यवहारप्रवर्तनाया-ऽस्त्वव्यभिचारनिश्चयाऽपेक्षा प्रमाणस्येति ।

तदिदमसाम्प्रतम् । अर्थक्रियानिर्भासिनो हि विज्ञानस्याऽर्था-व्यभिचारस्य स्वार्थे विनिश्चायकत्वं दुर्लभं, किमङ्ग पुनः पूर्वविज्ञा-नस्य प्रापणसामर्थ्ये स्वसंवेदनसिद्धस्य तस्य प्रयोजनतया किमर्था-ऽव्यभिचारनिरूपणेन किं च प्रामाण्येनेत्युक्तमिति चेत् । तत्किमि-दानीं यत्र स्वप्ने कामुकस्य स्वोचिताऽर्थक्रियासमर्थकामिनीविज्ञानं तदनन्तरं प्रवृत्तिज्ञानमथ संभोगविज्ञानमनन्तरं सुखं चरमधातुवि-सर्गश्चेति तत्र तावदाद्यं कामिनीविज्ञानमस्तु प्रामाण्यं, न ह्यन्यथा-ऽर्थक्रियानिर्भासं नास्ति विज्ञानम् । तदनन्तरं तस्य भावाज्जागरायां तदर्थकारिणः कामिनीरूपस्य बाधनात् । सुखचरमधातुविसर्गयोश्च

मनोमात्रयोनितया कामिन्यामसत्यामपि तज्ज्ञानमात्रादुत्पादनात् जागरायामनुवृत्तेरविरोधात् । अन्यथा कामिनीवस्तुसाध्याऽधरपल्लवनखक्षतादिवज्ज्ञावृत्तिप्रसङ्गादयमदोष इति चेत् । न । प्रकृते ऽर्थक्रियानिर्भासस्य ज्ञानस्याऽव्यभिचारित्वाग्रहेणाऽर्थक्रियाया अनिश्चयेन प्रवर्त्तकस्य ज्ञानस्याऽर्थक्रियासमर्थवस्तुपरिप्रापकत्वप्रामाण्याऽनिश्चयेन स्वप्नविज्ञानसाम्यात् ।

यदि मन्येत अर्थक्रियानिर्भासं ज्ञानं स्वतः प्रमाणम् । अर्थक्रियानिश्चयात्मकत्वात् । न च स्वप्नादौ प्रसङ्गः । तत्राऽवस्थान्तरे पुरुषान्तरे कालान्तरे वा बाधकोत्पादादप्रामाण्यात् । तत्प्रवर्त्तकेष्वपि ज्ञानेषु समानमन्यत्राऽभिनिविशात् । अपि चाऽव्यभिचारित्वं नाम ज्ञानस्यार्थेन सह । न च तदर्थग्रहणादृते शक्याऽवसानम् । न खल्वगृहीतदहनो धूमस्य तदव्यभिचारमवधारयितुमर्हति । क्षणिकत्वमपि ज्योतिर्विदागमेषु पूर्वाऽपरभागरहितकालकलामात्रस्य प्रसिद्धेस्तन्मात्रवर्त्तित्वं भावस्येति नाऽत्यन्ताऽप्रसिद्धं येन सत्त्वस्य तदव्यभिचारो न शक्याऽवगमो भवेत् । मा भूद्वा कापि न नः क्षतिः । न चाऽप्रमाणमप्रमाणेन वा ऽनवधृतप्रामाण्येन तद्ग्रहणमव्यभिचारग्रहणाङ्गम् । न खल्वप्रमाणेनाऽगृहीतप्रामाण्येन वा प्रमाणेन विषयीकृतो वन्हिर्धूमाऽव्यभिचारग्रहणाय कल्पते । तस्मादव्यभिचारग्रहणमन्तरेण नाऽर्थग्रहणं, न चाऽर्थग्रहणमन्तरेणाऽव्यभिचारग्रहणम् इति परस्पराश्रयप्रसक्तिः । एवं च दृष्टसामर्थ्यसाधर्म्याऽनुमानेनाऽभ्यासदशापन्नप्रत्यक्षज्ञानानां स्वार्थव्यभिचारग्रहणं परास्तं वेदितव्यम् ।

यच्चाऽनुमानस्य स्वतःप्रामाण्यमुक्तं तस्मिन् दर्शने प्रत्यक्षस्य स्वाऽर्थाव्यभिचारग्रहणादुक्तेन क्रमेण तत्पूर्वकत्वाऽनुमानस्योदय एव दुर्लभः कुतो ऽस्य प्रामाण्यं कुतस्तरां च तत् स्वतः? नन्वव्य-

भिचाराऽग्रहे ज्ञानमात्रादनाश्वासः प्रेक्षावतामित्युक्तम् । सत्यमुक्त,-मिदं तु वक्तव्यं, कोऽयमनाश्वासः, किं संशय अहो स्विदज्ञानम् ? न तावदज्ञानं बोधस्यैव ज्ञातत्वात् । नापि संशयः । विशेषस्मृत्य-पेक्षविमर्शं त्रिकारणं पञ्चकारणं वा संशयं रोचन्ते, समानाऽनेकधर्मो-पपत्तेः । 'विप्रतिपत्तेरुपलब्ध्यनुपलब्धिव्यवस्थातश्च विशेषाऽपेक्षो विम-र्शः संशय' इत्याचक्षाणास्तद्विचक्षणाः । न चाऽगृहीते विशेषे न स्मर-णसंभवः । न च संशयात्मैव तद्ग्रहणं स्मृतिहेतुः । स्मृतौ सत्यां तद्भावात्तस्मिंश्च स्मृत्युपपत्तेरन्योन्याश्रयप्रसङ्गात् । संस्कारजत्वेऽपि च प्रसङ्गतादवस्थ्यात् । अनादितायाश्च गत्यन्तरसम्भवे ऽनाश्रयणात् । तत्सिद्धं नाऽव्यभिचारनिश्चयो ज्ञानस्य स्वाऽर्थनिश्चयनिमित्तं, तस्यो-त्पत्तौ तदपेक्षत्वात् । यत्स्वरूपस्योत्पत्तौ यदपेक्ष्यते न तत्तस्य हेतुः । यथा ऽनुमेयविज्ञानं लिङ्गविज्ञानस्य । न चाऽसिद्धता हेतोः । उक्तं हि—'स्वाऽर्थनिश्चयापेक्षं तदव्यभिचारविज्ञान'मिति । कार्यात्प्राग्भा-वित्वेन हि कारणत्वं व्याप्तं, तद्विपक्षाद्विरुद्धोपलब्ध्या व्यावर्तमानं कारणत्वमपि व्यावर्तयतीति प्रतिबन्धसिद्धिः । अर्थप्रापण[१]शक्तिरपि तस्याऽर्थत्वप्रदर्शनान्नाऽन्या । न हि ज्ञानमात्मीयहस्ते वस्तूपनयति, अपि तु तत्र प्रवर्तयति ज्ञातारम् । न चास्य तत्र प्रवर्त्तनमन्यदतो वस्तुतत्त्वोपदर्शनात् । न च वस्तुतत्त्वमर्थस्याऽन्यदतः स्वरूपात् । तच्चास्य रूपमनुभवः स्वभावत एवाऽनुभवति, न पुनरव्यभिचाराद्यपे-क्षते । तदिदमनुभवस्याऽर्थे स्वतःप्रामाण्यमुच्यते । यत्पुनरनुभूयमाना-द्रूपादर्थस्याऽन्यथात्वं न तदनुभवत्यनुभवः । रजतविभ्रमेण तदन्य-थात्वग्रहणे रजतार्थिनस्तत्राऽप्रवृत्तेर्बाधकाऽनुपपत्तेश्च । ततश्च ज्ञाना-न्तराऽवसेयमन्यथात्वं, तेन तत्राऽन्यदपेक्षतइति तदस्य परत इत्यु-च्यते । यत्पुनरस्य तत्त्वाऽवबोधरूपत्वं विज्ञानस्य तदपि तद्ग्रा-हिणः प्रत्ययान्तरान्मानसादानुमानिकाद्वा ऽवगम्यमानं स्वत इत्यु-

१ प्रमाण २ पु॰ पा॰ ।

च्यते । तत्स्वरूपग्राहिणः प्रत्ययात्प्रत्ययान्तराऽनपेक्षणात् । न चास्य बाधकाशङ्कायामप्रामाण्यमाशङ्कनीयम् । बाधाऽनर्हे तदाशङ्काऽनुपपत्तेः । सन्ति हि कानि चिद्विज्ञानानि स्वस्थेन्द्रियस्वान्तस्य पुंसः स्फीताऽऽलोकमध्यवर्तिप्रमेयविषयाणि, यत्र न मनागपि बाधा दृष्टचरी कथं तत्र बाधार्हता, यत्रापि निपुणेन प्रतिपत्त्रा भवितव्यम् । स यदि प्रयत्नेनाऽनुसरन्नपि नाऽऽपादयत्यस्य बाधां तदौत्सर्गिकमस्य प्रामाण्यमविहतमनपेक्षमवतिष्ठते । यदि तु पश्येत्ततस्तदपोहितमिति नान्यत्र तदुत्प्रेक्षितव्यम् । यथोक्तम् ।

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थाऽन्यथात्वहेतूत्थदोषज्ञानादपोद्यते ।
द्वावेव निन्दितौ लोके निराशङ्काऽतिशङ्कितौ ॥
एवं त्रिचतुरज्ञानजन्मनो नाऽधिका मतिः ।
अर्थ्यते[1] तावदेवैकं स्वतः प्रामाण्यमश्नुते ॥
उत्प्रेक्षते हि यो मोहादज्ञानमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥ इति ।

न चेदं शापमात्रम् । उक्तं हि । 'न बाधाऽनर्हे तदाशङ्का युज्यते अतिप्रसङ्गा'दिति । बाधकारणदोषाभ्यामप्रामाण्यज्ञानात्तदभावग्रहाऽपेक्षप्रामाण्याऽनिश्चये, न तु स्वत इति चेत् । न । एकहेतुत्वकल्पनायां कार्योत्पत्तावनेकहेतुत्वकल्पनाऽनुपपत्तेः । बाधकारणदोषग्रहणस्य चाऽप्रामाण्यनिश्चयहेतुभावमात्रेण प्रामाण्योपहन्तृत्वेन तदभावे बोधमात्रादेव प्रामाण्योपपत्तौ न तदभावो ऽपेक्षणीयः । स च सत्यामाशङ्कायां, सा च यादृशे विषये दृष्टचरी तादृश एव न सर्वत्रेत्यावेदितम् । तत्सिद्धं स्वतः सर्वप्रमाणानां प्रामाण्यं, तदन्याऽनपेक्षणात् । यद्यतो ऽन्यन्नाऽपेक्षते तत्तस्य स्वत एव । तद्यथा वन्हेर्दहनसामर्थ्यमिति । तदन्याऽनपेक्षत्वं च साधितमुक्ते-

१ प्रार्थ्यते २ पु० पा० ।

लिङ्गाद्याभासजं लोके प्रतिभानमनिश्चयः ।
सर्वतः पूर्णविज्ञानः पूर्णो न्यूने न कश्चन ॥

यदपि किल श्वो मे भ्राता ऽऽगन्तेति प्रतिभाया-मक्षलिङ्गाद्यपेक्षाऽभावाद् बहिः स्वतन्त्रं मनो दृष्टं, सर्वं च सर्वमिति वा सदसत्पदार्थां द्रव्यादयः प्रकृतिपुरुषौ पञ्च-न प्रबन्धेन । तदन्याऽपेक्षस्य हि तत्स्वभावाऽनधीनत्वे तदाश्रितत्व-विरुद्धतदनाश्रितत्वप्रसक्तिबाधकं प्रमाणमिति न सन्दिग्धो व्यति-रेकः । तदिदमुक्तम् ।

'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतो ऽसती शक्तिः कर्तुमन्येन शक्यते' ॥ इति ।

तस्मान्नाऽनाश्वास इति सिद्धम् ।

सम्प्रति नैयायिकाऽभिमतयोगिज्ञानविषयत्वं विश्वस्य निरा-करोति—

लिङ्गाद्याभासजं लोके प्रतिभानमनिश्चयः ।
सर्वः संपूर्णविज्ञानः पूर्णो न्यूने न कश्चन ॥

यदपि किल श्वो मे भ्राता आगन्तेति लौकिक्यां प्रतिभा-यामक्षलिङ्गाद्यपेक्षाऽभावाद्[१] बहिः स्वतन्त्रं मनो दृष्टम् । ननु तत्र भ्रातुः स्वरूपस्य प्रागुपलब्धेर्भवत्वेव, मिह तु विश्वेषां भावानां देश-कालाऽवस्थाविशेषविप्रकीर्णानां न रूपतो ऽप्युपलम्भसम्भव इति कथमत्र मनसः स्वातन्त्र्य ? मित्यत आह—सर्वं च सर्वमिति वा प्रका-ररहितेन रूपेण व्यूढं प्रकारभेदवता यतो नेदानीं व्यूहे हेतुप्रका-रान्नैयायिकः स्वपराऽभिमतानाह—सदसत्पदार्थौ द्रव्यादयः प्रकृति-पुरुषौ पञ्चस्कन्धा इत्यादिना वा भेदेन लोकप्रमाणवशेन मनसा विषयीकृतं भावनामयस्य स्फुटाऽवभासस्य लोकोत्तरस्य प्रत्यक्षस्य

१ लिङ्गाद्यभावात् च पु॰ पा॰ ।

स्कन्धा इत्यादि चाऽभेदेन लोकप्रमाणवशेन मनसो विषय इत्यपि स्वातन्त्र्ये बहिः सर्वज्ञत्वसिद्धिः । अत्रोच्यते-

लोकोत्तरं तावत् प्रतिभानं विवादपदं, लौकिकं तु प्रियाऽप्रियगोचरं प्रायः सहप्रवृत्तहृदयप्रसादोद्वेगादिलिङ्गाद्याभासप्रभवमत एवाऽनिश्चयात्मकं तथा व्यपदिशन्ति प्रतिभानमेव, न तु निश्चयः । उभयकोटिसंस्पर्शित्वात्तुल्यत्वाच्च न संशयात्मकम् । प्रतिभैव । न प्रमाणम् ।

विषय इत्यपि सर्वज्ञतासिद्धिः स्वातन्त्र्ये मनसः । एतदुक्तं भवति । निष्प्रकारं सप्रकारं वा लौकिकेन प्रमाणेन गृहीत्वा भावयतो भावनाऽपनीताऽऽवरणं मनः स्वतन्त्रमेव विश्वमवगाहते इति ।

अत्रोच्यते । लोकोत्तरं तावत्प्रतिभानं सतया विवादपदमेवेति न तत्र मनसः स्वातन्त्र्यं स्वरूपेण प्रतिषेधनीयम् । लौकिकं तु प्रियाऽप्रियाऽगोचरं न स्वतन्त्रमनोजन्यं, यतः प्रायः सहप्रवृत्तहृदयप्रसादोद्वेगादिलक्षणलिङ्गाद्याभासप्रभवमत एव लिङ्गाद्याभासप्रभवत्वादेव तदनिश्चयात्मकम् । तथा च व्यपदिशन्ति 'एवं प्रतिभानं न तु निश्चय' इति । उभयकोटिसंस्पर्शस्याऽतुल्यत्वाच्च न संशयात्मकम् ।

ननु यदि न संशयो नापि निश्चयः तर्हि तद्विज्ञानतत्त्वं वाच्यमित्यत आह—प्रतिभैव । न ह्येतद्विज्ञानतुल्यवदुपप्लवमानविरुद्धकोटिद्वयविषयो येन संशयात्मकं, नाप्येककोटिविषयामपि प्रमामवधारयति येन निश्चयः स्यात् । न चैककोटिविषयं न च प्रकाशते येन न स्यात् । तस्मात्सिद्धं प्रतिभैवेति । तर्हि स्वयमनिश्चयात्मापि निश्चयजननादस्तु प्रमाणं चक्षुरादिवदित्यत आह—न प्रमाणम् । कस्मात् ? अनिश्चयफलत्वात् । ननूपजाते प्रतिभाभेदे यत्र तदनन्तरं निश्चयो भवति तत्र निश्चयफलकः प्रमाणभेदः कस्मान्न प्रमाणं ?-

अनिश्चयफलत्वात् । प्रमाणान्तराऽपेक्षनिश्चयत्वात् । एवं लिङ्गादिजातीयाऽपेक्षत्वात् तत्रापि पारतन्त्र्यम् । अन्यथा तदनपेक्षो मनोमात्रसाधनो बहिरर्थसंबन्धः सर्वस्य सर्वस्मिन् सर्वदा स्यादिति । अदृष्टविशेषादक्षलिङ्गाद्यपेक्षं मनः कस्य चिद् बाह्ये ऽप्यर्थे सति चक्षुराद्यारम्भवैयर्थ्यप्रसङ्गः । तत एवाऽदृष्टविशेषाऽसंस्कृतात् सर्वप्रतिपत्तिसिद्धेस्तस्यापि वैयर्थ्यात् । अकरणस्यैव कर्तुरात्मनो ऽदृष्टविशेषादेव परिच्छित्तिक्रियासिद्धेः । न खल्वनुपायमदृष्टमप्यर्थं साधयति । शरीराद्यारम्भात्तेन तर्हि अक्षलिङ्गाद्यनपेक्षं चैभिमित्यत आह—प्रमाणान्तराऽपेक्षनिश्चयत्वात् । न नात्रप्रतिभाय, एवाऽनपेक्षाया एव निश्चयजनकत्वं, सर्वत्र तथाभावप्रसङ्गात् । लिङ्गाद्यपेक्षायां च तद्धेतुत्वे कृतमनया, लिङ्गादीनां तन्निरपेक्षाणामेव तत्र तत्र सामर्थ्यप्रतीतेरिति ।

उपसंहरति—एवं लिङ्गादिजातीयाऽपेक्षत्वाल्लिङ्गाद्याभासाऽपेक्षत्वात् तत्रापि प्रतिभाने ऽपि लौकिके परतन्त्रं मनः । अन्यथा स्वातन्त्र्ये तल्लिङ्गाद्याभासाऽनपेक्षमनोमात्रसाधनो बहिरर्थसंबन्धो मनसो नित्यसंनिधानात् सर्वस्य पुंसः सर्वस्मिन्नर्थे सर्वदा स्यादिति सर्वः सर्वदा सर्वदर्शी स्यात् । अदृष्टविशेषाद्बाह्ये मनः स्वतन्त्रं कदा चित्कस्य चिदेवेति नाऽतिप्रसङ्गः । तदाह—अदृष्टविशेषादक्षलिङ्गाद्यनपेक्षं मनः कस्य चित्क चिद्बाह्ये ऽप्यर्थे इति चक्षुराद्यारम्भवैफल्यप्रसङ्गः । कस्मात्? तत एव मनसो ऽदृष्टविशेषाऽभिसंस्कृतात्सर्वरूपादिप्रतीतिसिद्धेः । आसतां चक्षुरादयः, तस्य मनसोऽपि वैयर्थ्यम् । कुतः? अकरणस्यैव कर्तुरात्मनो ऽदृष्टविशेषादेव रूपादिपरिच्छित्तिक्रियासिद्धेः ।

यदुच्येत, न खल्वनुपायमदृष्टमप्यर्थं साधयति । कुतः? शरी-

मनसः प्रवृत्तिः स्वतः। अत एव योगजाद्धर्मात् सर्वार्थेषु न मानसं प्रत्यक्षं, संनिकर्षोपायत्वात् सिद्धेः। संयुक्तसंयोगाऽनभ्युपगमात्। अन्यथा कुड्यादिव्यवहिताऽर्थोपलब्धिप्रसङ्गात्। अनुमाने ऽपि प्रत्यक्षत्वाऽऽपातात्। अजातारद्यारम्भात्। न तर्ह्यक्षलिङ्गाद्यनपेक्षा बहिर्मनसः प्रवृत्तिः। ततो ऽद्भुत एवाऽनुपायस्याऽसाधनत्वादेव योगजाद्धर्मात्सर्वार्थेषु न मानसं प्रत्यक्षं, यत्तमारकमित्याचक्षते स्वायम्भुवाः। कुतः? इन्द्रियाऽर्थसंनिकर्षोपायत्वात्तद्ग्राह्यविषयप्रत्यक्षत्वसिद्धेः।

यद्युच्येत नेन्द्रियार्थसंयोग एव, तदुपायगुणादिज्ञानस्याऽप्रत्यक्षत्वप्रसङ्गात्। नाऽपीन्द्रियसमवाय एव। शब्दज्ञानस्यैव प्रत्यक्षत्वापत्तेः। अपि तु संयुक्तसमवायादयो ऽपि तदुपायाः। अत एव सर्वाऽविरोधार्थं 'मिन्द्रियार्थसंनिकर्षोत्पन्न'मित्याह स्म तत्रभवानक्षपादः। तद्गुणादिग्रह इव संयुक्तसमवायादिहापि समाधिजधर्मसंस्कृतस्य मनसो बाह्येन्द्रियस्य वा तत्संयुक्तसंयोगादिराश्रयिष्यते तत्तद्व्यवहितादिग्रहणसिद्ध्यर्थमित्यर्थेत आह—संयुक्तसंयोगस्य प्रत्यक्षज्ञानहेतोरनभ्युपगमाद्वृद्धैः।

न केवलमनभ्युपगतो ऽनुपपन्नश्चाऽतिप्रसङ्गादित्यत आह—अन्यथा कुड्यादिसंयोगव्यवहिताऽर्थोपलब्धिप्रसङ्गादस्मदादीनाम्। न च समाधिसंस्कृतस्य मनसो लोचनादेर्वा सामर्थ्यमेवंविधं सम्भवतीत्युक्तं बौद्धसर्वज्ञपरीक्षायाम्। ततः सर्वस्य सर्वज्ञत्वप्रसङ्गात् अस्ति हि कथं चित्सर्वस्य सर्वेण सम्बन्धः। तथा ऽनुमाने ऽपि प्रत्यक्षत्वापातात्। इन्द्रियार्थसन्निकर्षोत्पन्नत्वेन ह्यनुमानात् प्रत्यक्षं व्यावर्तते। यदा त्वनुमानमपि तथा तदपि प्रत्यक्षं स्यात्। तथा हि। धूमादि यावच्चक्षुरादिसंयुक्तं धूमादिश्च वन्ह्यादिना तदनेन प्रकारेणाऽस्ति कश्चित्कथं चिदिन्द्रियस्य संनिकर्ष इति तदुत्पन्नमनुमानं

ऽतिवृत्तेषु तस्याप्ययोगात् । अत एव नेन्द्रियाऽर्थयोः सिद्धयोः सन्निकर्षः । अतीताऽनागतानां तदाप्यसत्त्वाद् व्यवहिताऽर्थोपलब्धिप्रसङ्गात् । अनुमानादिषु च प्रत्यक्षत्वाऽऽपातात् । सन्निकर्षग्रहणाऽऽनर्थक्याच्च । नन्वतीताऽनागतानां देशादिविशेषणत्वेन ज्ञानाज्ज्ञानस्य विशेषदेशाद्यालम्बनत्वात् तैश्चक्षुषो मनसो वा सन्निकर्षसम्भवात् । तेषां च सत्त्वात्सन्निधानादव्याहतमनुत्पन्नाऽतिवृ-

प्रत्यक्षं प्रसज्येत । न च प्रत्युत्पन्नचक्षुरादिनिरपेक्षमत्र धूमाद्येव कारणमिति युक्तम् । संनिकर्षस्यैव तत्र तत्र कृत्स्नसामर्थ्यस्य सम्भवे, लिङ्गादिसामर्थ्यकल्पनाऽनुपपत्तेः । न चैतावता सर्वज्ञता सिध्यतीत्याह—अज्ञाताऽतिवृत्तेषु तस्याप्ययोगात् । अत एव नेन्द्रियाऽर्थयोः सद्भावो ज्ञानजननं प्रति परस्पराऽऽनुकूल्येनाऽवस्थानं संनिकर्षः ।

अत एवेति विभजते—अतीताऽज्ञातानां तदा विज्ञानसमये ऽसत्त्वाद्व्यवहितार्थोपलब्धिप्रसङ्गात् । अनुमानादिषु च प्रत्यक्षत्वाऽऽपातात् । हेत्वन्तरमाह—संनिकर्षग्रहणाऽऽनर्थक्यप्रसङ्गाच्च । इन्द्रियार्थोत्पन्नमित्येतावतैव तयोः सद्भावसिद्धेः । असत उत्पादकत्वाऽयोगात् ।

चोदयति—नन्वतीताऽनागतानां देशादिविशेषणत्वेन ज्ञानात् । तद्यथा । इयमतीताऽनागतबहुराजा जगतीति तज्ज्ञानस्य विरोधिदेशाद्यालम्बनत्वात्तस्यैवाऽऽनुकूल्या निर्देशात् तत्र प्रवृत्तेश्च देशादिभिर्विशेष्यैर्यथायथं चक्षुषो मनसो वा ऽवधृतप्रत्यक्षता न हेतुभावस्य, संनिकर्षसम्भवात् । कुतः सम्भव? इत्यत आह—तेषां च विशेष्याणां देशादीनां च सत्त्वात् संनिधानादव्याहतमनुत्पन्नाऽतिवृत्तज्ञानस्येन्द्रियार्थसंनिकर्षजत्वाऽविशेषेणाऽनवमासो ऽपि विशेष्यस्यैवाग्र्यत्वादिति भावः । नन्वेवमपि पर्वतादेरिन्द्रियसंनिकृष्टस्याऽनुमा-

त्तज्ञानस्येन्द्रियाऽर्थसन्निकर्षजत्वम् । अनुमानादिलक्षणमपि च इन्द्रियाऽर्थसन्निकर्षोत्पन्नं ज्ञानमिति नानुमानादिषु तत्त्वम् । यदि तावद्यः कश्चिदर्थस्ततः स्मृतौ प्रत्यक्षत्वप्रसङ्गः । अथ प्रमेयो देशादिप्रज्ञानं भवतु प्रत्यक्षं, तन्मात्रसन्निकर्षात् न तु विशेषणज्ञानम् । विशिष्टज्ञानं प्रत्यक्षमिति तदाक्षेपात् विशेषणमपि प्रत्यक्षमिति चेत् । न तस्याऽसन्निकर्षात् । न ह्यसति विशेषणे विशिष्टो वर्तमानोऽपि भवति । सर्वस्य तथात्वप्रसङ्गात् । कथं तर्हि अतिवृ-

नविषयत्वादनुमानस्यापि प्रत्यक्षत्वापात इत्यत आह—पृथगनुमानादिलक्षणप्रणयनसामर्थ्यादनुमानादिलक्षणाभावे इन्द्रियार्थसंनिकर्षोत्पन्नमिति प्रत्यक्षलक्षणमिति नाऽनुमानादिषु तत्त्वं प्रत्यक्षत्वम् । तल्लक्षणविरहात् ।

तदेतद्विकल्प्य दूषयति—यदि तावद्यः कश्चिदर्थः तेन सहेन्द्रियाऽसंनिकर्षाद्यद्विज्ञानं तत्प्रत्यक्षं, ततः स्मृतौ प्रत्यक्षत्वप्रसङ्गः । सापि खलूद्बुद्धसंस्कारेणाऽऽत्मना सह मनसः संनिकर्षादुपजायते । न चैतस्याः पारमर्षं पृथगस्ति लक्षणम् । अथ प्रमेयः स एव खलु अर्थ्यमानतया ऽर्थो, न चाऽऽत्मा स्मृतावर्थ्यमानः, किं तु पूर्वाऽनुभूतो देशादिरिति दूषयति—देशादिमात्रज्ञानं भवतु प्रत्यक्षं, तन्मात्रसन्निकर्षात्, न तु विशेषणज्ञानम् ।

शङ्कते—विशिष्टज्ञानं प्रत्यक्षमिति तदाक्षेपाद्विशेषणमपि प्रत्यक्षमिति चेत् ? निराकरोति—न । तस्याऽविधेयस्य विशेषणस्य दसंनिकर्षात् । कस्मात्तर्ह्यसंनिहितविशेषणो ऽतीतविशेषणो विशिष्टो वर्तमानो भवति रूपमात्रस्य वर्तमानत्वेऽपि । कुतः ? सर्वस्य तथात्वप्रसङ्गात् । असंनिधानाऽविशेषात् । चोदयति—देशाद्यवर्तमानविशेषणो

त्तायां मातरि देवदत्तपुत्रो यज्ञदत्त उच्यते। किमित्र? न स तया तदा विशिष्टतया व्यवहारमनुपतेदिति। यदि तर्ह्यवर्त्तमानं न व्यवहाराङ्गं देवदत्ता ऽपि विशेषणतया न व्यवहाराऽङ्गं स्यात्। अथ भूतपूर्वेण विशेषणेन व्यवहारः, विशिष्टतयापि तादृश्या न दण्डवारितः। न चेदृशं विशेषण, मुपलक्षणं तु, रूपतो भिन्नस्याऽसन्निधानात्। सन्निध्यसन्निधिकृत एव चैतयोर्भेदः। तस्मान्नाऽसंनिहितविशेषणो विशिष्टः सन्निहितः। यदि विशेषणं प्रमेयं

विशिष्टो वर्त्तमानः, कथं तर्ह्यनिवृत्तायां मातरि देवदत्तापुत्रो यज्ञदत्त इत्युच्यते? समाधातुं निगूढाऽभिसन्धिः पृच्छति-किमत्र कथं? चोदक आह—न स तया तदा विशिष्ट इति न देवदत्तापुत्र इति हि विशिष्टतया व्यवहारमनुवर्तेत। अवर्तमानस्य व्यवहाराऽनङ्गत्वादिति। समाधाता ऽऽह—यदि तर्ह्यवर्त्तमानं न व्यवहाराऽङ्गं देवदत्ता ऽप्यतीतयोभयसिद्धा न तद्व्यवहाराङ्गं स्यात्। समाधातैवाऽऽशङ्क्य तुल्यतामापादयति—अथ भूतपूर्वेण विशेषणेन व्यवहारो न विशिष्टतया ऽपि तादृश्या दण्डेन वारितः। अपि चाऽभ्युपेत्य विशेषणत्वमेवंविधस्येदमुदितं, परमार्थतस्तु नेदं विशेषणं देवदत्तादिकं नामेत्यत आह—उपलक्षणं तु, रूपतो भिन्नस्य स्वलक्षणस्याऽऽकारेण इति यावत्। असंनिधानाद्विशेष्यस्याऽभिमतवस्त्वनाकारत्वादिति। अथ मा भूत् संनिधानं, तथापि विशेषणं कस्मान्न भवती?त्यत आह—संनिध्यसंनधिकृत एव एतयोर्विशेषणोपलक्षणयोर्यथाक्रमं भेदः। कस्मात्? नाऽसंनिहितविशेषणो विशिष्टः संनिहितः। स्वरूपेण संनिहितो ऽपि तदसंनिहितविशेषणस्य वस्तुनः स्वरूपं संनिहितस्य तन्मात्रं प्रत्यक्षं न पुनर्विशिष्टत्वमपीति सिद्धम्।

यदि च विशिष्टप्रमेयतासिद्ध्यर्थं विशेषणमपि प्रमेयमङ्गीक्रि-

जाताद्यर्थश्च प्रमेयः । अनर्थसन्निकर्षजमपि प्रत्यक्षं प्राप्तम् । न च तथा । तल्लक्षणविरहादिन्द्रियस्याऽर्थापेक्षत्वात् ।

अथ देशविशेष एव प्रमेयो न तद्विशेषणं तथा । न च तल्लक्षणविरहः । अर्थ्यमानसंनिकर्षात् । न तर्हि देशाद्यालम्बनमज्ञानेनाऽनुत्पन्नादिवेदिनो ध्यायिनः । प्रमेयैकदेशसन्निकर्षाच्च प्रत्यक्षज्ञानोदये सर्वः सर्वप्रत्यक्षदर्शी स्यात् । सर्वस्येन्द्रियसन्निकृष्टं प्रति कथं चिद्विशेषणत्वोपपत्तेः । अनुमानलक्षणाऽभावे ऽपि प्रत्यक्षविषयेत तदन्तरेण विशिष्टप्रमेयताऽनुपपत्तेः । ततो जाताद्यर्थश्च प्रमेय इति अनर्थसंनिकर्षजमपि ज्ञानं प्रत्यक्षं प्राप्तम् । विशेषणस्याऽर्थ्यमानस्य तत्र संनिकर्षोऽभावात् । न च तथा सम्भवति । कुतः ? प्रत्यक्षलक्षणविरहात् । इन्द्रियार्थसंनिकर्षोत्पन्नमिति हि तल्लक्षणम् । अथ मा भूत् लक्षणं विशेष्येन्द्रियसंनिकर्षमात्रात्तज्जनिष्यते, लप्स्यते च प्रत्यक्षं वैशद्यादित्यत आह—इन्द्रियस्याऽर्थाऽपेक्षत्वादिति तत्त्वज्ञानोत्पत्तौ यत्तदवोचाम तत्त्वविज्ञानजननमिन्द्रियाणामर्थसहकारितया नियतमिति ।

तदेतत्समुत्थानं शङ्कते—अथ तेषु देशविशेष एव प्रमेयो न तद्विशेषणम् अतीतादि । तथा च न प्रत्यक्षलक्षणविरहो ऽर्थ्यमानेन्द्रियसंनिकर्षात् । उत्तरं—न तर्हि देशाद्यालम्बनेन ज्ञानेनाऽनुत्पन्नादिवेदिनो ध्यायिनः । यदि मन्येत प्रमेयैकदेशसंनिकर्षादेव ध्यायिनो ध्यानसंस्कृतस्वान्तवृत्तयो युञ्जाना विश्वमेव वर्तमानाऽवर्तमानं कथं चिदिन्द्रियसंनिकृष्टं प्रमेयैकदेशविशेषणतया साक्षात्करिष्यन्तीति, तत्राह—प्रमेयैकदेशसंनिकर्षात्तु कथं चिद्विशेषणीभूतवर्तमानविश्वविषयप्रत्यक्षज्ञानोदये सर्वः सर्वप्रत्यक्षदर्शी स्यात्सर्वस्येन्द्रियसन्निकृष्टमर्थं प्रति कथं चिद्विशेषणत्वोपपत्तेः । उक्तं हि—'नाऽन्यत्र

**मानाऽर्थस्मृतौ प्रत्यक्षप्रसङ्गः। संस्कारस्तत्र कारणं नाऽर्थसत्ता। असत्यप्यर्थे भावात्। इतरत्रापि तुल्यम्। योगजधर्म्मस्य हेतुत्वात्। न हि तत्राऽर्थोपयोगे प्रमाणम्। सन्निहिते ऽसंनिहिते, व्यवहिते ऽव्यवहिते, वर्तमाने ऽवर्तमाने च सर्वत्र योगिप्रत्यक्षोत्पादाऽभ्युपगमात्। वर्तमानदेशाद्यालम्बनत्वं लिङ्गाद्यभावे इति वदता संप्लवो निरस्तः स्यात्।**

योग: प्रभवतां'ति। अनुमानलक्षणाऽभावे च अनुमानलक्षणाऽनवरुद्धे विषये प्रत्यक्षलक्षणे व्यवस्थाप्यमाने प्रत्यक्षे कस्मिंश्चित् सदृशे गवयादौ दृष्टे संस्कारबोधात्सदृशान्तरस्य गवादेरर्थस्य विद्यमानस्य स्मृतौ प्रत्यक्षप्रसङ्गः।

सम्भवति हि गवादेरपि हि विद्यमानस्य कथं चित् प्रत्यक्षगवादिविशेषणत्वमिति शङ्कते—संस्कारस्तत्र स्मृतौ कारणं नाऽर्थसत्ता। कुत: ? असत्यप्यर्थे सति संस्कारे स्मृतेर्भावात्। उत्तरम्—इतरत्रापि तुल्यम्। कुत: ? अर्थसत्तानिरपेक्षस्य योगजधर्मस्य हेतुत्वात्। तद्दर्शयति—न हि तत्र योगिनां सर्वविषयप्रत्यक्षजन्मनि समस्तार्थोपयोगे[1] प्रमाणम्। कस्मात्? संनिहिते ऽसंनिहिते, व्यवहिते ऽव्यवहिते' वर्त्तमाने ऽवर्त्तमाने च सर्वप्रकारे योगिप्रत्यक्षोत्पादाऽभ्युपगमात् शास्त्रे।

यदुच्यते अतीतादिविशिष्टसंनिहितवर्त्तमानदेशाद्यालम्बने तत्राऽतीतादिगोचरमिति, तत्राह—वर्त्तमानदेशाद्यालम्बनत्वं योगिज्ञानस्याऽतीतादिविशिष्टाऽर्थग्राहिण: प्रत्युक्तमधस्तात्। अपि च प्रमाणत इति सर्ववचनोपसंग्रहार्थे तसिं प्रयुञ्जानेन तदर्थे चोपरिष्टात्तु विशदयता तत्र भवता पक्षिलस्वामिना प्रमाणेन प्रमाणाभ्यां प्रमाणै श्चैकस्यैव प्रमेयस्याऽऽत्मादे: प्रमितिरिति प्रमाणसंप्लवो दर्शित:, तद्व्याकोपश्च प्रसज्येतेत्यत आह—लिङ्गाद्यभावे प्रत्यक्षमिति वदता

१ अर्थक्रियायोगे २ पु॰ पा॰।

गर्भा टत्वविशिष्टप्रत्यक्षोत्तरं प्रागभावस्यासत्त्वेन तद्धटि-लपदप्रत्यक्षासम्भवादिति चेन्न। यत्र चोत्पत्तिकाले घका-रटकारप्रागभावानां स्मृतिः, तत्र टोत्पत्तिकाले प्रागभा-वविशिष्टो घ इति पदप्रत्यक्षसम्भवात्। पूर्वं प्रागभाव-सत्त्वात्। यद्वा न प्रागभावगर्भानुपूर्वीप्रत्यक्षम्। प्रागभा-वस्यातीन्द्रियत्वादसत्त्वाच्च किं तु घनाशविशिष्टटत्वम्।

न च घकारोत्पत्तिक्षणाव्यवहितक्षणोत्पन्नटकारस्य घनाशविशिष्टत्वाभावात्कथं तत्र पदत्वमिति वाच्यम्। टकारस्य स्थितिक्षणे घनाशविशिष्टत्वसम्भवात्। न च घरट इत्यत्रापि टकारस्य घनाशविशिष्टत्वाद्घटपदत्वापत्तिः। वर्णान्तराव्यवहितत्वेनापि टकारविशेषणात्। एवं च टोत्प-त्तिकाले घटत्वनिर्विकल्पकं ततो घत्वविशिष्टप्रत्यक्षटत्व-निर्विकल्पके ततो घनाशविशिष्टकार इति प्रत्यक्षसम्भ-वात्। नाशत्वस्यानुपस्थितस्यैव प्रकारत्वात्। यद्वा अव्य-वहितोत्तरत्वसंबन्धेन घविशिष्टटत्वमेवानुपूर्वी।

केचित्तु घज्ञानध्वंसविशिष्टज्ञानविषयत्वं घटज्ञाना-नन्तरज्ञानविषयत्वं वा टस्यानुपूर्वी, मौनिश्लोके च लि-प्यादिक्रमेण ज्ञानक्रमोऽनुमेयः। न चेश्वरोच्चरिते आनुपूर्वी न स्यात् तज्ज्ञानस्यैकत्वेन नित्यत्वेन चानन्तर्याभावा-दिति वाच्यम्। तत्रान्येषां ज्ञानमादायानुपूर्वीसत्त्वात्। सा च मनसा श्रोत्रेण वा उपनीता टकारे ज्ञायत इत्याहुः।

ननु तण्डुलादिशाब्दबोधे वृत्त्या तण्डुलादिपदज्ञान-जन्या तण्डुलाद्युपस्थितिर्न तत्त्वेन हेतुः। पचनीत्युक्ते प्रत्यक्षादिनोपस्थिततण्डुलकर्मत्वादेः पाकेऽन्वयात्। अत एव तण्डुलप्रकारककर्मत्वविशेष्यकबोधे तण्डुलपदोत्तर-विभक्तिरूपाकाङ्क्षा तादृशविभक्तिजन्यकर्मत्वोपस्थिति-

रूपासत्तिरपि न हेतुः । न च तत्र द्वितीयान्तपदाध्याहार एव कल्प्यते । पदज्ञानस्य वृत्त्या तदर्थोपस्थितेश्च कल्पनापेक्षया लाघवेनार्थोपस्थितेः कल्पनात् । न च तण्डुलं पचतीत्यत्र स्मृतकलायादेरप्यन्वयापत्तिः । तात्पर्याज्ञानात् । अन्यथा तवापि दैववशस्मृतकलायपदोपस्थापितेनान्वयबोधापत्तिः । न च पुष्पेभ्य इत्यत्र स्पृहधातुयोग एव चतुर्थ्याः साधुत्वात् स्पृहयतिपदाध्याहार एवेति वाच्यम् । तथाप्यन्यत्र पदाध्याहारसमर्थनात् । किं च प्रकृते साधुत्वार्थं तदपेक्षणेऽपि शाब्दबोधार्थं तदनपेक्षणात् । न चैवं सति तण्डुलः कर्मत्वं पाकः कृतिरित्यादितस्तण्डुलकर्मकपाककृतिबोधापत्तिरिति वाच्यम् । तत्तद्विभक्त्यादिसमभिव्याहारशून्यपदाजन्यतण्डुलकर्मत्वाद्युपस्थितीनां तादृशबोधे हेतुत्वादिति चेन्न ।

लाघवेन तण्डुलवृत्तित्वेन ज्ञातपदोत्तरविभक्तिजन्यकर्मत्वोपस्थितित्वेनैव तण्डुलप्रकारककर्मत्वविशेष्यकबोधे हेतुत्वान्न तु तण्डुलपदोत्तरद्वितीयादिशून्यतण्डुलपदजन्योपस्थितित्वेन गौरवात् । एवमन्यत्रापि । एवं तण्डुलपदोत्तरद्वितीयादिविभक्तिरूपाकाङ्क्षाया हेतुत्वादपि पदाध्याहारस्यैव सिद्धेः ।

ननु तण्डुलस्य पाचक इत्यत्र षष्ठ्याः कर्मत्वे लक्षणया तण्डुलप्रकारककर्मत्वविशेष्यकबोधः । तत्र लाक्षणिकाननुभावकत्वेन विभक्तेरननुभावकत्वेनोक्ताकाङ्क्षाया हेतुत्वे व्यभिचार इति चेन्न । तथाप्यर्थाध्याहारासिद्धेः । किं च सर्वलाक्षणिकानुरोधेन लाक्षणिकस्याप्यनुभावकत्वाच्च । किं चार्थाध्याहारवादिमते लिङः कार्ये शक्तिर्न स्यादनुमानादेरुपस्थित्यापि शाब्दबोधसम्भवादिति दिक् ।

अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यत्र राज्ञः पुत्रान्वये तात्पर्ये पुरुषेणान्वयाबोधात्तात्पर्यज्ञानं शाब्दबोधे हेतुः ।

तच्च यद्यपि न तत्प्रतीतिफलोपहितत्वरूपजनकत्वम् । अन्योन्याश्रयात् । नापि तत्प्रतीतिस्वरूपयोग्यत्वं तत् । नानार्थे विनिगमनापत्तेः । स्वरूपयोग्यतावच्छेदिकायाः शक्तेः लाक्षणिकेऽभावेन तस्य लक्षणीयपरत्वाभावापत्तेश्च । न च गङ्गापदस्मारितपूरेण तीरस्मृतेर्न गङ्गापदस्य तीरपरत्वमिति वाच्यम् । तीरस्यापि पदार्थत्वेन विभक्त्यर्थान्वयानुपपत्तेः । गच्छ गच्छसीत्यादेर्मुख्यपरत्वापत्तेश्च । तथापि तत्प्रतीतोच्छयानुसंहितत्वं तत्परत्वरूपं तत्तात्पर्यकत्वम् । तच्च तच्छाब्दबोधेच्छाप्रयोज्यव्यापारप्रयोज्यज्ञानविषयत्वम् ।

व्यापारस्तु क्वचिदुच्चारणं क्वचिल्लिप्यादिः । तज्ज्ञानं शाब्दबोधे हेतुः ।

ननु तात्पर्यज्ञानं न शाब्दबोधे हेतुः । तेन विनापि मूर्खोच्चारितवाक्याच्छुकादिवाक्याच्चान्वयबोधात् । न च तत्रेश्वरतात्पर्यज्ञानमेव हेतुः । तस्य फलोन्नेयतया प्रथमं दुर्ग्रहत्वात् । न चैवं सति नानार्थे विनिगमना न स्यात् । तात्पर्यग्राहकप्रकरणादेरेव विनिगमकत्वादिति चेन्न । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ राज्ञः पुरुषान्वये तात्पर्यस्य सन्देहे व्यतिरेकनिश्चये च पुरुषेण सहान्वयाबोधात्तात्पर्यभ्रमे चान्वयबोधात्तात्पर्यनिश्चयस्यान्वयव्यतिरेकाभ्यां हेतुत्वात् । न च शुकादिवाक्ये व्यभिचारः । तत्रेश्वरेच्छामादाय तत्सत्त्वात् । तदज्ञाने तूक्तप्रकरणाभावेन तत्र शाब्दबोधाभावात् । किं तु पदार्थोप-

स्थितिमात्रं घटः कर्मत्वमित्यादाविव । अत एव नानार्थे उभयोर्योग्यत्वे उभयोरन्वयबोधो भवत्येव तात्पर्यग्रहस्तु प्रवृत्तावुपयुज्यते वक्त्रभिप्रेतानयनमिष्टसाधनमितिज्ञानात् प्रवृत्तेरिति परास्तम् । विष्णुतात्पर्यकाद्धरिदर्शनमिष्टसाधनमिति वाक्यादुभयत्र प्रवृत्त्यापत्तेः । तात्पर्यविषयार्थशाब्दबोधस्यैवानुभवाच्च । तात्पार्यग्राहकप्रकरणादेरननुगमान्न शाब्दबोधे हेतुत्वम् । तात्पर्यग्राहकत्वेनानुगमे तु लाघवात्तात्पर्यग्रहस्यैव हेतुत्वमिति दिक् ।

केचित्तु तात्पर्यज्ञानं विनापि शुकमूर्खाद्युच्चारितवाक्यादन्वयबोधान्न शाब्दबोधत्वावच्छिन्ने तात्पर्यज्ञानं हेतुः । किं तु नानार्थस्थलीयशाब्द इत्याहुः । तन्न । सैन्धवादिपदजन्यतुरगलवणाद्युपस्थितिकालीनसैन्धवादिपदजन्यतुरगशाब्दबोधे तुरगतात्पर्यग्रहे उभयोरन्वयबोधापत्तिः । न चेष्टापत्तिः, सकृदुच्चरितः शब्दः सकृदर्थप्रत्यायक इति नियमभङ्गापत्तेरिति चेन्न । प्रमाणसिद्धतादृशनियमनिश्चये विशेषदर्शनात् । सैन्धवादिपदं कदा उभयबोधं जनयतु एकानुसन्धानेन चोभयबोधं जनयत्विति नाभिप्रायः, किं तूभयबोधं जनयत्विति । तस्य चावृत्त्यान्वयबोधेनाप्युपपत्तेः । न च तादृशनियमे मानाभावः । घटाविव्यत्र एकघटपदोपस्थाप्यघटद्वये द्वित्वान्वयबोधसम्भवेनैकशेषानुशासनवैयर्थ्यापत्तेः ।

ननु सकृदितिव्युत्पत्तौ सकृत्त्वं नार्थविशेषणं जातिविशिष्टव्यक्तिबोधानापत्तेः । न ह्यसौ घटं पटं जानातीत्यादावावृत्त्या बोधस्यानुपपादनात् । अत एव वृत्तिविशेष्येऽपि न सकृत्त्वमिति चेन्न । एकं पदानुसन्धानमेकविधेयावच्छिन्नमेव स्वार्थोद्देश्यकबोधं जनयति एकोद्देश्याव-

च्छिन्नमेव स्वार्थविधेयकबोधं जनयतीति व्याप्तिद्वयाङ्गीकारस्तेन घटं पटं जानातीत्यत्र काष्ठं स्थाली पचतीत्यादौ च नावृत्तिं विना बोधः । न च सैन्धवान् द्रव्यमित्यादितो लवणतुरगवदेकोद्देश्यकद्रव्यबोधापत्तिरिति वाच्यम् । वृत्तिविशेष्यमेकमेवानुभावयतीति नियमस्यापि स्वीकारादत एव न सरूपाणामेकशेषवैयर्थ्यम् । न च मृगो गच्छतीत्यादौ सामान्यविशेषोभयशक्तमृगपदात् पशुत्वमृगत्वोभयरूपेण एकविशेष्यकबोधापत्तिरिति वाच्यम् । वृत्तिविशेष्यतावच्छेदकमेवानुभावयतीति नियमान्तरस्याप्यङ्गीकारात् । अत्र तुरीयनियमेनैव तृतीयवारणे तद्वैयर्थ्यमिति कश्चित् । न त्वेकमेव शाब्दबोधं जनयतीति नियमान्तरं, प्रमाणाभावात् । न च श्वेतो धावतीत्यादिशब्दश्लेषे पदभेदाद्वृत्तिर्न स्यात्, इष्टापत्तेः ।

अत्र पुष्पवन्तपदभेदो निवेश्यो व्याप्ये । तेन तत्र न व्यभिचारः । न तु पुष्पवन्तपदस्य चन्द्रसूर्यवृत्तिद्वित्वं शक्यतावच्छेदकम् । चन्द्रः सूर्यश्चेति प्रत्ययात् । न च पुष्पवन्तपदात् केवलं चन्द्रस्य सूर्यस्य च बोधापत्तिरिति वाच्यम् । पुष्पवन्तपदं चन्द्रे सूर्ये शक्तमिति ज्ञानस्य तज्जन्यपदार्थोपस्थितेर्वा चन्द्रत्वप्रकारकत्वविशिष्टसूर्यत्वप्रकारकत्वावच्छिन्नशाब्दबोधे हेतुत्वात् । अत एव केवलं चन्द्रे शक्तिज्ञानात् केवलं चन्द्रबोध इति प्राञ्चः ।

वस्तुतस्तु आवृत्तिस्वीकारेऽपि चैत्रौ गच्छतः इत्यत्र द्वित्वसंख्यायाश्चैत्रयोरुभयोरुद्देश्यतया बोधो न स्यात् । अत एव एकपदे नोद्देश्यविधेयभाव इत्युक्त्यापि न निस्तारः । आख्यातोपस्थाप्यद्वित्वोद्देश्यतायाः सत्त्वात् । अत एव व्यासज्यवृत्तेरुद्देश्यता व्यासज्यवृत्तिरेकैव ।

एकोद्देश्येत्यत्रैकोद्देश्यतावत्त्वम् । एवं घटौ द्वावित्यत्र व्यासज्ज्यवृत्तिविधेयतानिरूपितोद्देश्यताया व्यासज्ज्यवृत्तित्वादिति प्रत्युक्तम् । समवायेन द्वित्वनिरूपितोद्देश्यतायाः प्रत्येकं सत्त्वात् ।

न च व्यासज्ज्यवृत्तिसम्बन्धेन विधेयोद्देश्यताया व्यासज्ज्यवृत्तित्वम् । मानाभावात् । अत एव पुष्पवन्तपदभेदवत् द्वित्वादिपदभेदो निवेश्य इति निरस्तम् । न च घटत्वेनोपस्थिते सहस्रसंख्यान्वयवद्द्वित्वादेरन्वयसम्भवात् सरूपाणामेकशेषइत्यस्य व्यर्थतेति वाच्यम् । पयसि इत्यत्र जलत्वेन दुग्धत्वेन च जलदुग्धयोरुपस्थित्यर्थं तत्सार्थकत्वात् । तथा चैका या वृत्तिस्तद्विषयीभूतमर्थमनुभावयतीत्येव नियमः प्रमाणसिद्धः पर्यवस्यतीति ।

वस्तुतस्तु तादृशनियमास्वीकारेऽपि रामरामौ पयःपयसीत्यादेः साधुत्ववारणार्थं सरूपाणामिति सूत्रम् । अन्यथा तादृशप्रयोगस्यापि साधुत्वापत्तेरिति ध्येयम् । आवृत्तिश्च स्वस्थानस्थितस्य पुनरनुसन्धानम् । स्थानान्तर स्थस्यानुसन्धानमनुषङ्गः । स्थानान्तरस्थस्य स्वस्थानेऽनुसन्धानमनुवृत्तिः । एतत्त्रयं श्रुतपदानां, तत्र पूर्वं लघीयः । अश्रुतपदानामनुसन्धानमध्याहारइति प्राञ्चः ।

तन्न । विशेषदर्शनस्यासार्वत्रिकत्वेन एकदान्तर्भावेणाभिप्राये युगपद्बोधस्य दुर्वारत्वात् । किं चावृत्यनुरोधादेकोच्चारणान्तर्भावेनाभिप्रायाद्युगपद् उभयबोधो दुर्वारः सामग्रीसत्त्वात् प्रथममेतस्य चरममेतस्येत्येत्र नियामकाभावात् । धारावाहिकस्थले प्रथमक्षणे कार्यतावच्छेदकावच्छिन्नस्य जायमानत्वेन तत्रापादकाभावाद् व्यक्तिस्थानीयापत्तेरदूषणत्वस्वीकारात्, आवृत्तिस्तु यत्र क्रमिकबोधाभिप्रायस्तत्रेति दिक् ।

तच्च तात्पर्यमस्माकं लौकिकवाक्ये स्वतन्त्रम्, वेदे ईश्वरस्य ।

मीमांसकास्तु पूर्वपूर्वाध्यापकतात्पर्यपूर्वकमेव वेदे-तात्पर्यमिति परतन्त्रमनादित्वादिति । तन्न । कार्यद्रव्या-नधिकरणभावकार्याधिकरणरूपप्रलयस्य श्रुतिसिद्धतया तात्पर्यस्यानादित्वासिद्धेः । भावकार्यानधिकरणकालरूप-महाप्रलयोऽप्यागमसिद्ध एवेति दिक् ।

वेदत्वं च न शाखासमुदायत्वं वेदैकदेशस्य शाखा-त्वेनान्योन्याश्रयात् । नाप्यदृष्टजनकतावच्छेदकावच्छि-न्नत्वे सति मीनशरीरावच्छिन्नेश्वरोक्तजातीयत्वम् । ईश्व-रोक्तलौकिकवारणाय सत्यन्तम् । गीतादिवारणाय मी-नशरीरावच्छिन्नेति ईश्वरपदं स्वरूपकथनायेति । मीमांस-कमतलक्षणासिद्धेः । किं त्वखण्डोपाधिः । तस्य च याव-त्यभियुक्तानां वेदत्वव्यवहारः तत्रैव पर्याप्तेस्तत्पाठश्र-वण एव शूद्रादीनां प्रत्यवायः ।

केचित्तु अभियुक्तैर्वेदत्वेन परिभाषितत्वं वेदत्वं धातुत्वाख्यातत्वादिवत् परिभाषागर्भमेव इत्याहुः । ता-दृशवेदस्य पौरुषेयत्वं "तस्मात्तपस्तेपानाच्चत्वारो वेदाश्चा-जायन्तच्छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायते"त्यादि-श्रुतेः । वेदाः पौरुषेयाः वाक्यत्वात् भारतवदित्यनुमा-नात् सिद्धम् ।

अत एव

स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा ।
शिवाद्या ऋषिपर्यन्ताःस्मर्तारोऽस्य न कारकाः ।

इत्यादिस्मृत्या नाऽपौरुषेयत्वसिद्धिः । तस्याः श्रुति-विरोधेनान्यत्र तात्पर्यात् । स्वयम्भूत्वं न नित्यत्वं किं तु

नित्यज्ञानवज्जन्यत्वं जन्यज्ञानवदजन्यत्वं वा । अस्मदाद्य-ननुभूयमानजन्यत्वमिति केचित् । शिवाद्या इत्यत्र शिव-नामा कश्चिदृषिः शिवशब्देनोक्तः । अतद्गुणसंविज्ञानबहु-व्रीहिर्वा । न च श्रुत्या पौरुषेयत्वसिद्धिवद्विज्ञानमानन्द-मित्यादिश्रुत्या आनन्दस्य सिद्धिः स्यादिति वाच्यम् । लाघवेन सुखत्वावच्छेदेन पुण्यजनकत्वग्रहे तस्य लक्षण-या दुःखाभावपरत्वादिति दिक् ।

ननूत्पादविनाशकल्पनागौरवभीत्या शब्दस्य नित्यत्वसि-द्धौ शब्दसमुदायरूपवेदस्य वाक्यार्थज्ञानादिमज्जन्यत्वरू-पपौरुषेयत्वसिद्धिर्नागमादपीति चेन्न । वर्णात्मकः शब्दो ऽनित्यः समवेतत्वे सत्युत्पत्तिमत्त्वाद् घटवद् इत्यनुमाना-त्तत्सिद्धेः । उत्पन्नो गकारो विनिष्टो गकार इति प्रतीत्या-त्तस्योत्पादविनाशसिद्धेश्च ।

न चासौ भ्रान्तिः, बाधकाभावात् । न च स एवाय गकार इति प्रत्यभिज्ञा बाधिका । तस्या गवृत्तिगत्वावच्छि-न्नभेदाभावविषयत्वेनाबाधकत्वात । तथा सति गकारो-ऽयमिति स्यान्न तु सोऽयमिति चेन्न । सोऽयमित्यत्र तद्वृ-त्तिगत्वावच्छिन्नाभेदस्य विषयत्वात् । गकारोऽयमित्यत्र गत्वावच्छिन्नाभेद एव विषयो न तु गत्वे तद्वृत्तित्वमपि । यत्र तु जातौ जातित्वभानसामग्री तत्र तज्जातीयोऽयमि-तिधीः संसर्गस्तत्तज्जात्यवच्छिन्नभेदाभावः । तद्व्यक्तित्वा-वच्छिन्नभेदाभावो वा । न चैकस्मिन्नपि तज्जातीयोऽयमिति स्यात् । इष्टत्वात् । गभिन्नत्वे सति गवृत्तिजातीयाभेदस्य भानाङ्गीकाराच्च तथाप्रत्यय इत्यन्ये । किं चोत्पादविनाश-प्रत्यययोरप्रामाण्यापेक्षया प्रत्यभिज्ञाया एवाप्रामाण्य-मित्यस्यापि सुवचत्वात् ।

वस्तुतस्तु विलक्षणवायुसंयोगादीनां गत्वादिकमेव

कार्यतावच्छेदकं न तु गप्रत्यक्षादिकमित्यादिशब्दानित्यत्वसाधकानि द्रष्टव्यानि । एतेन शब्दो नित्यो व्योमैकगुणत्वाद्व्योमेतरासमवेतगुणत्वाद्वा व्योमपरिमाणवदिति निरस्तम् । येन रूपेण वर्णानां स्फोटव्यञ्जकत्वं तेन रूपेणार्थप्रत्यायकत्वेनैवोपपत्तावतिरिक्तनित्यस्फोटेऽपि न मानमिति दिक् ।

भट्टास्तु शब्दो द्रव्यं साक्षात्सम्बन्धेन प्रतीयमानत्वादित्याहुस्तन्न । अप्रयोजकत्वात् । अत एव निस्पर्शद्रव्यत्वेन शब्दस्य नित्यत्वसाधनमपि प्रत्युक्तमिति दिक् ।

स च शब्दो द्विविधः । प्रवर्तकोऽप्रवर्तकश्च । प्रवर्तको विधिः । तदन्योऽप्रवर्त्तकः । प्रवर्तकत्वं च प्रवृत्तिजनकेच्छाजनकज्ञानजनकत्वेन । प्रवृत्तिजनकेच्छा च कृतिसाध्यत्वप्रकारिका । तज्जनकं कृतिसाध्यत्वप्रकारकं ज्ञानं न तु कृत्यसाध्यत्वज्ञानाभावो गौरवात् । इच्छायाः समानप्रकारकधीसाध्यत्वेन कृतिसाध्यत्वप्रकारकज्ञानाभावकाले चिकीर्षानुदयाच्च । अतस्तद्विषयः कृतिसाध्यत्वं विध्यर्थः ।

न च विषभक्षणादौ कृतिसाध्यताज्ञानात् प्रवृत्यापत्तिस्तद्वारणार्थं बलवदनिष्टाननुबन्धित्वेन कृतिर्विशेषणीयेति चेन्न । इष्टाजनके बलवदनिष्टाननुबन्धिकृतिसाध्यत्वेन ज्ञाते प्रवृत्त्यापत्तेः । इष्टाजनकत्वेन ज्ञातस्य कृतिर्बलवदनिष्टजनकैव कष्टकर्मेति न्यायादिति चेन्न । अस्तु तथा न त्विष्टाजनकत्वेन ज्ञानदशायां तदीयकृतौ बलवदनिष्टजनकत्वज्ञाननियमो मानाभावादिति वाच्यम् नित्ये या प्रवृत्तिस्तत्र शुचिविहितकालजीवित्वप्रतिसन्धानजन्यं कार्यताज्ञानं हेतुः । अन्यत्रेष्टसाधनतालिङ्गकमिष्टसाधनताज्ञानकालीनं वा कार्यताज्ञानं हेतुरिति नोक्तदोषः

न चेष्टसाधनत्वविषयकं कार्यताज्ञानमेव हेतुरस्तु लाघवादिति वाच्यम् । साध्यत्वसाधनत्वयोर्विरोधेन एकदा एकत्र ज्ञानासंभवात् । प्रवृत्तिसामान्ये च कार्यताज्ञानं बलवदनिष्टाननुबन्धित्वनिश्चयहेतुः । न च कृतिसाध्यताज्ञानत्वेन प्रवृत्तिहेतुत्वे कृतिसाध्यत्वसंशयाद्बहुवित्तव्ययायाससाध्ये प्रवृत्त्यापत्तिस्तन्निश्चयत्वेन प्रवर्तकत्वेऽल्पव्ययायाससाध्यके कृतिसाध्यत्वे संशयात् प्रवृत्त्यनापत्तिरिति वाच्यम् । कृतिसाध्यताज्ञानत्वेनैव हेतुत्वात् । संशये बहुवित्तव्ययायाससाध्ये प्रवृत्त्यभावस्तु बलवदनिष्टाननुबन्धित्वनिश्चयाभावात् । न च बलवदनिष्टाननुबन्धित्वज्ञानत्वेन कृतिसाध्यतानिश्चयत्वेनैव हेतुत्वमस्त्विति वाच्यम् । कृतिसाध्यत्वनिश्चयेऽपि तत्संशयादप्रवृत्तेः । कृतिसाध्यत्वसंशयेऽपि अल्पायासादिसाध्ये तन्निश्चयात् प्रवृत्तेश्च । न चाप्रामाण्यनिश्चयानास्कन्दितकृतिसाधताज्ञानत्वापेक्षया अप्रामाण्यज्ञानानास्कन्दितकृतिसाध्यतानिश्चयत्वेनैव लाघवाद्धेतुत्वमिति वाच्यम् । कृतिसाध्यताज्ञानत्वेनैव हेतुत्वात् । तत्राप्रामाण्यनिश्चये तु बलवदनिष्टाननुबन्धित्वनिश्चयानुदयादेव न प्रवृत्तिरिति । न तु कृत्यसाध्यता ज्ञानाभावो हेतुः । कृतिसाध्यत्वसन्देहे शब्दात् कृतिसाध्यत्वनिर्णये प्रवृत्त्यभावापत्तेः । कृतिसाध्यत्वनिर्णयाभावविशिष्टत्वेन कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वे चातीव गौरवम् । अत एव कृत्यसाध्यतानिश्चयाभावोऽपि न हेतुः । गौरवादिति प्रभाकरानुयायिनः ।

अपरे तु सनो धात्वर्थगोचरेच्छावाचित्वात् कृतीच्छैव चिकीर्षा सैव प्रवृत्तौ हेतुर्लाघवात् । सा च कृतीष्टसाधनताज्ञानादिति इष्टसाधनत्वं विध्यर्थः । तच्च कृताव-

न्वेति एकपदोपस्थाप्यत्वेन सन्निहितत्वात्। न चेच्छायाः समानविशेष्यत्वप्रत्यासत्त्या प्रवृत्तिहेतुत्वान्न कृतीच्छा प्रवर्त्तिका किं तु कृतिसाध्यत्वप्रकारिकेच्छा साध्यत्वसंसर्गेण कृतिप्रकारिकैव वा हेतुरिति वाच्यम् । पाकत्वावच्छिन्नविशेष्यतासंबन्धेन प्रवृत्तौ कृतिनिष्ठविशेष्यता निरूपितपाकत्वावच्छिन्नप्रकारतासम्बन्धेन पाककृतीच्छायाः कृतीच्छाया इच्छाया वा हेतुत्वात्। न च कार्यतावच्छेदककारणतावच्छेदकसंबन्धस्यैकत्वात् पाकत्वावच्छिन्नविशेष्यतासम्बन्धेनैव कृतिप्रकारेच्छाया इच्छाया वा हेतुत्वमिति वाच्यम्। प्रत्यासत्तिलाघवेन वस्तुविशेषमर्दनानुकूलकृतेः समवायेन सुखहेतुत्वेन कृतौ इष्टसाधनत्वज्ञानात् प्रवृत्तिस्तत्र कृतीच्छैव प्रवर्तिका न तु कृतिविषयेच्छा कृतिविषये इष्टसाधनताज्ञानाभावादित्याहुः ।

अपरं तु अस्तु कृतीच्छापि प्रवृत्तिजनिका, न तु कृतीच्छैव याग इष्टसाधनमित्यादिशब्दाद् यागादाविष्टसाधनताज्ञानात् प्रवृत्तिस्तत्र कृताविष्टसाधनताज्ञानमेवेति कृतीच्छाया अभावात् । न चाननुगमः । कृतिप्रकारतानिरूपिता यागत्वावच्छिन्नविशेष्यता या च कृतिनिष्ठविशेष्यतानिरूपिता यागत्वावच्छिन्नप्रकारता एतदन्यतरसम्बन्धेनेच्छात्वेनैव यागत्वप्रकारकप्रवृत्तौ हेतुत्वात्। एवमन्यत्रेत्याहुः।

नन्वस्तु कृतिसाध्यताज्ञानं चिकीर्षाद्वारा प्रवृत्तौ हेतुः। तथापि प्राणपञ्चकसञ्चारे जीवनयोनिकृतिसाध्ये कृतिसाध्यताज्ञानात् प्रवृत्त्यापत्तिः । न च तत्र मानाभावः। प्राणक्रिया यत्नजन्या क्रियात्वाच्छरीरक्रियावदित्यनुमानात् तत्सिद्धेः। ज्ञानादेर्नाशं प्रति स्वोत्तरोत्पन्नयोग्यजातीयविशेषगुणस्य कारणत्वात्, सुषुप्तेः पूर्वज्ञाना-

दिनाशार्थं तत्स्वीकाराद्वा तत्सिद्धेरिति चेन्न । बाह्यवायुक्रियायां व्यभिचारेणानुमानासिद्धेः । न च तत्रापीश्वरयत्नजन्यत्वसत्त्वान्न व्यभिचार इति वाच्यम् । तर्हि ईश्वरयत्नजन्यत्वेन सिद्धसाधनादर्थान्तरत्वाद्वा ज्ञानादिनाशं प्रति स्वोत्तरोत्पन्नस्यैव हेतुत्वान्न तत्सिद्धिः ।

ये तु जीवनयोनियत्नस्वीकारपक्षेऽपि तत्र प्रवृत्तिवारणाय प्रवृत्तित्वेनकृतिसाध्यताज्ञानं कारणमाहुः । तन्न । तत्र तादृशकृतिसाध्यत्वभ्रमात् प्रवृत्त्यापत्तेर्दुर्वारत्वात् । स्वरूपायोग्यत्वेन प्रवृत्त्यभावस्तु तुल्यः । एवं निवृत्त्याख्ययत्नेऽपि प्रमाणाभावः । प्रवृत्त्यभावस्यैव निवृत्तित्वात् । न च निवृत्त्यभाव एव प्रवृत्तिरिति वाच्यम् । सुषुप्तौ निवृत्त्यभावसत्त्वात् । प्रवृत्तिकार्यचेष्टाद्यापत्तेः । न च निवृत्तेरसिद्धौतज्जनकत्वेन द्वेषसिद्धिर्न स्यादिति वाच्यम् । शत्रुं द्वेष्मीति अनुभवात् तत्सिद्धिरिति दिक् ।

नैयायिकास्तु क्रियां विना केवलकृतितः सुखादेरनुत्पादात्फलोपधायकजनकतासम्बन्धेन क्रियावत् कृतेर्जनकत्वं वाच्यम्, तदपेक्षया कृतिसम्बन्धेन क्रियायाः सुखहेतुत्वं, लाघवात् । किं च कृतेः क्रियाद्वारैव सुखादिजनकत्वं वाच्यम् । तथा च क्रियाया अनिष्टसाधनत्वं ज्ञात्वा कृतेरिष्टसाधनत्वं ज्ञातव्यमिति क्रियेच्छायाः सर्वत्र सत्त्वात् सैव प्रवृत्तिहेतुर्विशेष्यतायाः कार्यतावच्छेदककारणतावच्छेदकसम्बन्धत्वे लाघवाच्चेति क्रियायामेवेष्टसाधनत्वं बलवदनिष्टाननुबन्धिकृतिसाध्यत्वं च विध्यर्थोऽन्वेति । न च नित्ये फलाभावादिष्टसाधनत्वाभावः । तत्रापि बहुशः फलश्रुतेः, यत्र च न फलश्रुतिः । तत्र विश्वजिन्न्यायात् स्वर्गस्य प्रत्यवायपरिहारस्य वा फलत्वात् ।

फलकामनाधीनकर्तव्यत्वेऽपि प्रत्यवायसाधनीभूताभावप्रतियोगित्वेन नित्यत्वं फलकामनाविरहदशायां प्रवृत्त्यभावस्त्विष्ट एव। न च स्वर्गकामनां विना कृताज्ज्योतिष्टोमात् स्वर्गोत्पादवारणाय स्वर्गकामनाप्यधिकारिविशेषणं शौचादिवद्वाच्या तथा च कामनाविरहदशायां ज्योतिष्टोमाकरणेऽपि प्रत्यवायो न स्यात्, अशुचेरिव तदाप्यनधिकारित्वादिति वाच्यम्। प्रत्यवायोत्पत्तौ सन्ध्यावन्दनादिकरणवत् शौचादेरपि कारणत्वं न तु कामनायाः प्रमाणाभावात्।

केचित्तु कामनेतरयावदधिकारवतां प्रकरणमेव प्रत्यवायहेतुरित्याहुः। बलवदनिष्टाननुबन्धित्वस्य कृतिविशेषणान्न मधुविषसंपृक्तान्नभोजने प्रवृत्तिः। न वा न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणे कृतिसाध्ये इष्टसाधने विध्यर्थनिषेधानुपपत्तिः। बलवदनिष्टाननुबन्धिकृतिसाध्यत्वाभावसत्त्वाद्विशेषणाभावेन विशिष्टाभावात्। न च श्येनस्य हिंसात्वेन न स्वरूपबलवदनिष्टसाध्यत्वेन कथं श्येनेनाभिचरन् यजेतेत्यत्र विधिप्रवृत्तिरिति वाच्यम्। श्येनो हि वधसाधनं न तु नरकसाधनमिति न तत्र विध्यर्थान्वयानुपपत्तिः। श्येनाद्वधो वधाच्च नरक इति न तत्रास्तिकानां प्रवृत्तिः।

यद्यपि बलवदनिष्टप्रयोजकेऽपि प्रवृत्त्यभावाद् बलवदनिष्टाप्रयोजकज्ञानमेव प्रवर्तकमिति विध्यर्थोऽपि स एवेति श्येने विध्यर्थबाध एव। तथापि विध्यर्थो बलवदनिष्टाजनकत्वमेव, बलवदनिष्टाप्रयोजकत्वज्ञानं तु मानसमेव मत्कृतिसाध्यताज्ञानवत्। न हि प्रवर्तकं ज्ञानं विधिजन्यं किं तु मानसम्। न च हिंसाया नरकसाधनत्वस्यानुमाना-

दवगतत्वात् श्येनस्यापि मरणोद्देश्यकमरणानुकूलव्यापारत्वेन हिंसात्वाद्विध्यर्थानन्वयस्तदवस्थ इति वाच्यम् । कूपखननस्य विहितत्वेन कूपकर्तुर्गोधकर्तृत्ववारणाय मरणोद्देश्यकत्वविशेषणवद् श्येनस्य विहितत्वेनादृष्टादारकत्वेनापि मरणानुकूलव्यापारस्य विशेषणीयत्वात् । अन्यथा त्रिसन्ध्यं गंगामरणोद्देशेन कृतस्तवपाठादेरपि हिंसात्वापत्तेः । तथा च श्येनस्यादृष्टद्वारकत्वाद् हिंसात्वाभावान्न विध्यर्थान्वयानुपपत्तिः ।

वस्तुतस्तु बलवदनिष्टाननुबन्धित्वं कृतेर्विशेषणं कृतिसाध्यस्य वेत्यत्र विनिगमकाभावात् प्रत्येकमेव शक्यं तथा च श्येनादौ बलवदनिष्टाननुबन्धित्वस्यायोग्यत्वादनन्वयेऽपि इष्टसाधनत्वकृतिसाध्यत्वयोरन्वयो नानुपपन्नः एवं न कलञ्जं भक्षयेदित्यत्र नञर्थे बलवदनिष्टाननुबन्धित्वस्यैवान्वयो न तु कृतिसाध्यत्वेष्टसाधनत्वयोस्तयोस्तत्र सत्त्वात् ।

न च श्येनविध्यर्थबलवदनिष्टाननुबन्धित्वानन्वये बलवदनिष्टाननुबन्धित्वस्य ज्ञानस्य प्रवर्तकस्याभावात् कथं तत्र प्रवृत्तिरिति वाच्यम् । अगम्यागमनादाविव रागान्धानां मनसा भ्रमरूपलाद्दृशज्ञानादेव प्रवृत्तेः । न च ज्योतिष्टोमादौ मानसबलवदनिष्टाननुबन्धित्वज्ञानादेव प्रवृत्त्युपपत्तेर्बलवदनिष्टाननुबन्धित्वस्य शक्यत्वे मानाभाव इति वाच्यम् । तस्याशक्यत्वेन कलञ्जं भक्षयेदित्यत्र निषेधानुपपत्तेरिष्टसाधनत्वकृतिसाध्यत्वयोर्विध्यर्थयोस्तत्र सत्त्वात् । न च लक्षणीयबलवदनिष्टाननुबन्धित्वस्य निषेधोऽस्त्विति वाच्यम् । विधौ लक्षणाया अनङ्गीकार-

स्य सर्वसंमतत्वात् । अन्यथा विधिनिषेधाभ्यां निष्फलप्रवृत्तिनिवृत्त्योरजननापत्तेः ।

इदं तु बोध्यम् । श्येने बलवदनिष्टाननुबन्धित्वज्ञानवत् स्वकृतिसाध्यताज्ञानवच्च ज्योतिष्टोमादावपि बलवदनिष्टाननुबन्धित्वस्य कृतिसाध्यत्वस्य च मनसैव ज्ञानसम्भवादिष्टसाधनत्वमेव विध्यर्थः । न च मदीयेष्टसाधनताज्ञानवदिष्टसाधनताज्ञानमपि मानसमस्तु किं तत्रापि शक्त्येति वाच्यम् । न हि यागादौ इष्टसाधनताज्ञानं प्रवर्तकम् । किं तु स्वर्गसाधनताज्ञानं तच्च विधिना जन्यते तावन्मात्राच्च न प्रवृत्तिरिति स्वर्गेच्छापि तत्सहकारिणी सा च स्वर्गज्ञानात् । तथा च स्वर्गादीच्छा स्वर्गादीष्टसाधनाताज्ञानमिदं द्वयं चोपायेच्छाद्वारा प्रवृत्तौ हेतुः । कृतिसाध्यत्वस्य ज्ञानं तु साक्षात्ततश्च तस्मिन् तत्सामग्रीततत्स्वरूपादिज्ञानादन्वयव्यतिरेकाभ्यां ग्रहीतुं शक्यं कलञ्जभक्षणे तु लक्षणीयबलवदनिष्टाननुबन्धित्वस्यैव निषेधो न विधौ परः शब्दार्थ इत्यत्र विधिशब्देन प्रवर्तकविधेरेव ग्रहणं न तु निवर्तकविधेरितियुक्तमुत्पश्यामः ।

नन्वस्तु इष्टसाधनत्वमात्रं कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबन्धित्वत्रयं वा विध्यर्थः । तथापि कृतिसाध्यत्वज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं इष्टसाधनताज्ञानं प्रवर्त्तकं तत्रेष्टसाधनताज्ञानमुपायेच्छाद्वारा, द्वयं तु स्वानन्त्र्येण । अथ वा यागत्वावच्छिन्नविशेष्यतया प्रवृत्तौ तादृशविशेष्यतया कृतिसाध्यत्वप्रकारिकेच्छैव बलवदनिष्टाजनकत्वज्ञानसहिता हेतुस्तत्र च कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं जनकम् । अथ वा बलवदनिष्टाननुबन्धित्वज्ञानमप्युपायेच्छाद्वारैव प्रवृत्तिहेतुरित्यत्र विनि-

गमकाभाव इति चेन्न । कृतिसाध्यपाकोद्देश्यिका कृतिसाध्यः पको भवत्विति येच्छा तत्र कृतिसाध्यपाकत्वधर्मितावच्छेदकमिष्टसाधनताज्ञानं हेतुः । तथा च पाकत्वेन पाककृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानात् प्रवृत्त्यभावापत्तेरिति कश्चित् ।

परे तु पाकत्वेन पाकेष्टसाधनताज्ञानेऽपि पाकत्वेन तत्र कृतिसाध्यताज्ञानात् कृतिसाध्यत्वप्रकारिकेच्छोत्पत्तिः । यद्धर्मविशिष्टेष्टसाधनताज्ञानं तद्धर्मविशिष्टे यदुपायसाध्यताज्ञानं तदुपायसाध्यत्वप्रकारिकेच्छास्ति । न च सैव प्रवृत्तौ हेतुरस्त्विति वाच्यम् । विशेष्यतया प्रवृत्तौ विशेष्यतया इच्छात्वेनैव कारणत्वात्, न तु कृतिसाध्यत्वप्रकारिकेच्छात्वेन, गौरवात् । न च कृतिसाध्यत्वप्रकारकज्ञानस्य प्रवृत्तौ कारणत्वे गौरवमिति वाच्यम् । इष्टसाधनत्वेऽपि पाके कृतिसाध्यत्वसंशयान्निष्कम्पं प्रवृत्त्यनुदयात्तादृशप्रवृत्तौ कृतिसाध्यत्वप्रकारकनिर्णयस्य हेतुत्वावश्यकत्वेनेच्छाया एव लाघवेन प्रवृत्तौ हेतुत्वमित्याहुः । तन्न अल्पवित्तायाससाध्यकृतिसाध्यत्वसन्देहेऽपि प्रवृत्तेर्बहुवित्तव्ययायाससाध्ये तु कृतिसाध्यत्वसन्देहे बलवदनिष्टाननुबन्धित्वसंशयेन निश्चयाभावादेव प्रवृत्त्यनुत्पत्तेः । न चाल्पायाससाध्ये निष्कम्पप्रवृत्तौ कृतिसाध्यत्वनिश्चयो हेतुरिति वाच्यम् । निष्कम्पत्वानिरुक्तेरिति दिक् ।

परे तु कृतिसाध्यत्वनिर्णय एव चिकीर्षाहेतुः । स्वल्पव्ययायाससाध्यत्वसंशयात्प्रवृत्त्यभावस्त्विष्ट एवेति चिकीर्षैव प्रवृत्तिहेतुरित्याहुः ।

नन्वस्तु कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च चिकीर्षाद्वारा प्रवृत्तिहेतुः । बलवदनिष्टाननुबन्धित्वज्ञानं तु कथं प्रवर्तकम् ।

न्वयानुपपत्तिः । [1]सिद्धस्य वस्तुन इतिकर्त्तव्यतात्वाभावात्, क्रियाया एवेतिकर्त्तव्यतात्वात्, द्रव्यस्य केवलमङ्गत्वात्[2] ।

(१८) अत एवेतिकर्त्तव्यतात्वाभावात् द्रव्यस्य प्रकरणादग्रहणम् । यथाऽऽहुः

नावान्तरक्रियायोगादृते वाक्योपकल्पितात् ।
गुणद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रिया इति

तन्त्रवार्तिक—पृष्ठ २९३ ।

तदेतदग्रे वक्ष्यामः ।

(१९) किं च सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं[3] नाधिकारवाक्यम्, 'ज्योतिष्टोमेन स्वर्गकामो यजेत'इत्यस्याधिकारवाक्यत्वात् । उत्पत्तिवाक्ये च नेतिकर्त्तव्यताकाङ्क्षा, इष्टविशेषाकाङ्क्षाकलुषितत्वेनेतिकर्तव्यताकाङ्क्षाया विस्पष्टमनुत्थानात्[4] ।

(२०) तत्सिद्धं सोमस्य[5] नेतिकर्त्तव्यतात्वेन भावनायामन्वयः । तस्माद्विशिष्टविधावन्वयानुपपत्त्याऽवश्यं मत्वर्थलक्षणा वाच्येति ।

———

१ 'इतिकर्तव्यता'शब्दस्य 'एवम्प्रकारेण कर्तव्यम्' इत्यर्थो लभ्यते । सिद्धञ्च वस्तु न कदाऽपि कर्त्तुं शक्यते । अत इतिकर्तव्यता न तस्य किन्त्वसिद्धस्यैव वस्तुनः ।

२ द्रव्यङ्करणं सत् कदाऽपि प्रधानन्नैव भवितुमर्हति ।

३ कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । कर्मजन्यफलस्वाम्यबोधकोविधिरधिकारविधिः ।

४ उत्पत्तिवाक्ये फलस्यानुक्तत्वात् तत्रैव च कर्तुराकाङ्क्षाया उत्कटतरत्वात् तस्मिन्ननुक्ते इतिकर्तव्यताकाङ्क्षा नोदेति ।

५ सोमसम्बन्धिकारकस्येत्यर्थः ।

गमकाभाव इति चेन्न । कृतिसाध्यपाकोद्देश्यिका कृतिसाध्यः पाको भवत्विति येच्छा तत्र कृतिसाध्यपाकत्वधर्मितावच्छेदकमिष्टसाधनताज्ञानं हेतुः । तथा च पाकत्वेन पाककृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानात् प्रवृत्त्यभावापत्तिरिति कश्चित् ।

परे तु पाकत्वेन पाकेष्टसाधनताज्ञानेऽपि पाकत्वेन तत्र कृतिसाध्यताज्ञानात् कृतिसाध्यत्वप्रकारिकेच्छोत्पत्तिः । यद्धर्मविशिष्टेष्टसाधनताज्ञानं तद्धर्मविशिष्टे यदुपायसाध्यताज्ञानं तदुपायसाध्यत्वप्रकारिकेच्छास्ति । न च सैव प्रवृत्तौ हेतुरस्त्विति वाच्यम् । विशेष्यतया प्रवृत्तौ विशेष्यतया इच्छात्वेनैव कारणत्वात्. न तु कृतिसाध्यत्वप्रकारिकेच्छात्वेन, गौरवात् । न च कृतिसाध्यत्वप्रकारकज्ञानस्य प्रवृत्तौ कारणत्वे गौरवमिति वाच्यम् । इष्टसाधनत्वेऽपि पाके कृतिसाध्यत्वसंशयान्निष्कम्पं प्रवृत्त्यनुदयात्तादृशप्रवृत्तौ कृतिसाध्यत्वप्रकारकनिर्णयस्य हेतुत्वावश्यकत्वेनेच्छाया एव लाघवेन प्रवृत्तौ हेतुत्वमित्याहुः । तन्न अल्पवित्तायाससाध्यकृतिसाध्यत्वसन्देहेऽपि प्रवृत्तेर्बहुवित्तव्ययायाससाध्ये तु कृतिसाध्यत्वसन्देहे बलवदनिष्टाननुबन्धित्वसंशयेन निश्चयाभावादेव प्रवृत्त्यनुत्पत्तेः । न चाल्पायाससाध्ये निष्कम्पप्रवृत्तौ कृतिसाध्यत्वनिश्चयो हेतुरिति वाच्यम् । निष्कम्पत्वानिरुक्तेरिति दिक् ।

परे तु कृतिसाध्यत्वनिर्णय एव चिकीर्षाहेतुः । स्वल्पव्ययायाससाध्यत्वसंशयात्प्रवृत्त्यभावस्त्विष्ट एवेति चिकीर्षैव प्रवृत्तिहेतुरित्याहुः ।

नन्वस्तु कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च चिकीर्षाद्वारा प्रवृत्तिहेतुः । बलवदनिष्टाननुबन्धित्वज्ञानं तु कथं प्रवर्तकम् ।

न्वयानुपपत्तिः । [1]सिद्धस्य वस्तुन इतिकर्त्तव्यतात्वाभावात्, क्रियाया एवेतिकर्त्तव्यतात्वात्, द्रव्यस्य केवलमङ्गत्वात्[2] ।

(१८) अत एवेतिकर्त्तव्यतात्वाभावात् द्रव्यस्य प्रकरणादग्रहणम् । यथाऽऽहुः

> नार्थान्तरक्रियायोगादृते वाक्योपकल्पितात् ।
> गुणद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रिया इति
>
> तन्त्रवार्तिक—पृष्ठ २९३ ।

तदेतदग्रे वक्ष्यामः ।

(१९) किं च सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं[3] नाधिकारवाक्यम्, 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यस्याधिकारवाक्यत्वात् । उत्पत्तिवाक्ये च नेतिकर्त्तव्यताकाङ्क्षा, इष्टविशेषाकाङ्क्षाकलुषितत्वेनेतिकर्तव्यताकाङ्क्षाया विस्पष्टमनुत्थानात्[4] ।

(२०) तत्सिद्धं सोमस्य[5] नेतिकर्त्तव्यतात्वेन भावनायामन्वयः । तस्माद्विशिष्टविधावन्वयानुपपत्त्याऽवश्यं मत्वर्थलक्षणा वाच्येति ।

———

१ 'इतिकर्तव्यता'शब्दस्य 'एवम्प्रकारेण कर्तव्यम्' इत्यर्थो लभ्यते । सिद्धञ्च वस्तु न कदाऽपि कर्तुं शक्यते । अत इतिकर्तव्यता न तस्य किन्त्वसिद्धस्यैव वस्तुनः ।

२ द्रव्यङ्करणं सत् कदाऽपि प्रधानन्नैव भवितुमर्हति ।

३ कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । कर्मजन्यफलस्वाम्यबोधकोविधिरधिकारविधिः ।

४ उत्पत्तिवाक्ये फलस्यानुक्तत्वात् तत्रैव च कर्तुराकाङ्क्षाया उत्कटतरत्वात् तस्मिन्ननुक्ते इतिकर्तव्यताकाङ्क्षा नोदेति ।

५ सोमसम्बन्धिकारकस्येत्यर्थः ।

(२१) "नन्वेवमपि सोमेन यजेतेत्यत्र न विशिष्टविधानम्, गौरवात्, मत्वर्थलक्षणापाताच्च। किं तु दध्ना जुहोतीतिवद्गुणमात्रविधानमस्तु विधिशक्तेर्गुणे उपसंक्रमात्[1]। यथाऽऽहुः

सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे।
विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादतेति

तन्त्रवार्तिक—पृष्ठ २६०।

(२२) "न च यागस्याप्राप्तत्वान्न तदुद्देशेन सोमविधानमिति वाच्यम्। 'ज्योतिष्टोमेन स्वर्गकामो यजेत'-इत्यनेन यागस्य प्राप्तत्वात्। न चास्याधिकारविधित्वेन नोत्पत्तिविधित्वमिति वाच्यम्। 'उद्भिदा यजेत पशुकाम' इतिवदेकस्यैवोभयविधित्वोपपत्तेः[2]।

(२३) "एवं च सोमेन यजेतेत्यत्र न मत्वर्थलक्षणा[3]। यदि ह्यत्र विशिष्टविधानं स्यात्तदाऽन्वयानुपपत्त्या मत्वर्थलक्षणा स्यात्। 'ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यत्र तु यागविधाने क्व चिन्न मत्वर्थलक्षणा। न तावदेतस्मिन्[4] वाक्ये, ज्योतिष्टोमेन यागेन स्वर्गं

---

१ 'धात्वर्थस्यान्यतः प्राप्तेर्गुणमात्रं विधीयते' इति न्यायात् ज्योतिष्टोमवाक्यगतयजतिपदानुवादेन सोममात्रगुणविधायकत्वे एव विधिशक्तेर्व्यापारादित्याशयः।

२ उद्भिन्नामकेन यागेन पशून् भावयेदिति वाक्यार्थबोधे एकस्यैव वाक्यस्योत्पत्तिविधित्वमधिकारविधित्वञ्च तद्वदत्राप्यास्तामिति भावः।

३ अन्वयानुपपत्तिरूपस्य लक्षणाबीजस्याभावात्॥

४ ज्योतिष्टोमेन स्वर्गकाम इत्यत्र वाक्ये।

भावयेदिति सामानाधिकरण्येनैव नामपदस्यान्वयात्। नापि सोमेन यजेतेत्यत्र, यागोद्देशेन सोमविधानात्। सोमेन यागं भावयेदिति[1]।

(२४) "'नन्वनुवादेऽप्यस्ति मत्वर्थलक्षणा। अत एवोक्तम्-

विधाने वाऽनुवादे वा यागः करणमिष्यते
तत्समीपे तृतीयान्तस्तद्वाचित्वं न मुञ्चतीति।

तन्त्रवार्तिक-पृष्ठ २८४-५।

"अतश्च विशिष्टविधाविव गुणविधावप्यस्त्येव मत्वर्थलक्षणेति चेत्'-

(२५) "नैवम्। गुणान्वयानुपपत्त्या हि मत्वर्थलक्षणाऽङ्गीक्रियते। यदा तु भावनायां धात्वर्थस्य करणत्वेनान्वयस्तदाऽन्वयानुपपत्त्या साऽङ्गीकर्त्तव्या। गुणविधौ च न धात्वर्थस्य करणत्वेनान्वयो मानाभावात्। न हि दध्ना जुहोतीत्यत्र होमस्य करणत्वं श्रूयते तद्वाचकतृतीयाद्यभावात्। 'कल्प्यते इति' चेन्न। गुणस्यतत्र विधित्सितत्वेन साध्याकाङ्क्षायां साध्यत्वकल्पनाया एवोचितत्वात्, दध्ना होमं भावयेदिति।

(२६) "न चायमस्ति नियमो भावनायां धात्वर्थस्य करणत्वेनैवान्वयो न प्रकारान्तरेणेति। षष्ठाद्य-

---

१ लक्ष्यमाणाऽपि साधानता न यागविशेषणतया लक्ष्यते गौरवात्, किन्तु विशेषणतया। ततश्च सोमेनापूर्वसाधनभावयेदिति विनैव मत्वर्थलक्षणया वाक्यार्थसम्भवः

पूर्वपक्षानुत्थानापत्तेः। षष्ठाद्ये हि यजेत स्वर्गकाम इत्यादौ प्रत्ययवाच्यायां वक्ष्यमाणार्थभावनायां समानपदश्रुत्या यागस्य भाव्यत्वमाशङ्क्याऽपुरुषार्थत्वेन परिहृतम्[1]। यदि च धात्वर्थस्य करणत्वेनैव भावनायामन्वयस्तदा भाव्यत्वशङ्कैव नोदेतीति व्यर्थं षष्ठाद्यमधिकरणमापद्येत। किं च वाजपेयाधिकरणे[2] (१।४।६) तन्त्रसम्बन्ध आशङ्क्य परिहृतः। धात्वर्थस्य करणत्वेनैवान्वये [3]तन्त्रसम्बन्धशङ्कैव न स्यात्। तन्त्रसम्बन्धशङ्कापरिहारौ च व्याख्यातौ।

(२७) "किं च धात्वर्थस्य न करणत्वेनैवान्वयः। गुणकामाधिकरणे (२।२।१०) आश्रयत्वेन धात्वर्थान्वयस्योक्तत्वात्। तथा हि दध्नेन्द्रियकामस्य जुहुयादित्यत्र न तावद्धोमो विधीयते, तस्य वचनान्तरेण विहितत्वात्। नापि होमस्य फलसम्बन्धः, [4]गुणपदानर्थक्यापत्तेः। नापि गुणसम्बन्धं विधत्ते, फलपदानर्थक्यापातात्[5]। नाप्युभयसम्बन्धं विधत्ते, प्राप्ते कर्मण्यनेकविधाने वाक्यभेदापत्तेः। यथाऽऽहुः।

---

१ स्वर्गस्यैवात्र पुरुषार्थता न यागस्य। अतो न यागस्यार्थीभावनायां साध्यत्वेनान्वयः।

२ 'वाजपेयेन यजेत स्वाराज्यकाम'इत्यत्र, 'वाजञ्च तत् पेयम्' इति व्युत्पत्त्या वाजपेयस्य करणत्वम्, उत तस्य यागनामत्वेन साध्यत्वमिति शङ्कितम्। धातोः करणत्वान्वयनियमे तु शङ्काया उत्थानमेव न सम्भवतीति भावः॥

३ सकृदप्युच्चरितः शब्द उभयार्थबोधको भवतीत्येवंरूपः।

४ यदि होमस्यैव केवलस्येन्द्रियलाभरूपेण फलेन सम्बन्धस्तर्हि दध्नेति द्रव्यरूपगुणविधायकशब्दस्यानर्थक्यमेव॥

५ दधिहोमयोः सम्बन्धमात्रस्य विधेयत्वे फलोक्तेरानर्थक्यम्।

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नत इति ।
(तं । वा । ४०६

(२८) "अत्र च कर्मपदवत् गुणेत्युपलक्षणम् । एकोद्देशेनानेकविधाने वाक्यभेदात् । अत एव ग्रहैकत्वाधिकरणे (३।१।७) ग्रहं सम्मार्ष्टीत्यत्र ग्रहोद्देशेन एकत्वसंमार्गविधौ वाक्यभेदाद् ग्रहैकत्वमविवक्षितमित्युक्तम् । रैवत्यधिकरणे (२।२।११) च एतस्यैव रैवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेत्यत्र वारवन्तीयस्य रैवतीसम्बन्धे अग्निष्टोमसम्बन्धे फलसम्बन्धे च विधीयमाने वाक्यभेदाद्भावनोपसर्जनं भावनान्तरं विधीयते इत्युक्तम् ।

(२९) "तस्मात्प्राप्ते होमे नोभयविधानं संभवति । नापि होमान्तरं[1] विधीयते गौरवात्, प्रकृतहानाप्रकृतकल्पनाप्रसङ्गात्, मत्वर्थलक्षणाप्रसङ्गाच्च । नापि दध्येव केवलं करणत्वेन विधीयते इति युक्तम् केवलस्य व्यापारानाविष्टस्य करणत्वानुपपत्तेः, कर्तृव्यापारव्याप्यत्वनियमात्करणत्वस्य ।

(३०) "किं तर्हि विधीयते इति चेत् दध्नेति तृतीयेोपात्तं दधिकरणत्वं फलभावनायां करणत्वेन विधीयते । प्रत्ययार्थत्वेन दध्नोऽपि तस्य प्राधान्यात् । एवं च दधिकरणत्वेनेन्द्रियं भावयेदिति वाक्यार्थः ।

१ होमान्तरे विधीयमाने तस्याप्राप्तत्वात्, 'प्राप्तेकर्मणी'त्यादिकारिकोक्तबाधानवतार. ।

(३१) "करणत्वं च किंप्रतियोगिकमित्यपेक्षायां सन्निधिप्राप्तो होम आश्रयत्वेन संबध्यते। ततश्च सिद्धो धात्वर्थस्याश्रयत्वेनान्वयः।

(३२) "प्रकृतमनुसरामः। तत्सिद्धं धात्वर्थस्य नकरणत्वेनैवान्वय इति, किं तर्हि[1] क्व चित्करणत्वेन क्व चित्साध्यत्वेन क्व चिदाश्रयत्वेनेति। गुणविधौ च साध्यत्वेनैवान्वयः सम्भवतीति न मत्वर्थलक्षणायाः प्रयोजनम्।

(३३) "किं च गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थाङ्गत्वे किं मानमिति वक्तव्यम्। न तावच्छ्रुतिः, मत्वर्थलक्षणायां तृतीयाश्रुतिर्मत्वर्थस्यैवाङ्गत्वे मानं स्यात् न गुणस्याङ्गत्वे। समभिव्याहारात्मकं वाक्यमिति चेत्तत्किं स्वतन्त्रमेव मानमुत लिङ्गश्रुती कल्पयित्वा। नाद्यः, बलाबलाधिकरणविरोधात् (३।३।७)। [2]तत्र हि वाक्यं लिङ्गश्रुती कल्पयित्वाऽङ्गत्वे मानमित्युक्तम्। द्वितीये प्रत्यक्षां श्रुतिमुत्सृज्य श्रुत्यन्तरकल्पने तस्या एव वा आवृत्तिकल्पने व्यर्थः प्रयासः समाश्रितः स्यात्। विशिष्टविधौ चागत्या तदाश्रयणम्।

(३४) "किं च भवतु श्रुत्यन्तरकल्पनम्। तथाऽपि तत्सहकृतः प्रत्यक्ष एव विधिर्धात्वर्थाङ्गत्वेन गुणं

---

१ 'सोमेन यजेत' इत्यत्र करणत्वेन, दध्ना जुहोतीत्यादौ साध्यत्वेन, दध्नेन्द्रियकामस्य जुहुयादित्यादावाश्रयत्वेन धात्वर्थस्यान्वय इति।

२ प्रकृते सोमेन यजेत्यत्र गुणस्य सोमस्य धात्वर्थाङ्गीकारे प्रमाणतया यदि समभिव्याहारात्मकं वाक्यमेवोपन्यस्येत, तदा साक्षाच्छ्रुतिर्विरुध्येत॥

विधत्ते, उत कल्पितं विध्यन्तरम् । कल्पितमिति चेन्न, श्रुतविधेर्व्यर्थतापत्तेः । न हि तेन[1] तदा गुणो विधीयते, कल्पितविध्यन्तराङ्गीकारात् । नापि धात्वर्थः । तस्य वचनान्तरेण विहितत्वात् । अथ श्रूयमाण एव विधिः कल्पितश्रुतिसहकृतो धात्वर्थाङ्गत्वेन गुणं विधत्ते इति चेत् । तर्हि तत्र कथं धात्वर्थस्यान्वयः । करणत्वेनेति चेन्न, अन्वयानुपपत्तेः । न हि सम्भवति दध्ना होमेनेति चान्वयः । "साध्यत्वेनैवान्वयः—दध्ना होमं भावयेदिति" चेत्—न । तथा सत्यनुवादेऽपि धात्वर्थः करणत्वेनैवान्वेतीत्येतदुपेक्षितं स्यात् । विवक्षितवाक्यार्थश्च विनैव मत्वर्थलक्षणयाऽङ्गीकृतः स्यात् । तस्मान्न गुणविधौ मत्वर्थलक्षणा ।

(३५) "यत्तु विधाने वाऽनुवादे वेति वार्त्तिकम् तत्प्रतीतिमवलम्ब्य, न वस्तुगतिम् । तथा हि यावद्धि अग्निहोत्रं जुहुयादिति वाक्यं नालोच्यते, केवलं दध्ना जुहोतीति वाक्यमालोच्यते, तदा षष्ठाद्यन्यायेन (६।१।१) होमस्याभाव्यतां जानतां प्रतिपदाधिकरणभावार्थाधिकरणवासनावासितान्तःकरणानां भवत्येतादृशी मतिः, यद्दधिमता होमेनेष्टं भावयेदिति । प्रतिपदाधिकरणे (२।१।१ वर्ण १) हि सोमेन यजेतेत्यादिषु किं गुणधात्वर्थयोः फलभाव-

१ श्रुतविधिना ।

नाकरणत्वेनान्वयः उत एकस्यैवेति संदिह्य प्रधान-सम्बन्धलाभाद् विनिगमनाविरहाच्च सर्वेषां फलभावनाकरणत्वेनान्वयमाशङ्क्य लाघवादेकस्यैव फलभावनाकरणत्वमित्युक्तम्। भावनाकरणत्वं हि भावनाभाव्यनिर्वर्त्तकतया, भाव्यं च स्वर्गादि नादृष्टमन्तरेणेति अनेकेषां करणत्वेऽनेकादृष्टकल्पनाप्रसङ्गात्। तस्मादेकस्यैव करणत्वम्।

(३६) "यदाऽप्येकस्य तदाऽपि किं द्रव्यगुणयोः फलभावनाकरणत्वम्, उत धात्वर्थस्येति भावार्थाधिकरणे (२।१।१. वर्ण.२) संदिह्य द्रव्यगुणयोरेव भावनाकरणत्वम्, [1]भूतं भव्यायोपदिश्यते इति न्यायादित्याशङ्क्य धात्वर्थस्यैव भावनाकरणत्वम्, [2]पदश्रुतेर्बलीयस्त्वादित्युक्तम्।

(३७) "अतश्च सिद्धमेतद्वाक्यान्तरानालोचनदशायां गुणविधावपि धात्वर्थस्य करणत्वाशङ्कायां गुणपदे मत्वर्थलक्षणेति। यदा त्वग्निहोत्रं जुहोतीति होमविधायकं वाक्यान्तरमालोच्यते तदा होमस्य वाक्यान्तरेणैव विहितत्वात्तदुद्देशेन गुणमात्रं विधीयते इत्यालोचनान्न मत्वर्थलक्षणेति। अत एवोक्तं पार्थसारथिमिश्रैराघाराग्निहोत्राधिकरणे (२।२।४) फलतो गुणविधिरयं न प्रतीतित इति।

---

१ 'भूतम्' परिनिष्पन्नं वस्तु द्रव्यादिकम्, 'भव्यम्' परिनिष्पादनीयम् क्रियादिरूपम्।

२ धात्वर्थफलयोरेकपदोपात्तत्वेन समानाभिधानश्रुतेः, अन्तरङ्गत्वादिति भावः।

(३८) "यद्वा एतद्वार्त्तिकमधिकारविध्यभिप्रायम्। उद्भिदा यजेतेत्यादीनामधिकारात्[1]। तत्र हि यागो विधीयताम्, उत्पत्तिवाक्यसिद्धो वाऽनूद्यताम्, उभयथाऽपि धात्वर्थस्य करणत्वेनान्वयात् तृतीयान्तस्य तद्वाचित्वम्। अन्यथाऽन्वयानुपपत्तेरिति। तस्माद् गुणविधौ विनाऽपि लक्षणया अन्वयोपपत्तेर्न मत्वर्थलक्षणेति।

(३९) "अतश्च सोमेन यजेतेत्यत्र न विशिष्टविधानम्, किं तु गुणमात्रविधानम्, यागस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येतस्मिन्वाक्ये विधीयते इत्येव युक्तम्। अन्यथा मत्वर्थलक्षणापत्तेरिति"।

---

(४०) अत्रोच्यते। यद्यपि यागोद्देशेन सोमविधौ न मत्वर्थलक्षणा, तथाऽपि यागस्याप्राप्तत्वात्सोमेन यजेतेत्यत्र न यागोद्देशेन सोमविधानं सम्भवति। न च 'ज्योतिष्टोमेनेत्यादिना प्राप्तत्वात्तदुद्देशेन गुणमात्रं विधीयते" इति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः। [2]कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। तेन च विहितस्य कर्मणः फलविशेषसम्बन्धमात्रमधिकारविधिना क्रियते। फलविशेषसम्बन्धबोधकस्याधिकारविधित्वात्। यथा आग्नेयोऽष्टाकपालो भवतीत्येतद्विहितस्य कर्मणः

१ उद्भिदादिप्रकरण एवोक्तकारिकाया उपन्यस्तत्वात्।
२ द्रव्यदेवतात्मकञ्च कर्मस्वरूपम्।

फलविशेषसम्बन्धमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्ते इति तस्याधिकारविधित्वं, नोत्पत्तिविधित्वम् ।

(४१) स्यादेतत् । "दर्शपूर्णमासाभ्यामित्येतस्य नोत्पत्तिविधित्वं सम्भवति, आग्नेयोऽष्टाकपाल इत्यादिवाक्यानर्थक्यापत्तेः । न हि तेन तदा कर्म विधीयते, तस्य तदा दर्शपूर्णमासाभ्यामित्यनेन विहितत्वात् । नापि गुणविधानं सम्भवति, प्राप्ते कर्मणि अनेकगुणविधाने वाक्यभेदापत्तेः । अतः आग्नेयोऽष्टाकपाल इत्यस्योत्पत्तिविधित्वं युक्तम् । ज्योतिष्टोमेनेत्यस्य तु अधिकारविधेरुद्भिदा यजेत पशुकाम इत्यादिवदुत्पत्तिविधित्वेऽपि स्वीक्रियमाणे न कस्यचिदानर्थक्यम्, सोमेन यजेतेत्यस्य गुणविधित्वात् । यागोद्देशेन सोममात्रविधानाच्च न वाक्यभेद" इति चेत्–

(४२)मैवम् । यद्यपि सोमेन यजेतेत्यत्र न वाक्यभेदः तथाऽपि ज्योतिष्टोमेनेत्यस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबन्धे विधीयमाने गौरवलक्षणो वाक्यभेदोऽस्त्येव । सोमेन यजेतेत्येतद्वाक्यविहितकर्मणः फलसंबन्धमात्रविधाने तदभावात् । उद्भिदा यजेतेत्यत्र तु वचनान्तराभावेनागत्या तदाश्रयणम् । न च "सोमेन यजेतेत्यत्रापि कर्मस्वरूपे गुणे च

१ अत्रोत्पत्तिविधिरूपवाक्यान्तरस्याऽसत्त्वादयमेवोत्पत्तिविधित्वेन स्वीक्रियते

विधीयमाने वाक्यभेदः स्यादिति" वाच्यम्। [1]'श्रूयमाणेन विधिना गुणस्याविधेयत्वात्। विशेषणविधेरार्थिकत्वात्। सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थिकः। ज्योतिष्टोमेनेत्यस्य तूत्पत्तिविधित्वे कर्मस्वरूपं जलसंबन्धश्चेति उभयं श्रूयमाणेनैव विधिना विधातव्यमिति द्रुढो गौरवलक्षणो वाक्यभेदः। यथाऽऽहुः'

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
[2]एकोत्त्यवसितानां तु नार्थाक्षेपोविरुध्यते इति।

(तं। वा। ४६६)

(४३) न च "सोमेन यजेतेत्यस्योत्पत्तिविधित्वे यद्यपि न वाक्यभेदः तथाऽपि मत्वर्थलक्षणा स्यादेवेति" वाच्यम्। तस्याः स्वीक्रियमाणत्वात्। लक्षणातो वाक्यभेदस्य [3]जघन्यत्वात्। लक्षणा हि पददोषो वाक्यभेदस्तु वाक्यदोषः। पदवाक्यदोषयोर्मध्ये पदे एव दोषकल्पनाया उचितत्वात्। 'गुणे त्वन्याय्यकल्पनेति' न्यायात्। अत एव 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत'इत्यत्राधानानुवादेन जातपुत्रत्वकृष्णकेशत्वविधाने वाक्यभेदात्पदद्वयाभ्यामवस्थाविशेषो लक्ष्यते इत्युक्तम्। तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्य्या। तस्मात्सोमेन यजेतेत्ययमेवोत्पत्तिविधिर्न ज्योतिष्टोमेनेत्ययम्। गौरवलक्षणवाक्यभेदापत्तेः।

---

१ सोमवता यागेनेत्येवंरूपेऽर्थे स्वीकृते विशिष्टविधौ सोमस्य यागविशेषणविधित्वादार्थिकत्वमतो न गुणविधित्वम् ॥ २ विशिष्टविधीनाम् ॥ ३ दुष्टतरत्वात् ॥

(४४)किं च सोमेन यजेतेत्यत्र यागविधाने [1]श्रुत्यर्थविधानं स्यात्, गुणविधाने तु वाक्यार्थविधानम्, तच्च श्रुत्यर्थविधानसंभवे ऽयुक्तम्। यथाऽऽहुः। 'वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसंभवे' इति। 'वाक्यार्थः' पदान्तरार्थः इत्यर्थः।

(४५)ज्योतिष्टोमेपेत्यत्रापि फलोद्देशेन यागस्यैव विधानान्न वाक्यार्थविधानम्, तदुत्पत्तिविधित्ववादिना[2]ऽपि तदङ्गीकाराच्च। तस्मात् ज्योतिष्टोमेनेत्ययमधिकारविधिरेव।

(४६) अपि च कर्मस्वरूपविधिस्तत्र स्वीकार्य्यो यत्र कर्मणो रूपमुपलभ्यते। यागस्य च द्वे रूपे, द्रव्यं देवता चेति। सोमेन यजेतेत्यत्र यद्यपि देवता नोपलभ्यते सोमयागस्याव्यक्तत्वात्, अव्यक्तत्वं च स्वार्थचोदितदेवताराहित्यम्, न तु देवताराहित्यमात्रम्, एन्द्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहदेवतानांसत्त्वात्, ग्रहणार्थाभिरपि देवताभिः प्रसङ्गतो यागोपकारस्य क्रियमाणत्वात्,—तथाऽपि द्रव्यमुपलभ्यत एव। तेनापि यागस्वरूपं ज्ञातुं शक्यमेव।

(४७)ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र च न द्रव्यं देवता वा श्रूयते। अतस्तस्योत्पत्तिविधित्वे यागविशेषज्ञानं यागसामान्यस्याविधेयत्वात् विशेष-

---

१ लिङ्वत्पदोपात्तशब्दार्थः श्रुत्यर्थः।

२ तेऽपि फलस्यांशे तत्र वाक्यार्थविधानं स्वीकुर्वन्ति।

स्यैव विधेयत्वादित्यादिक्लेशेन स्यादतो नायं कर्मोत्पत्तिविधिः ।

(४८) "नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमपि होमोत्पत्तिविधिर्न स्यात् रूपाश्रवणात् । तच्छ्रवणाच्च दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् । तथा चाघाराग्निहोत्राधिकरण–(२।२।४)–विरोधः । तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना च जुहोतीत्यादीनां गुणविधित्वमुक्तमिति" चेत्–

(४९) सत्यम् । अग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं नोपलभ्यते, अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वात्, तदेतदग्रे वक्ष्यामः, तथाऽपि तस्योत्पत्तिविधित्वं स्वीक्रियते, अन्यथाऽऽनर्थक्यापत्तेः[1] । दध्ना जुहोतीत्यस्य च नानर्थक्यं गुणविधित्वात् । अतः अग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति युक्तम् ।

(५०) ज्योतिष्टोमेनेत्यस्य च नानर्थक्यमधिकारविधित्वोपपत्तेः । अतः किमर्थं संभवति रूपवति वाक्ये कर्मविधाने तद्रहिते तत्स्वीकार्यम् ।

(५१) किं च दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे पयसा जुहोत्यनेनैतत्कर्मानुवादेन न पयो विधातुं शक्यते, उत्पत्तिशिष्टदध्यवरोधात् । उत्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते, आकाङ्क्षाया उत्पत्तिशिष्टेनैव निवृत्तत्वात् (२।२।८) । अतस्तेनापि

१ 'अग्निहोत्रं जुहुयात्' इति यद्युत्पत्तिविधिर्न स्यात्तर्हि किं स्यात् । न तस्य गुणविधित्वम्, गुणस्यानुक्तत्वात् । न चाधिकारविधित्वम्, फलाश्रवणात् ॥

विशिष्टं कर्मान्तरं विधेयम्। तथाचानेका दृष्ट कल्पनागौरवम्। अग्निहोत्रं जुहोतीत्यस्य तु उत्पत्तिविधित्वे एतद्वाक्यविहितस्य कर्मणो द्रव्याकाङ्क्षय युगपदेव खले कपोतन्यायेन दध्ना जुहोति पयसा जुहोतीत्यादिवाक्यैर्गुणा विधीयन्ते इति नानेकादृष्टकल्पनागौरवम्। अतोऽग्निहोत्रं जुहोतीत्ययमुत्पत्तिविधिः, पयसा जुहोतीत्यादयस्तु गुणविधय इति युक्तम्। सोमेन यजेतेत्यत्र तु रूपवति वाक्ये कर्मोत्पत्तिविधाने स्वीक्रियमाणे न किं चिद्दूषणं, पक्षद्वयेऽप्येकस्यादृष्टस्य तुल्यत्वात्। तस्माद्युक्तं सोमेन यजेतेत्ययमेवोत्पत्तिविधिरित्यलमनया अप्रसक्तविधिनिरूपणानुगतप्रपञ्चनिरूपणचिन्तया।

---

(५२) प्रकृतमनुसरामः। तत्सिद्धं विधिः प्रयोजनवन्तमप्राप्तार्थं विधत्ते इति।

(५३) स च विधिश्चतुर्विधः। उत्पत्तिविधिर्विनियोगविधिः प्रयोगविधरधिकारविधिश्चेति।

(५४) तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः। यथाऽग्निहोत्रं जुहोतीति। उत्पत्तिविधौ च कर्मणः करणत्वेनैवान्वयः, होमेनेष्टम्भावयेदिति। न तु होमं कुर्य्यादिति साध्यत्वेन। तथा सति साध्यस्य साध्यान्तरान्वयायोगे नाधिकारवाक्यावगतफलसंबन्धो न स्यात्। करणत्वेन त्वन्वये होमेनेष्टं भावयेत् किं तदिष्टमित्याकाङ्क्षायां फलविशेषसंबन्धो घटते। न च "उत्पत्तिविधाविष्टवाचकपदाभावेन कर्मणा

इष्टं भावयेदिति कथं वाक्यार्थ" इति वाच्यम्। विधि-[1]श्रुतेरेवेष्टबोधकत्वात्। सा हि पुरुषार्थे पुरुषं प्रवर्त्तयन्ती कर्मणः फलसंबन्धमात्रं बोधयति। तस्मादुक्तमुत्पत्तिविधौ कर्म करणत्वेनान्वेतीति। अत एवोद्भिदा यजेतेत्यादौ तृतीयान्तः उद्भिच्छब्द उपपद्यते, उद्भिदा यागेन इष्टं भावयेदित्यन्वयोपपत्तेः।

(५५)येषामपीष्टसाधनत्वं लिङर्थस्तेषामपि तृतीयान्तानां कर्मनामधेयानामन्वयोऽनुपपन्न एव। न हि संभवति याग इष्टसाधनमुद्भिदेति। तृतीयोपात्तस्य कारकस्य लिङ्गसंख्यान्वयायोग्यस्य क्रिययैवान्वयात्।

(५६)"नतु तवाप्यग्निहोत्रं जुहोतीत्यादिषु कर्मोत्तिविधिषु द्वितीयान्तानां कर्मनामधेयानामन्वयोऽनुपपन्नः। न हि संभवति होमेन भावयेदग्निहोत्रमिति"।

(५७)सत्यम्। श्रूयमाणा तावद्द्वितीया[2]ऽर्थाद्धिप्रसाध्यत्वानुवादः, होमस्य हि करणत्वेनान्वयात्। असाधितस्य च करणत्वानुपपत्तेः तस्याश्चानन्वयोपस्थितौ सा[3] सक्तून् जुहोतीतिवत् तृतीयार्थं लक्षयति।

---

१ त्रिधिकर्मफलपुरुषाणां बोधो लिङा भवतीति लिङ्श्रुतिर्विधिश्रुतिरित्युच्यते।

२ 'अग्निहोत्रं जुहुयात्' इत्यत्र द्वितीयायां साक्षादन्वयो न सम्भवति। किन्त्वग्निहोत्रस्य करणत्वेनान्वयस्यावश्यकत्वे न तावदग्निहोत्रन्दध्यादिवत् स्वयं सिद्धं येन तस्य साक्षात्करणत्वेनान्वयः स्यात्। अतो द्वितीयया तस्य साधितत्वमाक्षिप्य करणत्वेनान्वय इति प्रथमसमाधानम्। समीचीनं समाधानन्तु पार्थसारथिमिश्रोक्तमेवक्ष्यते॥

३ द्वितीयाश्रुतिरित्यर्थः।

अग्निहोत्रेण होमेनेष्टं भावयेदित्युक्तं पार्थसारथिमिश्रैः। अतश्च द्वितीयान्तानां कर्मनामधेयानामन्वयो नानुपपन्नः। तत्सिद्धिमुत्पत्तिविधौ कर्मकरणत्वेनान्वेतीति।

(५८) अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति। स हि तृतीयाप्रतिपन्नाङ्गभावस्य दध्नो होमसंबन्धं विधत्ते दध्ना होमं भावयेदिति।

(५९) एतस्य च विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि। एतत्सहकृतेन विधिनाऽङ्गत्वं परोद्देशप्रवृत्तिकृतिव्याप्यत्वरूपं[1] पारार्थ्यापरपर्यायं ज्ञाप्यते।

(६०)तत्र निरपेक्षो रवः[2] श्रुतिः। सा च त्रिविधा। विधात्री[3] अभिधात्री[4] विनियोक्त्री चेति। तत्र विधात्री लिङाद्यात्मिका। अभिधात्री व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा वनियोक्त्री[5]।

सा च त्रिधा। विभक्तिरूपा समानाभिधानरूपा एकपदरूपा चेति।

---

१ परस्य यागादेर्योऽर्थः स्वर्गादिः स एवार्थोऽय स्येत्यर्थः। स्वतन्त्रफलशून्यत्वमिति भावः। विध्यन्वयिन्यां कृतौ यद्विषयकत्वानुपपत्तिर्यद्विषयकत्वेन परिच्छिद्यते तत्तस्याङ्गं तदर्थं चेति भाट्टालङ्कारः।

२ अन्यव्यवधानमनपेक्ष्यैव यः शब्दो यदर्थज्ञानं जनयति स तत्र श्रुतिरित्यर्थः।

३ कर्मफलपुरुषाणां गुणप्रधानभावविधायिका श्रुतिरित्यर्थः।

४ प्रकृत्यर्थगतलिङ्गसंख्यादीन् याऽभिदधाति श्रुतिः साऽभिधात्री श्रुतिरिति।

५ अङ्गाङ्गिरूपेणोपस्थितयोरन्यव्यवधानं विनैव याऽन्वयं बोधयति सेति यावत्।

# अथ मीमांसापरिभाषा ॥

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहम्भजे ॥ १ ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धीमता ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥ २ ॥

धर्मलक्षणम्

इह खलु महर्षिणा जैमिनिना (अ)द्वादशलक्षण्यां पूर्वमीमांसायां धर्माधर्मावेवानुष्ठानोपयोगितया विचारितौ ॥ तत्र वेदबोधितेष्टसाधनताको धर्मः—यथा यागादिः । वेदबोधितानिष्टसाधनताकोऽधर्मः—यथा कलञ्जभक्षणादिः । तयोश्च(क)वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम्, इतरौ तु वेदमूलकतया प्रमाणम् ॥

(२) मंत्रब्राह्मणरूपेण वेदस्य द्वैविध्यम्

तत्र वेदो द्विविधः—मन्त्ररूपो ब्राह्मणरूपश्च । तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते । प्रयोगोऽनु-

(अ) द्वादशाध्यायविशिष्टे शास्त्रे । तेषु अध्यायेषु द्वादशार्थाः प्रतिपादिताः । तद्यथा "प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः । अधिकारोऽतिदेशश्च सामान्येन विशेषतः । ऊहो बाधश्च तन्त्रश्च प्रसङ्गश्चोदितः क्रमात्" इति ।

(क) तथा चोक्तम् तन्त्रवार्तिके—"आचारात्तु स्मृतिं ज्ञात्वा श्रुतिर्विज्ञायते ततः । तेन ह्यन्तरितं तस्य प्रामाण्यं विप्रकृष्यते" इति । अन्यच्च "शिष्टाचारात् स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् । तयोर्ह्यन्तरितन्तस्य प्रामाण्यम् विप्रकृष्यते ॥" इति ।

ष्ठानम्[ग] तत्कालीनेत्यर्थः। विधायकं वाक्यं ब्राह्मणम्। ब्राह्मणशेषश्चार्थवादः—तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते॥

(३) ब्राह्मणस्य कर्मोत्पत्त्यादयः पञ्चविधाः

तच्च (ब्राह्मणम्) अनेकविधम्—कर्मोत्पत्तिवाक्यम् गुणवाक्यम्, फलवाक्यम्, फलायगुणवाक्यम्, सगुणकर्मोत्पत्तिवाक्यम्—इत्यादिभेदात्॥

(४) कर्मोत्पत्तिवाक्यलक्षणम्

तत्र येन वाक्येन—'इदं कर्म कर्तव्यम्'-इति-बोध्यते तत् कर्मोत्पत्तिवाक्यम्। यथा-"अग्निहोत्रं यजुहोति"इति। अत्राग्निहोत्रहोमः कर्तव्यतया विधीते—इति कर्मोत्पत्तिवाक्यम्॥

(५) गुणवाक्यलक्षणम्

विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यङ्गुणवाक्यम्। यथा—"दध्ना जुहुयात्" इति गुणवाक्यमिदम्। कर्माङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम्। अत्र होमस्य 'उद्देश्यत्वम्'—नाम मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम्। तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वम् 'अनुवाद्यत्वम्', दध्यादिगुणान्वयितया 'प्राधान्यञ्च'। दध्यादेर्मानान्तराप्राप्तत्वादत्रैव 'विधेयत्वम्,' होमसाधनत्वाच्च होमापेक्षया

(ग) अनुष्ठानकालीनेत्यर्थः।

'गुणत्वम्,' पुरुषेणानुष्ठीयमानत्वात् 'उपादेयत्वञ्च' इति । अत्र 'मानान्तरप्राप्तत्वम्' मानान्तरज्ञातत्वम्—इति बोध्यम् ॥

(६) फलवाक्यलक्षणम्

उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसम्बन्धबोधको विधिः 'फलविधिः' । यथा—"अग्निहोत्रं जुहुयात् स्वर्गकामः" इति । अत्र-'यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमम्भावयेत् (कुर्यात्)' इति—अग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसम्बन्धो बोध्यते, इति फलवाक्यमिदम् ॥

(७) फलायगुणवाक्यलक्षणम्

प्राप्तं कर्माश्रित्य फलाय गुणविधौ (सति) 'फलाय गुणवाक्यम्' । यथा—"दध्ना इन्द्रियकामस्य जुहुयात्" इति । अत्र अग्निहोत्रवाक्योत्पन्नं होममाश्रित्य इन्द्रियफलाय दधिरूपो गुणो विधीयते—'होमाश्रितेन दध्ना इन्द्रियरूपफलम्भावयेत्' इति । 'होमाश्रितेन' होमकारकीभूतेनेत्यर्थः । अयमेव गुणफलविधिः 'गुणकामविधिः' अपि चोच्यते ॥

(८) सगुणकर्मोत्पत्तिवाक्यलक्षणम्

द्रव्यदेवतादिगुणविशिष्टकर्मविधायकं वाक्यम् 'सगुणकर्मोत्पत्तिवाक्यम्' । यथा—(अ)"सोमेन यजेत" इति । अत्र सोमलताविशिष्टो यागो विधीयते । विशिष्टविधावपि विशेषणस्य अर्थाद्विधिः ॥

---

(अ) "श्यामला ऽम्ला च निष्पत्रा क्षीरिणी त्वचि मांसला ।
श्लेष्मला वमनी वल्ली सोमाख्या छागभोजनम् ॥"

(९) क्वचित् कर्मोत्पत्तिवाक्यस्यैव फलबोधकत्वञ्च

क्वचित् कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति । यथा—"उद्भिदा यजेत पशुकामः" इति । अत्र उद्भिन्नामको यागो वाक्यान्तराविहित एव पशुकामस्य पशुफलाय विधीयते, इत्येकमेवेदं वाक्यम् फलसाधनयागकर्मविधायकम् ॥

(१०) प्रयोगविधिलक्षणम्

प्रधानविधिरेव अङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् 'प्रयोगविधिः' इत्युच्यते । यथा—"अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यत्र 'अग्निहोत्रहोमेन स्वर्गं भावयेत्' इत्यर्थः प्रतीयते । 'भावयेत्' उत्पादयेदित्यर्थः, कुर्यादिति यावत् । अत्र—'कथमनेन होमेन स्वर्गं कुर्यात्?' इति—कथम्भावाकाङ्क्षा जायते,—यथा 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्तेः भवत्याकाङ्क्षा—'कथमनेन द्वैधीभावं कुर्यात्?' इति । तत्र उद्यमननिपतनादिसहायेन' इति गम्यते; तद्वदत्रापि—"अग्निम्प्रणयति," "अग्निषु समिध आदधाति" इत्याद्यङ्गविधिविहितप्रणयनसमिदाधानायतनशोधनादिकाङ्गकलापजनितोपकारसहितेन अग्निहोत्रहोमेन स्वर्गं कुर्यात्' इति प्रकरणकल्पितेन महावाक्येन—स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयते इत्येतादृशः प्रयोग-

विधिः ॥ अङ्गजातमेव 'कथम्भावः' इति 'इतिकर्तव्यता' इति चोच्यते । अत्र अग्निहोत्रहोमः प्रधानम्, प्रणयनादिकं सर्वमङ्गम् ॥

(११) अपूर्वकल्पनाया आवश्यकत्वम्

ननु—"इदमनुपपन्नम्, आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेः" इति चेत् मैवम्, विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते, आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्त्यर्थम्, अन्तरापुण्यपापरूपमपूर्वं कल्प्यते। ततश्च यागादेरपूर्वद्वारा स्वर्गसाधनत्वम्, न साक्षात् । तदेव फलापूर्वम् । तत्करत्वञ्च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य, प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेः अङ्गानामानर्थक्यापत्तेः ॥

(१२) प्रधानकर्मणः उत्पत्त्यपूर्वद्वारा अङ्गसाहित्यम्

ननु—"सर्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमयुक्तम्, आशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावात्"—इति चेत्,—न, प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसम्भवात् । प्रधानस्य सर्वाङ्गसाहित्यसिद्ध्यर्थम् प्रधानकर्मपरमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किञ्चिदपूर्वमस्तीत्यङ्गीकारात् । एवमङ्गानामपि परस्परसहितानामेव प्रधानोप-

कारकत्वात् तेषां स्वरूपेण साहित्याभावात्, तत्तदुत्पत्त्यपूर्वद्वारा साहित्यम् बोध्यम् ॥

(१३) अङ्गानामप्रधानोपकारकत्वम् किम् ?

अङ्गानाम् प्रधानोपकारकत्वन्नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव । दर्शपौर्णमासयोस्तु विशेषः । "यदाग्नेयोऽष्टाकपालो ऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति"—इत्याग्नेययागो विहितः । "ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्"—इत्यग्नीषोमीययागो विहितः । "उपांशुयाजमन्तरा यजति"—इत्युपांशुयागः,—"तावब्रूतामग्नीषोमावाज्यस्यैव(क) नावुपांशुपौर्णमास्यां यजन्"—इति वाक्यात्, पौर्णमास्यांविहितः ॥ एतानि पौर्णमास्याम्प्रधानानि ॥ एषाम्, आग्नेयाग्नीषोमीयोपांशुयाजानां तत्तद्वाक्यावगतपौर्णमासीकालसम्बन्धं निमित्तीकृत्य,—"य एवं विद्वान् पौर्णमासीम् यजते"इति विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र 'पौर्णमासी'—शब्दः, तत्र तत्राग्नेयादिसमुदायस्योपस्थितिः ॥

(१४) विधिवाक्येषु यागवाचकपदाभावेऽपि यागबोधकत्वम्

ननु—"यदाग्नेय"इति वाक्येयागवाचकपदस्याश्रवणात् कथं यागविधायकत्वम्"

(अ) अग्नीषोमाभ्याम् ॥

(क) तौ अग्नीषोमौ अब्रूताम् नौ आवाम् आज्यस्यैव उपांशु पौर्णमास्यांयजन् इति वाक्यात् ॥

इति चेत्—नैवम्। 'अग्निर्देवता ऽस्य पुरोडाशस्य' इति अर्थे विहितदेवतातद्धितान्त 'आग्नेय'—शब्दः। तस्य पुरोडाशपदसामानाधिकरण्याद् द्रव्यदेवतासम्बन्धो ऽवगतः। स यागमन्तरा न सम्भवति, द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवाद् यागक्रियायामेव सम्भवो वाच्यः, देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात्। अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो 'यजेत'इति कल्पितपदेन विधीयते—अग्निदेवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेन इष्टम्भावयेत्'इत्येवं यत्र यत्र द्रव्यदेवतासम्बन्धमात्रं श्रूयते—"सौर्यञ्चरुं निर्वपेत्"इत्यादौ—तत्र सूर्यदेवतासम्बन्धानुमितो यागो विधीयते, इति न कश्चिद् दोषः॥

(१५) लिङादेरप्यभावे विधायकत्वम्

ननु—"उपांशुयाजवाक्ये यजिश्रवणे ऽपि विधिप्रत्ययस्य लिङादेरभावात् कथम् विधायकत्वम्" इति चेत्—नैवम्। यजतीत्यस्य यजेतेति विपरिणामेन विधायकत्वसम्भवात्। एवं यत्र लिङादिर्न श्रूयते—"व्रीहीन् प्रोक्षति" "समिधो यजति"इत्यादौ तत्र विपरिणामो बोध्यः। केचित्तु—"यजतीत्यस्य पञ्चमलकारत्वाङ्गीकारात् विधायकत्वसम्भवः" इत्याहुः।

(१६) समुदायप्रदर्शनम् तथा—"ऐन्द्रं दधि अमावास्यायाम्" "ऐन्द्रम्पयोऽमावास्यायाम्"—इति वाक्यविहितौ (अ)साान्नाय्ययागौ, "यदाग्नेय" इति वाक्यविहिताग्नेयश्चामावास्यायाम् प्रधानानि। एषां त्रयाणाम्—"य एवंविद्वानमावास्याम् यजते" इति वाक्ये "अमावास्याम्" इतिनाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः। तेन वेदे यत्र 'दर्श' शब्दः 'अमावास्या'—शब्दो वा श्रुतः, तत्र यागसमुदायोपस्थितिः। त्रिकस्य त्रिकस्य 'अमावास्यापौर्णमासी'—शब्दाभ्याम् समुदायरूपेण विद्वद्वाक्ये ऽनुवादस्य प्रयोजनन्तु—"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादौ द्विवचनोपपत्तिः। अन्यथा षण्णामाग्नेयादियागानाम् बहुत्वात् दर्शपूर्णमासैः' इति बहुवचनं स्यात् ॥

(१७) अनुवादलक्षणम् मानान्तरेण प्राप्तार्थस्य पुनः श्रवणम् 'अनुवादः'। तथा फलवदाग्नेयादिसन्निधौ आम्नातानि प्रयाजाऽऽघाराज्यभागानुयाजादीनि षण्णां यागानामङ्गभूतानि। एवंस्थिते, "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यस्यायमर्थः,—'दर्शपूर्णमासाभ्यां समुदायाभ्याम् परस्परसहिताभ्याम् स्वर्गापूर्वं कुर्यात्' इति। तत्र—'कथं कालद्वयवर्तिनोः समुदाययोः पर-

(अ) सान्नाय्यशब्देन दधिदुग्धयोर्ग्रहणम्। "सान्नाय्यं दधिपयसी" इत्युक्तेः।

स्परसाहित्यम्' ? इत्याकाङ्क्षायाम् स्वरूपेण साहित्याभावे ऽपि त्रिकात् त्रिकादेकैकमपूर्वम् जायते; तद्द्वारा द्वयोः समुदाययोः साहित्यमित्युच्यते । 'एकैकस्य त्रिकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथम् ? 'इत्याकाङ्क्षायाम् प्रयाजानुयाजादिपूर्वोत्तराङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते । एकैकत्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जायन्ते, तद्द्वारा सर्वाङ्गसाहित्यम्। अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात् तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम् । तथा च प्रधानजन्योत्पत्त्यपूर्वाणाम् प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति, तदेव प्रधानानामङ्गविशिष्टत्वरूपसाङ्गत्वम् । एवञ्च पौर्णमास्याम् आग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते । तथा दर्शे ऽपि [अ] आग्नेयैन्द्रद्वयजन्यैस्त्रिभिरपूर्वैरङ्गोत्पत्त्यपूर्वसचिवैरेकं त्रिकापूर्वं जन्यते । ताभ्यां त्रिकापूर्वाभ्याम् आग्नेयाद्युत्पत्त्यपूर्वत्रितयत्रितयजन्याभ्याम् फलजनकीभूतमहापूर्वम् फलापूर्वनामकं जन्यते, तत-

(अ) ऐन्द्रम्पयः ऐन्द्रम् दधि चेति ।

श्च फलम् इति । तथा च-'सर्वाङ्गोपकृताभ्याम् दर्शपूर्णमासाभ्याम् अपूर्वद्वारा स्वर्गं कुर्यात्'इति–फलापूर्वनिष्पत्तये साङ्गप्रधानकर्तव्यताबोधको विधिः प्रयोगविधिरिति सिद्धम् ॥

(१८) प्रकारान्तरेण विधेस्त्रैविध्यम् पुनरपि विधिस्त्रिविधः-(१) अपूर्वविधिः, (२)नियमविधिः, (३) परिसङ्ख्याविधिश्चेति ॥

(१९) अपूर्वविधिलक्षणम् तत्र यो विधिः अत्यन्ताप्राप्तमर्थम्प्रापयति स 'अपूर्वविधिः'(१) । यथा दर्शपूर्णमासप्रकरणे, "व्रीहीन् प्रोक्षति" इति । एतद्विध्यभावे दर्शपूर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणम् प्राप्नोत्येव । इत्यत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः ॥

(२०) नियमविधिलक्षणम् यो विधिः पक्षे प्राप्तमर्थन्नियमयति, स 'नियमविधिः'(२) ।(क)तत्रैव-"व्रीहीनवहन्ति" इति । एतद्विध्यभावे दार्शपूर्णमासिकेषु व्रीहिषु उत्पत्ति(ख)वाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्यायावहननवत् कदाचिन्नखविदलनमपि प्राप्नुयात्-इति तस्मिन् पक्षे ऽवहननस्य प्राप्त्यभावात्

---

(क) दर्शपूर्णमासप्रकरणे ।

(ख) "आग्नेयोऽष्टाकपालम्" इति कर्मस्वरूपमात्रबोधकत्वादुत्पत्तिवाक्यत्वम् ॥

कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात्। सत्यस्मिन् विधौ 'अवहननेनैव वैतुष्यं कार्यम्' इति नियमे सति, विदलनम् सर्वात्मना निवर्तते, इति 'नियमविधिः'। न च-"वैतुष्यस्य नखविदलनेनापि सम्भवादवहननियमो व्यर्थः, प्रयोजनाभावात्" इति वाच्यम्, अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यते इति नियमाददृष्टाङ्गीकारात्, नियमेन दृष्टकार्यालाभे ऽप्यदृष्टस्योत्पत्तेः। तच्चापूर्वम् यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते;—तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम्। एवं व्रीहिसोमादिनियमविधिषु बोध्यम्॥

(२१) परिसंख्याविधिलक्षणम्

द्वयोः समुच्चित्य प्राप्तौ इतरनिवृत्तिफलको विधिः 'परिसङ्ख्याविधिः' (३)। यथा चयनप्रकरणे—"इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः। एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो, रशनाऽऽदानप्रकाशनसामर्थ्यरूपात् लिङ्गात्, अश्वरशनाऽऽदान इव गर्दभरशनाऽऽदाने ऽपि नियमेन प्राप्नुयात्। सत्यस्मिन् विधौ, अनेन मन्त्रेण-'अश्वरशनामेवाऽऽददीत, न तु गर्दभरशनाम्,

क्षा तु तूष्णीमेव ग्राह्या' इति-गर्दभरशनातो मन्त्रनिवृत्तिर्भवतीति द्वयोस्समुच्चित्य प्राप्तौ इतरनिवृत्तिफलकत्वात् 'अयम्परिसङ्ख्या-विधिः' ॥

---

(२२) योगाङ्गत्वबोधकप्रमाणानि पूर्वन्दर्शपूर्णमासाङ्गत्वम् प्रयाजादीनामुक्तम्। तत्राङ्गत्वबोधकप्रमाणानि श्रुति—लिङ्ग—वाक्य-प्रकरण-स्थान-समाख्या-भेदेन षट्।

(२३) श्रुत्याऽङ्गत्वम् तत्र—"दध्ना जुहुयात्", इत्यत्र अग्निहोत्र-वाक्यप्राप्तं होमम् 'जुहुयात्' इत्यनेन उद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयते-इति श्रुत्या (१)दध्नो ऽङ्गत्वम् ॥

(२४) लिङ्गेनाङ्गत्वम् 'लिङ्गम्'(२) नाम सामर्थ्यम्। तच्च द्विविधम्—अर्थगतम् शब्दगतञ्चेति। आद्यं यथा—"स्रुवेणावद्यति" इति—अवदानसामान्यशेषत्वावगमे ऽपि स्रुवस्य सामर्थ्यरूपात् लिङ्गात् आज्यसान्नाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गम्, स्रुवेण पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात्। शब्दगतं तु लिङ्गम् अर्थप्रकाशन-सामर्थ्यम्। यथा—"अग्नये जुष्टं निर्वपामि" इति मन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपात् लिङ्गात् निर्वापाङ्गत्वम्। यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यम् तस्य तदङ्गत्वम् ॥

---

(१) निरपेक्षो रवः (शब्दः) श्रुतिः।

(२५) वाक्यनाङ्गत्वम् पदान्तरसमभिव्याहारो 'वाक्यम्'(३)। यथा—"इषेत्वेति छिनत्ति" इत्यत्र छेदनाङ्गत्वेन 'इषेत्वा' इति मन्त्रो वाक्येन विधीयते। यद्वा-"अग्नये जुष्टम्" इत्यत्रैव, 'अग्नये जुष्टम्' इत्यादिपदानाम् 'निर्वपामि'—इत्यनेनैकवाक्यतापन्नत्वात निर्वापाङ्गत्वम्॥

(२६) प्रकरणनाङ्गत्वम् 'प्रकरणम्' (४) नाम परस्पराकाङ्क्षा। यथा—"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"-इत्यत्र 'दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कुर्यात्' इत्युक्ते, भवत्याकाङ्क्षा—'कथमाभ्याम् स्वर्गापूर्वं कर्तव्यम्?' इति। तथा फलवदाग्नेयादिसन्निधौ—"समिधो यजति", "तनूनपातं यजति", "आज्यभागौ यजति"—इत्यादिभिः प्रयाजादयः फलरहिताः श्रुताः। तेषां स्ववाक्येषु फलाश्रवणाद् भवति प्रयोजनाकाङ्क्षा—'किमेतेषाम् प्रयोजनम्?' इति। ततश्च—प्रयाजादीनाम् प्रयोजनाकाङ्क्षायां, दर्शपूर्णमासयोः कथम्भावाकाङ्क्षायाम् परस्पराकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषान्दर्शपूर्णमासाङ्गत्वन्निश्चीयते॥

(२७) स्थाननाङ्गत्वम् 'स्थानम्'(५) नाम सन्निधिः। यथा—"सान्नाय्यपात्रसन्निधौ[क] शुन्धध्वम्" इति मन्त्रस्य,

---

(क) "दैव्याय कर्मणे शुन्धध्वम्" इति मन्त्रः॥

पाठात् सन्निधानात्, सान्नाय्यपात्रप्रोक्षणाङ्गत्वम् ॥

(२८) समाख्ययाऽङ्गत्वम्

समाख्या (६) संज्ञा। यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते 'आध्वर्यव' समाख्यावशात् अध्वर्योः कर्तृत्वेनाङ्गत्वम्। तथा—"ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः" इत्यादिषु काम्येष्टिसमाख्यातेषु ऐन्द्राग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् "उभावामिन्द्राग्नी"इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः—विनियोगो नाम अङ्गत्वेनान्वयः ॥

(२९) श्रुत्यादिषु पूर्वपूर्वप्राबल्यम्। तत्र प्रथमं लिङ्गात् श्रुतेः प्राबल्यम्

श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यम्, उत्तरोत्तरस्य दौर्बल्यम्। यथा—"कदा चनस्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते"इति, अग्निहोत्रप्रकरणे श्रूयते, तत्र मन्त्रस्य इन्द्रप्रकाशनसामर्थ्यरूपात् लिङ्गात् इन्द्रोपस्थानाङ्गत्वे प्राप्ते, 'ऐन्द्र्या'इति तृतीयाश्रुत्या 'गार्हपत्यम्'इति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानात्,-लैङ्गिक इन्द्रोपस्थाने विनियोगो बाध्यते। श्रुतिर्हि स्वतो विनियोजिका;लिङ्गन्तु इन्द्रप्रकाशनसामर्थ्यमालोच्य—"ऐन्द्र्येन्द्रमुपतिष्ठते"इतिश्रुतिकल्पनाद्वारा विनियोजकमिति वाच्यम्। तच्चात्र न सम्भवति। यत्र श्रुतिविनि-

योगो नास्ति-"अग्नये जुष्टं निर्वपामि" इत्यादौ, तत्र मन्त्रस्य निर्वापप्रकाशनसामर्थ्यमालोच्य-'अनेन मन्त्रेण निर्वापं कुर्यात्' इति श्रुतिकल्पनाद्वारा लिङ्गम् विनियोजकम् भवत्येव,[अ] श्रुतिकल्पनाप्रतिबन्धकाभावात् ॥

(३०) वाक्यात् लिङ्गस्य प्राबल्यम्

तथा—"[क]स्योनन्तेसदनं कृणोमि तस्मिन् सीद" इति 'तत्'—शब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानात् वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वम् भाति, लिङ्गेन भिन्नमन्त्रत्वम् भाति आद्यस्य सदनप्रकाशन सामर्थ्यात्, "तस्मिन् सीद" इत्यस्य सादनप्रकाशकत्वात् । तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्यात् वाक्यम् बाधित्वा, लिङ्गेन-"स्योनन्ते" इत्यस्य सदनाङ्गत्वम्, "तस्मिन् सीद" इत्यस्य सादनाङ्गत्वम्, इति निर्णयः । "स्योनन्ते" इत्यस्य "तस्मिन् सीद" इत्यनेनैकवाक्यत्वबलात्, यथाकथञ्चित् सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा, "अनेन विशिष्टमन्त्रेण सादनं कुर्यात्" इति श्रुतिः कल्पनीया । सदनप्रकाशनरूपप्रत्यक्षलिङ्गेन कल्पितया "स्योनन्त इत्यनेन सदनं कुर्यात्" इति श्रुत्या, "स्योन-

(अ) विरुद्धार्थप्रतिपादिका श्रुतिः अभिनवश्रुति कल्पनायाम् प्रतिबन्धिका । अत्र तथाविधश्रुत्यभावात् न श्रुत्यन्तरकल्पनाप्रतिबन्धः ॥

(क) "स्योनन्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन् सीद मते प्रतिष्ठ व्रीहीणां मेधः सुमनस्यमानः"—इति मन्त्रः ॥

न्ते" इत्यस्य शीघ्रं सदने विनियोगे सति,- तेनैव मंत्रस्य नैराकाङ्क्षाद् वाक्यप्रमाणात् लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते, विलम्बितत्वात्, इति लिङ्गेन वाक्यस्य बाधः ॥

(३१) प्रकरणादीनां यथाक्रमम् बाधः

एवं वाक्येन प्रकरणस्य, प्रकरणात् क्रमस्य, क्रमात् समाख्यायाः बाधो वेदितव्यः ॥ तथा श्रुत्या वाक्यादेरपि बाधः । तदेवमङ्गताबोधकप्रमाणानिश्रुत्यादीनि निरूपितानि ॥

---

(३२) अङ्गत्वनिरूपणम्

तच्च अङ्गत्वम् शेषत्वम् पारार्थ्यमिति यावत् । परोद्देशेन प्रवृत्तकृतिव्याप्यत्वम्(ख) पारार्थ्यम् । प्रयाजादीनां दर्शपूर्णमासोद्देशेनप्रवृत्तपुरुषकृतिव्याप्यत्वात् लक्षणसङ्गतिः॥ दर्शादेः प्रयाजादि उद्दिश्य प्रवृत्तकृतिविषयत्वाभावात् नातिव्याप्तिः, केवलप्रयाजानुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः ॥

(३३) अङ्गानाम् द्वैविध्यम्

तान्यङ्गानि द्विविधानि—(१) सन्निपत्योपकारकाणि(२) आरादुपकारकाणि चेति ॥

(३४) सन्निपत्योपकारकलक्षणम्

यान्यङ्गानि साक्षात् परम्परया वा प्रधानयागशरीरम् निष्पाद्य, तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि, तानि 'सन्निपत्योपकारकाणि'(१) । यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि, आग्न्यादिदेवता, तत्सं-

---

(ख) साध्यत्वम् ॥

उत्सूत्रं च कल्पितमनुमानादिति बाधनात्सूत्रं कल्पितम् । अनुमानादिबाधनान्नोत्सूत्रमिति चेत् । शब्दनिवृत्त्यर्थमव्यपदेश्यपदव्याख्यानमयुक्तम् । षड्विधसन्निकर्षाभ्युपगमइन्द्रियग्रहणं चाऽनुमानादिनिवृत्त्यर्थमित्यादि पराहतं

संप्लवः प्रमाणानां निरस्तः स्यात् । उत्सूत्रं च कल्पितम् । न खलु लिङ्गाद्यभाव इति उद्देशो लक्षणं परीक्षासूत्रं वा समस्ति ।

शङ्कते—अनुमानादिलक्षणप्रणयनबाधनान्नोत्सूत्रमिति चेत् ? सूत्राऽऽहिताऽर्थसामर्थ्यलभ्यमपि तदर्थ एव, तन्मूलत्वादित्यर्थः । निराकरोति—शब्दनिवृत्त्यर्थमव्यपदेश्यपदव्याख्यानमयुक्तम् । भाष्यकारो हि शाब्दज्ञाननिवृत्त्यर्थम् अव्यपदेश्यपदं वर्णयांबभूव । तथा हि । यत्र प्रत्यक्षेण दृश्यमाने केसरादिमति वस्तुनि नागरिकेणाऽऽरण्यकं प्रत्युच्यते तुरङ्गोऽयमिति तत्राऽऽरण्यकस्तस्य वस्तुनस्तुरङ्गमपदवाच्यतामवैति, मानद्वयव्यापारात् । तथा हि । तुरङ्गमपदाऽभिधेय इत्येतावता शब्दः पुरोवर्त्तिनि च विशेषे तदभिधेयताश्रये इन्द्रियतदुपदेशस्य तत्र शब्दस्य प्रवृत्तेः । तच्चैतदुभजमपि ज्ञानं शाब्दमेव, शब्दस्य तत्र साधकतमत्वात् । सत्यपीन्द्रियाऽर्थसंनिकर्षे शब्दाऽभावे तदनुपपत्तेः । असति तु तस्मिन्यदा सदेव वस्त्वनुभूतमारण्यकेनाऽनुस्मर्य सङ्केतं प्रतिपद्यते स केसरादिमान् पदार्थस्तुरङ्गम इति तदा वाक्ये सति तदवबोधात् । तस्मादुभयजस्य विज्ञानस्य शब्दस्य निवृत्त्यर्थमव्यपदेश्यपदव्याख्यानमयुक्तं स्यात् । लिङ्गाद्यभावे प्रत्यक्षलक्षणव्यवस्थापना, उभयजस्य शाब्दत्वेन प्रत्यक्षत्वप्रसक्त्यभावात् ।

एतदुक्तं भवति । तदेव सूत्राऽभिहितसामर्थ्येन लभ्यते न यत्सूत्राऽवयवमुपहन्ति न तूपघातकमपीति, तथा देशकालविप्रकीर्णमात्रविषयप्रत्यक्षज्ञानाऽभ्युपगमो लिङ्गाद्यभावे प्रत्यक्षलक्षणम्, इन्द्रि-

स्यात् । तस्मादक्षलिङ्गादिपरतन्त्रं मनः । सर्वं च परिपूर्णं चेल्लौकिकप्रमाणगोचरो लौकिकप्रमाणाऽव्यवहार्य्यपि परिपूर्णज्ञान इति न लोकोत्तरज्ञानाऽभिमतस्य विशेषः । स्पष्टाऽवभासं ज्ञानं यदि, न तत्र तस्योपयोगः । अथ निश्चयः, स इतरस्यापि प्रमाणतुल्यः । प्रमितेः प्रत्यक्षदर्शिनः सर्वार्थेषु नैराकाङ्क्ष्यं नेतरस्य । अप्रत्यक्षमपि यदि परिपूर्णं मानान्तरेण मितं किमन्यदाकाङ्क्षेदिति । न हि

यग्रहणं चाऽनुमाननिवृत्त्यर्थमित्यादि पराहतं स्यात् । तद्विषयं प्रत्यक्षमित्यादिशब्दसूचितं पराहतं वेदितव्यम् । प्रकृतमुपसंहरति—तस्मादक्षलिङ्गादिपरतन्त्रं बहिर्मनः । अपि च सर्वं परिपूर्णं लौकिकं प्रमाणगोचरो न्यूनं वा ? तत्र सर्वं च परिपूर्णं चेल्लौकिकप्रमाणव्यवहार्यपि परिपूर्णज्ञान एवेति न ततो लोकोत्तरज्ञानाऽभिमतस्य विशेषः ।

शङ्कते—स्पष्टाऽवभासं ज्ञानं यदि विशेषः । एतदुक्तं भवति । पूर्णविषयमपि लौकिकमविशदाभमलौकिकं तु भावनाऽऽधेयविशदाभमित्यस्यास्ततो विशेष इति । निराकरोति—न । तत्र सर्वस्मिन् सम्पूर्णगृहीते न स्पष्टाऽवभासस्योपयोगः । लौकिकप्रमाणाऽन्वितमर्थमवगमयता विस्पष्टं तेन पिष्टं पिष्टं स्यात् ।

शङ्कते—अथ निश्चयः ? निराकरोति—स इतरस्यापि लौकिकस्य प्रमाणत्वेन तुल्यः । शङ्कते—प्रमितेः सर्वस्या एव प्रत्यक्षपरत्वात् सर्वार्थप्रत्यक्षदर्शिनः सर्वार्थेषु नैराकाङ्क्ष्यं नेतरस्य प्रमाणान्तरेण समस्तवस्तुदर्शिनो लौकिकस्याऽप्रत्यक्षे सर्वस्मिन्नैराकाङ्क्ष्यम् । तथा हि । प्रमाता आगमादर्थमवगम्य अनुमानात् बुभुत्सते अनुमाय च तं प्रत्यक्षेण दिदृक्षते । अथ साक्षात्कृत्य निराकाङ्क्षतामापद्यते । सेयं सर्वत्र प्रत्यक्षप्रमितिः प्रमातृणाम् । निराकरोति—अप्रत्यक्षमपि यदि मानान्तरेण परिपूर्णमितं किमन्यदाकाङ्क्षेदिति । यच्च खल्वनुमा-

**प्रमाणाऽन्तराऽऽकाङ्क्षा, प्रमेयसिद्ध्यर्थत्वात्तदाकाङ्क्षायाः । पुनः प्रमेयसिद्ध्यर्थं प्रमाणान्तराकाङ्क्षा । न । पूर्वस्मादप्यसकृत्तत्सिद्धेः । सिद्धस्य पुनः सिद्ध्यपेक्षाहेत्वभावाच्च । उपायान्तरसद्भावश्चोपायान्तराकाङ्क्षैव स्यात् । प्रीति[1]-**

याऽपि प्रत्यक्षेण दिदृक्षते न नूनं तत्राऽनुमानेन सम्पूर्णप्रमेयाऽधिगतिरभूत् तद्भावे दिदृक्षाऽनुपपत्तेः । यथाहुरत्रभवन्तो वार्त्तिककारमिश्राः ।

> यावदज्ञातसन्दिग्धं मेयं तावत्प्रमित्स्यते ।
>
> प्रमिते तु प्रमातॄणां प्रमौत्सुक्यं विहन्यते ॥ इति ।

अथ मानान्तरमाकाङ्क्षति तत्राह—न हि प्रमाणान्तराऽऽकाङ्क्षा । कुतः ? प्रमेयसिद्ध्यर्थत्वात्तदाकाङ्क्षायाः । हिताऽहितप्राप्तिपरिहारार्थिनो हि तदुपायमर्थयन्ते, स च प्रमाणाऽधीननिरूपण इति प्रमाणमनुसरन्ति, स चेत् कुतश्चित्प्रमाणात्सिद्धः कृतं तर्हि प्रमाणान्तरानुसरणेन तेषाम् । तथापि चेदनुसरन्ति नूनं प्रमेयान्तरमप्यमी बुभुत्सन्ते इत्यर्थः । अथ ततः प्रमेयसिद्धावपि तस्याऽऽशुतरविनाशित्वेन[2] पुनस्तत्प्रमेयसिद्ध्यर्थं प्रमाणान्तराकाङ्क्षां निराकरोति—न । पूर्वस्मादप्यसकृत्तत्सिद्धेरनेकजन्मपरम्पराऽऽयाससाध्ययोगजविज्ञानगोचरप्रयत्नाऽनुपपत्तेः । कुतश्चित्सिद्धस्य पुनः प्रमाणान्तरात्सिद्ध्यपेक्षाहेत्वभावाच्च । तदनुभवभावितभावनोद्बोधवशादेतद्विषयस्मृतिसन्तानसम्भवात् ।

शङ्कते—विचित्राऽभिसन्धित्वात् प्रमातॄणामुपायान्तरसद्भावस्तस्मिन्प्रमेये विशेषणतया बुभुत्सिते चेत् । निराकरोति—तर्हि प्राप्ताऽप्राप्तविवेकेन उपायान्तराऽऽकाङ्क्षैव स्यात् न प्रमेयान्तराऽऽकाङ्क्षा ।

१ प्रतीति॰ मू॰ पा॰ ।
२ आशुतरस्याशुतरविनाशित्वेन २ पु॰ पा॰ ।

विषशेषश्चेत्पूर्वप्रमाणजाद्दर्शनात्सिद्ध्यतीति व्यर्थं प्रमाणान्तरम् । उपायान्तरसद्भावाच्च पुनर्जिज्ञासमानं दृष्टमपीतरैर्जिज्ञासेत, विशेषनिश्चयात्मकं प्रत्यक्षमनिश्चयात्मकमनुमानादिति व्यभिचारात् । अप्रमितत्वादेव तर्ह्याकाङ्क्षा । व्यभिचारिणो ऽनिश्चयात्मकस्याऽप्रमाणत्वात् । भानादियोग्यं प्रत्यक्षं सन्निकर्षान्नाऽनुमानादि । सन्निकर्षसाधनं तर्हि गमनाद्यपेक्षतां न तु प्रमासाधनं, सिद्धत्वात्प्र-

शङ्कते—प्रीतिविशेषश्चेत् । यथा हि श्वशुरेकेन गवाक्षेण वीक्ष्य जामातरमपरेण वीक्षते प्रीतिविशेषात् तथेदमपीत्यर्थः । निराकरोति—सुकरे पूर्वप्रमाणजादपि पुनर्दर्शनात्सिध्यतीति व्यर्थं प्रमाणान्तरम् । अत्यन्तदुष्करमपि चोपायान्तरसद्भावाच्च पुनर्जिज्ञासमानं प्रत्यक्षदृष्टमपीतरैरनुमानादिभिरयं विचित्राऽभिसन्धिः प्रतिपत्ता जिज्ञासेतेति न प्रत्यक्षपरा सर्वप्रमितिः । प्रत्यक्षपरत्वमिच्छता वाच्यो विशेषः प्रत्यक्षस्य मानान्तरेभ्यः । अथाऽय मुच्यते निश्चयात्मकं प्रत्यक्षं विशदत्वादनिश्चयात्मकमनुमानादि व्यभिचारदर्शनात् । तदिदमनुपपन्नम् । अनुमानादेरपि यथोक्तलक्षणोपपन्नस्य व्यभिचाराऽभावात् । आभासव्यभिचार[1]स्तु प्रत्यक्षे ऽपि तुल्य इत्यनभिधाय स्थूलनिराकरणान्तरमाह[2]—अप्रमितत्वादेव तर्ह्याकाङ्क्षा । कुतः ? व्यभिचारिणो ऽत एवाऽनिश्चयात्मकस्याऽप्रमाणत्वात् । शङ्कते—भानादियोग्यं प्रत्यक्षम् । कुतः ? सन्निकर्षाद्धि विषयस्य सन्निहितत्वात् । असन्निधाने तदनुपपत्तेः । न पुनरेवमनुमानादि । तस्य देशकालविप्रकीर्णवस्तुगोचरत्वात् । निराकरोति—सन्निकर्षसाधनं तर्हि गमनाद्यपेक्षतां न तु प्रमासाधनम् प्रमाणम् । कुतः ? अनुमानादेरेव सिद्धत्वात्प्रमायाः । न च प्रमेव

१ अथ व्यभिचारः २ पु॰ पा॰ ।
२ इति स्थूलतया ऽनभिधाय दूषणान्तरमाह २ पु॰ पा॰ ।

भायाः प्रमिते च सन्निकर्षस्य भानादिहेतुत्वात्। प्रकृतं च प्रत्यक्षमसन्निकृष्टगोचरमिति न नैराकाङ्क्ष्यायाऽलमित्यविशेष एव लौकिकलोकोत्तरयोः प्रमात्रोः। अनुमानादेः सामान्यविषयत्वात्प्रत्यर्थनियतात्मविशेषाऽनवधारणात् साकाङ्क्षत्वं लौकिकस्य प्रमातुः। लौकिकोत्तरस्याऽपि कालरूपाऽवधारणान्नैराकाङ्क्ष्यमिति नाऽविशेषः। यदि तर्हि लौकिकं प्रमाणं विकलवस्तुविषयः लोकोत्तरमपि भावनामयं तत्परतन्त्रं न तद्गोचरयितुमर्हति। स्वातन्त्र्यं तु बहिर्मनसो नेत्यावेदितमेव। तस्मात्सर्वं मनसो विषय इति प्रलापः। अपि च—

भानादिहेतुरित्याह—सन्निकर्षस्य प्रमाण[1]मोचसहायस्य भानादिहेतुत्वात्। अपि च प्रकृतं प्रत्यक्षं देशकालविप्रकीर्णवस्तुम.त्वविषयमसन्निकृष्टवस्तुगोचरमिति न नैराकाङ्क्ष्यायाऽलमिति। तस्मादविशेषो लौकिकलोकोत्तरयोः प्रमात्रोः सर्वप्रमायाम्।

पुनः शङ्कते—गृहीतसम्बन्धलिङ्गादिप्रभवतया[2] विशेषे च सम्बन्धसंवेदनाऽनुपपत्तेः अनुमानादेः सामान्यविषयत्वात्प्रत्यर्थनियताऽनन्तरविशेषाऽनवधारणात् साकाङ्क्षत्वं लौकिकस्य प्रमातुः। लोकोत्तरस्य त्वविकलरूपसर्वाऽवधारणादप्रमितस्य वस्तुनोऽभावान्नैराकाङ्क्ष्यमिति नाऽविशेषः। दूषयति—यदि तर्हि लौकिकं प्रमाणं नाऽविकलवस्तुविषयं, लोकोत्तरमपि भावनामयं भवानया कृतं तत्परतन्त्रम्, भावना च विकलविषयलौकिकप्रमाणपरतन्त्रेति न तदविकलं गोचरयितुमर्हति। न च भावनाऽऽहितसंस्कारं मनो बहिः स्वतन्त्रं प्रवर्त्तत इत्याह—स्वातन्त्र्यं तु बहिर्मनसो नेत्यावेदितमेव। एतच्च बौद्धसर्वज्ञपरीक्षायां निपुणतरमुपपादितम्। प्रकृतमुपसंहरति—तस्मात्सर्वं मनसो विषय इति प्रलापः। अपि च।

१ संनिकर्षप्रमाण २ प. पा.। २ लिङ्गादितरथा २ पुं. पा.।

मिथ्यैव वर्तमानाभं न तु प्रत्यक्षमन्यथा ।
क्रमाऽक्रमौ न कल्पेते न प्रमेयं निरूप्यते ॥

कालत्रयपरिवृत्त्यर्थगोचराणि मानान्तराणि वर्तमानविषयं प्रत्यक्षं तत्र वर्तमानात्मना पश्यतो मिथ्याज्ञानं, सर्वस्याऽतथाभावात् । यथार्थं तु पश्यतो न प्रत्यक्षम् । अतीताऽनागतविषयत्वाऽभावात् तस्य । अथ वा ऽवश्यमनेन बहुविधस्य प्रत्यक्षस्यैकं लक्षणं वाच्यम् । अन्यथा प्रमाणान्तरत्वाऽभिधानमप्रत्ययं प्रमाणान्तराऽभ्युपगमो वा

मिथ्यैव वर्तमानाभं न तु प्रत्यक्षमन्यथा ।
क्रमाऽक्रमौ न कल्पेते न प्रमेयं निरूप्यते ॥

यथा लोकप्रतीतिकालत्रयपरिवृत्त्यर्थविषयाणि मानान्तराण्यनुमानादीनि वर्तमानविषयं प्रत्यक्षं तत्र सर्वज्ञस्य प्रत्यक्षेण सर्वं वर्तमानात्मना पश्यतो मिथ्याज्ञानम् । कुतः ? सर्वस्याऽतीताऽनागतवर्तमानस्याऽतथाभावात् वर्तमानत्वाऽभावात् । यथार्थं तु पश्यतोऽतीतादित्वेन पश्यतो न तद्विषयं ज्ञानं प्रत्यक्षं स्यात् । अतीताऽनागतविषयत्वाऽभावात् तस्य प्रत्यक्षस्य । प्रत्यक्षता हि वर्तमानविषयतया व्याप्ता । वर्तमानविषयता चातीताऽनागतविषयाद्विज्ञानान्निवर्तमाना प्रत्यक्षत्वमपि निवर्तयतीत्यर्थः ।

न तु प्रत्यक्षमन्यथेत्यस्याऽन्या व्याख्या । अथ वा अवश्यमनेन बहुविधस्य प्रत्यक्षस्यैकं लक्षणं वक्तव्यम् । अन्यथा यद्येकं लक्षणं नोच्येत तस्य प्रत्यक्षस्याऽपरिगृहीतस्यैकस्याऽनुमानादिभ्यः प्रमाणान्तरत्वाऽभिधानमप्रत्ययकारणकं स्यात् । यदि पुनरसालक्षण्येऽपि प्रत्यक्षमेकं प्रमाणमभ्युपेयेत ततः प्रमाणान्तराऽभ्युपगमो वा प्रत्ययः स्यात् । भिन्नलक्षणानामपि प्रत्यक्षत्वे ऽनुमानादीनामपि प्रत्यक्षत्वप्रसङ्गात् न मानान्तराणि तान्यभ्युपेयेरन्नित्यर्थः । यदुच्येत भिन्न-

परिभाषाप्रयोजनाऽभावात् । भिन्नलक्षणेष्वपि केषु चिल्लौकिकाः प्रत्यक्षशब्दं प्रयुञ्जते इति मिथ्यालोकोत्तरे तदयोगात् । तत्र नाऽक्षजत्वं लक्षणं मनसो, ऽतिव्याप्तेः । तस्मादिन्द्रियार्थसन्निकृष्टाऽर्थजत्वं तल्लक्षणम् । यथोक्तम् । 'अर्थसामर्थ्येन समुद्भवादिन्द्रियाऽर्थसन्निकर्षोत्पन्नं सत्संप्रयोग इति' । मनसोऽक्षत्वे सुखादिज्ञानव्याप्तेः अर्थसामर्थ्यजत्वेन

त्वाऽविशेषेऽपि द्रव्यगुणकर्म्मणामेवाऽर्थशब्दाऽभिधेयता परिभाषिता न सामान्यविशेषसमवायानाम् । एवं कासु चिदेव ज्ञानव्यक्तिषु प्रत्यक्षशब्दः परिभाषितो नाऽनुमानादिव्यक्तिष्वित्यत आह—परिभाषाप्रयोजनाऽभावात् । अप्रयोजनस्य परिभाषणेऽतिप्रसङ्गादित्यर्थः । भिन्नलक्षणेष्वपि केषु चिल्लौकिका वाचकमेव प्रत्यक्षशब्दं प्रयुञ्जते । न खल्वेते पर्यनुयोज्याः । यथा जातिचये अक्षशब्दमेकमित्यपि मिथ्या । कुतः ? लोकोत्तरे भवदभिमते लोकोत्तरत्वादेव तस्य लौकिकप्रयोगस्याऽयोगात् । तदवस्थितं प्रत्यक्षलक्षणमेकं वक्तव्यमिति ।

ननूच्यते अक्षजत्वं नाम प्रत्यक्षाणामेकं लक्षणं, तथा च सर्वज्ञज्ञानं मनोऽभिधानाऽक्षप्रभवमिति नाऽतिवर्तते प्रत्यक्षतामित्यत आह—तत्र नाऽक्षजत्वं लक्षणम् । कुतः ? तथा हि—मनोनामाऽक्षं न वा । तत्र मनसोऽक्षत्वेऽनुमानाद्यपि मनोजन्मेवेति तस्यापि प्रत्यक्षत्वं प्रसक्तमित्यतिव्याप्तेर्न लक्षणम् । अनक्षत्वे वा सुखादिज्ञानस्य बाह्येन्द्रियाऽजनितस्याऽप्रत्यक्षत्वप्रसक्तेरव्याप्तेः । तस्मादिन्द्रियाऽर्थसामर्थ्यजत्वमेव तत्प्रत्यक्षलक्षणमास्थेयं सर्वैरेव वादिभिः ॥

अत्रैव सर्वेषामनुमतिं दर्शयति—यथोक्तमर्थस्य सामर्थ्येन समुद्भवात् । अन्धादीनामनुपपत्तेरिन्द्रियस्येत्यपि शेषः । तथेन्द्रियार्थसन्निकर्षोत्पन्नं तथा सत्सम्प्रयोग इति । एवं च सति नाऽव्याप्तिः । मनसोऽक्षत्वे सति सुखादिज्ञानव्याप्तेर्नोऽतिव्याप्तिः । अर्थसामर्थ्यज-

अनुमानादिव्यवच्छेदात् । न च सूक्ष्मविप्रकृष्टव्यवहितानां ज्ञानोत्पत्तौ सामर्थ्यमिति न सर्वविषयप्रत्यक्षस्योपपत्तिः । कल्पनाऽपोढत्वं प्रत्यक्षलक्षणमिति चेत् । केयं कल्पना ? यदि शब्दाभासा प्रतीतिः, श्रौत्रं ज्ञानमप्रत्यक्षम् । अथाऽभिलापसंसर्गयोग्यप्रतिभासा ।

त्वेनाऽनुमानादिव्यवच्छेदात् । नन्वेवमपि सर्वविषयं विज्ञानं कस्मान्न प्रत्यक्षमित्यत आह—न च सूक्ष्मविप्रकृष्टव्यवहितानामर्थानां विज्ञानोत्पत्तौ सामर्थ्यमिति न सर्वविषयप्रत्यक्षतोपपत्तिः ।

शङ्कते—कल्पनापोढत्वं प्रत्यक्षलक्षणमिति चेत् । इदं खल्वनुमानादिभ्यो विकल्परूपेभ्यः प्रत्यक्षतां, निवर्त्तयति व्यवस्थापयति च सुखादिषु ज्ञानरूपतया स्वसंवेदनसिद्धेष्वपोढेषु कल्पनायाः प्रत्यक्षत्वं, सङ्गृह्णाति च सर्वज्ञविज्ञानमखिलं कल्पनानिर्मुक्तमित्यर्थः ।

तदेतद्यथासम्भवं विकल्प्य दूषयति—केयं कल्पना यस्या अपोढत्वमुच्यते प्रत्यक्षत्वं ? यदि शब्दाऽऽभासा शब्दाऽऽकारप्रतीतिः श्रौत्रं ज्ञानं शब्दविषयं विशदाभमप्रत्यक्षं प्रसज्येत । अथाऽभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना ।

अयमर्थः । अभिलापसंसर्गयोग्यः प्रतिभास आकारो यस्याः प्रतीतेः सा कल्पना । एतदुक्तं भवति । स एवाऽभिलापसंसृष्टो[1] भवति यत्राऽयमभिलापः कृतसङ्केतः । स एव च तथा यो देशकालाऽवस्थाऽनुगतः प्रतिभासते । न च वस्तुसतः स्वलक्षणस्याऽनुगतिः सम्भाविनी । न च जात्यादयो वस्तुसन्तः सम्भवन्ति । विचाराऽसहत्वात् । अत एव तद्वन्तोपि भेदा न तात्त्विकाः । तदभावे तद्वत्ताऽनुपपत्तेः । तस्मात् स्वाऽऽभासं वा अलीकं वा बाह्यं पश्यन्ति यादृशम् एको गोविकल्पः तादृशमेव गोविकल्पान्तरमपि । न च

१ संसृष्ट इति ३ पु॰ पा॰ ।

स्व[1]विषयविकल्पान्तरविषयाद्भेदस्तेनैव गृह्यते नापि विकल्पान्तरेणेति भेदाऽग्रहादेको विकल्पविषयः । तदेकत्वाद्विकल्पानामप्येकत्वम् । तदेकविकल्पनिर्माणसामर्थ्याच्चाऽनुभवानामप्येकत्वम् । तदेकत्वाऽत्तद्धेतूनां व्यक्तीनामप्येकता । यथा ऽऽह ।

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥ इति ।

तच्चा[2]ऽऽरोप्यमाणं रूपमन्यव्यावृत्तिस्वभावं भावाऽभावसाधारणत्वाच्चाऽत्यन्तविसदृशानां सादृश्याऽऽपादकत्वाच्चाऽबाह्यसादृश्याच्च । तथा हि । यद्भावाऽभावसाधारणं रूपं तदन्यव्यावृत्तिनिष्ठमेव यथा मूर्तत्वादि । तथा च गवादि विकल्पविषय इति स्वभावहेतुः । साधारणं खल्वेतद्गोत्वादि भावाऽभावयोः, अस्ति गौर्नास्ति गौरिति विकल्पास्पदत्वात् । असाधारण्ये तदनुपपत्तेः विरोधपौनरुक्त्याभ्याम् । तथा यदत्यन्तविसदृशानां सादृश्यमापादयति तदन्यव्यावृत्तिनिष्ठमेव, यथा वराहमहिषमातङ्गादीनामत्यन्तविसदृशानामकमेलकत्वम्[3] । तथा च अत्यन्तविसदृशानां शाबलेयादिस्वस्वलक्षणानां गोत्वमिति स्वभावो हेतुः । तथा ज्ञानप्रतिभासस्य वा अलीकस्य वा बाह्येन वा परमार्थतो वाऽत्यन्ताऽसद्रूपेण सादृश्यमन्यव्यावृत्तिकृतमेव कल्पते नाऽन्यथा । अत एव ज्ञानाऽऽभासो वाऽलीकं वा गोत्वं प्रति विकल्पं विद्यमानं[4] सदृशतया ऽनाकलितभेदमप्यश्वादि विकल्पविषयव्यावृत्तमेव बाह्यतया ऽऽरोप्यतइति नाऽन्यव्यावृत्तिरूपता ऽस्य न प्रथते । न चाऽनिरूपितेनाऽगवा तद्व्यावृत्तिरूपगोनिरूपणाद् गोनिरूपणाऽधीनत्वाच्चाऽगोनिरूपणस्याऽन्योन्याश्रयमिति साम्प्रतम् । अन्यतरस्याऽन्यतः प्रसिद्धेः । गोरूपस्य विज्ञानाऽऽकारस्य वा अलीकस्य वा ऽन्यतो व्यावृत्तिर्न पुनरस्य तदधीनं निरूपणम् ।

१ अपि स्वस्य स्वस्येति २ पु॰ पा॰ । २ तत्रेति २ पु॰ पा॰ ।
३ विसदृशानां पशुत्वम् । २ पु॰ पा॰ । ४ विद्यमानम् २ पु॰ पा॰ ।

सामान्याकारस्वसंवेदनेऽप्यप्रत्यक्षत्वम् । अथ वस्तुनि वस्त्वन्तरयोजना, सामान्याऽऽकारप्रतीतेः प्रत्यक्षत्वम् । सामान्यस्य वस्त्वन्तरस्याऽनभ्युपगमात् । अथाऽभिधानयोजना, अव्युत्पन्नाऽभिधानस्य तथा स्यात् ।

अन्यथा सामान्ये ऽपि पारमार्थिके दोषस्य साम्यात् । तस्मात् ज्ञानाकारो वा अलीकं वा बाह्यत्वेनाऽवसितं संकेतसम्भवाद्भवति शब्दसंसर्गयोग्यं तद्विषया व्युत्पन्नानां च प्रतीतिः कल्पनेति । तज्ज्ञानाकारवादिनां कल्पनां दूषयति—सामान्याकारस्वसंवेदने ऽप्यप्रत्यक्षम् ।

इदमभिसंहितम् । ज्ञानातिरिक्तस्य वेदनाऽनुपपत्तेरन्यव्यावृत्तिरूपं सामान्यं ज्ञानाकार इति निरूपितं साऽऽकारवादिभिः । न च तद्ग्राह्यत्वं विकल्पस्य ग्राह्यमध्यवसेयं वा सम्भवतीति निवेदयिष्यते 'न निरालम्बनं ज्ञान'मित्यत्रान्तरे । तत्पारिशेष्यात् ज्ञानाऽऽकारसामान्यस्य स्वसंवेदने ऽपि विकल्पनीयतया स्यादप्रत्यक्षता प्रागेव तद्ग्राह्यतायास्तस्या अग्राह्याया अनध्यवसेयायाश्च सर्वथा विकल्पगोचरत्वादिति ।

सम्प्रति निराकारज्ञानवादिनां[1] मतमाशङ्कते—अथ वस्त्वन्तरस्य रजतादेः पुरोवर्तिनि शुक्तिकादौ यो जनो रजतमिदमिति विज्ञानकल्पनां निराकरोति सा सामान्याऽऽकारा प्रतीतिः सामान्यमाक्रियते व्यज्यते यया प्रतिपत्त्या सा प्रत्यक्षं स्यात् कुतः ? सामान्यरूपस्य वस्त्वन्तरस्याऽनभ्युपगमात् । यथाह ।

तस्यां यद्रूपमाभाति बाह्यमेकमिवाऽन्यतः ।
व्यावृत्तमिव निस्तत्त्वं परीक्षाभङ्गभावतः ॥ इति ।

शङ्कते—अथाऽभिधानयोजना । अभिधेये कल्पनां निराकरोति—

१ बिम्बाकारज्ञानवादिनाम् । २ पु॰ पा॰ ।

**अथाऽरूपस्याऽऽरोपः कल्पनापोढं रूपमात्रवेदनं प्रत्यक्षम् । न तर्ह्यजाताऽतिवृत्तेषु योगिनोऽन्यस्य वा-ज्ञानं प्रत्यक्षम् । ज्ञानप्रतिभासिनो रूपस्य तेष्वभावात् । भावे वा प्रत्युत्पन्नत्वाऽऽपातात् ।**

अव्युत्पन्नाऽभिधानस्य पुंसो याऽभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः शब्दयोजनारहिता सा तथा प्रत्यक्षं स्यात् । न चेष्यते । शङ्कते—अथाऽरूपस्याऽलीकस्याऽऽरोपो बाह्यत्वेन कल्पना । यथोक्तं भदन्तेन 'बुद्ध्या कल्पितया विविक्तमपरैर्यद्रूपमुल्लिख्यते तद्बुद्धिर्न बहि'रिति । इयं च कल्पना व्युत्पन्नानामव्युत्पन्नानां च साधारणी । तेन तदपोढं रूपमात्रवेदनं प्रत्यक्षम् । तथा च नोक्तदोषप्रसङ्ग इति । निराकरोति—न तर्ह्यजाताऽतिवृत्तेषु योगिनोऽन्यस्य वा ज्ञानं प्रत्यक्षम् । कुतः ? ज्ञाने प्रतिभासिनो रूपस्य तेष्वजाताऽतिवृत्तेष्वभावात् । कस्मादभाव ? इत्यत आह—भावे वा प्रत्युत्पन्नत्वाऽऽपातात् ।

अयमभिसन्धिः । न खलु विकल्पानामलीकप्रकाशनेऽपि समानविषयत्वसम्भवः । प्रतिविकल्पमलीकस्याऽभेदात् । ननूक्तं भेदेऽप्यलीकानां यादृशमेको गोविकल्पः कल्पयत्यलीकं तादृशमेवाऽपर इति भेदाऽग्रहादलीकानां भेदा[1]ऽवसाय इति । सत्यमुक्तमिदं त्वालोचनीयम् । किमलीकात्मनामस्ति तत्तिरोहितं स्वरूपं यदेषु प्रथमानेष्वपि न प्रथते, नास्ति वा ? न तावद्वस्तुसतां कल्पनामात्राऽधीनमूर्तीनां कल्पनाऽनुपदर्शितरूपसम्भवः । तस्याऽकल्पितत्वेन वस्तुसतोऽलीकरूपत्वाऽनुपपत्तेः । तस्मादप्रथमानं नास्तीति वेदितव्यम् । तथा च नास्तितैव पारमार्थिकी तेषाम् । अस्तिता पुनः कल्पनामात्रमापतेत् । ननु भेदाऽग्रहादभेदाऽध्यवसायो विकल्पविषयाणामित्यन्य एवैषां विषय आश्रयणीयः । यः शब्दः संसर्गयोग्यः स्यात् प्रतिविकल्पं त्वलीकानां भेदात्स्वलक्षणवदशक्यसमयतया

१ अलीकान्यतमभेदेति २ पु· । पा· ।

अभिलापसंसर्गयोग्यत्वाऽभावेन विकल्पगोचरत्वाऽनुपपत्तेः । न चाऽभेदस्यापि सम्भवः । न खलु कल्पनामात्राऽधीनसत्त्वस्य तद्भेदात् एकत्वमुपपद्यते । तद्धि तस्यां सत्यां तदिव तज्जन्मनि जातमिव तद्विनाशे विनाशि चेति कथं तद्भेदो न भिद्येत । भेदश्चेद्दृश्यसमयतया ऽभिलापसंसर्गयोग्यत्वाऽभावेनाऽलीकं तद्ग्राह्यभावात् स्वलक्षणवन्न विकल्पगोचर इति नाऽऽत्माकारो नाऽलीकं न तद्ग्राह्यता न स्वलक्षणं बुद्धेर्विषयः । सर्वेषामशक्यसमयतया ऽभिलापसंसर्गाऽनर्हत्वात् । न चाऽगोव्यावृत्तिरूपतया ऽलीकानामभेदः केषां चिद्दिति साम्प्रतम् । तत्स्वभावत्वे तेषामन्योन्याश्रयदोषेण ग्रहणाऽभावप्रसाङ्गात् । यथाहाऽभवान्वार्त्तिककारः ।

सिद्धश्च गौरपोह्येत गोनिवृत्यात्मकश्च सः ।
तत्र गौरेव वक्तव्यो ऽन्यतायाः प्रतिषिद्ध्यते ।
गव्यसिद्धे त्वगौर्नास्ति तदभावे न गौः कुतः ॥ इति ।

न चेयमन्यव्यावृत्तिरपि कल्पनानिर्मिता तद्भेदे भेदवती साधारणी भवितुमर्हति । अत एव च विधिरूपमपि विकल्पते गोत्वम् । यत्किल विजातीयमात्रव्यावृत्तं परमार्थसतः सजातीयाऽसजातीय[1]व्यावृत्तात्स्वलक्षणात् भिन्नमप्यभेदेनाऽवसितम् । यथोक्तं 'यथाऽभिनिवेशाऽऽयत्तत्वात् यथातत्त्वं च समीहितत्वा'दिति । तदपि न विकल्पास्पदम् । अस्यापि ज्ञानाऽऽकारस्याऽलीकस्य वा प्रतिविकल्पं भेदेन विकल्पनीयताऽनुपपत्तेः ।

यदि मन्येत यथैवासद् रूपं सदात्मना प्रथते तथैकत्वरहितमप्येकत्वेन प्रकाशते । न चेतावता ऽस्य भेदः । तस्यापि वस्त्वधिष्ठानतया कल्पिते ऽनुपपत्तेः । तस्मादेतद्गोत्वादि न भिन्नं नाप्यभिन्नम्, संभिन्नं तु बाह्यतया प्रकाशते । तथा च सिद्धा ऽभिलापसंसर्गयोग्यता ऽस्येति । तत्किं य एवैकस्य विकल्पस्य विषयः स

१ विजातीय· २ पु. पा· ।

एव विकल्पान्तरस्यापि ? ओमिति चेत् । तस्यापि विकल्पनाऽधीनदेहत्वात् । इदमेव हि कल्पितस्य कल्पनाऽधीनत्वं यत्कल्पनाभेदाऽभेदाद्यनुविधानं नाम । तदनधीनत्वे तु कल्पितत्वाऽनुपपत्तेरनलीकत्वप्रसङ्ग इत्युक्तम् । यच्चाऽलीकस्य न भाविके नाऽनलीकत्वे इति । तत्र सर्वप्रतीयमानाऽवस्थायां त्वापादयामः, न भिन्नकल्पनाऽनुशयि शक्यमेकत्वेन प्रतिपत्तुम् । तदनुपातित्वाऽनुपपत्तेः । कल्पनायां प्रथनान्तरेण तस्य तत्त्वाऽसम्भवात् ।

स्यादेतत् । कल्पनैव स्वहेतोस्तथाभूतोपजाता यया स्वविषयः केषु चिदेक इति केभ्यश्चिद्व्यावर्तत इव प्रदृश्यते । नन्वेवंविधोपि किं विकल्पान्तरविषयो न ? न चेत् नाऽभिलापसंसर्गयोग्यः । तस्याऽदृष्टपूर्वस्याऽशक्य[1]समयत्वात् । विकल्पान्तरविषयत्वे वा तदधीनत्वाऽनुपपत्तिरित्युक्तम् । अपि चाऽत्यन्ताऽसतो गोत्वादेः स्वभावभेदभाजो न प्रकाशसम्भवः । गगननलिननरविषाणादीनामपि नात्यन्ताऽसत्ता । संसर्गभेदमात्रस्याऽसत्त्वात् । संसर्गिणां तु गगनादीनां नलिनादीनां च तत्र तत्र सद्भावात् । संसर्गमात्रस्य च क्व चित्सद्भावात् तत्रापि च कथं चिदुपपत्तेः । अत्यन्ताऽसतां संसर्गभेदानां सद्रूपसंसर्गिभेदाऽधीननिरूपणतया परस्परव्यावृत्तरूपाऽवभाससम्भवात् । इह तु स्वलक्षणज्ञानाऽधीननिरूपणानां गोत्वादीनां स्वलक्षणं, तद्विज्ञानव्यक्तीनामत्यन्तव्यावृत्तेः । भेदे सत्यभिन्नत्वाऽनवभासनात् अर्थक्रियायाश्चैकत्वाऽनुपपत्तेः । अतद्व्यावृत्तेश्च परस्तादाश्रयप्रसङ्गेनाऽनवकल्पनात् । न च कल्पितस्य गोत्वस्य विधिरूपस्याऽन्यव्यावृत्तिरूपस्य वा ऽभिलापसंसर्गयोग्यता । ननु परमार्थसत्सामान्याऽभिधाने ऽपि भावाऽभावसाधारण्यं न कल्पते । तदाश्रयाणां व्यक्तीनां तल्लक्षितानां देशकालविप्रकीर्णतया शब्दार्थस्य भावाऽभावसाधारण्यसम्भवात् । न चाऽत्यन्तवैधर्म्यं व्यक्तीनां, येनाऽन्यव्या-

१ तस्याशक्य॰ २ पु॰ पा॰ ।

आरोपितरूपाऽनुकारित्वात्तत्र कल्पनात्वप्राप्तेः । न ह्यविद्यमानरूपाऽनुकारादन्यो ज्ञानस्याऽऽध्यारोपः । ननु

वृत्तिरेव साधर्म्यममूषामाश्रीयेत । सामान्यस्यैव वस्तुसत आश्रयभूताऽवस्थितस्य समानस्य धर्मस्योपपत्तेः । तद्बाधानिरासश्च निवेदयिष्यते संसर्गपरीक्षायाम् । तत्सिद्धमेतन्नाऽभिलापसंसर्गयोग्यता ज्ञानाऽऽकारा, ऽलीकबाह्यत्वयोरभिलापेनाऽशक्यसमयत्वात् । यदभिलापेनाऽशक्यसमयं न तत्तत्संसर्गयोग्यं, यथा सुखादीनामात्मेति । यथोक्तम् ।

अशक्यसमयो ह्यात्मा सुखादीनामनन्यभाक् ।
तेषामतः स्वसंवित्तिर्नाऽभिजल्पाऽनुषङ्गिणी ॥ इति ।

शक्यसमयतया खल्वभिलापसंसर्गयोग्यता व्याप्ता । अन्यथाऽतिप्रसङ्गात् । सा ज्ञानाऽऽकारा ऽलीकबाह्यताभ्यां निवर्तमाना ऽभिलापसंसर्गयोग्यतामपि निवर्त्तयतीति प्रतिबन्धसिद्धिः । तदिदं प्रसिद्धतरतया दूषणमनुद्भाव्य प्रकृतस्यापि सिद्धिरुद्भाविता ऽऽचार्येण दूषणतयेति ।

नन्वारोपितरूपाऽनुकारिणी कल्पना । न चाऽतीताऽनागतेषु विज्ञानं योगिनस्तथेति न तत्कल्पनेत्यत आह—आरोपितरूपाऽनुकारित्वात् तच्चाऽजाताऽतिवृत्तज्ञाने कल्पनात्वप्राप्तेः । नन्वारोपितरूपाऽनुकारित्वमेवाऽस्याऽसिद्धमित्यत आह—न ह्यविद्यमानरूपाऽनुकारादन्यो ज्ञानस्याऽध्यारोपः । न चेदं विद्यमानम् । उक्तं हि भावे वा प्रत्युत्पन्नत्वाऽऽपातादिति ।

निरधिष्ठान आरोपो ऽतो वस्तुनो ऽन्यरूपप्रतीतिः कल्पना। निरधिष्ठानं तर्हि तैमिरकस्य केशादिज्ञानं प्रत्यक्षम् । अथ तत्र किं चिद्धिष्ठानमुच्यते। खपुष्पमिति तु ज्ञानमकल्पना प्रत्यक्षं स्यात् । सामान्ये च सामान्याऽऽकारा प्रतीतिः स्वसंवित्ताविव तत्राऽनारोपरूपत्वात् । अथ रूप-

चोदयति- ननु निरधिष्ठान आरोपः । यथोक्तम् 'आरोपविषयारोपे वा ज्ञानं रजतभ्रम'मिति । ततः किं? मित्यत आह । अतो वस्तुनः स्वलक्षणस्य परमार्थसतो ऽन्यरूपेण सामान्यरूपेण प्रतीतिः कल्पना । तथा च नाऽजाताऽतिवृत्तः साक्षात्कारो योगिनः कल्पना । न हि तत्राऽजाताऽतिवृत्ते सामान्यरूपतया चकास्त इति । अथैकदेशी परिहरति–निरधिष्ठानं तर्हि तैमिरिकस्य केशादिज्ञानं प्रत्यक्षं प्रसज्येत । चोदकमुत्थाप्य दूषयति-अथ तत्र किञ्चिदालोकांशाद्यधिष्ठानमुच्यते । परमार्थदूषणमाह-खपुष्पमिति तु ज्ञानमविकल्पना यतः प्रत्यक्षं स्यात् । न हि तत्र किं चिदधिष्ठानं सम्भवति । न खलु बौद्धानां मूर्ताऽभावादन्यदस्ति गगनं नाम । अभावश्च सर्वोपाख्याविरहलक्षणो नाऽधिष्ठानं कस्य चिदिति । अपि च सामान्ये सामान्याऽऽकारा प्रतीतिः प्रत्यक्षं स्यात् । नन्वियं ज्ञानाऽऽकारमलीकं वा बाह्य[1]मध्यवस्यन्ती समानाऽऽरोप एवेति कथं न कल्पने? त्यत आह–स्वसंवित्ताविव तत्र सामान्ये अनारोपरूपत्वात्। यथा हि विकल्पविज्ञानं विकल्पनीयग्रहणमपि स्वसंवित्तावकल्पना एवं सामान्यमलीकं वा ज्ञानाऽऽकारं बाह्यमध्यवस्यदेव कल्पना । न तद्रूपमात्रे नाऽऽरोपमपहाय तत्सामान्यरूपमात्राऽऽवेदनं कदा चिदपीति चेत् । अथ विकल्पनीयमपहाय संविद्रूपतावेदनमपि किं कदा चिद्वि-

१ ज्ञानाकारं बाह्यम्॰ २ पु॰ पा॰ ।
२ सामान्यमात्रके॰ २ पु॰ पा॰ ।

मात्रकल्पना, अतीताऽजातादिषु ज्ञानं न कल्पनापोढम्। अथ सामान्याकारप्रतीतिर्वस्तुनि कल्पना तत्प्रत्यक्षं सामान्ये तु भ्रान्तत्वात्।

का पुनरियं भ्रान्तता ? यद्यसदर्थता तुल्येयं सर्ववेकल्पनीयं, समानसमयतया तु तद्वेदनं बाह्यसमारोपसमयसामान्यवेदनेऽपि समानं तत्। तस्मात् स्वसंवित्ताविव सामान्यरूपमात्र[2]विकल्पतया प्रत्यक्षं प्रसज्येतेत्यर्थः।

शङ्कते—अथाऽविद्यमानस्वरूपसामान्यादेः रूपमात्रकल्पनापि भवति कल्पना। न चैवं सति स्वसंवित्तौ कल्पनात्वप्रसङ्गः। विकल्पविज्ञानस्वरूपस्य विद्यमानत्वादिति भावः। निराकरोति—अतीताऽजातादिविज्ञानं कल्पनापोढं तत्प्रतिभासिनो रूपस्य जात्यादेरिवाऽविद्यमानत्वात्।

शङ्कते—अथ सामान्याऽऽकारा प्रतीतिर्वस्तुनि कल्पना समाऽऽरोपरूपत्वात् न प्रत्यक्षम्। अथ मा भूद्वस्तुनि, सामान्ये तु स्यादित्युक्तं, तत्राह—सामान्ये तु भ्रान्तत्वात्। असत्खल्वेतत्सामान्यं विचाराऽसहत्वात्[1]। तत्तद्विषया प्रतीतिरसदर्थतया विभ्रमः। न खलु 'प्रत्यक्षं कल्पनापोढमन्यन्निर्दिष्टलक्षण'मिति प्रणयतो दिङ्नागस्यैव कल्पनापोढमात्रं प्रत्यक्षलक्षणमपि तु तदेवाऽभ्रान्तत्वसहितं प्रत्यक्षलक्षणमिति मन्यते स्म कीर्तिः[2]। यथाह 'प्रत्यक्षं कल्पनापोढमभ्रान्त'मिति। एतेनाऽभ्रान्तविशेषणोपादानेन निरधिष्ठाने केशादिज्ञाने भ्रान्तत्व[3]मप्रत्यक्षतया व्याख्यातम्। तदेतद्विकल्प्य दूषयति—का पुनरियं भ्रान्तता ? यद्यसदर्थता तुल्येयं सर्ववेदने। अजाताऽतिवृत्तयोरसत्त्वात्। अथाऽत्यन्ताऽसदर्थता तैमिरिकस्वप्नादिज्ञानं प्रत्यक्षं प्रसज्येत। तस्याऽर्थस्याऽत्यन्तासत्त्वाऽभावात्। अथाऽर्थक्रियासंवादित्वम-

१ विचारासादत्वात् २ पु॰ पा॰। २ अकीर्तिः॰ २ पु॰ पा॰।
३ ज्ञानं ध्वान्तम्॰ २ पु॰ पा.।

युक्तयाज्यानुवाक्यावचनादीनि च। अत्र प्रेक्षणादेर्व्रीहिगतातिशयद्वारा अवहननादेस्तुषनिर्मोकादिरूपदृष्टद्वारा–व्रीह्यादीनां पिष्टद्वारापुरोडाशनिष्पादकत्वम्,— तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वहेतुत्वञ्च। याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षात्–यागशरीरनिर्वर्तकत्वम्,-तद्द्वारा तदुत्पत्त्यपूर्वोपयोगित्वञ्च। यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात्, द्रव्यदेवते हि यागस्य स्वरूपमिति सिद्धान्ताच्च। (अ) एतान्येव सामवायिकानीत्युच्यन्ते॥

(३५) आराद्युपकारकलक्षणम्

आत्मसमवेतापूर्वजनकानि "आरादुपकारकाणि"(२)। यथा प्रयाजाज्यभागानुयाजादीनि। एतानि द्रव्यगतं देवतागतं वा संस्कारं न जनयन्ति, किन्त्वात्मगतमदृष्टं जनयन्तीत्यारादुपकारकाणि॥

---

(३६) सामान्यतः कर्मणो द्वैविध्यम्

तत्र, सामान्यतः कर्म द्विविधम्(१) अर्थकर्म(२) गुणकर्म चेति। तत्रात्मगतापूर्वजनकं कर्म 'अर्थकर्म'। यथा-अग्निहोत्रं दर्शपूर्णमासप्रयाजादिकम्। 'गुणकर्म' संस्कारजनकम्॥

(३७) गुणकर्मणो द्वैविध्यम्

तच्च द्विविधम् उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकं च। तत्र 'उपयुक्तसं-

---

(अ) सन्निपत्योपकारकाणि॥

स्कारकम्' प्रतिपत्तिकर्म-उपयुक्तस्य (क) आकीर्णाकरस्य द्रव्यस्य विहितदेशेप्रक्षेपः प्रतिपत्तिरिति लक्षणात्। यथा इडाभक्षण-कृष्णविषाणप्रासन-चतुरवत्तहोमादिकम्॥

(३८) होमस्य प्रति॰ पत्तित्वशङ्का-तत्परिहारश्च

ननु—"इडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णाकरपुरोडाशद्रव्यप्रक्षेपात्मकत्वात् प्रतिपत्तित्वं युक्तम्। होमस्य तु यागोपयुक्तद्रव्यसंस्कारकत्वाभावात् कथम् प्रतिपत्तित्वम्? होमस्य यागसमानकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेरुपयुक्तत्वाभात्"—इति चेत्, अत्राहुः—उपयुक्तसंस्कारमात्रम् 'प्रतिपत्तिः', न तु प्रधानयागोपयुक्तत्वम्। (ख) तथा सति, पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालकर्तव्यस्य लोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्,-यागोपयुक्तद्रव्यप्रक्षेपरूपत्वाभावात्। तथा कृष्णविषाणप्रासनस्यापि प्रतिपत्तित्वं न स्यात्,-यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात्। अतो यत्रक्वचनोपयोगमात्रमविवक्षितम्। यत्रक्वचिदुपयोगस्तत्राप्यस्ति-वपाहृदयाद्युद्धरणेनोपयुक्तस्य पशोः सम्बन्धिनः शकृल्लोहितस्याकीर्णाकरस्य प्रतिपत्त्य-

---

(क) प्रक्षेप्तुमर्हस्य।

(ख) 'प्रधानयागोपयुक्तत्वम् प्रतिपत्तित्वम्" इति लक्षणस्वीकारे इति।

पेक्षत्वात्। एवं यथा कथञ्चिदुपयोगो होम-स्थलेऽप्यस्ति॥

(३६) प्रतिपत्तेस्त्रैवि-ध्यम् तथाहि प्रतिपत्तिस्त्रिधा-(१) प्रधानोत्तरकाला,(२) प्रधानसमकाला,(३) प्रधानपूर्वकाला चेति। तत्राऽऽद्या इडाभक्षणादिका। द्वितीया होमादिरूपा। तथाहि दर्शपूर्णमासप्रकरणे श्रूयते-"सकृदुपस्तृणाति", "द्विर्हविषोऽवद्यति", "सकृदभिघारयति", "चतुरवत्तञ्जुहोति"। तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यम् तत्साधनत्वेन न विधीयते, होमस्याप्राप्तत्वेनानुवादासम्भवात्। न च 'यदाग्नेय' इति वाक्याद्धोमप्राप्तिः, तद्वाक्यस्य यागविधायकत्वात्। न च-"यागहोमयोरभेदः" इति-वाच्यम्,-देवतोद्देशेन द्रव्यत्यागस्य यागशब्दार्थत्वात्, प्रक्षेपविशिष्टस्य यागस्य होमशब्दार्थत्वात् तत्राग्नेयचोदनया यागस्य प्राप्तत्वे ऽपि प्रक्षेपांशस्याप्राप्तत्वेनानुवादासम्भवात्। किन्तु-उपस्तरणद्विरवदानाभिघारणवाक्यैः प्राप्तञ्चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो 'जुहोति' इत्यनेन विधीयते। स च संस्कारः प्रतिपत्तिरूप एव। "अग्नये जुष्टमभिघारयामि" इत्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथञ्चिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्य-

पेक्षितया तदवयवसम्बन्धावदानकर्मकप्रक्षेपस्य प्रतिपत्तिकर्मौचित्यात्। स च संस्कारः 'प्रधानसमकालः'। होमो हि--"वषट्कृते जुहोति"इति विधानात्, वषट्कारोत्तरक्षणे अध्वर्युणा कर्तव्यो यागोऽपि तस्मिन्नेव क्षणे यागस्य स्मरणार्थत्वेन वषट्कारेण स्मारितः सन्,-यजमानेनानुष्ठेय इति (अ)तयोर्यौगपद्यसम्भवात्। तदिदं सर्वम् प्रधानाधिकरणवार्तिके स्थितम्। 'प्रधानपूर्वकाला' प्रतिपत्तिर्यथा-"शकृत्सम्बिध्यति, लोहितं निरस्यति"-इति शकृत्सम्प्रवेधन-लोहितनिरसने। इदमपि "पशावनालम्भात् लोहितशकृतोरकर्मत्वम्",-इत्यधिकरणे स्थितम्॥

(४०) उपयोक्ष्यमाणसंस्कारोपपादनम्

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः-(१) 'साक्षाद्विनियुक्तसंस्कारः',(२) 'साक्षाद् विनियुक्तस्य यदुपकारकम् तत्संस्कारः',(३)'विनियोक्ष्यमाणसंस्कारश्चेति'। तत्र आद्यो यथा-"व्रीहीनवहन्ति"इत्यादिः। "व्रीहिभिर्यजेत"इति वाक्याद् विनियुक्तव्रीहीणामवहननसंस्कारः। द्वितीयो यथा-"वत्समालभेत"-इति। दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्योपकारको वत्सः, तत्संस्कारकमिदमालम्भनम्। तृतीयो यथा-"तप्ते पयसि दध्या-

(अ) होमयागयोः।

नयति" इति। अत्र "सा वैश्वदेव्यामिक्षा" इति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत् पयः तत्संस्कारकत्वाद् विनियोक्ष्यमाणसंस्कारकत्वध्यानयनम्॥ पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः, त्यागांशे ऽदृष्टार्थश्च। अत्र (क) तत्संस्कार्याग्नीषोमीयदेवताया वपायागे उपयुक्तार्थत्वात्, हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च। स्विष्टकृद्यागो द्रव्यांशे देवतांशे चोपयुक्तसंस्कारार्थः, त्यागांशे ऽदृष्टार्थश्च। सूक्तवाकसाधनप्रमाणमपि तथैवोत्तमप्रयाजे उपयोक्ष्यमाणदेवतासंस्कारत्वात् तदंशे उपयोक्ष्यमाणसंस्कारः, इतरांशे ऽदृष्टार्थः। हृदयादिह विर्योगात पूर्वं क्रियमाणो वसाहोमोऽपि वसांशे प्रतिपत्तिः, इतरांशेऽदृष्टार्थ इत्याद्यूह्यम्॥

(४१) प्रतिपत्तिकर्मलक्षणान्तरम्

केचित्तु-"उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वम् प्रतिपत्तिकर्मत्वम्। चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमे उपयोक्ष्यमाणत्वाभावात्, तद्भिन्नत्वं होमेऽस्तीति लक्षणसङ्गतिः। अत्रायं विशेषः-अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यम्। कर्मणि द्रव्यस्य गुणत्वात्। यथाऽग्निहोत्रादौ दध्यादेर्गुण-

(क) पशुपुरोडाशयागे।

त्वम् । गुणकर्मणि द्रव्यस्य प्राधान्यम्; द्रव्ये च कर्मणो गुणत्वम्,—"व्रीहीन् प्रोक्षति अवहन्ति"इत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः । क्रियापेक्षया द्रव्यस्य प्राधान्यम्; प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वम्' इति ॥

(४२) गुणकर्मणः प्रकारान्तरेण चातुर्विध्यम्

पुनरपि गुणकर्म चतुर्विधम्—उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् । तत्र(१) उत्पत्तिसंस्कारो यथा—"अग्नीन् आदधीत"इति मन्त्रविशेषैः (१)सम्भारेषु निधापिता अपि आहवनीयादय उत्पद्यन्त-इत्याहवनीयाद्युत्पत्तिहेतुभूतसंस्कारजनकत्वादाधानस्य उत्पत्तिसंस्कारत्वम् । (२) आप्तिसंस्कारो यथा "स्वाध्यायोऽध्येतव्य"इति अध्ययनेन स्वाध्याय आप्यते—इत्याप्तिसंस्कारोऽयम् । (३) विकृतिर्यथा-"व्रीहीन् अवहन्ति"इति । अत्र व्रीहिगतवैतुष्यरूपविकृतिजनकत्वादवहननं विकृतिसंस्कारकम् । (४) संस्कृतिर्यथा-"व्रीहीन् प्रोक्षति"इति । अत्र प्रोक्षणस्य व्रीहिगतातिशयरूपसंस्कृतिजनकत्वात् संस्कृतिरूपगुणकर्मत्वम् । अत्र आधानमध्ययनञ्च स्वतन्त्रं गुणकर्म, न तु क्रत्वङ्गम् । प्रोक्षणादिकं सर्वं क्रत्वङ्गं गुणकर्मेति ध्येयम् ॥

---

(१) कुण्डेषु ।

(४३) अर्थकर्मणस्त्रैविध्यम्

अर्थकर्म त्रिविधम्-नित्यनैमित्तिककाम्यभेदात्। तत्र-"यावज्जीवमग्निहोत्रञ्जुहोति", "सायञ्जुहोति", "प्रातर्जुहोति"-इतिजीवता पुरुषेण सायम्प्रातःकालयोर्नियमेन कर्तव्यतयाऽवगतमग्निहोत्रादिकन्नित्यम् (१) । "अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्"-इति[२] दर्शपूर्णमासातिपत्तिनिमित्तकपथिकृदिष्ट्यादिकं नैमित्तिकम्(२)। नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव, कृते फलन्नास्तीति-केचित्। अन्ये तु-दुरितनिवृत्तिः फलमस्ति, "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्" इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात्-इति । न च-"एवं तयोरपि काम्यत्वापत्तिः, फलवत्त्वात्" इति वाच्यम्, फलकामनापूर्वकानुष्ठानाभावात् तत्तद्विधिवाक्ये फलकाममुद्दिश्य तत्तदर्थफलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः ॥

(४४) काम्यकर्मणस्त्रैविध्यम्

काम्यमपि कर्म त्रिविधम्-(१) केवलमैहिकफलकम् (२) आमुष्मिकफलकम्, (३) ऐहिकामुष्मिकफलकञ्चेति । (१) तत्राद्यं यथा-[३] कारीर्यादि तत्तत्समयवर्तिशुष्य-

(२) अतिपत्तिः विघ्नः ।

(३) "आसन्नवृष्टिकामः कारीर्या यजेत" इति श्रुतेः ।

त्सस्यसञ्जीवनहेतुवृष्टिकामिना क्रियते, न कालान्तरवृष्टिकामेन जन्मान्तरीयवृष्टिकामेन वा। (२) केवलामुष्मिकफलकं यथा—स्वर्गाद्यर्थदर्शपूर्णमासादिकम्, स्वर्गस्येहलोकभोग्यत्वाभावात्। (३) ऐहिकामुष्मिकसाधारणफलकं यथा-"वायव्यं श्वेतमालभेत भूतिकाम" इति भूत्यादिफलकम्, इत्यन्यत्र विस्तरः॥

(४५) यागादीनां लौकिकत्वेऽपि वेदस्यालौकिकबोधकत्वम्

"ननु-दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणाञ्च प्रत्यक्षत्वे लौकिकत्वात्, कथं वेदस्यालौकिकार्थबोधकत्वम्?"-इति चेत्,-न कर्मणामप्रत्यक्षत्वे ऽपि तेषां स्वर्गादिफलसाधनत्वमप्रत्यक्षम्, इति 'तत्फलसाधनतया तत् कर्म कर्तव्यम्' इत्येवं फलसाधनतयकर्मकर्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधकत्वात्। एवं व्रीह्यादीनां यागादिक्रियासाधनत्वञ्च प्रत्यक्षवेद्यम्, इति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वम्, इति न कश्चिद्दोषः॥

---

(४६) विधिवाक्यस्य विधायकत्वप्रकारः

इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते। तत्र "स्वर्गकामो यजेत" इत्यत्र 'यजि'-धातोरुपरितने 'त'-प्रत्यये धर्मद्वयमस्ति-आख्यातत्वम् लिङ्त्वञ्च। तत्र आख्या-

तत्वं सर्वलकारसाधारणम्। (अ)तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपामर्थभावनाम् प्रतिपादयति॥

(४७) अर्थवानाया अंशत्रयम्

सा चार्थभावना-किम्? केन? कथम्? इति-अंशत्रयविशिष्टा। तथा हि यजेत'इत्यत्र प्रथमम्प्रत्ययेन 'भावयेत्' इति प्रतीयते,-सुबन्ताभिहितानां सर्वेषाङ्कारकाणान्तिङन्तार्थक्रियान्वयनियमे सति, तिङन्तार्थस्य प्राधान्यात्। तत्र प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात् प्रथमम् प्रत्ययार्थभावनाया उपस्थितिर्युक्ता। (१) ततः करोतिसमानार्थकभावयतेः सकर्मकत्वात्--'किम्भावयेत्?' इति-कर्माकाङ्क्षायाम् भिन्नपदोपात्तो ऽपि स्वर्गो भाव्यत्वेनान्वेति,-(क)न तु समानपदोपात्तोऽपि भागो भाव्यत्वेनान्वेति, दुःसाध्यात्मकस्य यागस्य ईप्सिततमत्वरूपकर्मत्वायोग्यत्वात्, स्वर्गस्य त्वानन्दात्मकत्वेन ईप्सिततमतया कर्मत्वेनान्वययोग्यत्वात्। ततश्च 'स्वर्गम्भावयेत्'इति बोधो भवति॥ (२) ततः 'केन?' इति करणाकाङ्क्षायां, समानपदोपात्तो यागो करणत्वेनान्वेति—'यागेन स्वर्गङ्कुर्यात्, इति॥ (३ ततः-'कथम् यागेन स्वर्ग-

(अ) आख्यातत्वेन।

(क) कर्मत्वेनेत्यर्थः, साध्यत्वेनेति यावत्।

कुर्यात्?' इति—कथम्भावाकाङ्क्षायाम्, अग्न्यन्वाधानावहननादिजन्यदृष्टोपकारेण प्रयाजादिजनितादृष्टोपकारेण सहितेन यागेन स्वर्गङ्कुर्यात् इति,—अग्न्यन्वाधानप्रयाजादिकमङ्गजातम् इतिकर्तव्यतयाऽन्वेति। कथम्भावाकाङ्क्षापूरकत्वम् 'इतिकर्तव्यतात्वम्'। यथा 'ओदनकामः पचेत्' इत्यत्र लिङा भावना प्रतीयते। किम्भावयेत्? इत्याकाङ्क्षायाम्, ओदनो भाव्यत्वेनान्वेति। केन? इत्याकाङ्क्षायाम् 'पाकेन' इति लभ्यते। 'कथम्' इत्याकाङ्क्षायाम्, तृणफूत्कारसहितेनेति। ततश्च 'तृणफूत्काराद्युपकृतेन पाकेन तेजःसंयोगेन ओदनम्भावयेत्' इति वाक्यार्थः सम्पद्यते। तद्वद्वेदेऽपि बोध्यः॥

(४८) शब्दभावना

स एव लिङ्प्रत्ययो लिङ्त्वावच्छेदेन शब्दभावनां प्रेरणाख्यामभिधत्ते। लोकेऽपि—"गामानय"-इत्याद्याचार्यवाक्यश्रवणानन्तरम् "अयमाचार्यो माङ्गवानयने प्रेरयति" इति प्रेरणाख्यव्यापारं ज्ञात्वैव शिष्यो गवानयने प्रवर्तते,—इत्यन्वयव्यतिरेकाभ्याम् प्रेरणाज्ञानम् प्रवृत्तिकारणम्। प्रेरणाज्ञानस्य चान्वयव्यतिरेकाभ्यां लिङादिश्रवणजन्यत्वावधारणात् लिङादेः प्रेरणायां शक्तिर्लोके गृह्यते, इति वेदेऽपि तत्रैव शक्ति-

कल्पनौचित्यात् । इयांस्तु विशेषः—लोके गवानयनादिप्रवृत्त्यनुकूलप्रेरणाख्यो व्यापारः प्रयोक्तृपुरुषगताभिप्रायविशेषः; वेदे तु प्रयोक्तृपुरुषाभावात् लिङादिशब्दनिष्ठ एव स इत्यङ्गीक्रियते । अत एव शब्दनिष्ठव्यापारत्वात् शाब्दीभावनेत्युच्यते । यागहोमादिविषयप्रवृत्तिहेतुत्वात् 'प्रवर्तना', 'प्रेरणा' इति चोच्यते ॥

(४६) शब्दभावनायाश्अंशत्रयम्

सैषा[अ] शब्दभावनाऽप्यंशत्रयविशिष्टा—तत्र, पुरुषप्रवृत्तिरूपाऽर्थभावना भाव्यत्वेनान्वेति, अध्ययनावगतलिङादिकङ्करणत्वेनान्वेति, अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति । तत्र साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद्व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैः यागाद्यर्थङ्कर्तव्यत्वेन बुध्वा यागादीननुतिष्ठेरन् [क]—इति शब्दभावनाबोधः तेन पुरुषप्रवृत्तौ शब्दभावनाभाव्यत्वमवगतम् ॥

(अ) "लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः । सम्बन्धबोधः करणान्तदीयम्प्ररोचना चाङ्गतयोपयुज्यते" ॥

(क) अनुष्ठानङ्कुर्युरित्यर्थः, अनुष्ठानम्प्रवृत्तिः ।

(५०) ज्योतिष्टोमादिषु शब्दभावनायाः कर्तव्यत्वेन न प्रतीतिः

इयञ्च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु[१] स्वरूपेण प्रतीयमानाऽपि कर्तव्यत्वेन न प्रतीयते। अर्थभावनाया एव तेषु कर्तव्यत्वावगमात्,--किन्तु "स्वाध्यायोऽध्येतव्यः" इति वाक्ये[२] एव कर्तव्यत्वेन प्रतीयते। न च-'अत्र अर्थभावनाया एव विधेयत्वम्' इति-वाच्यम्; "स्वाध्यायोऽध्येतव्यः" इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्य शब्दभावनारूपत्वात्। तथा हि-अधिपूर्वकात् "इङ्-अध्ययने" इति धातोः कर्मणि 'तव्य' प्रत्ययो विहितः; कर्म च स्वाध्यायः प्रधानम्; तत्संस्कारमध्ययनङ्गुणकर्म, व्रीहिसंस्कारप्रोक्षणादिवत्। अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगतलिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकं यागादिरूपार्थज्ञानम्, तदेव दृष्टत्वात् तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयःसाधनत्वाच्च प्रयोजनम्; कर्मावबोधं विना कर्मानुष्ठानायोगात्। न त्वदृष्टम्प्रयोजनम्, दृष्टफले सम्भवति अदृष्टफलकल्पनायोगात्। तथा च स्वाध्यायविधिनैव स्वाध्या-

(१) अधिकारविधिषु।
(२) अध्ययनविधौ।

यगतविधिवाक्यगतलिङादिप्रतिपादिताः सर्वाः शब्दभावना अंशत्रयविशिष्टाः कर्तव्यत्वेन विधीयन्ते—साङ्गवेदाध्ययनव्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्तव्यताम् बुध्वा यागादीननुतिष्ठेयुः इति। 'अनुतिष्ठेयुः' प्रवृत्तिं कुर्युरित्यर्थः । तत्र[1] पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करणत्वेनान्वयात्, प्राशस्त्यज्ञानस्येतिकर्तव्यतात्वेनान्वयात्, शब्दभावनाया अपि अंशत्रयवैशिष्ट्यम्—अर्थभावनाया इव—इष्टम् । [2] तत्र समीहितस्वर्गादिभाव्यकत्वभानमपि विधिवशादेव । प्रवर्तनायाम् विधिः[3] यागादेः पुरुषार्थासाधनत्वे तत्र पुरुषम्प्रवर्तयितुन्न शक्नोति, इति स्वभाव्यपुरुषप्रवृत्तिविषयस्य यागादेः पुरुषाभिलषितस्वर्गादिसाधनत्वमापादयति। अन्यथा स्वस्य प्रवर्तनात्वमेव न स्यात्, प्रवृत्तिहेतुव्यापारस्यैव प्रवर्तनात्वात् । लङादि स्थले तु प्रवर्तनात्मकविधेरभावादर्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति ॥

---

(१) शब्दभावनायाम् ।
(२) अर्थभावनायाम ।
(३) 'प्रवर्तनायां विधिः' इत्यस्य 'आपादयति' इत्यनेनान्वयः ।

(५१) भावनालक्षणम्

'भावनात्वम्' नाम भवितुः प्रयोजकव्यापारत्वम्। तत्र अर्थभावनायाम् भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वाल्लक्षणसङ्गतिः। शब्दभावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वाल्लक्षणसङ्गतिः॥

(५२) ज्योतिष्टोमादिविधे लक्षणस्याव्याप्तिशङ्का ज्योतिष्टोमादिपदानां नामत्वेन तद्वारणञ्च

ननु—"ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यत्र 'यागेन स्वर्गम्भावयेत्' इत्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वयः?" इति चेत्,—न, भावनाकरणत्वेनाभिमतयागनामत्वेनान्वयात्—'ज्योतिष्टोमनामकेन यागेन' इति॥

(५३) ज्योतिष्टोमादिपदानां यागनामत्वसाधनम्

"कथन्तन्नामत्वम्" इति चेत्—न, 'ज्योतिराख्याः त्रिवृदादिस्तोमाः अस्मिन् सन्ति' इति व्युत्पत्त्या यागनामत्वात्। "यागस्य त्रिवृदादिस्तोमसम्बन्धः केनावगम्यते" इति चेत्—न, "त्रिवृत् पञ्चदशः सप्तदशः स्तोमाः"-इतिवाक्यान्तरेण एतच्छब्दार्थस्य तत्सम्बन्धावगमात्॥

(५४) नामत्वसाधनभूततत्प्रख्यादिन्यायव्युत्पादनं तत्र प्रथमं तत्प्रख्यप्रदर्शनम्

एवं शास्त्रोक्तैस्तत्प्रख्यादिभिर्हेतुभिस्तत्र नामत्वम् बोध्यम्। शास्त्रे हि तत्प्रख्य-तद्व्यपदेश- यौगिक-वाक्यभेदैश्चतुर्भिर्नामत्वम् प्रतिपादितम्। तथा हि (१) "अग्निहोत्रं जुहोति" इत्यत्र अग्निहोत्रशब्देन अग्निदेवतारूपो गुणो न विधीयते,—"अग्निर्ज्योति

ज्योतिरग्निः स्वाहेति सायञ्जुहोति" इति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात्,- किन्तु अग्निप्रख्यापकम् अग्निप्रापकम् यच्छास्त्रान्तरम्—"अग्निर्ज्योतिर्ज्योतिरग्निः"- इत्यादिकम्—तेन प्राप्तमग्निसम्बन्धन्निमित्तीकृत्य, 'अग्नये होत्रम् होमोऽस्मिन्' इति बहुव्रीहिणाऽग्निहोत्रपदस्य होमनामधेयत्वम्। न च—"होमस्य (अ) प्रत्ययवाच्यायाम् अर्थभावनायाङ्करणत्वात् तन्नामत्वेऽग्निहोत्रेणेति तृतीया स्यात्, ज्योतिष्टोमेनेतिवत्" इति—वाच्यम्, द्वितीयाया एव लक्षणया करणार्थकत्वात्, "नासाधितं करणम्"—इतिन्यायेनासाधितस्य करणत्वायोगात्, अर्थात्प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायेनात्र नामत्वम्।

(५५) द्वितीयं तद्व्यपदेशदर्शनम्

(२) तथा "श्येनेनाभिचरन् यजेत" इत्यत्र श्येनपदं यागनामधेयम्, न तु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः, "यथा ह वै श्येनो निपत्याऽऽदत्ते एवमेवायन्द्विषन्तम्भ्रातृव्यन्निपत्याऽऽदत्ते" इत्युपमानोपमेयव्यपदेशा-

---

(अ) आख्यातत्वेन लकारवाच्यायम्।

दग्धबीजकल्पान् संस्काराजनकत्वरूपाप्रसवधर्मिणः करिष्यति। न च तनूकरणाभावेण कथं प्रसङ्ख्यानाग्निना दाहः, कश्च तनूकरणस्योपयोग इति वाच्यम्। तनूकरणात् पुनः क्लेशैरनभिभूतायाः सत्त्वपुरुषान्यताख्यातिमात्ररूपायाः सूक्ष्मविषयत्वात्सूक्ष्मायाः साक्षात्काररूपप्रज्ञायाः क्रमेण समाप्तकर्तव्यायाश्चरमासम्प्रज्ञाते प्रविलयरूपप्रतिप्रसवस्य जननाद् विदेहकैवल्यप्राप्तेः। तनूकरणं हि दौर्बल्यसंपादनेन तदनभिभवायेति बोध्यम्। एवं च क्रियायोगो ज्ञानादिसाधनमेव न साक्षान्मोक्षहेतुरिति सिद्धान्तः। अत्रेदं बोध्यम्। क्रियायोगस्य क्लेशतानवं दृष्टादृष्टद्वारा फलम्। अभिमानरागद्वेषादिप्राबल्ये क्रियायोगासम्भव एव, सम्भवे वाऽङ्गविकल इति साङ्गस्वनिष्पत्तये क्लेशतानवं करोति। एवं तेन चित्तशुद्धात्रधर्माख्यकारणतानवादविद्यादेरपि तानवं भवति। एवं योगोऽपि तस्य दृष्टादृष्टद्वारा फलम्। तत्र सत्त्वशुद्धिरदृष्टं द्वारम्। दृष्टं तु चित्तनियमनम्। एवमनेन तत्तानवे सत्यन्तराक्लेशैरप्रतिबद्धो योगी विवेकख्यातिपर्यवसायी भवति। ततस्तेन साक्षात्कारेणाग्निदग्धबीजकल्पाः क्लेशाः प्ररोहसमर्था न भवन्तीत्येषा जीवन्मुक्तिः। ततः प्रारब्धसमाप्त्या सम्प्रज्ञातेन चित्तेन सह दग्धबीजकल्पा अनागतावस्थाः सूक्ष्मक्लेशास्तत्कारणे लीयन्ते। ततः कारणाभावात्पुनर्जन्माभाव इति परममुक्तिः। न च ज्ञानाच्चित्ते विद्यमान एव क्लेशानां नाशोऽस्तु, किं दाहकल्पनया। कार्यानागतावस्थाया एव कारणशक्तित्वेन शक्तेश्चाग्न्यादौ यावद्द्रव्यभावितया दृष्टत्वेन, चित्ते विद्यमाने तन्नाशासम्भवेन दाहकल्पनादिति दिक्।

अथ क्लेशाः के कियन्तश्च तदाह।

**अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥ ३ ॥**

एते पञ्च[1] संसारहेतुविपर्ययरूपाः क्लेशा इत्यर्थः। क्लिश्नन्ति

१ पञ्चेति पदमाधिकं बहुषु पुस्तकेषु, युक्तं च भाति।

जन्मादि प्रापयन्तीति व्युत्पत्तेः। रागादीनां च विपर्ययकार्यतया विपर्ययत्वं बोध्यम्। संसारहेतुविपर्ययत्वं चादृष्टसामान्यहेतुकमतो विशेषगुणत्वम्। ननु कथमेषां क्लेशत्वं किमर्थं वा तदुच्छेदोऽपेक्षित इति चेत्। शृणुत। एते क्लेशाः स्यन्दमाना लब्धवृत्तिका दृष्टादृष्टद्वारा गुणानां सत्वादीनां कार्यारम्भणरूपं सामर्थ्यं बलवत्कुर्वन्ति, तथा गुणानां वैषम्यरूपं परिणामं निर्वर्त्तयन्ति। ततश्च महदादिकार्यकारणप्रवाहं प्रवर्त्तयन्ति। ततोऽविद्यातो रागो, रागाच्चाविद्येत्येवं परस्परानुग्रहाधीना भूत्वा जात्यायुर्भोगरूपं कर्मविपाकं निष्पादयन्ति। अन्योन्यसाहित्येनैव स्थिराः सन्तस्ते विपाकपरम्परानिर्वाहका इति दुःखरूपत्वात्तेषां क्लेशत्वे दुःखनिदानत्वाच्च ते समुच्छेत्तव्या इति सिद्धम्। तेषां सर्वेषां वक्ष्यमाणज्ञाननाश्यतोपपत्तयेऽविद्यामूलकत्वमाह।

**अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥४॥**

निमित्तकारणस्यापि प्रसवभूमित्वरूपं क्षेत्रत्वं प्राधान्यमात्रेण गौणम्। एषां मध्येऽविद्या क्षेत्रं प्रसवभूमिरुत्तरेषां प्रत्येकं प्रसुप्तादिचतुर्भेदानामस्मिताऽऽदीनामीत्यर्थः। सर्वेषामविद्यासत्त्वे सत्त्वात् तदभावे चाभावात्। तत्र प्रसुप्तत्वं चेतसि शक्तिमात्रेणानागतावस्थयाऽवस्थितानां स्वकार्यजननसामर्थ्यं यत्तद्रूपम्। कार्यस्यानागतावस्थैव हि कारणे शक्तिः। तद्वत्त्वमेव चोपादानत्वम्। न च कदाचित्प्रबोध एव कारणसुप्तिः सम्भवति। न चैषां स इति वाच्यम्। सुप्तक्लेशस्यालम्बने स्वस्वविषये ऽभिव्यक्तेरेव तत्प्रबोधत्वात्। न च दग्धबीजभावाख्यपञ्चम्यवस्थायामतिव्याप्तिः। तदा स्वकार्यजननसामर्थ्यरूपबीजभावोपगमाभावात्। तथा हि। विवेकसाक्षात्काररूपप्रसङ्ख्यानवतो दग्धक्लेशबीजस्य जीवन्मुक्तस्य सन्निकृष्टेऽप्यालम्बने विषये क्लेशानां नोत्पत्तिर्दग्धबीजस्य

प्ररोहाभावेन कारणाभावात् । अन्यथा पुनःप्ररोहे देहान्तरोत्पत्त्या क्षीणक्लेशकुशलपुरुषदेहस्य चरमदेहत्वानुपपत्तिः । चरमदेह एव च दग्धबीजभावरूपा पञ्चम्यवस्था नान्यत्रेति न सा क्लेशेषु गणिता । न च जीवन्मुक्तानां विषयसन्निकर्षेऽपि क्लेशानभिव्यक्त्या क्लेशसंस्काराभाव एवास्तु विदेहकैवल्य इति वाच्यम् । अग्न्यादौ दाहादिशक्तेर्यावद्द्रव्यभावितादर्शनात् । चित्तेन सहैव क्लेशशक्तेरशेषतो नाशसम्भवेन तदा कार्यजननसामर्थ्यदाहस्यैव स्वीकारात् । अतस्तदा विषयसन्निकर्षेऽपि नैषां प्रबोध इति दिक् । तनुत्वं तु प्रतिपक्षानुष्ठानेन विवेकख्यातिप्रतिबन्धाक्षमत्वम् । तथा हि । सम्यग्दर्शनमविद्याप्रतिपक्षः । भेददर्शनमस्मितायाः । अहेयानुपादेयताज्ञानरूपं माध्यस्थ्यं रागद्वेषयोः । उपकरणाख्यानुबन्धबुद्धिनिवृत्तिरभिनिवेशस्येति बोध्यम् । निवृत्तिस्तु क्लेशानामन्यतमेनाभिभवादत्यन्तविषयसेवनाद्विच्छिद्य विच्छिद्य पुनः पूर्ववदतनुभावेनाविर्भावः । वाजीकरणाद्युपयोगादिनेव प्रसुप्तिर्हि क्लेशानां व्यञ्जकविलम्बेनैकद्वित्रजन्मादिबहुकालं व्यापारानभिव्यक्तिः । इयन्तु स्वल्पप्रतिबन्धेन व्यञ्जकसत्त्वेऽप्यल्पकालमन्तराऽन्तराऽनभिव्यक्तिरिति प्रसुप्तितो भेदः । ननु विच्छेदे किं प्रमाणमिति चेत् । रागकाले क्रोधस्यादर्शनम् । न च तदा क्रोधस्याभावः । असत्कार्यानभ्युपगमेन पुनः क्रोधानापत्तेः । एवं क्रोधकाले रागस्यादर्शनम् । क्रोधेन मिष्टान्नस्यापि त्यागात् । क्रोधरागयोर्विरोधात् । कस्य चिदेकस्यां स्त्रियां रागो दृश्यते, न हि तदाऽन्यस्यां नास्ति । कालान्तरेऽनुत्पत्त्यापत्तेः । असदुत्पादासम्भवात् । तस्मात्तदा विषयान्तररागेण विच्छिन्न इत्येव । उदारता तु विषये लब्धस्वाभाविकवृत्तित्वरूपमभिव्यक्तत्वम् । न च प्रसुप्तविच्छिन्नयोः कथं क्लेशत्वं दुःखाजनकत्वादिति वाच्यम् । सर्वेषां क्लेशजननयोग्यत्वानतिक्रमात् ।

उदारावस्थया तेषां दुःखजनकत्वात्। ननु प्रतिक्लेशव्यक्तीनां कालभेदे नेदं चातूरूप्यमस्तीति कथमेतैः क्लेशानां विभाग इति चेन्न। तत्तदवस्थाविशिष्टक्लेशव्यक्तीनामेव विच्छिन्नादित्वस्य विवक्षितत्वात्। यथा पुरुषस्य बालतरुणवृद्धरूपो विभागः। न चोदारावस्थायां किं कारणम्। स्वव्यञ्जकविषयध्यानमिति गृहाण। तद्रूपाञ्जनाद्धि तस्याभिव्यक्तिः। यथा प्रतिपक्षभावनात्तन्निवृत्तिः। एवं च प्रतिपक्षभावनाद्विषयसंयोगोऽपि त्याज्यः। न च निमित्तकारणस्य कथं क्षेत्रत्वम्। सर्वेषामेषामविद्याभेदत्वात्। न च रागादीनां ज्ञानत्वाभावात्कथमविद्यात्वम्। सर्वेषामविद्यामूलकत्वात्। यद्ध्यविद्याविषयस्तदनुगतत्वाद्रागादीनाम्। यतो विपर्यासप्रत्ययरूपाविद्याकाल उपलभ्यन्ते, तत्क्षये च क्षीयन्त इति दिक्।

तत्राविद्यास्वरूपमाह।

**अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥**

अनित्यादिचतुष्टये नित्यादिबुद्धिरित्यर्थः। तत्र कालनिष्ठाभावप्रतियोगित्वरूपानित्यत्ववति कार्ये नित्यत्वख्यातिर्नित्यत्वज्ञानम्। यथा ध्रुवा पृथ्वी। ध्रुवा सचन्द्रतारका द्यौः। अमृता दिवौकस इति। ध्रुवत्वं नित्यत्वम्। केचिद्धि भूतानि चन्द्रतारकाद्युलोकान्देवाँश्च नित्यान्मन्यमानास्तत्तद्रूपप्राप्तये तान्युपासते, सोमपानादि च कुर्वन्ति तथा प्रपञ्चज्ञानस्यासति सदाकारत्वात्सम्पूर्णः प्रपञ्च एवाविद्यक इति श्रुतिषु प्रसिद्धम्। असत्त्वं च प्रागुक्तानित्यत्वमेव शुक्तिरजतादिज्ञानवदेव प्रपञ्चज्ञानम्। असति सद्बुद्धिरूपाविद्यैव च सर्वप्रपञ्चकारणम्। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति" श्रुत्याऽपि प्रपञ्चस्येदृशमेवासत्यत्वमुच्यत इति दिक्। तथा शुचावपवित्रे परमबीभत्से काये शुचित्वख्यातिर्यथा नवशशाङ्कलेखेव कमनीयेयं कन्येत्यादि। उक्तं च।

प्ररोहाभावेन कारणाभावात्। अन्यथा पुनःप्ररोहे देहान्तरोत्पत्त्या क्षीणक्लेशकुशलपुरुषदेहस्य चरमदेहत्वानुपपत्तिः। चरमदेह एव च दग्धबीजभावरूपा पञ्चम्यवस्था नान्यत्रेति न सा क्लेशेषु गणिता। न च जीवन्मुक्तानां विषयसन्निकर्षेऽपि क्लेशानभिव्यक्त्या क्लेशसंस्काराभाव एवास्तु विदेहकैवल्य इति वाच्यम्। अग्न्यादौ दाहादिशक्तेर्यावद्द्रव्यभावितादर्शनात्। चित्तेन सहैव क्लेशशक्तेरशेषतो नाशसम्भवेन तदा कार्यजननसामर्थ्यदाहस्यैव स्वीकारात्। अतस्तदा विषयसन्निकर्षेऽपि नैषां प्रबोध इति दिक्। तनुत्वं तु प्रतिपक्षानुष्ठानेन विवेकख्यातिप्रतिबन्धाक्षमत्वम्। तथा हि। सम्यग्दर्शनमविद्याप्रतिपक्षः। भेददर्शनमस्मितायाः। अहेयानुपादेयताज्ञानरूपं माध्यस्थ्यं रागद्वेषयोः। उपकरणाख्यानुबन्धबुद्धिनिवृत्तिरभिनिवेशस्येति बोध्यम्। निवृत्तिस्तु क्लेशानामन्यतमेनाभिभवादत्यन्तविषयसेवनाद्वा छित्त्वा विच्छिद्य पुनः पूर्ववदतनुभावेनाविर्भावः। वाजीकरणाद्युपयोगादिनेव प्रसुप्तिर्हि क्लेशानां व्यञ्जकविलम्बेनैकद्वित्रजन्मादिबहुकालं व्यापारानभिव्यक्तिः। इयन्तु स्वल्पप्रतिबन्धेन व्यञ्जकसत्त्वेऽप्यल्पकालमन्तराऽन्तराऽनभिव्यक्तिरिति प्रसुप्तितो भेदः। ननु विच्छेदे किं प्रमाणमिति चेत्। रागकाले क्रोधस्यादर्शनम्। न च तदा क्रोधस्याभावः। असत्कार्यानभ्युपगमेन पुनः क्रोधानापत्तेः। एवं क्रोधकाले रागस्यादर्शनम्। क्रोधेन मिष्टान्नस्यापि त्यागात्। क्रोधरागयोर्विरोधात्। कस्य चिदेकस्यां स्त्रियां रागो दृश्यते, न हि तदाऽन्यस्यां नास्ति। कालान्तरेऽनुत्पत्त्यापत्तेः। असदुत्पादासम्भवात्। तस्मात्तदा विषयान्तररागेण विच्छिन्न इत्येव। उदारता तु विषये लब्धस्वाभाविकवृत्तित्वरूपमभिव्यक्तत्वम्। न च प्रसुप्तविच्छिन्नयोः कथं क्लेशत्वं दुःखाजनकत्वादिति वाच्यम्। सर्वेषां क्लेशजननयोग्यत्वानतिक्रमात्।

उदारावस्थया तेषां दुःखजनकत्वात् । ननु प्रतिक्लेशव्यक्तीनां कालभेदे नेदं चातूरूप्यमस्तीति कथमेतैः क्लेशानां विभाग इति चेन्न । तत्तदवस्थाविशिष्टक्लेशव्यक्तीनामेव विच्छिन्नादित्वस्य विवक्षितत्वात् । यथा पुरुषस्य बालतरुणवृद्धरूपो विभागः । न चोदारावस्थायां किं कारणम् । स्वव्यञ्जकविषयध्यानमिति गृहाण । तद्रूपाञ्जनाद्धि तस्याभिव्यक्तिः । यथा प्रतिपक्षभावनात्तन्निवृत्तिः । एवं च प्रतिपक्षभावनाद्विषयसंयोगोऽपि त्याज्यः । न च निमित्तकारणस्य कथं हेयत्वम् ; सर्वेषामेषामविद्याभेदत्वात् । न च रागादीनां ज्ञानत्वाभावात्कथमविद्यात्वम् । सर्वेषामविद्यामूलकत्वात् । यद्वाविद्याविषयस्तदनुगतत्वाद्रागादीनाम् । यतो विपर्यासप्रत्ययरूपाऽविद्याकाल उपलभ्यन्ते, तत्क्षये च क्षीयन्त इति दिक् ।

तत्राविद्यास्वरूपमाह ।

**अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥**

अनित्यादिचतुष्टये नित्यादिबुद्धिरित्यर्थः । तत्र कालनिष्ठाभावप्रतियोगित्वरूपानित्यत्ववति कार्ये नित्यत्वख्यातिर्नित्यत्वज्ञानम् । यथा ध्रुवा पृथ्वी । ध्रुवा सचन्द्रतारका द्यौः । अमृता दिवौकस इति । ध्रुवत्वं नित्यत्वम् । केचिद्धि भूतानि चन्द्रतारकाद्युलोकान्देवाँश्च नित्यान्मन्यमानास्तत्तद्रूपप्राप्तये तान्युपासते, सोमपानादि च कुर्वन्ति तथा प्रपञ्चज्ञानस्यासति सदाकारत्वात्सम्पूर्णः प्रपञ्च एवाविद्यक इति श्रुतिषु प्रसिद्धम् । असत्त्वं च प्रागुक्तानित्यत्वमेव शुक्तिरजतादिज्ञानवदेव प्रपञ्चज्ञानम् । असति सद्बुद्धिरूपाविद्यैव च सर्वप्रपञ्चकारणम् । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति" श्रुत्याऽपि प्रपञ्चस्येदृशमेवासत्यत्वमुच्यत इति दिक् । तथा शुचावपवित्रे परमबीभत्से काये शुचित्वख्यातिर्यथा नवशशाङ्कलेखेव कमनीयेयं कन्येत्यादि । उक्तं च ।

स्थानाद्बीजादुपष्टम्भान्निःस्यन्दान्निधनादपि ।
कायस्याधेयशौचत्वात्पण्डिता ह्यशुचिं विदुरिति

स्थानं मूत्राद्युपहतं मातुरुदरम् । बीजं शुक्रशोणिते । उपष्टम्भो मातृभुक्तान्नादिरसः । निःस्यन्दः प्रस्वेदादिः । निधनं मरणं, तद्धि श्रोत्रियशरीरमप्यपवित्रयति । तत्स्पर्शे स्नानविधानात् । कामिनीनामङ्गरागात्सुगन्धताऽऽधानमिव स्नानादिभिः शौचाधानात् सदा स्वतोऽशुचित्वमित्यर्थः । एवमशुचित्वाद् वस्तुनः सादृश्याभावेऽपि नवशशाङ्कलेखादिष्वादृश्यरूपाशुचिख्यातिरुक्ता । एतेनापुण्ये ताम्रशिलारोहणादौ, हिंसादौ वा पुण्यप्रत्ययः, तथाऽनर्थेऽर्जनरक्षणादिदुःखबहुलतयाऽपुरुषार्थे धनादावर्थप्रत्ययोऽप्यविद्यात्वेन व्याख्यातः । शुच्यशुचिशब्दयोर्भोगसाधनासाधनमात्रोपलक्षणत्वात् । एवं च संसारहेतुसर्वाविद्योपलक्षणमेतदिति बोध्यम् । "दुःखमेव सर्वं विवेकिन" इति सूत्रेण दुःख एव सुखख्यातिमर्थाद्वक्ष्यति । दुःखसाधनतया, दुःखबहुलतया, वा सर्वस्य दुःखत्वम् । एवं च दुःखसाधने दुःखनिवृत्त्याख्यसुखसाधनत्वबुद्धि,रेवं दुःखप्रचुरे सुखप्रचुरत्वबुद्धि,रेवं दुःखे सुखख्यातिरूपाऽविद्या, केवलदुःखे सुखत्वभ्रमस्यासिद्धेः । अनात्मन्यात्मख्यातिर्यथा, बाह्यस्य देहस्योपकरणेषु पुत्रधनादिषु चेतनाचेतनेष्वहंबुद्धिर्ममताबुद्धिर्वा । तथा विषयभोगावच्छेदकतयाऽन्तःकरणोपकरणे शरीरेऽहंबुद्ध्यादिः । तथा भोग्यतया साक्षात्पुरुषोपकरणेऽन्तःकरणेऽहंबुद्धिः । एतदविद्याकार्यमेव प्रपञ्चः । अहं कर्तेत्याद्यभिमानस्यैव धर्माधर्मोत्पत्तिद्वाराऽखिलजगद्धेतुत्वात् । चतुर्थाविद्याविषये पञ्चशिखाचार्यैरप्युक्तम् । स्थूलरूपं व्यक्तं, सूक्ष्मरूपमव्यक्तं, वा बुद्धिसत्त्वमात्मत्वेन गृहीतत्वात्तस्य बुद्धिसत्त्वस्य सत्यसङ्कल्पत्वादिकमात्मसम्पदं मन्वानो नन्दति, तस्येच्छाविघाता-

दिरूपां विपदमात्मविपदं मन्वानः शोचति यः स सर्वोऽप्रतिबुद्धोऽविद्वानिति । यथैव चतुष्पदाऽविद्याऽस्य संसारस्य मूलमित्यथैवोक्ता । अतः शुक्तिरजताद्यविद्यानामगणनेऽपि न न्यूनता । न चाविद्याशब्दस्य भावविशिष्टविद्या, तदभावो, वा नञ्तत्पुरुषाव्ययीभावाभ्यामर्थो नञ्तत्पुरुषस्योत्तरपदार्थप्रधानतया किंचिद्धर्माभावविशिष्टविद्याप्रतीतिर्बहुव्रीहिणाऽप्युक्तमविद्यात्वं वाऽर्थो न तु विपरीतख्यातिरुक्तार्थानां च न क्लेशबीजत्वमिति वाच्यम् । अमित्रागोष्पदवदविद्याशब्दस्य सतत्त्वापरपर्यायतत्त्वभूतवस्तुविरुद्धे निरूढेः । तथा हि । अमित्रो न यत्किञ्चिदभावविशिष्टं मित्रम् । नापि मित्राभावः । नोत्तमं मित्रम् । किं तु मित्रविरुद्धः सपत्नः । यथा वाऽगोष्पदं न यत्किञ्चिदभावविशिष्टं गोष्पदम् । नापि तदभावः । नाप्युत्तमगोष्पदम् । किं तु देशविशेष एव । एवमविद्या नोत्तमा विद्या । नापि प्रमाणरूपविद्याभावो । नापि यत्किञ्चिदभावविशिष्टा विद्या । किं तु विद्याविपरीतज्ञानान्तरमविद्या । नञ्तत्पुरुषः । आरोपितत्वं च नञर्थः । आरोपितविद्येति च बोधः । क्वचित्प्रधानेऽविद्याशब्दस्तु गौणोऽविद्याधर्मकत्वादिति दिक् ।

अथास्मितां तत्कार्यभूतां लक्षयति ।

**दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥**

दृक्शक्तिर्द्रष्टा पुरुषः । दर्शनशक्तिः करणम्बुद्धिः । प्रलये फलोपधानाभावाच्छक्तिग्रहणम् । तयोरेकात्मतेव, एकाकारताऽऽपैकस्वरूपापत्तिरिव या साऽस्मिता क्लेश इत्यर्थः । अविद्यातोऽस्मितायाः अयं भेदः, यद् बुद्ध्यादौ सामान्यतो भेदाभेदविषयाऽहम्बुद्धिरविद्या, अत्यन्ताभेदाग्रहणात् । अस्मिता तदुत्तरकालिकस्तज्जन्यः पुरुषे बुद्ध्यादिगुणदोषारोपादीश्वरोऽहमहम्भोगीत्यादिरूपो दूरस्थवनस्पत्योरिव तयोरत्यन्तमेकताभ्रमः । भ्रमत्वाविशेषेऽपि कार्यकरणरूपावान्तरविशेषादनयोर्भेदे-

नोपन्यासः । कार्यकारणभावश्चानयोर्लोकादवगन्तव्यः । लोके ह्यादौ कलत्रपुत्रादिष्वात्मभावो जायते, ततस्तेषां दुःखाद्यात्मनि मन्यते । तथा जलादिष्वादौ प्रतिबिम्बरूपेण चन्द्राद्यारोपस्ततश्चन्द्रादिषु तद्द्वारको मालिन्याद्यारोप इति । ननु बुद्धिपुरुषयोरन्योन्यधर्मारोपेणैवाहं सुखीत्यादिव्यवहारोपपत्तौ किमेकात्मताऽऽरोपेण, परस्परधर्मारोपश्चाभेदग्रहं विनाऽपि रङ्गरजतयोरिव सम्भवत्येवेति चेन्न । परिणामित्वापरिणामित्वाभ्यां भोग्यभोक्तृत्वाभ्यामत्यन्तभिन्नधर्मत्वेनात्यन्तविभक्तयोर्भोक्तृभोग्यशक्त्योः पुरुषबुद्ध्योरविभागरूपैकत्वप्रत्यये सत्येव भोगसम्भवात् । भेदग्रहरूपे स्वरूपप्रतिलम्भे तु कैवल्यमन्योन्यवियोग एव, न तु भोगः । एवं च भोगानुपपत्त्यैव तत्कल्पनम् । योऽहंसुखी सोऽहमनुभवितेत्येवं प्रत्ययस्यैव भोगत्वात् । जीवन्मुक्तस्य तु गौणो भोगः । सुखादिसाक्षात्कारमात्ररूप इति वक्ष्यते । अस्मितारूपमविद्याजन्यत्वं चोक्तं पञ्चशिखाचार्यैः । वस्तुतो बुद्धेर्भिन्नं पुरुषं बुद्धेराकारशीलविद्याऽऽदिभिर्विविक्तमसंस्पृष्टमपश्यन्नविवेकी बुद्धौ शान्ताद्याकारोऽस्मि ज्ञानादिशीलोऽस्मि सुखादिमानस्मीत्याकारामात्मबुद्धिं मोहेनाविद्यया कुर्यादिति । तत्र पुरुषाकारः सदाशुद्धत्वशीलमौदासीन्यं विद्या चैतन्यम् । बुद्धिस्त्वशुद्धाऽनुदासीना जडा च ।

अथास्मिताकार्यं रागं लक्षयति ।

## सुखानुशयी रागः ॥ ७ ॥

सुखाभिज्ञस्य सुखस्मरणात् तत्साक्षात्कारतो वा यः सुखे तत्साधने वाऽनुशेते, तद्विषयक इच्छाविशेषरूपः क्लेशो राग इत्यर्थः । तत्र साधने स्मर्यमाणेऽनुभूयमाने वा सुखानुस्मृतिपूर्वक एव रागः । दृश्यमानमसुखसाधनं तज्जातीयस्य सुखहेतुतां स्मृत्वा

तज्जातीयतया सुखहेतुत्वमनुमाय वेच्छति, जीवन्मुक्तेच्छायाः संसाराहेतुत्वेन क्लेशत्वाभावान्न तस्यामतिव्याप्तिः ।

अथ रागप्रतिघातीत्यतया द्वेषं लक्षयति ॥

## दुःखानुशयी द्वेषः ॥ ८ ॥

दुःखाभिज्ञस्य दुःखस्मरणात्तत्साक्षात्काराद्वा दुःखे तत्साधने च या जिहासा स क्रोधरूपो द्वेषः । अयमपीच्छाविशेष एव प्रतिघो मन्युर्जिघांसेति भाष्योक्तेः । प्रतिहन्त्युद्वेजयतीति प्रतिघः ॥

अथ तन्मूलकमभिनिवेशं लक्षयति ।

## स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥ ९ ॥

स्वस्य रसेन संस्कारमात्रेण वहतीति स्वरसवाही । अपिशब्दसमुच्चितमविद्वांसं तथेति तच्छब्दः परामृशति । अविदुष इवेत्यर्थः । रूढः प्रसिद्धः । अस्यात्यन्तदुरन्तत्वप्रतिपादनाय विद्वदपरिहार्यत्वमुखेन लक्षणं कृतम् । सर्वस्य विदुषोऽविदुषश्चेयमात्मन्याशीः-प्रार्थना दृश्यते सदैव, यन्मा न भूवमिति, भवान्येवेत्यर्थिका, तथा जीव्यासमित्यर्थिका भूयासमिति चेयमाशीस्त्रासो भयमित्युच्यते । अननुभूतमरणदुःखस्येदृशप्रार्थनाऽसम्भवात् । तया प्रार्थनया पूर्वजन्मनि मरणदुःखानुभवः स्वकारणमनुमीयते । धनादिनाशजन्यदुःखज्ञस्यैव धनं मे मा नश्यतु सदैव भूयादितीच्छादर्शनात् । एवञ्च जीवस्यानादित्वं सिद्धम् । जन्म तस्य देहेन्द्रियवेदनाभिराद्यः सम्बन्ध इति । नन्विह जन्मन्येव मरणदुःखानुमानेनेदं भयमस्त्विति चेन्न । यतोऽयमुक्तरूपोऽभिनिवेशः स्वाभाविक एवात्यन्तमूढस्य जातमात्रस्य कृमेरपि प्रत्यक्षानुमानागमैरसम्भावितो मरणत्रास उच्छेददृष्टिकार्यको दृश्यतेऽतस्तेन पूर्वजन्मानुभूतमरणदुःखानुभवानुमानाद् यदनुभवो-

त्थमरणत्रासजन्यत्रासनयेदानीं स जायत इच्छारूपस्याप्यस्य संस्कारा-
जनकत्वं फलबलात् कल्प्यते । दुःखानुभववासनैव तत्स्मरणद्वारा
त्रासकारणमित्यन्ये । तथा हि । जातमात्र एव बालो मारकवस्तुदर्श-
नेन कम्पमानः कम्पादनुमितमरणसम्बन्धस्ततो बिभ्यदुपलभ्यते
दुःखात् । दुःखहेतोश्च भयं दृष्टम् । न चात्र जन्मनि मरणमनुभूतं सुत-
रामस्य दुःखत्वं, तद्धेतुत्वं वा । तस्मात् स्मृतिः परिशिष्टा । सा च
न संस्कारादृते । न च सोऽनुभवं विना । न चात्र जन्मनि स इति
प्राग्भवीयः परिशिष्ट इत्यासां पूर्वजन्मसम्बन्ध इति । यथा चायं
क्लेशोऽत्यन्तमूढेषु दृश्यते तथा सम्प्रज्ञातयोगेन साक्षात्कृतप्रपञ्चीय-
पूर्वापरान्तयोराद्यन्तयोरवशिष्यमाणं तत्त्वभूतं ब्रह्म येन ततथातत्त्व-
ज्ञस्य विदुषोऽपि रूढः विदुषोऽविद्याऽस्मिताऽऽद्यभावेऽपि वासनासत्वा-
त् । इयञ्च वासना चित्तेन सह नश्यन्त्येव न तु ज्ञानेन दह्यत इत्यवि-
द्यासंस्कारेभ्यो विशेषः । न च तस्यात्मनित्यत्वनिश्चयात् कथञ्जी-
व्यासमितीच्छा सिद्ध इच्छाविरहादिति वाच्यम् । सत्यपि तस्मिन्निच्छा-
दर्शनेनेदृशसंस्कारस्योत्तेजकत्वकल्पनात् । न चैवमविद्यानाशेऽप्यभिनि-
वेशसत्वेन कथं तस्याविद्याव्याप्यत्वमुक्तमिति वाच्यम् । संसारहेतुता-
ऽवच्छेदकरूपेणैव तद्व्याप्यत्वकल्पनात् । तद्धेतुताऽवच्छेदकं च मर-
णत्रासातिरिक्तभयत्वमेव । फलबलाद् भयसामान्यमेव तु रागवदिहाभि-
निवेशो विवक्षित इति दिक् । एवञ्च पूर्वजन्मीयत्रासवासनयैव यथो-
क्तनिरुपधीच्छासम्भवेनैतद्बलेनात्मनः सुखरूपत्वसाधनं चिन्त्यमा-
त्मत्वस्यैव प्रियताऽवच्छेदकत्वौचित्याच्चेति दिक् । मिश्रास्तु विद्वच्छब्दे-
नात्र न सम्प्रज्ञातयोगवान्, किन्तु श्रुतानुमानाभ्यामेव यस्य तत्त्व-
ज्ञानं जातमग्रे निदिध्यासनं च नास्ति स एव गृह्यत इत्याहुः ।

अथ क्रियायोगेन क्लेशतनूकरणस्य फलमाह ।

**ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥**

प्रसवविरुद्धः प्रतिप्रसवः प्रलयः । ते पञ्च क्लेशाः सूक्ष्मा दग्धबीजकल्पा योगिनश्चरिताधिकारे चेतसि प्रलीने सति तेन चित्तेन सहास्तं गच्छन्तीति तत्प्रलयेनैव ते हेया इत्यर्थः ।

तनूकरणेन प्रलये जननीये, द्वारभूतं दग्धबीजभावमाह ।

**ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥**

तेषां स्थितानां बीजभावोपगतानां या वृत्तयः स्थूला अभिव्यक्तावस्थास्ताः प्रथमं क्रियायोगेन तनूकृताः सत्यो ध्यानेन प्रसङ्ख्यानेन समाधिजप्रज्ञारूपेण हातव्याः प्रतिबद्धाः कार्या इत्यर्थः । यावद्दग्धबीजकल्पा भवन्तीति शेषः । यथा च वस्त्राणां स्थूलो मलः पूर्वं पाषाणप्रक्षेपाद्यल्पयत्नेन निर्धूयते, पश्चात् सूक्ष्मः क्षारसंयोगादिनोपायेनाधिकयत्नेन च दूरीक्रियते । तथा स्थूलाः स्वल्पक्रियायोगसम्पाद्यतनुत्वतया स्वल्पाः प्रतिपक्षाः । तादृशाश्चाधिकयत्नसाध्यप्रसङ्ख्यानाग्निना दग्धबीजकल्पाः, तादृशाश्चासम्प्रज्ञातयोगसाध्यचित्तनाशेन नाश्या इति महाप्रतिपक्षाः । एवं च जीवन्मुक्तानां वृत्तिरूपाविद्यालेशाभ्युपगमश्चिन्त्यः । एवं हि स्थूलानामपि प्रतिपक्षहेयताऽऽपत्तौ पूर्वसूत्राविरोधापत्तेरिति दिक् ।

तत्र क्लेशानां हेयत्वोपपादनाय तेषां दुःखोत्पादने द्वारमाह ।

**क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥**

दृष्टादृष्टजन्मनी वर्त्तमानभविष्यती ताभ्यां वेदनीयो भोग्यः कर्माशयः पुण्यापुण्यरूपः । स च क्लेशमूलः रागमोहक्रोधप्रभवत्वात् । तत्र रागात् काम्यकर्म्मप्रवृत्तौ स्वर्गादिहेतुर्धर्मो भवति । एवं तत एव परद्रव्यापहारादावधर्म्मः । मोहादधर्म्मे हिंसाऽऽदौ धर्म्मबुद्ध्या प्रवर्त्तमानस्याधर्म्म एव । मोहाद्धर्म्मस्तु नास्त्येवेति मिश्राः । उदासीन आप्तत्वमोहाद् द्रव्यदानान्मोहजो धर्म्मोऽस्त्येवेत्यन्ये क्रोधजो धर्म्मो यथा ध्रुवस्य, स हि पितृवमानक्रोधात्तज्जिगीषया कृतेन पुण्यकर्म्मणा

सर्वोपरिस्थानं लब्धवान्। क्रोधनोऽधर्म्मस्तु प्रसिद्ध एव प्राणिवधादेः ।

रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः ।
कार्यो ह्यस्य भवेद्दोषः पुण्यापुण्यमिति श्रुतिः ॥
तद्वशादेव सर्वेषां सर्वदेहसमुद्भव इति कौर्म्मोक्तेः ।

स द्विधा दृष्टजन्मवेदनीयोऽदृष्टजन्मवेदनीयश्च । तत्राद्यो यथा तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्त्तित, ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा य उत्पन्नः पुण्यकर्म्माशयः स इहैव जन्मनि कालेन फलदः, तथा तीव्रसंवेगेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु तपस्विषु कृतेन पुनःपुनरपकारेणोत्पादितः पापकर्म्माशय इहैव फलदः । यथा नन्दीश्वरोऽष्टवर्षः कुमारो महादेवप्रसादान्मनुष्यपरिणामं हित्वा देवत्वेन परिणतः । देवानामिन्द्रो नहुष ऋषीणामपकारात् स्वं परिणामं हित्वाऽहित्वेन परिणतः । अदृष्टजन्मवेदनीयस्तु प्रसिद्ध एव । तत्र नारकीयाणां धर्म्माद्यनुत्पत्त्याऽऽद्यः कर्म्माशयो नास्ति । स्वर्गिणां त्वस्त्येव देवानां लीलामानुषविग्रहेण, प्रयागादौ कर्म्मानुष्ठानस्य तत्फलस्य च श्रवणात् । क्षीणक्लेशानां त्वन्त्यो नास्तीति दिक् ।

इदानीं कर्म्माशयफलानामपि क्लेशमूलकत्वमाह ।

**सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥**

क्लेशरूपे कर्म्माशयस्य मूले सत्येव जात्यायुर्भोगरूपो विपाकः फलं भवति। विपच्यते साध्यते कर्म्मभिरिति व्युत्पत्तेः । तत्र जातिर्जन्म, आयुर्जीवनकालः, भोगः सुखदुःखात्मकशब्दादिवृत्तिः । सुखादिसाक्षात्कारस्य तु विपाकजन्यतां वक्ष्यति। ननु क्लेशानां कर्म्मसहकारित्वे न मानं क्लेशाभावकाले च "ज्ञानाग्निः सर्वकर्म्माणीति" वाक्येन कर्म्मक्षयस्याप्यवगमेन तत एव विपाकाभावोपपत्तेरिति चेन्न । यत्रैवान्तकाले रागाद्युद्बोधो, मरणोत्तरं तद्योनेरेव प्राप्तिरित्यन्वयव्यतिरेकाभ्यां कर्म्म-

वशाद्रागादेरपि विपाकहेतुत्वात् । "तदेव सक्तः सह कर्म्मणेति लिङ्गं मनो यत्र निषिक्तमस्य" इति श्रुतेश्च नरकादावपि परस्त्र्यादिसक्तानामेव तप्तलोहमयनारीसमालिङ्गनादिफलश्रवणेन रागानुसारेणैव विपाकाच्च ज्ञानोत्तरं चारब्धो विपाकः समाप्यत एव न त्वारभ्यत इति न तत्र क्लेशापेक्षा । तथा हि । सत्सु हि क्लेशेषु कर्म्माशयो विपाकारम्भी न छिन्नक्लेशमूलः । यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहसमर्था भवन्ति, नापनीततुषा दग्धबीजभावा वा, तथा क्लेशावनद्धो ज्ञानाग्निदग्धबीजभावश्च कर्म्माशयो विपाकारम्भी, न स्वविपाकगोचरक्लेशशून्यो न क्लेशसामान्याभावकालिकप्रसङ्ख्यानदग्धबीजभावोच्छेदेन कर्म्मानुत्पादः, प्राचीनकर्म्मणां दाहश्च न तु नाशः प्रारब्धकर्म्मणोऽपि नाशप्रसङ्गात् । न च तदतिरिक्तकर्म्मत्वेन ज्ञाननाश्यता, क्लेशस्यैव विपाकारम्भहेतुत्वे लाघवात् । प्रारब्धफलकस्य कर्म्मणो बीजशक्तिनाशेऽपि फलसमापकत्वं बीजनाशे ऽप्युत्पन्नाङ्कुरवत् । "क्षीयन्ते चास्य कर्म्माणी" त्यपि दाहपरमेव । एवञ्च जीवन्मुक्तस्य भोगार्थमविद्यालेशकल्पनं चिन्त्यम् । आरब्धविपाके क्लेशानामहेतुत्वात् । एतेन सत्यपि ज्ञानेऽविद्याविनाशात् कर्म्मान्तरानुत्पत्तावपि प्राकृतानामनादिभवपरम्परासञ्चितानामसङ्ख्यानामनियतविपाककालानां भोगेन क्षेतुमशक्यत्वादशक्योच्छेदः संसार इत्यपास्तम् । तत्र कर्म्मणो जन्मकारणत्वे विचार्यते । किमेकं कर्म्मैकस्य जन्मनः कारणम्, उतानेकजन्मनः, फलदानायोत्पादकमित्येको विचारः । किमनेकं कर्म्मानेकजन्मकारणमुतैकजन्मन इत्यपरः । तत्र नैकं कर्म्मैकजन्मकारणम्, अनादिकाल एकैकजन्मसञ्चितस्यात एवासङ्ख्येयस्यैकैकजन्मभुक्तादेकैककर्म्मणो भुक्ततयाऽवशिष्टस्यैहिकस्य चानन्तकर्म्मणो मध्ये किं कर्म्म प्रथमं फलं दास्यति किञ्च पश्चादिति फलक्रमे नियमाभावात्

लोकानां पुण्याद्यनुष्ठाने फलानाश्वासापत्तेः। भाव्यनन्तकालमध्ये भाविबलवत्तरपापादिनाऽनुष्ठीयमानकर्म्मादृष्टानां नाशसम्भवात्, झटिति भोगकामनयैव कर्म्मानुष्ठानाच्च। नाप्येकमनेकस्य कारणम्। अनेकेषु जन्मसु क्रियमाणकर्म्मणामेकैकमेवानेकासङ्ख्यजन्मनः कारणमतोऽवशिष्टस्य तदितरस्य तद्विरुद्धफलदस्य विपाककालाभावप्रसक्तेः कर्म्मवैफल्यशङ्कया तदननुष्ठानप्रसङ्गात्। नाप्यनेकं कर्म्मानेकजन्मकारणम् अनेकस्य जन्मनो यौगपद्यासम्भवेन क्रमस्वीकारे प्रथमपक्षोक्तस्यानाश्वासरूपदोषस्य प्रसङ्गात्,। यदि हि कर्म्मसहस्रं युगपत् जन्मसहस्रं प्रसुवीत ततः कर्म्मसहस्रक्षयादवशिष्टस्य विपाककालः फलक्रमनियमश्च स्यात्, नास्ति तु तदयोगिन इति। अतश्चतुर्थः सिद्धान्तः। तथा हि जन्मारभ्य मरणपर्य्यन्तकाले विहितनिषिद्धानुष्ठानसम्पादितो धर्म्माधर्म्मसमूहो गुणप्रधानभावेनोत्पन्नो नानाविधविचित्रफलो मरणकाल आरब्धकर्म्मभोगसमाप्त्या लब्धावसरः सन्नेकप्रघट्टकेन मिलित्वा स्वफलदानार्थं मरणं प्रसाध्य प्रवृद्धवेगत्वरूपसम्मूर्च्छितत्ववान् गुणप्रधानभावापन्नः स्वफलयोग्यमेकमेव जन्म करोति नानेकम्। यस्तु अत्यन्तमुद्भूतमनन्तरमेव फलं दास्यति स प्रधानं, यस्तु किञ्चिद्विलम्बेन स गौणः। मरणञ्च लिङ्गदेहस्य स्थूलदेहादुत्क्रमणं न तु नाशो गमनश्रुतेः। तच्च जन्म तेनैव कर्म्मणा लब्धायुष्कं तस्मिन्नायुषि तेनैव कर्म्मणा भोगः सम्पद्यते इति भोगो मुख्यं फलम् अतो जन्महेतुः कर्म्माशयस्त्रिविपाक इत्युच्यते। अतोऽयं कर्म्माशय एको भवो जन्मकार्यतयाऽस्यास्तीति एकभविकः पूर्वाचार्यैरुक्तः। न चैवं स्वर्गिनारकीयाणां तच्छरीरैर्धर्म्माद्यनुत्पत्तेः प्राचीनकर्म्मणां च तत्रैव समाप्तेः पुनर्जन्मानुपपत्तिरिति वाच्यम्। स्वर्गादिजनककर्म्मणामेव ब्राह्मणस्यावरादियोनिलाभपर्यन्तफलश्रवणात्। शास्त्रानुक्तकालविशेषफलकस्यैवे-

कभविकत्वनियमात् । दृष्टजन्मवेदनीयस्तु कश्चिदेकविपाकारम्भी कश्चिद्द्विपाकारम्भी तथाद्यो नहुषस्य तस्य हीन्द्रत्वसम्पादककर्मणैव दीर्घायुष्ट्वस्य लाभात् पापविशेषेण सार्प्यभोगरूप एक एव विपाक उत्पन्नः । द्वितीयो नन्दीश्वरस्य । तस्य हि अष्टवर्षायुर्मनुष्यजन्मनः पुण्यविशेषेणायुर्भोगरूपं विपाकद्वयमुत्पन्नम्, अनयोश्च मनुष्यशरीरस्यैव वार्धकादिवत्सर्पदेवशरीररूपपरिणामान्तात् न जन्मान्तरं, वासनानां तु नैकभवभवत्वरूपमेकभविकत्वं यतः क्लेशकर्मणो-विपाकस्य योऽनुभवश्चित्तवृत्तिनिवहो ज्ञानरूपस्तन्निष्पादिताभिर्वासनाभिरनादौ काले सम्मूर्च्छितं पुष्टमिदं चित्तं पटवत्सर्वतस्ताभिश्चित्रितमिव ग्रन्थिभिराततं मत्स्यजालमिव वर्त्ततेऽतो वासना अनेकभवपूर्विका एव । अन्यथा मनुष्यदेहानन्तरं देवतिर्यग्योनिभोगानुपपत्तेः । मनुष्यदेहे तद्वासनाऽनुत्पत्तेः । पूर्ववासनानां च मनुष्यजन्मना क्षयात् । भिद्यते हृदयग्रन्थिरित्यत्र ग्रन्थिपदेन वासना एव भाष्ये, तासां ग्रन्थित्वेन रूपणात् न त्वहङ्कारादिरिति बोध्यम् । एवं च धर्माधर्मसंस्काररूपकर्माशयस्यैवैकभविकत्वं स्मृतिहेतुसंस्काररूपवासनानां चानादित्वमिति सिद्धम् । योऽपि अदृष्टजन्मवेदनीयकर्माशयस्यैकभविकत्वनियम उक्तः सोऽपि नियतविपाकस्यैव । नियतविपाकत्वं च कर्माशये, अवन्ध्यत्वे सत्यनन्यशेषत्वे सति कर्मान्तरानभिभूतत्वम् । दृष्टजन्मवेदनीयस्य तु भवाहेतुत्वादेवैकभविकत्वाभावः । अदृष्टजन्मवेदनीयस्य नियतविपाकभिन्नस्य तु त्रयी गतिः । तत्राद्या अदत्तफलकस्यैव विनाशोऽतोऽस्य नास्त्येकभविकत्वम् । द्वितीया तु प्रधानकर्मण्यावापगमनं तच्च प्रधानकर्मणा यागादिना सहैव तदङ्गपशुहिंसाऽऽदीनां स्वफलदानोन्मुखत्वं यथा धान्यबीजैः सहोत्पन्नानां तृणबीजानां तैः सहैव कुसूलप्राप्तिः कुसूलस्थितानां च धान्यबीजेन सहैव वापप्राप्तिर्न स्वातन्त्र्येण तद्वत्, परोपसर्जनतयाऽनुष्ठितत्वाच्च न स्वातन्त्र्येण फलदातृत्वम् । अत्रापि प्रधानकर्मापूर्वस्य बलव-

त्तरकर्मान्तरेणाभिभवे तदुपसर्जनस्यापि नैकभविकत्वम्। यद्यपि प्रधानोपकार एव तेषां फलं तदङ्गत्वेन विधानात्तथाऽपि न हिंस्यात्सर्वभूतानीति निषेधादनर्थोऽपि तत्कार्यप्रधानाङ्गत्वेन तदनुष्ठानविधेनैतन्निरपेक्षता फलदान इति बोध्यम्। तृतीया तु बलवत्तरेणोत्कटेन नियतविपाककर्मणा स्वविरुद्धफलदेन प्रतिबन्धस्य चिरं द्विचजन्मादिपर्यन्तमप्रसुप्ततयाऽवस्थानमतोऽस्यापि नैकभविकत्वम्। तत्राद्या यथा धर्मरूपशुक्लकर्मोदयात्पापरूपकृष्णामिश्रस्य धर्मरूपशुक्लकृष्णस्य च यथा तपःस्वाध्यायादिसाध्यः शुक्लकर्माशय उदित एवादत्तफलस्य कृष्णस्य नाशकोऽविशेषाच्च शवलस्यापि कृष्णभागयोगात्। तथा च श्रुतिः।

"द्वे द्वे ह वै कर्मणी वेदितव्ये पापकस्यैको राशिः पुण्यकृतोऽपहन्ति तदिच्छस्व कर्माणि सुकृतानि कर्तुमिहैव ते कर्म कवयो वेदयन्ते" इति।

पुण्यपापरूपे द्वे कर्मणी पुरुषैर्वेदितव्ये। वीप्सा पुरुषभेदात्। तत्र पुण्यकृत एको मुख्यो राशिः समूहस्य समूहिकार्यत्वात्। पापकस्य राशेरयं हन्ति तमपहन्ति। शेषे षष्ठी। तस्मात्सुकृतानि कर्तुमिच्छस्व इह लोक एव ते तुभ्यं कवयो वेदयन्ते न तु लोकान्तर इत्यर्थः। इच्छस्वेतिछान्दसम्। परपीडाऽऽदिसाधनसाध्योऽयं शुक्लः कर्माशय एवमुत्कृष्टः यदेकोऽपि सन् कृष्णाकृष्णशुक्लांश्चापहन्ति। अत्यन्तविरोधिनः कर्माशयान्भूयसोऽपीति भावः। यत्तु स्वाध्यायादिजन्यदुःखात्पापनाश इति तन्न। अधर्मस्य स्वकार्यदुःखविरोधित्वात्। न हि तपआदिजन्यं दुःखं तत्कार्यं, तद्विध्यानर्थक्यापत्तेः। तद्बलादेव तदुत्पत्तिसिद्धेः। विधिं विना तदनुत्पत्तौ च कुम्भीपाकादेरपि विधानापत्तेरिति दिक्। द्वितीया तु पञ्चशिखाचार्येणोक्ता। स्वल्पः सङ्करः सुपरिहरः सप्रत्यवमर्शः कुशलस्य नापकर्षायालङ्कस्मात्कुशलं हि मे बह्वन्यदस्ति यत्रायमावापं गतः स्वर्गेऽप्यपकर्षमल्पङ्करिष्यतीति। अस्यार्थः—हिंसाऽऽदिजन्यपापेन यागापूर्वस्य स्वल्प एव सङ्करः स्यात्। सोऽपि स्वल्पेनैव प्रायश्चित्तेन

घटादौ सद्व्यवहारश्च वर्तमानत्वनिबन्धनः । किं तु भावत्वं तत् । तच्चाभावान्यत्वम् । अभावत्वमेव वानुगतप्रत्ययसिद्धोऽखण्डोपाधिः भावत्वं वाखण्डोपाधिः । तच्च ज्ञेयत्वादिवत्

आदिना गगनादिपरमाणुक्रियापरिग्रहः । ननु सन्नित्यादिव्यवहारबलादेव सा जातिरायास्यतीत्यत आह । जात्यादावपीति । तथा च सत्त्वव्यवहारस्य सत्ताजातिविषयत्वे जातावपि सद्व्यवहारो न स्यात् अतो भावत्वादिकमेव तद्व्यवहारविषय इति न तादृशव्यवहारेण सत्ताजातिसिद्धिरिति भावः । ननु घटः सन्नित्यादिव्यवहारस्यान्यथानुपपत्तिसिद्धायां सत्ताजातौ सत्त्वव्यवहारस्यैकार्थसमवायसम्बन्धेन सत्ताजातिरेव विषयो न भावत्वादिकमित्यत आह । घटादाविति । तथा च घटः सन्नित्यादिव्यवहारस्यापि वर्तमानत्वादिविषयकत्वेनैवोपपत्तौ न तदन्यथानुपपत्त्या सत्ताजातिसिद्धिरिति भावः । न च वर्तमानत्वादेरननुगततया अनुगतसद्व्यवहारो विना सत्ताजातिं न निर्वहतीति वाच्यम् । अनुगततया व्यवहारानभ्युपगमादिति । ननु सच्छब्दशक्यतावच्छेदकतया सत्ताजातिरायास्यतीत्यत उपसंहारव्याजेन तामाशङ्कां निराकरोति । किं त्विति । तदिति । सत्तास्वरूपमित्यर्थः । तथा च सच्छब्दशक्यतावच्छेदकमपि भावत्वमेव न तु सत्ताया अतिरिक्तस्वरूपत्वमिति भावः । अत्र वर्तमानत्वादिकमननुगतत्वादुपेक्षितमिति ध्येयम् । ननु भावत्वस्यापि सर्वसाधारणानुगतस्याभावात् कथं तदपि सच्छब्द-

शक्यतावच्छेदकमित्यत आह। तच्चेति। भावत्वं चेत्यर्थः। ननु भावत्वमेवाखण्डोपाधिस्तद्भिन्नत्वमेवाभावत्वमित्येव किं न स्यादित्यत आह। अभावत्वमेवेति। एवकारोऽप्यर्थे। तथा च विनिगमनाविरहादुभयोरेवाखण्डोपाधित्वमिति भावः। नन्वेवं सति भावत्वं भावो न स्यादित्यत आह। तच्चेति। भावत्वं चेत्यर्थः। इदमत्र तत्त्वम्। जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतया द्रव्यजन्यतावच्छेदककोटिप्रविष्टतया सत्ताजातिसिद्धिः। न च तादृशकार्यकारणभावे मानाभाव इति वाच्यम्। नीलादौ स्वाश्रयसमवेतत्वसम्बन्धेन नीलरूपकारणसत्त्वात् समवायेन नीलापत्तिवारणाय तादृशकार्यकारणभावस्यावश्यकत्वात्। न च समवायसम्बन्धेन नीलादिकं प्रति स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसम्बन्धेन नीलादेर्हेतुत्वकल्पनात् त्रिविधकार्य(१)कारणभावान्तरकल्पनमिति वाच्यम्। स्वाश्रयसमवेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्येन कारणतावच्छेदकसम्बन्धगौरवेण चातिरिक्तोपदर्शितकार्यकारणभावकल्पनस्यैवोचितत्वात् उपदर्शितकार्यतावच्छेदककोटौ जन्यत्वनिवेशाद्गौरवम् जन्यत्वस्य कालिकसम्बन्धेन घटत्वादिमत्त्वरूपस्यापि वक्तुं शक्यत्वादिति तु नाशङ्कनीयम्। यतोऽत्र कालिकसम्बन्धेन घटादिमत्त्वरूपजन्यत्वनिवेशे तस्य महाकालसाधारण्येन प्रकृते कार्यतावच्छेदकस्य नित्यसाधारण्यं न सङ्गच्छत इति ध्वंसप्रतियोगित्वरूपं प्रागभावप्रतियोगित्वरूपं वा जन्यत्वमत्र निवेशनीयम्।

(१) कल्पनाच तथाविधकार्य–प्र० ३ पु०।

घटाभावादिवच्च स्ववृत्त्यपि ॥

एवं गुणत्वमपि न रूपादिचतुर्विंशता-वैका प्रत्यक्षसिद्धा जातिः । अतीन्द्रियेषु प्रत्यक्षा-योगात् । तुरगादेरुत्कृष्टगतिमत्त्वे ब्राह्मणादेश्च

वस्तुतस्तु नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वाङ्गीका-रेण सत्त्वमात्रस्यैव द्रव्यकार्यतावच्छेदकतया जन्यत्वस्य तत्र निवेश एव नास्ति क्व विनिगमनाविरहेण तस्य नाना-विधतया गौरववार्ता । अत एव समवायसम्बन्धेन जन्य-त्वमेव कार्यतावच्छेदकमस्तु किं तत्र सत्ताया निवेशने-नेति नोपदर्शितयुक्तिः सत्ताजातिसाधिकेत्यपि निर-स्तम् । जन्यत्वस्य गुरुतया तदपहाय सत्ताया एव तत्र निवेशनौचित्यात् । यदि च जन्यत्वमखण्डोपाधिः तथापि जन्यमात्रवृत्तिभेदव्यक्तेस्तद्व्यक्तित्वेन तथात्वमादाय वि-निगमनाविरहेण सत्ताया एव तथात्वौचित्यात् । न च सत्तायास्तथात्वेऽपि तथाविधभेदादिकमादाय विनिगम-नाविरह इति वाच्यम् । सत्ताया धर्मिग्राहकमानसिद्ध-त्वादित्यधिकं सत्ताजातिविचारेऽनुसन्धेयमिति ॥

गुणत्वजातिं खण्डयति । **एवमिति** । वक्ष्यमाणयु-क्त्येत्यर्थः । वक्ष्यमाणयुक्तिमेव स्फोटयति । **अतीन्द्रि-येष्विति** । अतीन्द्रियरूपादिष्वित्यर्थः । **प्रत्यक्षायो-गादिति** । इदमुपलक्षणम् । अनुमानस्याप्रयोजकत्वादि-त्यपि द्रष्टव्यम् । ननु रूपादिष्वनुगतगुणव्यवहारबलादेव गुणत्वजातिः सेत्स्यतीत्यत आह । **तुरगादेरित्यादि** ।

दोषाद्यभावे ऽपि गुणव्यवहाराच्च । एकस्य कार्य-तावच्छेदकस्य विरहे ऽपि येन केनापि रूपेण कारणत्वाद्यनुगमय्य जातिकल्पने चातिप्रसङ्गो जातिसङ्करप्रसङ्गश्चेति दिक् । घ्राणादिज्ञाने

तथा च यथा तुरगादौ गत्यादिनिष्ठोत्कर्षमादाय गुणव्य-वहारस्तथा रूपादिष्वपि उत्कर्षादिकमादाय गुणव्यव-हारोपपत्तौ चतुर्विंशतिगुणसाधारणानुगतगुणत्वजातौ प्रमाणाभावादिति भावः । द्रव्यकर्मान्यसामान्यवद्वृ-त्तिकारणतात्वेनानुगतीकृतानां रूपादिकारणतानामव-च्छेदकतया गुणत्वजातिरायास्यतीत्याचार्या अनुमन्यन्त इति तन्मतं दूषयति । एकस्येति । अनुगतस्येत्यर्थः । येन केनापि रूपेणेति । द्रव्यकर्मान्यसामान्यवद्वृ-त्तित्वेनेत्यर्थः । अनुगमय्येति । तदवच्छेदकत्वेनेति शेषः । अतिप्रसङ्ग इति । रूपद्रव्यकर्मेतरसामान्य-वद्वृत्तित्वेनानुगतीकृतानां कारणतानामवच्छेदकत्वेन रूपव्यावृत्तत्रयोविंशतिगुणवृत्तिजातेरपि सिद्धिप्रसङ्ग(१) इत्यर्थः । अत्रेष्टापत्तौ दूषणान्तरमाह । जातिसङ्करेति । तुल्ययुक्त्या रूपद्रव्येतरसामान्यवद्वृत्तिकारणतावच्छे-दकत्वेन रसादित्रयोविंशतिगुणकर्मसाधारणजातिसिद्धा तयोः सङ्करप्रसङ्ग इत्यर्थः । इदमत्र बोध्यम् । असति बाधके गुणपदशक्यतावच्छेदकत्वेन गुणत्वजातेः सिद्धौ बाधका-भावः । न च तथा सति विभुपदशक्यतावच्छेदकत्वेन विभुचतुष्टयमात्रवृत्तिजातिसिद्धिप्रसङ्ग इति शिरोमण्युक्तं

(१) गुणत्वजातिसिद्धिः सम्भवतीति–पा. ३ पु. ।

ऽनुभवव्यवहारश्च स्मृत्यन्यज्ञानत्वनिबन्धनः । जातिस्त्वनुभवत्वं साक्षात्कारित्वमेव । साक्षात्कारिणि ज्ञान एव तत्प्रत्ययात् । सत्यपि चानु-

---

दूषणं युक्तम् । इदानीमीश्वरजीवातिरिक्तस्य विभुत्वे मानाभावेन विभुत्वस्यात्मत्वतुल्यवृत्तितया आत्मत्वातिरिक्तजातित्वे तुल्यव्यक्तिवृत्तित्वरूपबाधकसत्त्वे तथा दोषानवकाशात् आकाशादीनामतिरिक्तत्वपक्षे ऽपि तथा स्वीकारे बाधकाभावाच्चेति । इदं पूर्णाय परमात्मने इत्यत्रेश्वरे आत्मपदव्यपदेशं कुर्वता दीधितिकृतापि सम्मतम् । अन्यथा आत्मपदशक्यतावच्छेदकत्वं विना ईश्वरसाधारणात्मत्वजातौ युक्त्यन्तराभावेन तथा व्यपदेशो ऽसङ्गत एव स्यादिति । अनुभवचतुष्टयसाधारणीमनुभवत्वजातिं प्रचीनसम्मतां दूषयितुमाह । शाब्दादिज्ञाने चेति । स्मृत्यन्यज्ञानत्वनिबन्धन इति । एतेनानुभवव्यवहारबलादनुभवत्वं जातिरित्यपास्तम् । ननु तथाप्यनुभवामीत्यनुव्यवसायबलादनुभवत्वजातिरायास्यतीत्यत आह । जातिस्त्विति । साक्षात्कारित्वमेवेति । प्रत्यक्षत्वमेवेत्यर्थः । तथा च प्रत्यक्षत्वातिरिक्तानुभवत्वजातौ मानाभाव इति भावः । प्रत्यक्षत्वातिरिक्तानुभवचतुष्टयवृत्त्यनुभवत्वजातिस्वीकारे बाधकमप्याह । सत्यपि चेति । तथा च तादृशजातिविशेषस्वीकारे सुखाद्यनुमित्यनन्तरमपि तथानुव्यवसायापत्तिरिति भावः । केचित्तु विशेषणज्ञानादिजन्यतावच्छेदककोटिप्रविष्टतयाऽनुभवत्वजातिसिद्धिः । अन्यथा विशिष्टबुद्धित्वादेस्तथात्वे स्मृतौ व्यभिचारप्रसङ्ग

मानिकादिसुखादिनिश्चये सुखादिकमनुभवामीति प्रत्ययाभावादिति ॥

इत्याहुः। तदप्यसत्। प्रत्यक्षत्व एव तज्जन्यतावच्छेदकत्वोपपत्तौ अतिरिक्तानुभवत्वस्य तत्र निवेशे प्रयोजनाभावात्। न च विशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति विशेषणज्ञानादेर्हेतुत्वे विशेषणज्ञानादिकं विना अनुमित्याद्यात्मकविशिष्टबुद्ध्यापत्तिरिति वाच्यम्। अनुमित्यादिपूर्वं परामर्शादेरावश्यकत्वेन तथा वक्तुमशक्यत्वात्। न चैवं सति साध्यविशेष्यकानुमितिविलोपप्रसङ्गः इतरभेदज्ञानाभावदशायामपि इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकव्यतिरेकव्याप्त्यवगाहिपरामर्शसम्भवेन तस्मात् तदानीमपि साध्यविशेषणकानुमितेरपि सम्भवादिति वाच्यम्। तावता क्षत्यभावात्। भवतु वा विशिष्टानुमितित्वावच्छिन्नं प्रत्यपि विशेषणज्ञानादेर्हेतुत्वम्। न चैवं गौरवावकाशः नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन शुद्धानुभवत्वेन तथा सम्भवेन जन्यत्वनिवेशे कालिकसम्बन्धेन घटत्वादिमत्त्वमादाय विनिगमनाविरहेणानन्तकार्यकारणभावद्धा तदपेक्षया तथाविधकार्यकारणभावद्वयस्यैव सम्यक्त्वात्। न च प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वेऽपि स दोषस्तदवस्थ इति वाच्यम्। ईश्वरप्रत्यक्षव्यावृत्तास्मदादिप्रत्यक्षसाधारणजातिविशेषमभ्युपेत्य तस्यैव तथात्वोपगमात्। अनुभवत्वमपि तथा सम्भवतीति तु न मन्तव्यम्। तथा सति प्रत्यक्षत्वेन सङ्करप्रसङ्गात्। न चैवमनुभवं प्रत्येव वेति दीधितिविरोधः। युक्त्या पदार्थतत्त्वविवेकस्य ग्रन्थविरोधेनानिवारणीयत्वादित्यादि निपुणतरमत्रानुसन्धेयमिति संक्षेपः ॥

एवं घटाद्यभावस्याप्यभावोऽतिरिक्त एव । घटादिमति तदभावो नास्तीत्यबाधिताभावत्वप्रत्ययात् । न चैवमनवस्था एकस्यैव घटाभावस्य स्वाभावाभावरूपत्वे[1] विरोधाभावात् । [2]अन्योन्याभावस्यान्योन्याभावो भावत्वं संसर्गा-

तदत्यन्ताभावाभावस्य तत्स्वरूपत्वमभ्युपगच्छतां प्राचां मतं दूषयितुमाह। एवमिति। वक्ष्यमाणयुक्त्येत्यर्थः। अतिरिक्त एवेति । घटाद्यतिरिक्त एवेत्यर्थः । तदभावो नास्तीति। घटाद्यभावो नास्तीत्यर्थः। अभावत्वप्रत्ययादिति । घटाद्यभावाभावस्य घटादिभावस्वरूपत्वे ऽभावत्वेन प्रत्ययानुपपत्तिः। भावे ऽभावत्वाभावादिति भावः । न च भावाभावसाधारणमभावत्वमखण्डोपाधिरित्युक्तौ नायं दोष इति वाच्यम्। एवं सति लाघवादेव घटाभावाभावस्यातिरिक्तत्वसिद्धेः लाघवानादरे ऽभावमात्रस्यानतिरिक्तत्वसिद्धिप्रसङ्गादित्यादिकमवधेयम् । ननु घटाद्यभावाभावस्यातिरिक्तत्वे तुल्ययुक्त्या तदभावस्याप्यतिरिक्तत्वमभ्युपगन्तव्यम् एवं तदभावस्यापीत्यनवस्थेत्याशङ्कां निराकरोति। न चैवमिति। अभावाभाववत् तदभावादेरप्यतिरिक्तत्वे इत्यर्थः। एकस्यैवेति। घटाद्यभावस्यैवेत्यर्थः। स्वाभावाभावरूपत्वइति। घ-

(१) घटतदभावाभावरूपत्वे—पा॰ ३ पु. ।

(२) अन्योन्याभावस्य भावत्वं संसर्गाभावत्वं चान्योन्याभावः । इत्यधिकं ३ पु.

भावत्वं च अतिरिक्तान्योन्याभावाङ्गीकारे ऽनव स्थाप्रसङ्गात् । ध्वंसप्रागभावयोश्चातिरिक्तावेव प्रागभावध्वंसौ घटादेः सत्त्वकाले तस्य प्रागभा-

टाभावस्य घटाभावाभावाभावस्वरूपत्वे इत्यर्थः । तथा च घटाभावाभावस्याप्यभावो घटाभाव एव न त्वतिरिक्त इति नानवस्थेति भावः । भावत्वं संसर्गाभावत्वं चेति । इदं चान्योन्याभावत्वावच्छिन्नस्यान्योन्याभावमवलम्ब्योक्तम् । घटान्योन्याभावस्य त्वन्योन्याभावोभावत्वं संसर्गाभावत्वं पटाद्यन्योन्याभावत्वं चेत्यपि बोध्यम् । केचित्तु अन्योन्याभावस्याप्यन्योन्याभावोऽतिरिक्त एव । न चैवमनवस्था । तस्याप्रामाणिकत्वेनादोषत्वात् । अन्यथा अन्योन्याभावमात्रस्यैवातिरिक्तत्वविलोपप्रसङ्गात् । सर्वत्र तदधिकरणमात्रवृत्तिधर्म एव तत्स्वरूपत्वकल्पनसम्भवादिति वदन्ति । ध्वंसप्रागभावयोः प्रागभावध्वंसौ प्रतियोगिस्वरूपौ इत्युपगच्छतां प्राचां मतं दूषयितुमाह । ध्वंसप्रागभावयोश्चेति । तस्येति । घटादेरित्यर्थः । ध्वंसप्रागभावौ न स्त इति । ध्वंसो नास्ति प्रागभावो नास्तीत्यर्थः । यदि च तयोरत्यन्ताभावविषयकत्वेनैवोपपत्तेर्न ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वे साधकमिति विभाव्यते । तदा घटध्वंसो भविष्यति घटप्रागभावो नष्ट इत्यादिप्रतीतिर्ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वसाधिकेत्यवधेयम् । न चैवं सति अभावत्वप्रत्ययादित्युत्तरग्रन्थविरोधः तयोः प्रागभावध्वंसत्वावलम्बनादिति वाच्यम् । अभावत्वप्रत्ययादित्यस्य प्रागभावध्वंसत्वावगा-

वध्वंसौ न स्त इत्यबाधिताभावत्वप्रत्ययात् । प्रागभाव एव न पारमार्थिक इत्यन्ये ॥

प्रत्यभिज्ञायाश्च तत्तागोचरसंस्कार एव हेतुरिति प्राञ्चः । न च तस्याः संस्कारजन्यज्ञानत्वे स्मृतित्वापत्तिः तज्जन्यज्ञानत्वस्य तत्र प्रयोजकत्वादिति वाच्यम् । किमिदं प्रयोजकत्वं नाम । न व्यापकत्वमविरोधात् न व्याप्यत्वं प्रमाणाभा-

---

हिप्रत्ययादित्यर्थकत्वात् तयोर्भावाभावसाधारणातिरिक्ताखण्डोपाधित्वाभ्युपगमे तु ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वे लाघवस्यैव शरणीकरणीयत्वादित्यवधेयम् । प्रागभावाभ्युपगम एव ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वानतिरिक्तत्वचिन्ता स एव नास्ति प्रमाणाभावादित्यभिप्रेत्याह । प्रागभाव एवेति । अपर इत्यनेनास्वरसः सूचितः तद्बीजं तु प्रागभावविचारे प्रागभावस्यातिरिक्तत्वव्यवस्थापनावसरे ऽनुसन्धेयम् इह तु विस्तरभिया न लिखितमिति ॥

संस्कार एव हेतुरिति । इदमत्राकूतम् । तन्निष्ठलौकिकान्यविषयताशालिप्रत्यक्षं प्रति तद्विषयकत्वेनैव ज्ञानलक्षणायाः कारणत्वं कल्प्यते न तु ज्ञानत्वान्तर्भावेन तत् गौरवात् । एवं सति कृत्यादिसाक्षात्कारात् पूर्वमपि नियमतो विषयस्मृतिकल्पनमपि नास्ति । कृत्यादित एव कृत्यादिसाक्षात्कारे विषयभानोपपत्तेरिति । अविरोधादिति । प्रत्यभिज्ञायाः संस्कारजन्यत्वेऽपि तथाविधव्या-

वात् । परं त्वनुद्भूते ऽभिभूते वा तत्तासंस्कारे प्रत्यभिज्ञाया अनुत्पादेन तत्तास्मृतिरेव तद्धेतुरिति मन्तव्यम् ॥

क्षणाश्च क्षणिकोऽतिरिक्तः कालोपाधिः । वि-

---

पकताया अक्षतेरित्यर्थः । प्रमाणाभावादिति । तादृशव्याप्तिग्रहानुकूलतर्काभावादित्यर्थः । तथा च प्रकृते प्रयोजकत्वस्य दुर्वचत्वेन तथा वक्तुमशक्यतया प्रत्यभिज्ञायाः संस्कारजन्यत्वे न किञ्चिद्बाधकमिति भावः । प्राचीनमतं दूषयति । परं त्विति । अनुद्भूते । उद्बोधकासमवहिते । अभिभूते । स्मृतिप्रतिबन्धकसमवहिते । तत्तास्मृतिरेवेति । एवकारेण संस्कारस्य प्रत्यभिज्ञाहेतुत्वव्यवच्छेदः । अयमाशयः । तन्निष्ठलौकिकान्यविषयताशालिप्रत्यक्षं प्रति तद्विषयकत्वेन ज्ञानलक्षणाप्रत्यासत्तेर्हेतुत्वे घटपटादिगोचरानुद्बुद्धसंस्कारदशायां घटपटाद्युपनीतभानप्रसङ्गः । अनुद्बुद्धभिन्नतद्विषयकत्वेन तत्र हेतुत्वे तु प्रथमतोऽनुद्बुद्धसंस्कारस्य पश्चादुद्बोधकसमवधानदशायां घटाद्युपनीतभानाजनकत्वप्रसङ्गः । अन्योन्याभावस्य व्याप्यवृत्तित्वनियमात् तस्याव्याप्यवृत्तित्वाभ्युपगमे ऽप्युद्बोधकानामननुगततया तावद्भेदकूटविशिष्टतद्विषयकत्वेन तत्र हेतुत्वे महागौरवप्रसङ्गः । अतो लाघवात्तद्विषयकज्ञानत्वेनैव तत्र हेतुत्वं कल्प्यते । तथा हेतुत्वकल्पने च नियमतः प्रत्यभिज्ञा कृतिसाक्षात्कारपूर्वं तत्ताविषयकस्मृतिकल्पनस्य फलमुखत्वेन गौरवासम्पादकत्वादित्यादिकमन्यदूहनीयम् ॥

भागप्रागभावविशिष्टं कर्मैव तथेति चेत् । न उदीच्यकर्मजन्यविभागप्रागभावविशिष्टस्य कर्मणः क्षणचतुष्टयावस्थायित्वात् । स्वजन्यविभागप्रागभावविशिष्टं तत् तथेति चेत् तर्हि स्वत्वाननुगमादननुगमः जाते च विभागे कुतः

क्षणस्यातिरिक्तत्वं व्यवस्थापयति । क्षणश्चेति । क्षणपदार्थ इत्यर्थः । अतिरिक्त इति । क्लृप्तभावाभावेभ्योऽतिरिक्त इत्यर्थः । शङ्कते । विभागेति । तथा च क्लृप्तेन निर्वाहे व्यर्थमतिरिक्तपदार्थकल्पनमिति भावः । उदीच्येत्यादि । तथा च क्षणचतुष्टयान्तर्भावेन तत्र क्षणव्यवहारापत्तिः । न चैवमिष्टापत्तिः । तथा सति घटप्रागभावक्षणेऽपि घटवान् क्षण इति व्यवहारापत्तेरिति भावः । शङ्कते । स्वजन्येत्यादि । स्वपदं तत्तत्क्रियापरम् । उदीच्यकर्मणः स्वजन्यविभागप्रागभावविशिष्टत्वेन पूर्वक्षणचतुष्टयानवस्थायित्वात् नोपदर्शितानुपपत्तिरिति भावः । तत्तत्कर्मणस्तत्क्षण इत्यर्थः । स्वत्वाननुगमादिति । स्वत्वस्य तत्तद्व्यक्तिविश्रान्ततयेत्यर्थः । अननुगम इति । क्षणत्वस्याननुगम इत्यर्थः । अनुगतक्षणव्यवहारानुपपत्तिमुक्त्वा तथाविधक्रियैव क्षण इति लक्षणे प्रश्नव्याजेनाव्याप्तिमप्याह । जाते विभाग इत्यादि । जायमाने विभाग इत्यर्थः । तथा चोक्तलक्षणे द्वितीयक्षणेऽव्याप्तिरिति भावः । इदं च प्रतिक्षणं क्रियाया उत्पत्तौ मानाभाव इत्यभिप्रेत्यो-

क्षणव्यवहारः विभागपूर्वसंयोगविशिष्टात् कर्मणा एवेति चेत् तर्हि सुतरामननुगमः । एवं पूर्वसंयोगनाशकाले उत्तरसंयोगकाले ऽपि कर्मसत्त्वे क्षणत्वं वक्तव्यमिति । अदृष्टदण्डरथादीनां

क्तम् । तथात्वे तु नायं दोष इति ध्येयम् । उक्तलक्षणस्य अलक्ष्यं द्वितीयक्षणमभ्युपेत्योक्ताव्याप्तिं वारयितुमुत्तरव्याजेनाशङ्कते । विभागपूर्वसंयोगविशिष्टात् कर्मणा इति । स्वजन्यविभागपूर्वसंयोगोभयविशिष्टात् कर्मण इत्यर्थः । तथा च लक्ष्यभेदेन लक्षणस्य नानात्वान्नोक्ताव्याप्तिरिति भावः । अव्याप्तिदोषस्यैवंक्रमेण परिहारे ऽप्यननुगमदोषस्यानुद्धारादित्यभिप्रेत्य दूषयति । तर्हीत्यादि । प्रकारान्तरेणाप्यननुगमं दर्शयति । एवमिति । स्वजन्यविभागप्रागभावविशिष्टकर्मणः स्वजन्यविभागपूर्वसंयोगोभयविशिष्टकर्मणश्च क्षणत्वमिवेत्यर्थः । एवंशब्दस्याव्ययत्वेन नानार्थत्वात् प्रकृते दृष्टान्तपरता । वक्तव्यमिति । पूर्वसंयोगनाशोत्पत्तिविशिष्टक्रियाया उत्तरसंयोगोत्पत्तिविशिष्टक्रियायाश्च क्षणत्वं वक्तव्यमित्यर्थः । इदमुपलक्षणम् । पूर्वसंयोगनाशोउत्तरसंयोगप्रागभावोभयविशिष्टक्रियाया अपि क्षणत्वमवसेयम् । तथा चाव्याप्तिरूपदोषस्य परिहारेऽपि क्षणपदार्थाननुगमरूपदोषो दुरुद्धर इति भावः । न चैवं क्षणत्वमेवातिरिक्तमभ्युपेयम् तेनैवानुगतक्षणव्यवहारनिर्वाहात् किं क्षणपदार्थस्यातिरिक्तत्वाभ्युपगमेनेति वाच्यम् । विनिगमनाविरहेणैककालोत्पन्ननानातथाविधक्रियासु क्षणत्वसम्बन्धकल्पनामपेक्ष्यातिरिक्तक्षणम-

च्चेदानीन्तनानां दशरथपदात् अन्येषामपि पिशाचादिपदात् केन रूपेण पदार्थोपस्थितिरित्यवहितैः परिभावनीयं सूरिभिरिति कृतं पल्लवितेन ॥

भ्युपेत्य तत्रैव तत्सम्बन्धकल्पनाया लघीयस्त्वात् । ननु इदानीन्तनानां दशरथादिपदात् कथं शाब्दबोधः । इदानीन्तनदशरथत्वादिप्रकारकग्रहाभावेन विशेषणग्रहाभावात् दशरथत्वविशिष्टादौ शक्तिग्रहासम्भवेन दशरथपदजन्यदशरथत्वादिविशिष्टपदार्थोपस्थितेरभावात् । एवं कथं वा पुंसां पिशाचादिपदात् पिशाचत्वादिविशिष्टस्य शाब्दबोधः पूर्वदर्शितरीत्या पदजन्यपदार्थोपस्थित्यभावादित्याशङ्कामपनेतुमाह । अदृष्टदशरथेत्यादि । परिभावनीयमिति । भावनया निर्वाह्यमित्यर्थः । तथा चायं पूर्वपक्षो न दुःसमाधेयः । किं तु भावनासमाधानक इति भावः । भावनासाध्यसमाधानत्वे तादृक् यत्र प्रमेयवानयमित्यनुभवजन्यः प्रमेयवानयमिति संस्कारो जातस्तदनन्तरं तस्मात्प्रमेयत्वांशे दोषवशाद्दशरथत्वमात्रप्रकारकस्मृतिजनकोद्बोधकवशाद्दशरथत्वप्रकारकस्मरणं तत्र दशरथत्वविशिष्टे शक्तिग्रहसम्भवेन तज्जन्यदशरथत्वादिविशिष्टोपस्थितेः सुलभतया दशरथत्वादिप्रकारकशाब्दबोधे बाधकाभावः । एवं पिशाचादिपदस्थलेऽपि द्रष्टव्यम् । यदि च तदंशे ऽन्याप्रकारकस्मृतिं प्रति तदंशे ऽन्याप्रकारकतत्प्रकारकसंस्कारस्य हेतुत्वमावश्यकम् अन्यथा जातित्वरूपेण घटत्वप्रकारकसंस्कारादपि जातित्वांशे मोक्षदशायां

एवं स्वत्वमपि पदार्थान्तरम्। यथेष्टविनियोगयोग्यत्वं तदिति चेत् कोऽसौ विनियोगः। भक्षणादिकमिति चेत्। न परकीये ऽप्यन्नादौ तत्सम्भवात्। शास्त्रनिषिद्धं तथेति चेत् किं

घट इति स्मरणापत्तेः तथा च कथमुपदर्शितरीत्या दशरथादिपदात् दशरथत्वादिविशिष्टे शक्तिग्रहस्योपपादनं तज्जन्यशाब्दबोधोपपादनं चेति विभाव्यते। तथापि यत्र दशरथत्वादिसम्बन्धेन घटादेः भ्रमो जातः तत्र तथाविधशक्तिग्रहाद्युपपादनं भवत्येव। न च तस्य सम्बन्धतायां मानाभावः संयोगादौ सम्बन्धतायुक्तेरत्रापि तौल्यादित्यलमधिकेन॥

एवं स्वत्वमपीति। चैत्रस्येदं धनमित्यादिप्रतीतिविषयो धनवृत्तिचैत्रनिरूपितसम्बन्धोपीत्यर्थः। पदार्थान्तरमिति। नैयायिकानां स्वत्वत्वेन व्यवह्रियमाणं यत्तदपेक्षया अतिरिक्तमित्यर्थः। ननु क्लृप्तेन निर्वाहे किं तत्रातिरिक्तत्वकल्पनेनेत्याशयेन शङ्कते। यथेष्टेत्यादि। तत्। स्वत्वम्। तत्सम्भवादिति। भक्षणसम्भवादित्यर्थः। तथा च तथाविधभक्षणे कृते पुरुषान्तरीयान्नादौ स्वत्वापत्तिरिति भावः। तत्। भक्षणम्। तथा विनियोगः परकीयान्नादिभक्षणस्य शास्त्रनिषिद्धत्वान्न तद्योग्यतामादाय पुरुषान्तरस्यान्नादौ पुरुषान्तरस्य स्वत्वापत्तिरिति भावः। तथाविधशास्त्राज्ञाने तद्घटितस्वत्वलक्षणस्य दुर्ज्ञे-

तच्छास्त्रम् । परस्वं नाददीतेत्यादिकमिति चेत् स्वत्वाप्रतीतौ कथं तत्प्रवृत्तिः । तस्मात् स्वत्वमतिरिक्तमेव । प्रमाणं च तत्र परस्वं नाददीतेत्यादिकं शास्त्रमेव । तच्च प्रतिग्रहोपादानक्रय-

---

यत्वमित्याशयेन पृच्छति । किं तदिति । परकीयान्नादिभक्षणनिषेधबोधकमित्यर्थः । तस्य उपदर्शितशास्त्रस्य । प्रवृत्तिः परकीयस्वत्वाश्रयादाननिषेधबोधकत्वम् । तथा च स्वत्वज्ञाने सति तथाविधशास्त्रादुपदर्शितनिषेधबोधः । शास्त्रात् तथाविधनिषेधबोधे सति शास्त्रबोधिततथाविधनिषेधप्रतियोगित्वरूपोपदर्शितनिषिद्धत्वादिघटितोपदर्शितस्वत्वज्ञानमित्यन्योन्याश्रय इति भावः । इदमुपलक्षणम् । योग्यत्वस्य निर्वचनाशक्यतयापि तद्घटितलक्षणमनुपपन्नमित्यादि द्रष्टव्यम् । उपसंहरति । तस्मादिति । क्लृप्तमध्ये निवेशासम्भवादित्यर्थः । न च यथेष्टविनियोगोपायक्रयादिविषयत्वमेव तदस्तु किं तत्रातिरिक्तत्वकल्पनेनेति वाच्यम् । तादृशविषयताया धनस्वरूपत्वे क्रयपूर्वकालेपि तदीयस्वत्वव्यवहारप्रसङ्गात् । क्रयस्वरूपत्वे तु क्रयनाशक्षणे तदीयस्वत्वनाशप्रसङ्गात् अतिरिक्तत्वे तु अस्माकं समीहितस्य सिद्धत्वादिति । ननु सर्वमिदं सम्भवति स्वत्वे प्रमाणसद्भावे तत्तु न पश्याम इत्यत आह । प्रमाणं चेत्यादि । परस्वं नाददीतेत्यादि । शास्त्रस्य निषेधप्रतियोगितावच्छेदकघटकत्वेन स्वत्वस्य प्रमितिजनकत्वात् स्वत्वप्रमाणत्वमित्यर्थः । तच्चेति । अतिरिक्तस्वत्वं चेत्यर्थः । प्रतिग्रहः दानजन्यपरस्वत्वनाशानन्तरोत्पन्नस्व-

गपित्रादिमरणैर्जन्यते(१) दानादिभिश्च नाश्य- ते। कारणानामेकशक्तिमत्त्वात् कार्याणां वैजा- त्याद्वा कार्यकारणभावनिर्वाह इति दिक् ॥

स्वत्वसम्पादकं ग्रहणमुपादानम् अस्वामिकारण्यस्थस्य काशकुशादेरानयनम्। दानादिभिरिति। आदिपदग्राह्यो विक्रयादिः। ननु स्वत्वोत्पत्तिं प्रति प्रतिग्रहादीनां समुदितानां न हेतुत्वम्। तथाविधसमुदितघटकैकसत्वे स्वत्वोत्पत्त्या व्यभिचारात्। नापि प्रत्येकं तेषां तत्र हेतुत्वम्। परस्परं विना परस्परकारणात् स्वत्वोत्पत्त्या तद्दोषतादवस्थ्यात्। एवं स्वत्वनाशं प्रति दानादीनां हेतुत्वेपि विभावनीयमित्यत आह। कारणानामेकशक्तिमत्त्वादिति। स्वत्वादिकं प्रत्येकशक्तिमत्त्वेन तत्र तेषां हेतुत्वाभ्युपगमादित्यर्थः। शक्त्यनङ्गीकारे त्वाह। कार्याणामित्यादि। तत्तद्विजातीयस्वत्वरूपकार्यं प्रति प्रत्येकं प्रतिग्रहादीनां हेतुत्वाभ्युपगमादित्यर्थः। कार्यकारणभावनिर्वाहः स्वत्वादीनांप्रतिग्रहादीनां निर्दुष्टः कार्यकारणभावः। केचित्तु स्वत्वं नातिरिक्तं किं तु क्वचिद्विक्रयप्रागभावविशिष्टक्रयविनाशः क्वचिद्दानादिप्रागभावविशिष्टप्रतिग्रहादिध्वंसः क्वचिद्विक्रयप्रागभावविशिष्टपित्रादिध्वंसः स्वत्वम्। न चैवं सति स्वत्वमित्याकारकानुगतव्यवहारानुपपत्तिः। तत्रेष्टापत्तौ क्षतिविरहात्।

(१) तच्च प्रतिग्रहोपादानपित्रादिमरणजन्यं—पा० ३ पु०।

अत्र केचित् तदप्युपायेच्छाद्वारैव।

साक्षादित्यपरे। अत एव बलवदनिष्टाननुबन्धित्वसंशयेनेच्छोत्पत्तावपि तन्निश्चयाभावान्न प्रवृत्तिरिति दिक्।

वस्तुतस्तु बलवदनिष्टाननुबन्धित्वनिश्चयस्यैव इच्छाहेतुत्वात्। ननु पाकत्वप्रकारिकेच्छायां नेच्छाविषयौदनसाधनताज्ञानं हेतुः। तेन विनापि ओदनसाधनं पाक इति ज्ञानात्पाकेच्छोत्पत्तेरिति चेन्न। ओदनसाधनत्वप्रकारिकेच्छायां स्वाव्यवहितोत्तरेच्छायां वा तस्य हेतुत्वात्।

अन्ये तु पाकसाध्य ओदनो भवत्वितीच्छायां समवायेनौदनः पाकसाध्य इति ज्ञानम् ओदनेच्छा च हेतुः, स्वाव्यवहितोत्तरपाकेच्छायां वा, न तु इष्टसाधनताज्ञानम्। इच्छाया असिद्धधर्मविषयत्वेन साधनत्वस्य सिद्धधर्मत्वेनेच्छाविरोधित्वादित्याहुः।

नन्वस्तु नित्यस्य।

सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥

इत्याद्यर्थवादाद्युपस्थितफलसाधनत्वं तथापि तादृशब्रह्मलोकादिफले यदा न कामना तदा सन्ध्यावन्दनादौ प्रवृत्तिर्न स्याद् इष्टसाधनत्वेनाज्ञानात्। नच तदा प्रत्यवायाभावरूपेष्टसाधनताज्ञानात्तत्र प्रवृत्तिरिति वाच्यम्। अत्यन्ताभावादीनामनादितया प्रत्यवायध्वंसस्यैव फलत्वं वाच्यम्, तच्च न सम्भवति दुरितध्वंसार्थिनो यत्र प्रवृत्तिस्तस्मिन् दुरितस्याधिकारतया स्वस्मिन्नधिकारनिश्चयस्य प्रवर्त्तकत्वेन तन्निश्चयस्यापि हेतुत्वेन तन्निश्चयाभावात्। न च पापभ्रमेण कृतप्रायश्चित्ताद् दुरितध्वंसोत्पत्तिवारणाय दुरितध्वंसे दुरितस्यावश्यं हेतुता वाच्या तथा च तन्निश्च-

यस्य हेतुत्वे न मानमिति वाच्यम् । दुरितवतामेवागमेनाधिकारित्वबोधनात् । तन्निश्चयस्यापि तत्र हेतुत्वमितिचेन्न । सन्ध्यावन्दनादौ तथागमाभावात् मङ्गलवद्दुरितध्वंसार्थं प्रवृत्त्युपपत्तेः । वस्तुतो दुरितनिश्चयोऽप्यत्राप्यस्त्येवेति ध्येयम् । न च दुरितध्वंसे यदा न कामना तदा प्रवृत्तिर्न स्यात्, इष्टत्वादित्याहुः ।

अन्ये तु सन्ध्यावन्दनाकरणे निन्दार्थवादेन नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायकल्पनेन प्रत्यवायपरिहारसाधनत्वेन तत्रेष्टसाधनताज्ञानान्नियमतः प्रवृत्तिः । प्रत्यवायपरिहारः प्रत्यवायप्रागभावः, तस्यानादित्वेपि यस्मिन् सत्यग्रिमक्षणे यत् सत्त्वं यद्व्यतिरेकेत्वसमिति योगक्षेमसाधारणसाध्यत्वं तत्राप्यक्षतमित्याहुः ।

परे तु निन्दार्थवादेन प्रायश्चित्तोपदेशेन चोपासनाभावस्य प्रत्यवायहेतुत्वावगमादुपासनाभावस्य प्रत्यवायद्वारा दुःखसाधनत्वावगमात्तदभावस्य सन्ध्यावन्दनस्य दुःखसाधनत्वाभावत्वेनेष्टत्वं तथा च दुःखसाधनाभावरूपसन्ध्यावन्दनरूपेष्टसाधनत्वेन कृतेर्ज्ञानादेव तत्र प्रवृत्तिरिति ।

नन्वस्त्वर्थवादोपस्थितदुरितध्वंसरूपेष्टसाधनत्वज्ञानात् सन्ध्यावन्दनादौ प्रवृत्तिः । ऋतौ स्वदारगमनप्रवृत्तिः कथम् । तत्र प्रत्यवायध्वंसस्यार्थवादादनुपस्थित्याऽफलत्वात् । नापि दुरितप्रागभावः, तस्यासाध्यत्वात्तस्यानङ्गीकाराच्चेति चेन्न ।

ऋतुस्नातां तु यो भार्याम्, इत्यादिवचनैकवाक्यतया ऋतुकालीनस्य गमनाभावस्य प्रत्यवायजनकतया तत्परिहारार्थं तत्र प्रवृत्तेः । न च तत्परिहारस्य तत्प्रत्यवायाभा-

वरूपत्वेनोक्तरूपेण फलत्वासिद्धिरिति वाच्यम् । प्रागभावस्यातीन्द्रियत्वेनानङ्गीकारेपि तद्वदेव । भावान्तरस्यापि साध्यत्वाङ्गीकारादिति कश्चित् ।

ननु घटो भविष्यति इति प्रत्यक्षानन्तरं घटो भविष्यतीति प्रयोगात् वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वस्य प्रत्यक्षविषयत्वेन प्रत्यक्षमेव प्रागभावे मानम् । न चैकद्वित्रिकपालसंयोगप्रत्यक्षेऽपि घटो भविष्यतीति प्रत्यवायाभावात् । घटव्यभिचारित्वेनाज्ञातविषयस्य घटजनकत्वेन ज्ञातस्य तत्प्रत्यक्षे हेतुत्वे गौरवात् प्रागभावव्याप्यत्वेन तज्ज्ञानस्य हेतुत्वं वाच्यम् । तथा च तेन प्रागभावानुमितिरेवास्त्विति वाच्यम् । समानविषये प्रत्यक्षसामग्र्या बलवत्वेन प्रागभावप्रत्यक्षस्यैव सम्भवात् । न च प्रत्यक्षसामग्र्या बलवत्वे मानाभाव इति वाच्यम् । स्थाणुर्वा पुरुषो वेति संशयोत्तरं पुरुषे पुरुषत्वव्याप्यपाण्यादिमान् इति विशेषदर्शनोत्तरं पुरुषत्वप्रत्यक्षस्यैव मानत्वात् । न च तत्तल्लौकिकप्रत्यक्षसामग्र्यास्तदनुमितिं प्रति प्रतिबन्धकत्वं वाच्यम् । तथा च पर्वतप्रत्यक्षसामग्र्यां कथं पर्वतानुमितिरिति वाच्यम् । तद्विधेयकानुमितावेव तत्प्रत्यक्षसामाग्र्यविरोधित्वात् । एवं पर्वतविधेयकानुमितिसामग्र्याः पर्वताद्यविषयकप्रत्यक्षे प्रतिबन्धकत्वेन न पर्वतानुमितिकाले पर्वतान्यप्रत्यक्षम् । भिन्नविषयकानुमितिसामग्र्यास्तादृशप्रत्यक्षे प्रतिबन्धकत्वात् । न चानुमितिसामग्र्याः प्रत्यक्षत्वमेव प्रतिबध्यतावच्छेदकमस्तु, लाघवान्न तु उक्तप्रतिबध्यप्रतिबन्धकभावः गौरवात् । सर्वत्रानुमित्युत्तरमेव प्रत्यक्षोत्पत्तिस्वीकारादिति वाच्यम् । तत्रानुमिनोमीति अनुव्यवसायाभावात्

साक्षात्करोमीति प्रत्ययसत्त्वाच्चानुमित्यभावसाधकप्रत्यक्षस्यैव प्रमाणत्वात् । कालादिघटितानेककारणानां प्रतिबन्धकत्वे मानाभावात् । असाधरणतत्तत्कारणानामेव प्रतिबन्धकत्वस्वीकारात् । किं चानुयोगिताविशेषरूपस्य अखण्डोपाधिरूपस्य वा प्रागभावत्वस्य कुत्राप्यज्ञानादनुमानासम्भवः । अत एव सामग्रीज्ञानानन्तरं सामग्र्याव्याप्यत्वेन ज्ञानात् प्रागभावप्रत्यक्षं वाच्यं तदा च प्रागभावत्वस्य नष्टत्वान्न तत्प्रत्यक्षं किं त्वनुमितिरिति परास्तम् । सामग्रीकालेऽपि प्रागभावव्याप्यत्वेन सामग्रीज्ञानाच्चेति चेन्न ।

वर्तमानस्यातीन्द्रियत्वेन तद्घटितभविष्यत्वस्य लौकिकप्रत्यक्षासम्भवात् । किं च भविष्यत्वं वर्तमानकालोत्पत्तिकत्वं न तु भवदभिमतम् । तथा सति देशकालयोः प्रागभावे प्रतियोगिनि वान्वयो वाच्यः । तथा च श्वोभाविनि अद्यभविष्यत्यद्यभाविनि श्वो भविष्यतीति प्रत्ययप्रसङ्गात् । अन्यत्रोत्पन्ने गृहवर्तिनि गृहे भविष्यतीति प्रत्ययप्रसङ्गाच्च । इह घटो भविष्यतीत्यादौ तादृशोत्पत्तौ देशविशेषः कालविशेषश्चाधिकरणत्वेनान्वेति न तूत्पत्तिरिति । तेनाद्य भवने समुत्पद्य श्वः प्राङ्गणे वर्तिनि न श्वः प्राङ्गणे भविष्यतीति प्रत्ययः ।

कश्चित्तु घटस्यापि घटध्वंसप्रागभावत्वात्कपालनाशजन्यघटनाशस्य कपाले घटध्वंसो भविष्यतीत्यापत्त्या न प्रागभावे देशान्वय इत्याह तन्न । नाशोत्पत्त्यधिकरणे एव नाशप्रागभावस्वीकारात् । अत्रोत्पत्तिर्धात्वर्थः प्रत्यायार्थः वर्तमानकालोत्तरकालीनत्वं तच्च धात्वर्थेऽन्वेति धात्वर्थस्तु आख्यातार्थाश्रयत्वे तथा च वर्तमानकालोत्तरकालीनोत्पत्त्याश्रय इति बोधः । न तु प्रत्ययार्थो वर्तमान-

कालोत्तरकालीनोत्पत्तिकत्वं तथा च घटो वर्तमानकालोत्तरकालीनोत्पत्तिका या उत्पत्तिस्तदाश्रयइति स्यात्। स च न सम्भवति उत्पतेरुत्पत्त्यनङ्गीकारात् । तदङ्गीकारेऽपि लाघवेनोक्तस्यैव प्रत्ययार्थत्वाच्च ।

ननु धात्वर्थे कालादेरन्वये श्वो भाविनाशके परश्वो नङ्क्ष्यति इति प्रत्ययः स्यात्। नाशस्य धात्वर्थस्य परश्वः सम्बन्धित्वात् । नष्टे च नश्यतीति स्यात् । नाशस्य वर्तमानत्वात्। नष्ट इति न स्यात्। नाशे वर्तमानध्वंसप्रतियोगिरूपातीतत्वाभावाच्चेति चेन्न। नङ्क्ष्यतीत्यत्रानागता नश्यतीत्यत्र वर्तमाना नष्ट इत्यत्रातीता उत्पत्तिर्धातुना बोध्यते। तत्रोत्पत्तिर्लक्षणया धात्वर्थः । अतीतत्वादिकं तु पूर्ववत् प्रत्ययार्थ एव। तस्यां कालादेरन्वयः। तथा च अतीता या उत्पत्तिस्तत्काले यो नाशस्तत्प्रतियोगी घट इति बोधः। धात्वर्थयोः परस्परान्वयस्य युगपद्वृत्तिद्वयस्य च स्वीकारादिति केचित्।

दीधितिकृतस्तु तादृशोत्पत्तेः प्रकृते लक्षणया प्रत्ययार्थत्वात्। तस्या धात्वर्थनाशेऽन्वयमाहुः ।

धातोरेव तादृशोत्पत्तिकनाशे लक्षणेत्यपरे ।

कश्चित्तु उत्पत्तेरपि उत्पत्तिस्वीकारादतीतानगताविद्यमानोत्पत्तिरेव तत्तत्प्रत्ययार्थः । तथा च तस्यामेव देशकालादेरन्वयमाह ।

ननूत्पत्तौ अनागतत्वं वर्तमानप्रागभावप्रतियोगित्वं तथा च नङ्क्ष्यतीत्यत्र विद्यमानप्रागभावप्रतियोगिनि या उत्पत्तिस्तद्वान् यो नाशस्तत्प्रतीयोगी घट इति बोधात् प्रागभावसिद्धिरिति चेन्न। वर्तमानकालोत्तरकालीनत्वस्यैवोत्पत्तावनागतत्वात् ।

केचित्तु नष्ट इत्यत्रातीतकालसम्बन्धित्वं अतीतस्व वर्तमानकालसम्बन्धित्वं वा निष्ठार्थः । तस्या धात्वर्थनाशेऽन्वय इति तन्न । चिरनष्टेऽपि पूर्वदिनरूपातीतकालवृत्तित्वस्य सत्त्वात्पूर्वेद्युर्नष्ट इति प्रत्ययापत्तेः । नाशे वर्तमानत्वरूपाधुनार्थस्य सत्त्वादधुना नष्ट इति प्रत्ययापत्तेश्च ।

अन्ये तु नशधातोर्नाशसामग्र्येवार्थः । नश्यत्यत्र सामग्रीघटकेषु सर्वत्र वर्तमानत्वान्वयः ।

नङ्क्ष्यति नष्ट इत्यत्र तद्घटकेषु केषुचिदेवातीतत्वानागतत्वयोरन्वय इत्याहुः । तन्न सामग्र्या एकस्या अभावादनन्तशक्तिकल्पने गौरवापत्तिप्रसङ्गात् ।

परे तु यथा आद्यक्षणसम्बन्ध उत्पत्तिः । तथा चरमक्षणसम्बन्धो नाशः । तथा च नष्ट इत्यादेरुत्पत्तिरिति तन्न ।

गुरुमते तथात्वसम्भवेऽपि न्यायनये लाघवेन नाशत्वविशिष्ट एव शक्तेः । न चोक्तेन निर्वाहे नातिरिक्तनाशे प्रमाणम् । चिरातीतेऽपि मणौ मणिध्वंसाद्दाहोत्पत्तेः । महाघटध्वंसात् खण्डघटोत्पत्तेश्च । न च चरमक्षणविशिष्टमहाघटद्वितीयक्षणे खण्डघटो भवितुमर्हति । जन्यद्रव्ये द्रव्यस्य प्रतिबन्धकत्वात् । क्षणस्य क्षणिकस्योपगमे तन्नाशस्यातिरिक्तस्यावश्यमुपेयत्वात् । तत्र चरमक्षणाभावात् । न च स एव क्षण उत्पत्तिर्नाशश्च । इदानीमुत्पद्यते नश्यति चेति प्रत्ययापत्तेः । किं च चरमक्षणसम्बन्धत्वस्य नाशे विद्यमानध्वंसप्रतियोगित्वरूपातीतत्वाभावेन नष्ट इत्यादेरनुपपत्तिः ।

केचित्तु भूसत्तायामित्यनुशासनाद्वस्तुस्वरूपा सत्ता धात्वर्थः । आकाशमस्तीत्यत्रेवाकाशं भवतीत्यत्रेष्टापत्तिरेव ।

परदिने भविष्यतीत्यादौ सप्तम्या उत्पत्तिर्बोध्यते । शरदि पुष्प्यन्ति सप्तच्छदा इत्यादौ सप्तम्या उत्पत्त्यर्थकत्वव्यवस्थापनादुत्पत्तौ लाक्षणिकत्वेऽप्यक्षतेः । प्रत्ययस्य वर्तमानप्रागभावप्रतियोगित्वमेवार्थः । तथा च वर्तमानप्रागभावप्रतियोगिनी परदिनीया या उत्पत्तिस्तद्वत्सत्ताश्रयो घटः । नङ्क्ष्यतीत्यादौ नाशे सप्तम्यर्थोत्पत्त्यन्वयः ।

नष्ट इत्यादौ वर्तमानत्वमेव निष्ठार्थः । सप्तम्या उत्पत्त्यर्थकत्वेनैव पूर्वदोषनिरासात् । नश्यतीत्यादौ परं वर्तमानोत्पत्तिः प्रत्ययार्थं उत्पत्स्यते इत्यादौ सप्तम्यर्थं आधेयत्वम् उत्पत्तौ धात्वर्थेऽन्वेति इत्याहुः ।

ननु घटोत्पत्तेः पूर्वं घटो नास्ति इति प्रत्यक्षं ध्वंसात्यन्ताभावाविषयकं प्रागभावविषयकमिति प्रागभावसिद्धिरिति चेन्न । प्रागभावानङ्गीकारेण तस्यात्यन्ताभावविषयकत्वात् । इह घटप्रागभाव इति प्रत्ययस्तु न कस्यापि ।

केचित्तु पूर्वत्वं प्रागभावाधिकरणसमयवृत्तित्वं तत्पूर्वत्वं तत्प्रागभावाधिकरणसमयवृत्तित्वम् । उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिसमयसम्बन्धरूपा स्वाधिकरणक्षणवृत्तियावत्प्रागभावाधिकरणसमयसम्बन्धरूपा वा प्रागभावं विना दुर्वचेति प्रागभावसाधकमाहुः तन्न । अतीतकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वादिनैव पूर्ववत् तत्पूर्वत्वव्यवहारसम्भवादुत्पत्तेरपि स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपाया यदीयसमयत्वं यत्समयवृत्तिध्वंसप्रतियोगित्वाभावव्याप्यं तत्समयसम्बन्धरूपाया वा स्वीकारात् । अत एव महाप्रलयाङ्गीकारे तदुत्पत्तौ नाव्याप्तिः । यद्वा यदधिकरणक्षणावृत्तियद्वृत्तिध्वंसप्रतियोगिताकत्व

यदवृत्तित्वव्याप्ययद्वृत्तिध्वंसप्रतियोगिताकत्वम् । तस्य तत्सम्बन्धस्य तदुत्पत्तिपदार्थत्वात् । अत एव स्वजन्यविभागप्रागभावावच्छिन्ना क्रिया क्षण इति प्रागभावसाधकं निरस्तम् । स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वस्य स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टत्वस्य स्ववृत्तियावद्ध्वंसविशिष्टत्वस्य स्ववृत्तियावदभावविशिष्टस्य वा क्षणत्वस्वीकारात् ।

केचित्तु तन्तुत्वेन पटत्वेन कार्यकारणभावस्वीकारात् सहस्रतन्तुपटस्य स्वानधिकरणेषु तन्तुषु उत्पत्तिवारणाय तत्पटं प्रति तत्प्रागभावस्य हेतुत्वं न त्वनन्तानां तत्तत्तन्तूनां तत्त्वेन हेतुत्वं गौरवापत्तेः । न च तन्त्वन्तरेषु घटोत्पत्तौ तस्यैव प्रतिबन्धकत्वम् । अन्यदा द्रव्यजनकसंयोगाभावादेव न तदुत्पत्तिरिति वाच्यम् । घटान्तरोत्पत्तिसमय एव सहस्रतन्तुकपटापादनसम्भवात् प्रागभावसाधकमाहुः ।

तन्न त्रिषु चतुर्ष्वेव विजातीयसंयोगे सहस्रतन्तुकपटोत्पादनवारणार्थं तावत्तन्तुसंयोगाकारणत्वमवश्यं वाच्यम् । तथा च प्रागभावकारणत्वे मानाभावात् । न च प्रागभावव्याप्ययावत्तन्तुसंयोगानां जनकत्वं वाच्यम् । कतिपयसंयोगनाशे पटानुत्पत्तिप्रसङ्गात् । न च तत्पटव्याप्ययावत्संयोगेनैव लाघवेन हेतुत्वात् । यावत्त्वानिरुक्तेश्च तत्तद्व्यक्तित्वेनैव हेतुत्वकल्पनात् । न च यावत्त्वमपेक्षाबुद्धिविषयत्वमवच्छेदकं तथा चैक एव कार्यकारणभाव इति वाच्यम् । अपेक्षाबुद्धेश्चैत्रमैत्रीयादिभेदादनन्तकार्यकारणभावतादवस्थ्यात् । कारणतावच्छेदके गौरवस्याधिक्याच्च । न च तत्तत्संयोगत्वेन सह-

स्रतन्तुकपटं प्रति कारणत्वेऽपि छिन्नितन्तुसंयोगेन खण्डपटोत्पत्तौ कथमग्रे सहस्रतन्तुकपटोत्पत्तिस्तत्पटस्य तत्र प्रतिबन्धकत्वादिति वाच्यम् । दृढतराभिघातेन तन्नाशादेव सहस्रतन्तुकपटोत्पत्तेः । अत एव सहस्रतन्तुकपटोत्पत्तिसमये न खण्डोत्पत्तिः । महापटध्वंसस्य तत्र हेतुत्वाद्वा खण्डपटजनकसंयोगस्य महापटजनकसंयोगकाले एवोत्पत्तेरभ्युपगमात् ।

अपरे तु सहस्रतन्तुकपटस्य समवायेनोत्पत्तौ न तत्तत्तन्तूनां तत्तत्संयोगादीनां वा हेतुता सम्भवति तन्त्वन्तरे तु पटसमवायेन सत्त्वेन व्यभिचारात् । अनन्तकार्यकारणभावेन गौरवाच्च । अत एव तत्तत्तन्तौ समवायस्य भिन्नस्याङ्गीकारेऽपि न निस्तारः ।

न च कतिपयसंयोगेषु सत्सु सहस्रतन्तुकपटोत्पत्त्यापत्तिः । कालिकसंबन्धेन तत्पटोत्पत्तौ कालिकसम्बन्धेन चरमसंयोगव्यक्तेस्तत्त्वेन हेतुत्वात् ।

न च सहस्रतन्तुमात्रवृत्तिबहुत्वव्यक्तेस्तद्व्यक्तित्वेनसमवायेन हेतुतास्त्विति वाच्यम् । तत्पटाव्यवहितपूर्वसमये तदुत्पत्तौ मानाभावात् । चैत्रमैत्रीयापेक्षाबुद्ध्यादिना विनिगमनाविरहाच्च । अतस्तत्कारणत्वेन प्रागभावसिद्धिः । तस्याभावत्वं तु भावत्वसाधकमानाभावात् । न चाभावत्वसाधकमानाभावाद्भावत्वं तस्य समवायेन ध्वंसप्रतियोगिनं प्रति द्रव्यस्य कारणत्वेनानादित्वासिद्धेरिति वदन्ति तन्न ।

समवायत्वस्वरूपेण तस्य तत्कारणत्वेऽप्यच्चतेः । किं च तं प्रति कालिकसंबन्धेन चरमसंयोगव्यक्तेस्तदानीमनन्तोत्पन्नानां वा प्रत्येकं हेतुत्वे विनिगमकाभावात् ।

अनन्तकार्यकारणभावापत्तेः । समवायानां नानात्वपक्षे तत्तद्द्रव्यवृत्तिसमवायेन कार्यं तादात्म्येन तत्तद्द्रव्याणां हेतुत्वस्य क्लृप्तत्वेन तेनैवातिप्रसङ्गसम्भवात्। किं च तद्व्यक्तित्वस्य कार्यतानवच्छेदकत्वेनापादनासम्भवः । तस्य समवायेनाकस्मिकत्वपरिहारार्थं कार्यतावच्छेदकत्वस्वीकारेऽपि तत्पटत्वेन तन्तूनामेव तादात्म्येन कारणत्वसम्भवात्। कारणतावच्छेदकावलीढस्यैव प्रकृते कार्योत्पत्तौ नियामकत्वात् । एवं जागराद्यज्ञानस्य चतुर्थे क्षणे उत्पत्त्यापत्तिस्तत्कारणस्य पूर्वं सत्त्वात् । तज्ज्ञानरूपप्रतिबन्धकाभावस्य च तृतीयक्षणे सत्त्वात् । अत एव न द्वितीयतृतीयक्षणयोस्तदापादानं तत्क्षणोत्पन्नानन्तानां प्रतिबन्धकत्वे प्रत्येकं विनिगमनाविरहादतिरिक्तप्रागभावसिद्धिरपि निरस्ता । द्वितीयादिज्ञानानामपि चतुर्थक्षणे तु उत्पादस्यापदानसम्भवेन जागराद्येत्यस्य वैयर्थ्यात् ।

न च द्वितीयादिज्ञाने पूर्वज्ञानस्य कारणत्वात् तज्ज्ञानस्य स्वोत्पत्तौ प्रतिबन्धकत्वान्नापादनमिति वाच्यम् । तत्तज्ज्ञानपूर्वकालोत्पन्नैः प्रत्येकं विनिगमनाविरहात् । तत्तज्ज्ञानसमकालोत्पन्नैः प्रतिबन्धकत्वेऽपि विनिगमनाविरहाच्च । सर्वत्र समवायेन तत्तद्व्यक्तिं प्रति क्लृप्तानां प्रत्येकं विनिगमनाविरहात् । अतिरिक्तकारणत्वेन प्रागभावसिद्धिर्वक्तुमशक्यत्वेन कार्यविशेषापादानायासवैयर्थ्यात् । न च द्वितन्तुकसंयोगस्य समवायेन तत्पटोत्पत्तौ कारणत्वसम्भवात्, न प्रागभावसिद्धिरिति वाच्यम् । संयोगस्य वैजात्येन जन्यद्रव्यत्वावच्छिन्नं प्रति पटत्वावच्छिन्नं प्रति वा जनकत्वेन तत्तत्पटत्वावच्छिन्ने तस्य कारणत्वे विनिगमनाविरहे प्रत्येकं तैस्तैर्विनिगमनाविरहो दुर्वारः । न

च सामान्यतः कृत्स्नकारणस्यैव विशेष्यहेतुत्वेनेति वाच्यम् । तादृशनियमे प्रमाणाभावात् । अत एव तत्त्वज्ञानप्रागभावो दृष्टहेतुतया सिध्यतीति निरस्तम् । तत्त्वज्ञानान्तरप्रागभावस्य सत्त्वेन तत्त्वज्ञानिनरेऽप्यदृष्टापत्तेः । आद्यतत्त्वज्ञानप्रागभावस्य च न हेतुत्वम् । आद्यत्वानिरुक्तेः । वैजात्यमेषामाद्यत्वम् । तथा चाद्यज्ञानप्रागभावस्य हेतुतेत्यपि निरस्तम् । लाघवेन वासनाया एव हेतुत्वसम्भवात् । तत्त्वज्ञानध्वंसस्य प्रतिबन्धकत्वाद्वा । न च तत्त्वज्ञानध्वंसस्य प्रतिबन्धकत्वे तत्त्वज्ञानोत्पत्तिक्षणतदुत्तरक्षणयोर्धर्माधर्मस्वीकारे गौरवमिति वाच्यम् । तत्त्वज्ञानोत्पत्तिक्षणे त्वयापि तत्स्वीकारात् किं चाद्यत्वज्ञाने वैजात्यस्वीकारापेक्षया तत्क्षणोत्पन्नध्वंसप्रतियोगित्वेन वैजात्यस्वीकारस्यैवोचितत्वादिति दिक् ।

नन्वस्तु कृतिसाध्यताज्ञानं प्रवृत्तौ साक्षाच्चिकीर्षाद्वारा वा हेतुः । तथापि सिद्धे कपालादौ प्रवृत्तेस्तत्र कृतिसाध्यताज्ञानाभावात् कथं हेतुत्वमिति चेन्न ।

प्रवृत्तेर्द्वेधा विषयता सिद्धताख्या उद्देश्यताख्या च । तत्र सिद्धताख्यविषयतया कपालादौ प्रवृत्तिः । तत्र कृतिसाध्यताज्ञानं न हेतुः । किं तु उद्देश्यताख्यविषयतया । तथा च समवायेन घटाद्युद्देश्यकप्रवृत्तौ घटः कृतिसाध्य इति ज्ञानं घटसाधनत्वेन तदुपादानप्रत्यक्षं घटेच्छा च समवायेन हेतुः । अतः कपालादिज्ञानाद्यभावकाले न घटोद्देश्यकाप्रवृत्तिरिति केचित् ।

परे तु घटोद्देश्यकप्रवृत्तिः सिद्धताख्यविषयतासम्बन्धेन यत्र तत्र कृतिसाध्यताज्ञानं तत्र विशेष्यतासम्बन्धेन कपाले घटवत्त्वेन कृतिसाध्यताज्ञानसत्त्वान्न दोषः ।

अनन्तकार्यकारणभावापत्तेः । समवायानां नानात्वपक्षे तत्तद्द्रव्यवृत्तिसमवायेन कार्यं तादात्म्येन तत्तद्द्रव्याणां हेतुत्वस्य क्लृप्तत्वेन तेनैवातिप्रसङ्गसम्भवात् । किं च तद्व्यक्ति-त्वस्य कार्यतानवच्छेदकत्वेनापादनासम्भवः । तस्य सम-वायेनाकस्मिकत्वपरिहारार्थं कार्यतावच्छेदकत्वस्वीकारे-ऽपि तत्पटत्वेन तन्तूनामेव तादात्म्येन कारणत्वसम्भवात् । कारणतावच्छेदकावलीढस्यैव प्रकृते कार्योत्पत्तौ नियाम-कत्वात् । एवं जागराद्यज्ञानस्य चतुर्थे क्षणे उत्पत्त्यापत्ति-स्तत्कारणस्य पूर्वं सत्त्वात् । तज्ज्ञानरूपप्रतिबन्धकाभावस्य च तृतीयक्षणे सत्त्वात् । अत एव न द्वितीयतृतीयक्षणयो-स्तदापादानं तत्क्षणोत्पन्नानन्तानां प्रतिबन्धकत्वे प्रत्येकं विनिगमनाविरहादतिरिक्तप्रागभावसिद्धिरपि निरस्ता । द्वितीयादिज्ञानानामपि चतुर्थक्षणे तु उत्पादस्यापदानस-म्भवेन जागराद्येत्यस्य वैयर्थ्यात् ।

न च द्वितीयादिज्ञाने पूर्वज्ञानस्य कारणत्वात् त-ज्ज्ञानस्य स्वोत्पत्तौ प्रतिबन्धकत्वान्नापादनमिति वाच्यम् । तत्तज्ज्ञानपूर्वकालोत्पन्नैः प्रत्येकं विनिगमनाविरहात् । त-त्तज्ज्ञानसमकालोत्पन्नैः प्रतिबन्धकत्वेऽपि विनिगमनावि-रहाच्च । सर्वत्र समवायेन तत्तद्व्यक्तिं प्रति क्लृप्तानां प्रत्येकं विनिगमनाविरहात् । अतिरिक्तकारणत्वेन प्रागभावसि-द्धिर्वक्तुमशक्यत्वेन कार्यविशेषापादानायासवैयर्थ्यात् । न च द्वितन्तुकसंयोगस्य समवायेन तत्पटोत्पत्तौ कारणत्व-सम्भवात्, न प्रागभावसिद्धिरिति वाच्यम् । संयो-गस्य वैजात्येन जन्यद्रव्यत्वावच्छिन्नं प्रति पटत्वावच्छिन्नं प्रति वा जनकत्वेन तत्तत्पटत्वावच्छिन्ने तस्य कारणत्वे वि-निगमनाविरहे प्रत्येकं तैस्तैर्विनिगमनाविरहो दुर्वारः । न

च सामान्यतः क्लृप्तकारणस्यैव विशेष्यहेतुतेति वाच्यम्। तादृशनियमे प्रमाणाभावात्। अत एव तत्त्वज्ञानप्रागभावो दृष्टहेतुतया सिद्ध्यतीति निरस्तम्। तत्त्वज्ञानान्तरप्रागभावस्य सत्त्वेन तत्त्वज्ञानिनरेऽप्यदृष्टापत्तेः। आद्यतत्त्वज्ञानप्रागभावस्य च न हेतुत्वम्। आद्यत्वानिरुक्तेः। वैजात्यमेषामाद्यत्वम्। तथा चाद्यज्ञानप्रागभावस्य हेतुतेत्यपि निरस्तम्। लाघवेन वासनाया एव हेतुत्वसम्भवात्। तत्त्वज्ञानध्वंसस्य प्रतिबन्धकत्वाद्वा। न च तत्त्वज्ञानध्वंसस्य प्रतिबन्धकत्वे तत्वज्ञानोत्पत्तिक्षणतदुत्तरक्षणयोर्धर्माधर्मस्वीकारे गौरवमिति वाच्यम्। तत्त्वज्ञानोत्पत्तिक्षणे त्वयापि तत्स्वीकारात् किं चाद्यत्वज्ञाने वैजात्यस्वीकारापेक्षया तत्क्षणोत्पन्नध्वंसप्रतियोगिन्येव वैजात्यस्वीकारस्यैवोचितत्वादिति दिक्।

नन्वस्तु कृतिसाध्यताज्ञानं प्रवृत्तौ साक्षाच्चिकीर्षाद्वारा वा हेतुः। तथापि सिद्धे कपालादौ प्रवृत्तेस्तत्र कृतिसाध्यताज्ञानाभावात् कथं हेतुत्वमिति चेन्न।

प्रवृत्तेर्द्वैधा विषयता सिद्धताख्या उद्देश्यताख्या च। तत्र सिद्धताख्यविषयतया कपालादौ प्रवृत्तिः। तत्र कृतिसाध्यताज्ञानं न हेतुः। किं तु उद्देश्यताख्यविषयतया। तथा च समवायेन घटाद्युद्देश्यकप्रवृत्तौ घटः कृतिसाध्य इति ज्ञानं घटसाधनत्वेन तदुपादानप्रत्यक्षं घटेच्छा च समवायेन हेतुः। अतः कपालादिज्ञानाद्यभावकाले न घटोद्देश्यकाप्रवृत्तिरिति केचित्।

परे तु घटोद्देश्यकप्रवृत्तिः सिद्धताख्यविषयतासम्बन्धेन यत्र तत्र कृतिसाध्यताज्ञानं तत्र विशेष्यतासम्बन्धेन कपाले घटवत्त्वेन कृतिसाध्यताज्ञानसत्त्वान्न दोषः।

न च घटेच्छाविरहदशायां कपाले तादृशज्ञानात् प्रवृत्त्यापत्तिरिति वाच्यम् । घटवत्त्वेन कपाले इष्टसाधनताज्ञानाद् घटवत्त्वेन कपालेच्छाया अपि तत्र हेतुत्वात् समवायेन तादृशप्रवृत्तौ समवायेन घटेच्छाया घटसाधनताज्ञानस्यापि तत्र हेतुत्वाद्वेत्याहुः ।

अपरे तु सिद्धताख्यविषयतया घटोद्देश्यकप्रवृत्तौ घटेच्छा कृतिसाध्यघटसाधनमिति प्रत्यक्षं च हेतुरित्याहुः ।

अन्येतु घटत्वावच्छिन्नोद्देश्यताख्यविषयतासम्बन्धेन प्रवृत्तौ घटत्वावच्छिन्नविशेषतासम्बन्धेन चिकीर्षा घटसाधनमित्युपादानप्रत्यक्षं च घटत्वावच्छिन्नप्रकारतासम्बन्धेन हेतुः । कृतिसाध्यताज्ञानस्य साक्षात्प्रवृत्तिहेतुत्वे तु तादृशप्रवृत्तौ घटत्वावच्छिन्नविशेष्यतासम्बन्धेन कृतिसाध्यताज्ञानमिच्छाहेतुः तादृशप्रत्यक्षं च तादृशप्रकारतयेत्याहुः ।

नन्वस्तूक्तरीत्या कृतिसाध्यताज्ञानं प्रवर्तकम् । बलवदनिष्टाननुबन्धित्वज्ञानं तु कथम् ।

अत्र केचित् कृतिसाध्यताज्ञानवत् साक्षादेव प्रवर्तकमिति वदन्ति ।

उपायेच्छाद्वारेष्टसाधनताज्ञानवदित्यपरे ।

ननु किं बलवदनिष्टाननुबन्धित्वम् । इष्टोत्पत्तिनान्तरीयकदुःखाधिक दुःखाजनकत्वं तदिति चेन्न । नान्तरीयकत्वानिर्वचनात् । न च कालिकसम्बन्धेन स्वजन्यसुखव्यापकत्वं तत् । सुखदुःखयोरसमानकालीनत्वेन पाकादिदुःखस्यापि अनान्तरीयकत्वापत्त्या तत्र प्रवृत्त्यभावापत्तेः । नापि दैशिकत्वेन व्यापकत्वं तत् । नरकदुःखस्यापि दैशिकेनागम्यागमनजन्यसुखव्यापकतया नान्तरीयकत्वेन तत्र

प्रवृत्त्यापत्तेः। न च स्वजन्येष्टात् पूर्वमुत्पन्नत्वं तत्। निदाघदूनदेहस्य निकटस्थसरोवगाहनवत् दूरस्थसरोवगाहनेऽपि प्रवृत्त्यापत्तेः। न च स्वोद्देश्यसुखोत्पत्तौ तदवश्यम्भावितत्वम्, निदाघदूनदेहस्य सन्तापशान्तेर्निकटस्थसरोवगाहनेन सम्भवात् दूरस्थसरोवगाहजन्यदुःखस्य नावश्यकत्वमिति न तत्र प्रवृत्तिरिति वाच्यम्। परस्त्रीगमनेऽपि प्रवृत्त्यापत्तेः। न च यज्जातीयेष्टतावच्छेदकावच्छिन्नोत्पत्तौ यदावश्यकं तत्त्वम्। कलञ्जभक्षणे प्रवृत्त्यापत्तेः। तज्जातीयसुखोत्पत्तौ अवश्यं नरकोत्पत्तेः। न च यद्दुःखं विना स्वोद्देश्यसुखानुत्पत्तिस्तन्नान्तरीयकम्। बह्वायाससाध्यस्वल्पसुखजनके प्रवृत्त्यापत्तेः। न च विजातीयद्वेषविषयदुःखाजनकत्वं तत्। यागादावप्यप्रवृत्त्यापत्तेः। तद्दुःखस्यापि कस्य चिद् विजातीयद्वेषविषयत्वात्। अत एव विजातीयद्वेषे स्वीयत्वविशेषणेनापि न निस्तारः। यागादिदुःखस्यापि कदा चित् स्वीयतादृशद्वेषविषयत्वात् तत्कालीनत्वेन तादृशद्वेषस्य विशेषणीयत्वे त्वननुगमः। यदा तत्पुरुषस्य कुत्रापि न तादृशोद्वेषस्तदा प्रवृत्त्यभावापत्तेः। नचैतत्कालावच्छेदेन तत्पुरुषीयद्वेषविषयत्वाभाववत् यावत्स्वजन्यकत्वज्ञानं तत्पुरुषीयप्रवृत्तौ हेतुरिति वाच्यम्। द्वेषज्ञानस्याप्रवर्तकत्वादिति चेत्।

अत्र के चित् पाकादिप्रवृत्तौ पाकजन्यत्वेनोपस्थिते बलवद्द्वेषस्य प्रतिबन्धकत्वात्।

अन्ये तु पाकजन्यतत्तत्फले द्वेषतत्फलसाधनताज्ञानस्य प्रवृत्तौ प्रतिबन्धकत्वम्।

अपरे तु विशेष्यतया प्रवृत्तौ विशेष्यतयोत्कटद्वेषः प्रतिबन्धकः। स चोत्कटद्वेषविषयसाधनताज्ञानात्। न

चोपायोत्कटद्वेषस्योपायप्रवृत्तौ न विरोधित्वमुपायप्रवृत्तिजनकोपायेच्छाकाले तस्य सत्त्वात् । आत्मयोग्यविशेषगुणानां क्रमिकत्वनियमेनोपायेच्छाद्वेषसामग्र्योरव्यवहितपौर्वापर्यस्यैकक्षणवृत्तित्वस्य वाऽभावादिति वाच्यम् । ज्ञानयोरेव यौगपद्यानङ्गीकारेण यत्रागम्यागमनजन्यसुखदुःखयोर्युगपदेवेच्छाद्वेषौ तत्र इच्छाद्वेषविषययोर्युगपदेव साधनताज्ञानम् । तत्र उपाये द्वेषः, न त्विच्छा, उत्कटद्वेषाभावस्य कार्यसहभावेनोपायेच्छाकारणत्वेनोपायेच्छाविघटनद्वारैव तस्य प्रवृत्तौ प्रतिबन्धकस्वीकारात् । यद्वा उक्तस्थले उपायद्वेषोत्पत्तिकाले नेच्छाप्युपपद्यते ततस्तु न प्रवृत्तिः । उत्कटद्वेषस्य प्रवृत्तौ साक्षात्प्रतिबन्धकत्वात् । योग्यात्मविशेषगुणसामान्यस्य यौगपद्यानङ्गीकारे तु यत्रागम्यागमनेच्छा ततोऽगम्यागमने फलसाधनताज्ञानं दुःखसाधनताज्ञानं च ततोऽगम्यागमनेच्छासामग्र्योर्बलवत्वान्न दुःखे द्वेषः । तस्य स्वाश्रयजनकत्वज्ञानसम्बन्धेनागम्यागमनप्रवृत्तौ प्रतिबन्धकत्वात्कार्यसहभावेन प्रवृत्तौ तदभावस्य कारणत्वात्तदुत्पत्तिकाले तदुत्तरकाले च नागम्यागमने प्रवृत्तिरिति तन्न । तेन सम्बन्धेन उभयत्र काले द्वेषाभावेन प्रवृत्तेरवारणाद् द्वेषस्य प्रतिबन्धकत्वं मृग्यमिति ।

तादृशज्ञानस्यापेक्षाबुद्धिरूपत्वे तु तस्य प्रतिबन्धकत्वमित्यपरे । उत्कटद्वेषस्यानुत्कटेच्छां प्रति उत्कटेच्छाया अनुत्कटद्वेषं प्रति प्रतिबन्धकत्वम् । उत्कटत्वावच्छिन्ने त्वननुगतमेव कारणम् । अत एकस्य कालभेदेन प्रवृत्तिनिवृत्त्योरुपपत्तिरिति ।

आचार्यास्तु कार्याः कुर्यादित्यादौ प्रार्थना आशंसा लिङां इच्छावाचकत्ववद्विधिलिङोऽप्याप्ताभिप्रायो वा-

च्यः । तथा च यागादावाप्ताभिप्रायविषयत्वे ज्ञाते यागो-मदिष्टसाधनं ममाप्ताभिप्रायविषयत्वान्मन्मित्राद्यभिप्रा-यविषयभोजनवदित्यनुमानादिष्टसाधनत्वादिबोधात् प्र-वृत्तिरित्याहुः । तन्न आप्ताभिप्रायविषयत्वस्येष्टसाधनत्व-व्यभिचारितया साधनत्वेनाप्ताभिप्रायविषयत्वं हेतुर्वा-च्यः । तस्य च विधिनाऽज्ञानादिष्टसाधनत्वेनाप्ताभिप्राय-विषयो विध्यर्थो वाच्यः । तदपेक्षया इष्टसाधनत्वमेव विध्यर्थोऽस्त्विति दिक् ।

ननु वस्तु इष्टसाधनत्वादिकं विध्यर्थः । तथापि काला-न्तरभाविस्वर्गसाधनत्वं दर्शपौर्णमासयोः कथम् । आशु-तरविनाशित्वादिति चेन्न । अपूर्वस्य द्वारस्य स्वीकारात् । अत्र षट्प्रधानयागाः प्रत्यक्षविधिना अवगतकालयोगि-नः । तत्र त्रयाणां दर्शसम्बन्धः । त्रयाणां पौर्णमासे सम्ब-न्धः । तत्र त्रयाणामुत्पत्त्यपूर्वाणि त्रीणि तैर्जन्यमेकमपू-र्वमेवं चत्वारि । एवं त्रिकान्तरेऽपि इति अष्टौ कलिका-पूर्वाभ्यामेकमपूर्वं जन्यते तत्परमापूर्वमिति जन्यापूर्वैर्जन-कापूर्वनाशाभ्युपगमात् । नवापूर्वपक्षमाहुः ।

अन्ये तु परमापूर्वकलिकापूर्वयोश्च मानाभावेन षडेवापूर्वाणि । न चाङ्गानां प्रधानानां चापूर्वद्वारा फलहे-तुत्वेऽङ्गप्रधानयोः साम्येन सर्वेषां प्रधानत्वापत्तिरिति वा-च्यम् । त्वन्मतेऽपि अङ्गापूर्वाणां प्रधानोत्पत्त्यपूर्वाणामेव कलिकापूर्वहेतुत्वान्नोक्तदोष इति चेत्, मन्मतेऽपि अङ्गापूर्व-विशिष्टप्रधानापूर्वाणामेव फलहेतुत्वान्नोक्तदोषः । न च कलिकापूर्वानभ्युपगममे प्रयाजजन्यापूर्वस्यानाशात् प्रया-जानां पुनरनुष्ठानं न स्यादिति वाच्यम् । प्रयाजादीनामा-वृत्तौ मानान्तरमस्ति चेत्तत एव तत्कालीनप्रयाजजन्याप-

र्वविशिष्टस्य प्रधानापूर्वस्य फलकारणत्वस्वीकारेण तदनुष्ठानोत्पत्तेरिति दिक् ।

ननु चरमकारणातिरिक्तकारणसाधारणस्य कार्याव्यवहितपूर्वक्षणत्वव्यापकत्वस्वव्यापारान्यतरस्वत्वरूपस्य यागे प्रमितस्य निर्वाहार्थं व्यापारस्य कल्पना, स च क्रियाध्वंस एवास्तु लाघवान्नत्वदृष्टं, गौरवात् । न च प्रतियोगिध्वंसयोरेकत्राजनकत्वान्न ध्वंसस्य व्यापारतेति वाच्यम् । तादृशनियमे मानाभावादिति चेन्न । अपूर्वाभावे पापध्वंसरूपफलाभावेन प्रायश्चित्तवैयर्थ्यापत्तेः । न च प्रायश्चित्तध्वंसस्य नरकप्रतिबन्धकत्वमिति वाच्यम् । प्रायश्चित्तोत्तरकृतात् कर्मणो नरकाभावप्रसङ्गात् । न च प्रायश्चित्तध्वंसाज्जन्मान्तरनिषिद्धकर्मदुःखस्य प्रतिबन्धापत्तेः । एतज्जन्मकृततादृशकर्मजन्यदुःखे च न विरोधित्वम् । अप्रसिद्धेः । किं च तत्त्वज्ञानस्यापूर्वनाशकत्वेन वासनाध्वंसस्यापूर्वप्रतिबन्धकत्वेन वाऽपूर्वसिद्धिः । न च वासनाकालीनयागत्वेन हेतुत्वान्नोक्तदोषः । गौरवात् । एवम् ।

कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात् ।
गण्डकीबाहुतरणाद्धर्मः क्षरति कीर्तनात् ॥

इत्यादिवचनात् कीर्तनादिनाश्यातयापि धर्मसिद्धिर्द्रष्टव्या । विस्तरस्त्वस्मत्कृतगुणरहस्यटिपण्यां चावसेयः । स चेत्थम् । न च ध्वंसस्य नित्यत्वेन फलानन्त्यापत्तिः । त्वन्मतेऽपि सुखस्य स्पर्शनाशकत्वे प्रथमोत्पन्नसुखेन धर्मनाशेऽग्रे शतवर्षभाविस्वर्गसुखफलाभावापत्तिः । चरमसुखस्य विजातीयसुखस्य वा धर्मनाशकत्वान्न तादृशस्वर्गानुत्पत्तिरिति वाच्यम् । अपूर्वतत्प्रागभावध्वंसानाम-

योगवशेन वृत्तिसम्भवात् यागनामत्वम् । ननु—'उद्भिद्यते भूमिः अनेन इति योगवशेन खनित्रादावपि उद्भिदः प्रयोगसम्भवात्, खनित्रादिगुणविधिः किन्न स्यात्' इति चेत्—न, एतादृशस्थले गुणविधिः क्वापि वक्तुन्न शक्यते, विरुद्धत्रिकद्वयसमावेशाख्यदोषप्रसङ्गात् । तथा हि "उद्भिदा यजेत पशुकामः" इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासम्भवात् पशुकर्मकभावनायाङ्करणत्वेन यागो विधेयः—'यागेन पशून् भावयेत्' इति; ततश्च यागस्य विधेयत्वम्, फलम्प्रति शेष(१) तया प्रतीयमानत्वाद्गुणत्वम् । फलसिद्ध्यर्थं पुंसाऽनुष्ठीयमानत्वात्(२) उपादेयत्वम्, इति विधेयत्वगुणत्वोपादेयत्वात्मकमेकं त्रिकं यागेऽस्ति । तथा यागोद्देशेन उद्भिद्गुणविधौ विधित्सितगुणापेक्षया प्राधान्यम् उद्देश्यत्वम् अनुवाद्यत्वञ्चेति द्वितीयं त्रिकम् । तदिदम् त्रिकद्वयम् परस्परविरुद्धम् एकस्मिन् यागे प्रसज्येत । अतो न गुणविधिः । न च—"सोमेन यजेत" इत्यत्र विरुद्धत्रिकादिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामङ्गीकृत्य, सोमवता या-

(१) 'शेषतया' अङ्गतयेत्यर्थः, ।
(२) प्रवृत्तिविषयत्वम् ।

गेनेष्टम्भावयेत् इति सोमविशिष्टयागविधानात्, यथा सोमरूपगुणविधिः, तद्वदुद्भिन्पदस्यापि मत्वर्थलक्षणयाऽत्रोद्भिद्गुणविशिष्टयागविधिः स्यादेव" इति वाच्यम् सोमादौ गत्यन्तराभावात् मत्वर्थलक्षणया विशिष्टविध्यङ्गीकारात् उद्भिदादौ नामत्वेन गतिसम्भवात् विशिष्टविध्यङ्गीकारायोगात् । तस्मात् योगवशादुद्भिदादीनान्नामत्वम् ।

(५७) चतुर्थ-वाक्यभेदप्रदर्शनम् (४) तथा—"चित्रया यजेत पशुकामः" इत्यत्र चित्रापदम्प्राजापत्यनामधेयम् । "दधिमधुघृतमापोधानास्तण्डुलास्तत्संसृष्टम् प्राजापत्यम्" इत्यत्र 'तत्संसृष्टम् प्राजापत्यम्' इति सामानाधिकरण्याद् यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासम्बन्धः श्रुतः, तेनानुमितो यागो विधीयते । विहितस्य यागस्य फलाकाङ्क्षायाम् "चित्रया यजेत' इति वाक्यम् फलसम्बन्धविधायकम् । तत्र फलार्थकत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वात् चित्रापदन्नामधेयम् । न तु "अग्नीषोमीयम् पशुमालभेत" इति वाक्यप्राप्तम् पशुयागं 'यजेत' इत्यनूद्य चित्रत्वस्त्रीत्वगुणद्वयविधानम्, मा-

३५४

नान्तरप्राप्तं कर्मोद्दिश्य तत्रानेकगुणैर्विधाने वाक्यभेदात्। तदुक्तम्—

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः" [तन्त्रवार्तिकम्] इति मानान्तराप्राप्तकर्मत्वेन एकदेवताष्टाकपालपुरोडाशामावास्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासम्बन्धेनानुमितो यागो विधीयते—इति सिद्धान्तात्। तदुक्तम्—

"अप्राप्ते तु विधीयन्ते बहवो ऽप्येकयत्नतः"

इति [तन्त्रवार्तिकम्]।

(५८) चित्रया यजेतेत्यत्र-सिद्धान्त्युपन्यस्तवाक्यभेददोषपरिहारमूला शङ्कातन्निरासश्च

अथ—'यथा 'पशुना यजेत' इत्यत्र मानान्तरप्राप्तं यागमुद्दिश्य तदङ्गतया 'पशुना'—इत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यादीनां त्रयाणाम् वाक्यभेदं विनैव विधिरङ्गीकृतः, तद्वदत्रापि एकपदोपात्तचित्रत्वस्त्रीत्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः। अत एव तत्र विधेयस्य पशोरुपादेयत्वात् तद्गतमेकत्वम् यज्ञाङ्गतया विवक्षितम्, इत्येकेनैव पशुना यष्टव्यम्। 'ग्रहं सम्मार्ष्टि' इत्यत्रोद्देश्यगतमेकत्वादिकन्त्वविवक्षितम्—इतिसिद्धान्तप्रवादः, कथम्? 'ग्रहं सम्मार्ष्टि' इत्यत्र 'ग्रहम्' इति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात् प्रयोजनवत्वाच्च प्राधान्यं गम्यते। सम्मार्गस्तु

ग्रहम्प्रति गुणभूतः। "प्रतिप्रधानं गुण आवर्तनीयः" इति न्यायाद् यावन्तो ग्रहाः, तेषां सर्वेषां सम्मार्ग इति निश्चये सति—कति ग्रहाः सम्मार्जनीयाः? इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम्। यदुच्यते—'नेदमुद्देश्यगतम्, किन्तु स्वयं विधेयम्—ग्रहम् संमृज्यात्, यं संमृज्यात् तञ्चैकमिति,—तथा सति विधेयभेदाद्वाक्यभेदः स्यात्। यथा बुभुत्साया अभावाद् विधिनाऽयोगाच्चोद्देश्यगता संख्या न विवक्षिता। उद्देश्यगतमपि विशेषणं किञ्चिद्विवक्षितम्, यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति, यदा तत्रैव ग्रहत्वं विवक्षितम् तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात्। तेन ग्रहजातीयसाधनसोमयागापूर्वार्थत्वाच्चमसेषु न सम्मार्ग इति स्थितम्। 'पशुना यजेत' इत्यत्र यागम्प्रति पशुः विधेयत्वाद् गुणभूतः, 'प्रतिगुणम्प्रधानावृत्तिर्नास्ति'—इति कियता पशुना यागः कर्तव्यः? इत्याकाङ्क्षायाम्, एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितम्, बुभुत्सितत्वात्। किञ्च लिङ्गसंख्याविशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपात्तस्य विधेयत्वाद् विधेयपशुद्वारा तद्गतलिङ्गसं-

ख्यादेरपि क्रियाङ्गत्वादेकत्वं विवक्षितम् । अथ वा तृतीयया विभक्त्याऽभिहितयोर्लिङ्ग-संख्ययोर्विभक्त्यभिहिततया करणकारकश-क्त्यात्मसात्कृतयोः प्रातिपदिकार्थपशुद्रव्येण सम्बन्धमनाहृत्य तद्वदेव साक्षात् क्रियाङ्ग-त्वेन विधाने सति, पश्चात् अरुणैकहाय-नीन्यायेन परस्परमन्वयः—यागाङ्गत्वेन वि-हितो यः पशुः स एकः पुमांश्च इति । यथा 'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति' इत्यत्र कारकाणां क्रियान्वयनिय-मात् करणविभक्तिभिः आरुण्यपिङ्गाक्षीत्वा-दीनां चतुर्णां परस्परमनन्वितानामेव सो-मक्रयणाङ्गत्वेनान्वये सति, आरुण्यादिगुण-स्यामूर्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायनीपरिच्छेदकत्वेन (१) प-श्चात् परस्परं पार्ष्णिकान्वयः,—या एक-हायनी गौः सा पिङ्गाक्षी अरुणा इति, त-द्वत् । तदेवमुद्देश्यगतविशेषणमविवक्षितम् उपादेयगतम् विवक्षितम्-इति स्थितम् । एवञ्च चित्रापदेन चित्रत्वस्त्रीत्वोभयवि-शेषितपशुकारकस्य 'यजेत'– इति पदानू-दिते ऽग्नीषोमीयपशुयागे विधातुं शक्य-त्वात्, कथन्नामत्वम् ? "–इति चेत्,–न ।

(१) विशेषणत्वेन ।

(अ)तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसम्बन्धाकाङ्क्षस्य हानम्, अप्रकृतस्य अग्नीषोमीययागस्य कल्पना च स्यात्। तत् द्वयमयुक्तम्। तस्मात् चित्रापदं कर्म नामधेयम्। एवं तत्प्रख्यादिभिरन्यतमेन सर्वत्र कर्मनामत्वमूह्यम् ॥

इति विधिवाक्यस्य प्रामाण्यं विचारितम् ॥

---

## ॥ अथ अर्थवादविचारः ॥

(५९) अर्थवादवाक्यानाम्प्रामाण्यनिरूपणम्

अर्थवादानान्तु स्वार्थपरत्वे प्रयोजनाभावात् अध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वात् विधेयगतप्राशस्त्यप्रतिपादनद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यम् ॥

(६०) अर्थवादानां चातुर्विध्यम्

स चतुर्विधः—निन्दा-प्रशंसा-परकृति-पुराकल्प-भेदात्। तत्र(१)निन्दार्थवादो यथा-"असत्रम् वा एतत् यदच्छन्दोमम। अश्रुजम् हि रजतं यो बर्हिषि ददाति पुराऽस्य संवत्सराद् गृहे रुदन्ति" इति। (२)प्रशंसा यथा—"शोभते ऽस्य मुखं य एवं वेद" "वायुर्वै क्षेपिष्ठा देवता"—इत्येवमादिः। (३) 'परेणो-

(अ) चित्रापदस्य अनामत्वे सति।

दम्महता पुरुषेण कर्म कृतम्'—इति प्रतिपादकोऽर्थवादः परकृतिः । यथा—"अग्निर्वा अकामयत" इत्यादिः। (४) परवक्तृकार्यादिप्रतिपादकः पुराकल्पः । यथा—"तमशपद् धिया धिया त्वा वध्यासुः" इत्यादिः । तत्र निन्दार्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वम् 'अश्रुजम्'—इत्यादिरजतनिन्दाद्वारा विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात् । इतरेषां त्रयाणां साक्षात् प्राशस्त्यपरत्वमेव । 'वायुर्वा'—इत्यर्थवादस्य वायुः क्षिप्रगामित्वात् अतीव प्रशस्ता देवता; अतस्तद्दैवत्यं कर्म प्रशस्तम्—इति विधेयदेवतावगतप्राशस्त्यप्रतिपादनद्वाराविध्येकवाक्यत्वम्। 'अग्निर्वा अकामयत'—इत्यस्य—अग्निदेवत्यो यागः पूर्वकालेऽग्निना कृतत्वात् प्रशस्तः आधिक्यत्वादिदानीमपि अन्यैर्यजमानैरवश्यं कर्तव्यः—इति विधेयकर्मगतप्राशस्त्यद्वारा विध्येकवाक्यत्वम् । एवमन्यत्राप्यूह्यम् । क्वचित् कार्यान्तरमप्यस्ति । यथा—"अक्ताः शर्करा उपदध्यात्" इति विधौ 'अक्ता'—इति पदेन द्रवद्रव्यसामान्यम्प्रतीयते; तच्च द्रव्यं किम्? इति सन्देहे "तेजो वै घृतम्" इत्यर्थवादात् घृतमिति

निष्नीयते,— इति 'तेजो वै घृतम्' इत्यर्थवादस्य सन्दिग्धार्थनिर्णायकत्वेन प्रामाण्याङ्गीकारात् ॥

इत्यर्थवादविचारः ।

## ॥ अथ मन्त्रविचारः ॥

(६१) मन्त्राणाम्प्रयोजनम्

मन्त्राणामपि अध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव, न त्वदृष्टार्थत्वम्; दृष्टे सम्भवति अदृष्टकल्पनायोगात् । प्रयोगकाले कर्मज्ञानं विना कर्मानुष्ठानायोगात् कर्मौपयिकमर्थज्ञानं मन्त्रैः क्रियते । न च—"उपदेष्टृवचनादिनाऽप्यर्थस्मरणसम्भवादनुष्ठानोपपत्तिः" इति वाच्यम्, मन्त्रैरेवार्थं स्मृत्वाऽनुष्ठाने सति फलम्भवति नान्यथेति नियमाङ्गीकारात् । नियमेनादृष्टस्याङ्गीकारात् तदभावे तज्जन्यादृष्टलोपे तन्मूलम्फलं न सिध्यति—इति कल्पनात् ॥

(६२) "इमामगृभ्णन्...अश्वाभिधानीमादत्ते"—इत्यस्य वचनस्य वैयर्थ्यशङ्कातन्निरासश्च

ननु—"एवम्मन्त्राणां स्वस्वप्रकाश्येऽर्थे विनियोग इति फलितम् । विनियोगो नाम शेषत्वेनान्वयः, शेषत्वन्नामाङ्गत्वम् । ततश्च—'इमामगृभ्णन् रशनाम्'इतिमन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रका-

शनसामर्थ्यरूपात् लिङ्गादेव रशनाग्रहणात्वोपपत्तेः, 'इमामगृभ्णान् रशनामृतस्येत्यश्वाभिधानीमादत्ते'इति वचनं किमर्थम् ?"—इति चेत्—न, परिसंख्यार्थत्वात् चयनप्रकरणेऽश्वरशनाग्रहणम् गर्दभरशनाग्रहणञ्चेति द्वयमस्ति; तत्र लिङ्गादश्वरशनायाम् मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषात् गर्दभरशनायामपि मन्त्रः प्राप्नुयात् । अतोऽश्वरशनायामेव मन्त्रः कार्यः, न गर्दभरशनायाम्- इति मन्त्रनिवृत्तिरूपपरिसंख्यार्थोऽयं विधिः ॥

(६३) परिसंख्यादोषत्रयदुष्टेऽप्यगत्यातत्स्वीकारः

सा च परिसंख्या त्रिदोषा—(१) स्वार्थत्यागः, (२) परार्थस्वीकारः, (३) प्राप्तबाधश्चेति । तत्र "अश्वाभिधानीमादत्ते"इतिवाक्यस्य—'अनेन मन्त्रेण अश्वरशनादानं कुर्यात्'इति स्वार्थः, स च त्यक्तः; गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः; गर्दभरशनायामपि लिङ्गात् प्राप्तस्य मन्त्रस्य अनेन बाधश्च—इति त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता; गत्यन्तरे सति सा न युक्ता ॥

(६४) विकल्पप्रदर्शनम्

एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः । यथा—यदाग्नेयोऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः ; तत्र अपूर्वविशेषस्य पुरोडाशप्रकृतिद्रव्याकाङ्क्षायाम्, अनियमेन यस्य कस्यचिद्द्रव्यस्य

प्राप्तौ "व्रीहिभिर्यजेत" इति वाक्याद् व्रीहयो नियम्यन्ते ; एवं "यवैर्यजेत" इति वाक्यात् यवा अपि नियम्यन्ते ;—तयोरेकार्थत्वाद्विकल्पः । एवम् "अतिरात्रे षोडशिनं गृह्णाति" इत्यतिरात्रे षोडशिग्रहो विहितः तथा "नातिरात्रे षोडशिनं गृह्णाति" इति प्रतिषेधात् ग्रहणाभावो विहितः,—तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोः एकस्मिन् प्रयोगे अनुष्ठातुमशक्यत्वात्, क्वचित् प्रयोगे ग्रहणानुष्ठानम्, प्रयोगान्तरे तदभावानुष्ठानम्—इति तत्रापि विकल्पः ॥

(६५) विकल्पाऽष्टदोषप्रदर्शनम् स च अष्टदोषदुष्टः । तथाहि—(१) पूर्वं व्रीहिप्रयोगे, यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, (२) अननुष्ठापकत्वलक्षणाप्रामाण्यं तत्स्वीकारः । (३) ततो द्वितीयप्रयोगे, यवानुष्ठाने पूर्वं त्यक्तं यत् प्रामाण्यं तत्स्वीकारः; (४) स्वीकृतं यदप्रामाण्यं तत्परित्यागश्च—इति यवशास्त्रे चत्वारो दोषाः । एवं पूर्वं यवप्रयोगे, (५) व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तत्परित्यागः; (६) अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः । (७) पुनर्द्वितीयप्रयोगे, व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः; (८) स्वीकृताप्रामाण्यपरित्या-

गश्च—इति व्रीहिशास्त्रे चत्वारो दोषाः । इत्यष्टदोषदुष्टविकल्पः ॥

(६६) विकल्पहेतुप्रक्रियाप्रदर्शनम्

स च विकल्पः—(१) क्वचिदेकार्थत्वात्, एककार्यकारित्वादित्यर्थः, यथा व्रीह्यादौ। तत्र व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद् विकल्पः।—(२) क्वचिद् वचनबलात्, यथा—"वृहत्पृष्ठम्भवति" इति वृहत्सामसाध्यम् पृष्ठनामकं स्तोत्रं विहितम्, "रथन्तरपृष्ठम्भवति" इति रथन्तरसामसाध्यम् पृष्ठस्तोत्रान्तरम् विधीयते। स्तोत्रञ्च प्रयाजादिवदपूर्वार्थत्वात् अर्थकर्म, साम तु संस्कारकर्मत्वात् गुणकर्म, स्तोत्रसाधनीभूतस्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात्। प्रगीतमन्त्रसाध्यम्[१] इन्द्रादिगुणिनिष्ठगुणाभिधानं स्तोत्रम् (१)। अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम् (२)। गानक्रियाविशेषः साम (३)। स्तोत्रसाधनीभूता ऋचः स्तोत्रियाः (४)। तद्गतत्रिवृत्पञ्चदशत्वादिसंख्याविशेषः स्तोमः (५)—इत्येतेषां भेदः। तथा च वृहद्रथन्तरपृष्ठयोः भिन्नापूर्वार्थत्वेन, एकार्थत्वाभावे ऽपि—"वृहद्वापृष्ठं कार्यम्" 'रथन्तरं वा पृष्ठं कार्यम्' इति—वचनबला-

(१) प्रगीतमन्त्रसाध्यम् सामभिर्व्यक्तगीताक्षरसाध्यमित्यर्थः ।

देव विकल्पः। (३) क्वचिद् व्यवस्थितविकल्पः द्वितीयप्रयाजादिकर्मणि 'नाराशंसतनूनपा-त्'-मन्त्रयोः एकार्थत्वाद् विकल्पः। स च राजन्यविशिष्टानां नाराशंसो द्वितीयः प्रयाजः-"सतनूनपादन्येषाम्"इति वाक्यात् व्यवस्थितः, इति व्यवस्थितविकल्पः॥

(६७) विधिनामधेयार्थवादमन्त्राणाम् प्रामाण्योपसंहारेण कृत्स्नस्य वेदस्य प्रामाण्याण्यप्रदर्शनम्

तदेवम्–(१) चोदनापरपर्यायाणां विधिवाक्यानाम् अंशत्रयविशिष्टभावनाविधायकत्वात् प्रामाण्यम्। (२) उद्भिदादीनां नामतया–(३) अर्थवादानाम् विधेयप्राशस्त्यपरतया–(४)मन्त्राणाम् अनुष्ठेयार्थस्मारकतया–प्रामाण्यम्;–इति कृत्स्नस्य वेदस्यालौकिके धर्माधर्माख्येऽर्थे प्रामाण्यं स्थितम्॥

इति समस्तवेदप्रामाण्यनिरूपणम्॥

---

# अथ स्मृतिशिष्टाचार-प्रामाण्यनिरूपणम्॥

(६८) स्मर्तॄणां वेदमूलकतया प्रामाण्यम्

स्मृतयोऽपि मन्वादिप्रणीताः। वेदमूलकत्वात् स्यादष्टकादौ धर्मे तासाम्प्रामाण्यम्। "(क)औदुम्बरी सर्वा वेष्टयितव्या"इति स्मृतिरप्रमाणम्, "औदुम्बरीं स्पृष्ट्वोद्गायेत्"इति

---

(क) यजमानतुल्या उदुम्बरस्य शाखा।

प्रत्यक्षश्रुतिविरुद्धत्वात्, सर्ववेष्टने श्रुत्युक्तस्पर्शनस्य कर्तुमशक्यत्वात् । "वैसर्जनीयहोमीयम् वासोऽध्वर्युः प्रतिगृह्णाति" इत्यादिस्मृतिरप्रमाणम्, श्रुत्यर्थविरुद्धत्वेन लोभमूलकत्वात् ॥

(६९) शिष्टाचारस्य स्मृतिद्वारा वेदमूलकत्वात् प्रामाण्यम्

तथा शिष्टाचारोऽपि स्मृतिद्वारा वेदमूलकत्वात् प्रमाणम् । मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणम्, "मातुलस्य सुतामूढ्वा" इत्यादिस्मृत्या निषिद्धत्वेन स्मृतिविरुद्धत्वात् । तदेवं श्रुतिस्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तम् ॥

इति स्मृतिशिष्टाचारप्रामाण्यनिरूपणम् ॥

## अथ धर्मभेदकथनम् ॥

(७०) धर्मस्य भेदाः । तत्र कर्मभेदप्रकारप्रदर्शनम्

सच धर्मः परस्परभिन्नः । भेदप्रमाणानि तु शब्दान्तरादीनि । तथा हि—यागदानहोमानां यजति ददाति जुहोतीत्यपरपर्यायशब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः । स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम् 'दानम्' ।

(७१) शब्दान्तराभ्यासात्कर्मभेदः

"समिधो यजति" इत्यादीनां पञ्चानां वाक्यानाम्मध्ये एकस्य कर्मविधायकत्वम्, अन्येषां त्वस्मिन् कर्मणि गुणविधायकत्वम्

इत्यत्र नियामकभावात्, सर्वेषां सर्वविधायकत्वे स्थितेऽपि, विहितस्य कर्मणः पुनर्विधानं व्यर्थम्,—इति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षया उत्तरोत्तरवाक्यविहितस्य कर्मणो भेदः सिध्यति;—इत्येतादृशस्थलेष्वविशेष पुनःश्रुतिरूपात् 'यजति'—पदाभ्यासात् कर्मभेदः (१)।

(७२) संख्यया कर्मभेदः "तिस्र आहुतीर्जुहोति" इत्यत्र 'जुहोति-पदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसङ्ख्यान्वयात् परस्परम्भिन्नास्त्रयो होमाः—इति सङ्ख्ययाऽत्र कर्मभेदः(२)।

(७३) संज्ञया कर्मभेदः गुणात् कर्मभेदः "अथैषज्योतिरथैष विश्वज्योतिरथैषसर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत" इति ज्योतिष्टोमप्रकरणे श्रुतानामपि ज्योतिराख्यानां त्रयाणां यागानां ज्योतिष्टोमापेक्षया भेदः—भिन्नसंज्ञावशादेव त्रयाणां परस्परम्भेद इति संज्ञया कर्मभेदः (३)।

(७४) गुणात् कर्मभेदः तथा—"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा" "वाजिभ्यो वाजिनम्" इत्यत्र 'सा वैश्वदेवी' इति वाक्ये विश्वेदेवदेवताऽऽमिक्षाद्रव्यसम्बन्धानुमितो यागो विधीयते, "वाजिभ्यो वाजिनम्" इत्यत्रापि वाजिदेव-

त्यवाजिनद्रव्यकर्मान्तरं विधीयते, न तु पूर्वविहिते वैश्वदेवयागे वाजिनरूपद्रव्यगुणो विधीयते, पूर्वयागस्याऽऽमिक्षागुणावरुद्धत्वेन तत्र वाजिनस्य निवेशायोगात् । न च व्रीहियववद्विकल्पः, वाजिनामिक्षयोः समशिष्टत्वाभावात्, विषमशिष्टयोर्विकल्पायोगात् । वैश्वदेवयागोत्पत्तिवाक्ये एवामिक्षागुणः शिष्यते-इत्युत्पत्तिशिष्टः । वैश्वदेववाक्यादुत्पन्ने कर्मणि वाक्यान्तरेण शिष्टो (विहितो) वाजिः गुण उत्पन्नशिष्टः । तयोर्मध्ये हि उत्पन्नशिष्टः प्रबलः, कर्मोत्पत्तिवेलायामेव कर्माङ्गत्वेन प्रमितत्वात् । उत्पन्नशिष्टो वाजिनगुणः अनन्तरप्रमितोऽपि विलम्बितत्वेन दुर्बलत्वात् पूर्वकर्मणि निवेशमलभमानो वाजिरूपदेवतान्तरसम्बन्धात् स्ववाक्यस्य कर्मान्तरविधायकत्वम् आनयति-इति गुणाद् भेदः(४) ॥

(७५) प्रकरणात् कर्मभेदः

तथा कुण्डपायिनामयने श्रूयते-"उपसद्भिश्चरित्वा मासमग्निहोत्रञ्जुहोति" इति । अत्र पूर्वं कर्म किञ्चिदपि सन्निहितन्न भवति, अपूर्वकर्मसन्निधानरूपात् प्रकरणान्तरात् प्रसिद्धाग्निहोत्रधर्मकं तन्नामकं कर्मान्तरं विधीयते । नत्वग्निहोत्रशब्देन प्रसि-

द्धाग्निहोत्रमनूद्य गुणविधिः, प्राप्ते कर्मणि आनन्तर्यमासरूपानेकगुणविधौ वाक्यभेदापत्तेः-इति प्रकरणान्तरादत्र कर्मभेदः,-प्रसिद्धाग्निहोत्रम्, नैयमिकाग्निहोत्रम्, नित्याग्निहोत्रमिति यावत् । तदेवम् शब्दान्तराभ्याससंज्ञागुणनामधेयप्रकरणान्तरैः कर्मभेदो दर्शितः ॥

इति धर्मभेदकथनम् ॥

# अथ वेदादिप्रमेयार्थकथनम् ॥

(७६) वेदादिप्रमेदार्थस्य त्रैविध्यम्

तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः—क्रत्वर्थः, पुरुषार्थः, उभयार्थश्चेति । (१) प्रयाजादिः केवलक्रत्वर्थः; (२) फलम् तत्करणञ्च पुरुषार्थः, यथा ज्योतिष्टोमादिः स्वर्गादयश्च ; (३) दध्यादि तूभयरूपम्, 'दध्ना जुहुयात्" इति फलासंयुक्तवाक्येन क्रत्वर्थत्वात् "यथा दध्नेन्द्रियकामस्य जुहुयात्" इत्यनेन फलाय विधानात् पुरुषार्थत्वात् । तदुक्तम् ॥

'एकस्यतूभयरूपत्वे संयोगपृथक्त्वम्"-इति । संयोगो वाक्यम्, तस्य 'पृथक्त्वम्' भेदः । एकस्य उभयार्थत्वे नियामक इत्यर्थः । क्रत्वर्थे

दने । अथाऽत्यन्ताऽसदर्थता, तैमिरिकस्वप्नादिज्ञानं प्रत्यक्षम् । अथाऽर्थक्रियासंवादित्वमभ्रान्तत्वं, यद्यर्थनिबन्धनौ सुखदुःखप्राप्तिपरिहारौ उपादानपरित्यागाऽयोग्यवेदनस्य भ्रान्तत्वप्रसङ्गः । अथोत्तरोत्तरज्ञाननिर्वृत्तिः, क्षणिकविज्ञानस्य तथात्वम् । तस्मादतदात्मनि तादात्म्यप्रभ्रान्तत्वम् । यथाह 'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिरविसंवादनम्' इति, तद्विकल्प्य दूषयति—यद्यर्थनिबन्धनौ ज्ञानविषयनिबन्धनौ यथाक्रमं सुखदुःखप्राप्तिपरिहारौ अर्थक्रियासंवादित्वमिष्यते तत उपादानपरित्यागाऽयोग्यविषयं यद्वेदनं तस्य चन्द्रतारकादिविषयस्य विज्ञानस्य भ्रान्तत्वप्रसङ्गः । अथोत्तरोत्तरज्ञाननिर्वृत्तिरेकस्मिन्नर्थे संवादः, स चास्ति चन्द्रतारकादिविषयस्यापि विज्ञानस्येति तदप्यभ्रान्तं प्रत्यक्षं चेति न व्यभिचारः । दूषयति—क्षणिकविषयस्य विज्ञानस्य भवतामस्माकमाशुतरविनाशिविद्युदादिविषयस्य विज्ञानस्य तथात्वं भ्रान्तत्वं प्रसज्येत । न हि तत्रैकस्मिन् विषये उत्तरोत्तरज्ञानोत्पत्तिसम्भवः ।

यदि मन्येत उपदर्शिताऽर्थप्रापणसामर्थ्यमेव प्रापकत्वमविसंवादकत्वं, प्रवर्तकत्वमेव च प्रापणसामर्थ्यमुपदर्शकत्वमेव प्रवर्तकत्वम् । न हि अर्थक्रियासमर्थवस्तूपदर्शनादन्यद् विज्ञानस्य प्रवर्त्तकत्वं प्रापकत्वं वा सम्भवति । न च देशकालाऽऽकारनियतं चन्द्रतारकाऽन्यसामर्थ्यमर्थक्रियासु स्वोचितासु च न तादृशमुपदर्शितं विज्ञानेन । न च न तादृशं प्राप्येत यदि न देशतो विप्रकृष्येत विद्युदादि वा न कालत इति । तदयुक्तम् । विकल्पाऽसहत्वात् । किमर्थमात्रप्राप्तिः संवाद आहो यथोपदर्शिताऽर्थप्राप्तिः ? न तावत्पूर्वः कल्पः । विज्ञानमात्रादर्थमात्रप्राप्तेरविसंवादसम्भवेन तन्मात्रस्याऽभ्रान्तत्वप्रसक्तेः । नाप्युत्तरः । साऽऽकारनिराकारविज्ञानयोर्विच्छिन्नस्थूलाऽवभासस्य प्रत्यक्षतया नियतस्याऽभ्रान्तत्वेन तत्त्वाऽनवक्लृप्तेः । न

तीतिर्भ्रान्तिः। तथा च सर्वज्ञज्ञानं न कल्पनापोढमभ्रान्त-खलु स्थौल्यं नाम परमार्थसद्विज्ञाने वा बाह्ये वा सम्भवति। अने-कविधविरुद्धधर्मसंसर्गाप्रतयोभयत्राप्यपास्तत्वात्। यथाह।

तस्मान्नाऽर्थे न विज्ञाने स्थूलाऽऽभासस्तदात्मनः।
एकत्र प्रतिषिद्धत्वाद् बहुष्वपि न सम्भवः॥ इति।

न च निराकारविज्ञाननये बहवो रूपपरमाणवो निरन्तरो-त्पादवन्तः समर्था एकविज्ञानोपारोहिणः स्थूलाऽऽभासभाजः। यथाह 'अप्रतिभासधर्मो ऽस्ति स्थौल्य'मिति। प्रतिभासनकालधर्म्मः प्रतिभा-सधर्म्म इति। न च न ते रूपपरमाणवः, न च न निरन्तरमुत्पन्नाः, न च नैकविज्ञानोपारोहिणः, न च न तादृशस्थूलव्यपदेशनाज इति कस्मात् भ्रान्ततेति साम्प्रतम्? नैरन्तर्याऽनुपपत्तेः। तद्ग्रहस्य भ्रान्तत्वापातादन्तरालाऽग्रहे नितान्तविच्छिन्नेषु तरुष्वेकघनवनप्रत्य-यवत्। न हि न ते तरवः। न च नैकस्मिन्विज्ञाने भासन्ते। निरन्तराऽनुत्पादश्च तुल्यः। न खलु तरव इव रूपपरमाणवो निर-न्तरमुत्पन्नाः, विजातीयैर्गन्धरसस्पर्शपरमाणुभिरन्तरितत्वात्। तादृ-शस्यापि चाऽभ्रान्तत्वे द्विचन्द्राऽलातचक्रचलद्वृक्षादिदर्शनानामप्य-भ्रान्तत्वप्रसङ्गः। तदियमभ्रान्तता भवत्स्वेव प्रहरतीत्युपेक्षिता आचार्येण।

उपसंहरति—तस्मात्पारिशेष्यादतदात्मनि तादात्म्यप्रतीति-र्भ्रान्तिः। भवत्वेतद् भ्रान्तिलक्षणं, तथापि का नः पीडे?त्यत आह— तथा च भ्रान्तिकल्पनयोः समारोपरूपेणैक्ये सति सर्वज्ञज्ञानं न कल्पनापोढम्। अविद्यमानरूपयोरतीताऽनागतयोः रूपवत्त्वेनाऽऽरो-पात्। तदवेदने प्रत्यक्षत्वाऽनुपपत्तेरसाक्षात्कारत्वप्रसङ्गात्। नाप्य-भ्रान्तमरूपाऽऽरोपादेवेति न प्रत्यक्षलक्षणमन्वेति।

मिति न प्रत्यक्षलक्षणमन्वेति । अथाऽनुभवाऽऽकारप्रवृत्तं ज्ञानमतोन्वेत्येव । यथोक्तं 'मानसमप्यनुभवाकारप्रवृत्तं प्रत्यक्ष'मिति। अथ केयमनुभवाकारता? यदि बोधात्मकता, सर्वं तथा ज्ञानम्। अथ व्यक्त्यन्तराऽवभासता, प्रथमोपनिपात्यपि दूरत्वादिना ऽव्यक्तपीतादिपरिच्छेदं न प्रत्यक्षं स्यात्। अथाऽदूरान्तराऽतिरोहितवेदना, सामान्यवेदनस्य प्रत्यक्षत्वप्रसङ्गः। यदि मन्येत सन्निहितवर्त्तमानाऽवभासाऽनुभवाऽऽकारप्रवृत्तिः, तथाभूतं च सर्वार्थेषु योगिनां तथागतानां च दर्शनमिति। तदसत्। पूर्वदोषाऽनतिवृत्तेः। अपि

लक्षणान्तरं प्रत्यक्षस्य शङ्कते—अथाऽनुभवाऽऽकारप्रवृत्तं प्रत्यक्षम्, अतो ऽन्वेत्येवाऽतीताऽनागतविषयं सर्वज्ञज्ञानम् । यथोक्तं 'मानसमप्यनुभवाऽऽकारप्रवृत्त'मिति। तद्विकल्प्य दूषयति—केयमनुभवाकारता? यदि बोधात्मकता ततः सर्वं तथाबोधात्मकं ज्ञानमिति सर्वमेव प्रत्यक्षं प्रसक्तम् । अथ व्यक्त्यन्तराऽवभासता प्रथमोपनिपात्यपि निर्विकल्पकं दूरत्वादिना दोषेणाऽव्यक्तपीतादिपरिच्छेदं न प्रत्यक्षं स्यात् । अथाऽदूरान्तरस्याऽतिरोहितस्य च वेदनाऽनुभवाऽऽकारप्रवृत्तिरस्ति चाऽव्यक्तपरिच्छेदस्याप्यदूरान्तराऽतिरोहितगोचरत्वं दूरान्तरत्वे ऽतिरोहितत्वे च[1] तद्गोचरस्याऽवेदनप्रसङ्गादिति दूषयति च । तद्गोसामान्यस्याऽवस्तुसतो न दूरान्तरत्वं नापि तिरोहितत्वम् । उभयोर्वस्तुधर्मत्वात् । ततस्तद्वेदनं प्रत्यक्षं स्यात् ।

यदि मन्येत संनिहितवर्तमानाऽवभासा खल्वनुभवाकारप्रवृत्तिः । न च सामान्यमलीकं संनिहितं च वर्त्तमानं च । तथाभूतं च सर्वार्थेषु योगिनां कतिपयभूमिसमारूढानां तथागतानां च दशभूमिगतानां च[2] दर्शनमिति। दूषयति—तदसत् । कुतः? पूर्वदोषाऽनतिवृत्तेः । यद्यपि सामान्यमपरमार्थकतया ऽसंनिहितमवर्त्तमानं च तथापि तथा ऽवभासत इत्यनुभवाऽऽकारप्रवृत्त्या तत्प्रति-

१ दूरान्तरस्याऽतिरोहितत्वे च· २ पु· पा। २ अतीताऽनागतानां च· २ पु·पा· ।

च तथाभूते तथा दर्शनाद् वर्तमानं मिथ्याज्ञानमेव, तैमिरिकदर्शनवत्। न तु प्रत्यक्षमन्यथा भवति, तदिन्द्रियार्थसामर्थ्याऽजन्यलक्षणमितरथा तिमिराद्युपप्लवजकेशादिदर्शनं कस्य हेतोरवाकीर्य्यंत ? सर्वमेव प्रत्यक्षमसंनिहिताऽवभासम्। अर्थज्ञानयोः कार्य्यकारणभावेन कालभेदात्। किं तर्हीदं प्रकाशते ? ज्ञानाऽऽकारम्। न हीदानीं सर्वैकदेशस्यापि प्रत्य-

पत्तिः प्रत्यक्षं प्रसज्येतेति पूर्वदोषाऽऽपत्तिरित्यर्थः । अत्रैव कारिकायाः पूर्वार्द्धेन दूषणान्तरमाह—अपि च तथाभूते वर्तमाने ऽतीतेऽनागते च तथाभूतदर्शनात्। तथाभूतत्वमाह—वर्तमानं मिथ्याज्ञानमेव, तैमिरिकदर्शनवत्। कस्मात्पुनर्न प्रत्यक्षं ? मित्यत आह—न तु प्रत्यक्षमन्यथा भवति। कुतः ? तदिन्द्रियार्थसामर्थ्यजन्यलक्षणं प्रत्यक्षं यत्खलु तत्राऽर्थ्यमानं तस्य चेन्द्रियस्य च सामर्थ्याज्जायमानं प्रत्यक्षं विज्ञानमिति तस्य लक्षणं, न पुनरनुभवाऽऽकारप्रवृत्तिस्त्वदभिमता लक्षणमित्यर्थः। कस्मात्पुनरियं न लक्षणम् ? इत्यत आह—अन्यथा हि तिमिराद्युपप्लवजकेशादिदर्शनं कस्य हेतोः प्रत्यक्षताया अवाऽकीर्यंत ? न हि भवतामनुभवाऽऽकारप्रवृत्तित्वं प्रत्यक्षलक्षणमिच्छतां तैमिरिकज्ञानस्य प्रत्यक्षत्वमभिमतमित्यर्थः ।

सम्प्रति साऽऽकारज्ञानवादी प्रत्यवतिष्ठते—सर्वमेव प्रत्यक्षमसंनिहिताऽवभासं तत्सर्वत एव मा निर्वर्तिष्ट प्रत्यक्षतेति नाऽयमन्यथाग्रहो ऽप्रत्यक्षतामावहतीत्यर्थः । कस्मादसंनिहिताऽवभासं सर्वज्ञानम् ? इत्यत आह—अर्थज्ञानयोः कार्यकारणभावेन कालभेदात्। यथासङ्ख्यमत्र नेष्यते। दूषणवादी तु गूढाऽभिसन्धिः पृच्छति—किं तर्हीदं नीलादिसंनिहितदेशकालं प्रकाशते ? । चोदक आह—ज्ञानाकारम् । प्रष्टा सोपहासं स्वाऽभिप्रायमाविष्करोति—न हीदानीं सर्वैकदेशस्याप्यर्थरूपस्य प्रत्यक्षदर्शी विद्यतइति । साधु

क्षदर्शी । ज्ञानाकारे ऽर्थे वेदनाऽध्यवसायेनैव व्यवहारदर्शनाज्ञाऽर्थदर्शनहानिः । कथमन्यवेदने ऽन्याऽध्यवसायः ? निरूढत्वादनादेरर्थग्रहाऽभिनिवेशाऽपस्मारलक्षणाया अविद्यायाः । स्वस्ति तर्हि सर्वज्ञत्वाय भूयिष्ठाऽविद्याऽपस्माराय, वरं कनीयो ऽविद्यमेकदेशदर्शित्वमेव । अपि च परिभाषयापि तावदेकदेश एव प्रत्यक्षं स्यात् । ग्राह्यत्वं हेतुत्वमेव ज्ञानाका-

सर्मार्थितः सर्वार्थप्रत्यक्षदर्शी चोदयति—ज्ञानाकारे ऽर्थवेदनाऽध्यवसायेनैव व्यवहाराज्ज्ञाऽर्थदर्शनहानिः । द्विविधो हि विषयः प्रमाणानां ग्राह्यश्चाऽध्यवसेयश्च । तत्र स्वाऽऽकारो ग्राह्यः । तस्य तु बाह्यत्वमध्यवसेयम् । यथाह 'स्वप्रतिभासे ऽर्थे ऽर्थाध्यवसायेन प्रवृत्ति'-रिति । न ह्यस्मिन्दर्शने प्रकारान्तरेण ग्रहणमुपपद्यते । तेन ज्ञानाऽऽकारस्य बाह्यत्वेनाऽध्यवसाय एव सर्ववेदनम् । न चेतावता भ्रान्तः । न खलु चित्तेन ग्रहणव्यापारेण गृह्णन् भ्रान्तो भवति कदा चिदन्यथा गृह्णन् कदा चिदुचितादुपायात् उपायान्तरेणाऽऽभिमुख्येन प्रवृत्तो भ्रान्तः । न त्वेतदुभयमपि सर्वविदि समस्तीति कथं भ्रान्तः ? दूषयति—कथमन्यवेदने स्वाऽऽकारवेदने अन्यवेदनस्य बाह्यवेदनस्याऽध्यवसायः ? चोदक आह—निरूढत्वादनादेरर्थग्रहाऽभिनिवेशाऽपस्मारलक्षणाया अविद्यायाः । सोपहासं दूषयति—स्वस्ति तर्हि सर्वज्ञत्वाय भूयिष्ठाऽविद्याऽपस्माराय, वरं कनीयो ऽविद्यमेकदेशदर्शित्वमेव । न हि स्वाऽऽकारमनर्थमप्यध्यवस्यन्ननन्योपायतया ऽपि भवत्यभ्रान्तः । न च भ्रान्तत्वं न्यायसिद्धं समस्तप्रत्यक्षभ्रान्तत्वप्रसङ्गभिया शक्यमपन्होतुं, प्रमाणसिद्धस्य प्रयोजननिरोधेनाऽशक्यनिन्हवत्वादिति भावः । अध्यवसायकत्वनिराकरणं च दर्शयिष्यते 'न निरालम्बनं ज्ञान'मित्यत्र । अपि च परिभाषया ऽपि तावदेकदेश एव प्रत्यक्षं स्यात् । परिभाषा-

राऽर्पणक्षममिति न पुनः सर्वः। तस्याऽहेतुत्वाद्देशतः कालतो वा ऽसंनिधानात्। अन्यथा सर्वस्य सर्वदर्शित्वप्रसङ्गात्। अथ वा प्रत्युत्पन्नाकारमेव ज्ञानमतीताऽनागताऽऽकारमपि वा। पूर्वत्र सर्वस्याऽतथाभावान्मिथ्या। उत्तरत्राऽतीतादिरूपकल्पनाप्रवृत्तत्वान्न प्रत्यक्षम्। सर्वं वा ज्ञानकाले

माह-ग्राह्यत्वं हेतुत्वमेव ज्ञानाऽऽकारार्पणक्षममिति। यथाह सौत्रान्तिकनये।

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव तद् युक्तं ज्ञानाऽऽकाराऽर्पणक्षमम्। इति।

तच्चैतद्ग्राह्यत्वमलौकिकतया पारिभाषिकम्। तेन चैकदेश एव प्रत्यक्षो न पुनः सर्वः। कुतः? तस्य सर्वस्याऽहेतुत्वात्। तदेव कुतः? देशतः कालतो वा तस्याऽसन्निधानात्। अतो हि ते भावने ये देशतः कालतो वा विप्रकृष्येते न तु तथा सर्वमित्यर्थः। अथाऽसन्निहितः कस्मान्न हेतुः? इत्यत आह-अन्यथा संनिधिविरहिणो ऽपि हेतुत्वे सर्वस्याऽस्मदादेरपि सर्वदर्शित्वप्रसङ्गः। योगस्य च सामर्थ्यमत्र निरस्तमेव यथा पूर्वार्द्धे।

अस्याऽन्या व्याख्या। अथ वा प्रत्युत्पन्नाऽऽकारं वर्तमानाऽऽकारमेव वा सर्वस्मिंस्त्रैकाल्यभाजि वस्तुविस्तारे विज्ञानमतीताऽनागताकारमपि वा। तत्र पूर्वस्मिन् कल्पे सर्वस्याऽतथाभावान्मिथ्या सर्वज्ञविज्ञानं स्यात्। उत्तरत्र त्वतीताऽनागतादिरूपकल्पनाप्रतीतत्वा[1]न्न प्रत्यक्षम्। कल्पनारहितस्य तत्त्वात्। न तावदतीताऽनागते रूपमात्रेण प्रमेये निर्विकल्पकप्रमेयस्य रूपमात्रस्य तयोर्वर्तमानादविशेषात्। न हि वर्तमानमपि वर्तमानताविशिष्टं निर्विकल्पके प्रथते, अपि तु रूपमात्रेण। तस्मादतीतत्वादिना विशिष्टत्वमनयोर्ज्ञातव्यम्। तथा च कल्पनात्वं विशेषणविशेष्यभावेन ग्रहणमेव

१ प्रवृत्तत्वात्. १ पु. पा.।

प्रत्युत्पन्नात्मना ज्ञायेत, तथावस्थं वा। पूर्वस्मिन्मिथ्यात्वम्। उत्तरत्र न सर्वं प्रत्यक्ष,मवस्थान्तराऽप्रत्यक्षीकरणात् । अपि च सर्वं न क्रमेण शक्याऽवगम,मानन्त्यात् । न हि पूर्वाऽपरकोटिविरहिणो ज्ञेयस्योत्पादवतः परिनिष्ठाऽस्ति। न यौगपद्येन, आनन्त्यादेव। इयत्ताऽनवधारणे सर्वैं-

हि तत्त्वं कल्पनानाम्। तथैवाऽभिलापसंसर्गाऽर्हत्वात् । न तु शब्दाऽर्थयोरेकविज्ञानोपारोहे, निर्विकल्पके ऽपि तथा संभवात् । तस्माद-तीतादिविशिष्टालम्बनस्य ज्ञानस्य कल्पनात्वादप्रत्यक्षतेत्युपपन्नम् ।

यस्तु मन्यते अस्तु वर्तमानविषयमेव प्रत्यक्षं, तथापि सर्व-विषयमतीताऽनागतयोरप्यतीताऽनागतत्वाभ्यां वर्तमानत्वादिति, तन्निरासायाऽस्यैव व्याख्यान्तरमाह—सर्वं वा ज्ञानकाले प्रत्युत्पन्ना-त्मना ज्ञायेत तथाऽवस्थं वा। यो यदवस्थः स तथेत्यर्थः । तत्र पूर्वस्मिन्मिथ्यात्वम्, अन्यावस्थस्याऽन्यथाग्रहणात् । उत्तरत्र न सर्वं प्रत्यक्षम् । कुतः? अवस्थान्तराऽप्रत्यक्षीकरणात् । एतदुक्तं भवति । यस्त्वज्ञानकाले ऽतीतः प्रत्युत्पन्नो ऽनागतो वा स तथैव प्रत्यक्षी-कर्तव्यः । स च स्वज्ञानकाले ऽतीत आसीदनागतो वर्तमानश्च तथा स्वज्ञानकाले वर्तमानो ऽभूदनागतः भविता चाऽतीतः । एवं स्वहीनकाले ऽनागतस्य भवितारौ वर्तमानत्वाऽतीतत्वे इति स्वज्ञानसमयवर्त्यवस्थाभेदवद्वस्तुग्रहणे ऽवस्थान्तरमस्यामगृहीतमिति न सर्वज्ञः स्यात् ।

पश्चार्द्धं विवृणोति—अपि च । सर्वं न तावत्क्रमेण शक्याऽव-गमम् । कस्मात् ? आनन्त्यात् । तदेव दर्शयति—न हि पूर्वाऽप-रकोटिविरहिणो ज्ञेयस्योत्पादवतः परिनिष्ठा ऽस्ति । नित्यस्यापि तावत्परमाण्वादेर्व्यवस्थितरूपस्यापि नेयत्ता किमङ्ग पुनरव्यवस्थित-रूपस्योत्पादवत इत्यर्थः। न यौगपद्येन। कुतः? पूर्वोक्तादानन्त्या-

देशप्रतिपत्त्योरविशेषात् । नन्वनवधारयन्नपीयत्तां रूपतो यौगपद्येन सर्वमवैति । नैतत्सारम् । न हीयत्ताऽनवधारणे सर्वमवधारितं भवत्येकदेशो वा । अन्यतराऽव्यवच्छेदात् । बहुद्रव्यसमवाये इयत्तावधारणादेव सर्वप्रतिपत्तिः, सा च परिमिते सम्भवति नाऽपरिमिते । ज्ञानाऽऽकाराऽधीनश्च

देव इयत्ताऽनवधारणात् । साकल्यवचनो ह्ययं सर्वशब्दः, साकल्यं चेयत्तानिःशेषतायामापतेत्, सा चेन्नाऽवधारिता नाऽवधारितं सर्वमित्यर्थः । अथेयत्ताऽवधारणाऽधीनं सर्वाऽवधारणमित्येतदेव कुत ? इत्यत आह—तदियत्ताऽनवधारणे सर्वैकदेशप्रतिपत्त्योरविशेषात् । एतदुक्तं भवति । बहूनामेकदेशप्रतिपत्तौ हि न सर्वप्रतिपत्तिरिति लोकप्रसिद्धं ब्रुवन्ति वक्तारः, एकदेशमेषां जानीमो न सर्वमिति । यदि रूपमात्रमेव सर्वं भवेत् ततस्तस्योभयत्राऽविशेषात् सर्वैकदेशप्रतिपत्त्योरभेदप्रसङ्ग इति ।

चोदयति—नन्वनवधारयन्नपीयत्तां रूपतो यौगपद्येन सर्वमवैति । अनियतमेव च सर्वमिति कथं तदपरिमाणरूपाऽवधारणे सम्भवतीयत्ता प्रमेयस्याऽपराध्यते । यदनियतं न पुनस्तद्विषयं विज्ञानं तस्य यथाप्रमेयमवस्थानात्, अनवस्थाने वा प्रामाण्याऽनुपपत्तेरित्यर्थः । निराकरोति—नैतत्सारम् । न हीयत्ताऽनवधारणे सर्वमवधारितमेकदेशो वा । कस्मात् ? अन्यतरस्यैकदेशस्य परिमितरूपमात्राऽग्रहणे अव्यवच्छेदात् । अन्यतराऽव्यवच्छेदेन चाऽन्यतरप्रतिपत्तेः । व्यतिरेकं दर्शयित्वा ऽन्वयमाह—बहुद्रव्यसमवाये इयत्ताऽवधारणादेव सर्वप्रतिपत्तिः नैकस्मिन्नसंबद्धेषु वा परस्परं बहुष्वपि सर्वत्वमेकदेशत्वं वा सम्भवतीति बहुद्रव्यसमवायइत्युक्तम् । सा चेयत्तानिःशेषता परिमिते सम्भवति नाऽपरिमिते, तत्सिद्धमानन्त्यादनिःशेषता । तथा च न सर्वाऽवभासकृत् । सर्वग्रहणमेव यौगपद्यग्र-

ज्ञेयाऽधिगमः । न चैकविज्ञानवर्त्तिनामाकाराणां युगपद्भुवामानन्त्यं समस्ति । सर्वेषां प्रत्युत्पन्नत्वात् । अव्यवच्छिन्नदेशकाला ह्यजाताऽतिवृत्तप्रत्युत्पन्ना अनन्ताः सहाऽपेक्षमाणा अतीताश्च, पूर्वकालकोटेः अनवच्छेदात्, अवच्छेदेपि पुरस्तात् । प्रत्युत्पन्नास्तूभयकोटिव्यवच्छिन्ना यावन्त उत्पन्नास्तावन्त एवेति कथमानन्त्यम् ? अतो नाऽनन्ताऽऽकारमेकं ज्ञानमनन्तानि वा युगपद् ज्ञानानि । किं चेदं सर्वं यद्विद्वान् सर्ववित् ? न तावत्प्रत्येकमर्थाः, नाप्यन्यसहिताः

इयमिति तस्याप्यभाव इति । इतश्च नाऽनन्तस्य सर्वस्य युगपद्बोधो यत्सौत्रान्तिकनये ज्ञानाकाराऽधीनश्च ज्ञेयाऽधिगमः । न चैकविज्ञानवर्त्तिनामाकाराणां युगपद्भुवामानन्त्यं समस्ति । कुतः ? सर्वेषां प्रत्युत्पन्नत्वात् ।

अथ प्रत्युत्पन्नानामपि कस्मान्नानन्त्य ? मित्यत आह—अव्यवच्छिन्नदेशकाला ह्यजाताऽतिवृत्तप्रत्युत्पन्ना अनन्ताः । ननु प्रत्येकं भावानां नात्मावच्छिन्नदेशकालत्वमपीत्यत आह—सहाऽपेक्षमाणाः समुच्चीयमानाः न केवलं चयः, किं तु अतीताश्चाऽनन्ताः । नन्वेकयैव कालकलया तस्याः पुरस्तातनाः सर्वं एवाऽतीताऽवच्छिन्ना इति कथमतीता अनन्ता ? इत्यत आह—पूर्वकालकोटेरनवच्छेदात् अवच्छेदेपि पुरस्तात् । न चेयं विधा एकाऽनेकविज्ञानोपारोहिणामाकाराणामस्ति, येनाऽऽनन्त्यमेव तेषां भवेदित्याह-प्रत्युत्पन्नास्तूभयकोटिव्यवच्छिन्ना यावन्त उत्पन्नास्तावन्त एवेति कथमानन्त्यम् ? उपसंहरति—अतो नाऽनन्ताकारमेकं ज्ञानमनन्तानि वा युगपत् ज्ञानानि, उभयथाप्युभयकोटिव्यवच्छेदात् ।

न प्रमेयं निरूप्यते इति कारिकार्द्धार्थं विवृणोति—किं चेदं सर्वं यद्विद्वान् सर्ववित् ? न तावत्प्रत्येकमर्थाः प्रत्येकमन्यनिरपे-

केन चित्सामान्येन वशीकृताः कियन्तो ऽपि। न चेत्थंभावो ऽनन्तेषु सम्भवति। मुख्यमनन्तमेव सर्वमिति चेत्। न। अन्यतरकालकोटिभाजामानन्त्ये ऽप्यसर्वत्वात् पूर्वाऽपराऽव्यच्छिन्नानां च सर्वत्वात्। अपि चानन्त्यमेव सर्वत्वे तदवधारणं न सम्भवति। तथा हि। सर्वा व्यक्तयो ऽवधारिताश्चेत्तावत्य एव नाऽनन्ताः। अनवधारणे ह्यनन्तत्वं तासां तदनवधारणं चाऽनन्तमिति कथं तदवधारणम्? कालत्रयाऽवच्छिन्नास्तर्ह्यर्थाः सर्वे, न तेष्ववच्छेदाऽभावादेकदेशेषु सर्वशब्दाऽप्रयोगात्। नाप्यसम्बद्धाऽन्यसहिताः। मा भूदेकस्मिन्नपि देवदत्तपुत्रे यं कं चिदन्यमपेक्ष्य सर्वशब्दप्रयोगः, अपि तु केन चित्सामान्येन वशीकृताः कियन्तोऽपि। यथा सर्वे ब्राह्मणाः सर्वे गाव इति। भवत्वेवं को दोषः? अत आह—न चेत्थंभावो ऽनन्तेषु सम्भवति।

शङ्कते—मुख्यमनन्तमेव सर्वमिति चेत्। तथा हि। प्रकरणादावसति नियामके अयं कथमसंकुचितवृत्तिः सर्वशब्दो ऽनन्तेषु वर्तत इत्यनन्त एवास्य मुख्यो ऽर्थ इत्यर्थः। निराकरोति—नाऽन्यतरकालकोटिभाजामतीतानामनागतानां वा ऽऽनन्त्ये ऽप्यतीततया तावत्यैवैकया ऽप्युपहितानामसर्वत्वात्। पूर्वाऽपराऽव्यवच्छिन्नानां च प्रत्युत्पन्नानां प्रत्युत्पन्नतोपहितानां सर्वत्वात्। अपि चाऽऽनन्त्यमेव सर्वत्वे तदवधारणं न सम्भवति। तथा हि। सर्वा व्यक्तयो ऽवधारिता न वा? अवधृताश्चेत् तावत्य एव नाऽनन्ताः। अनवधारणे ह्यनन्तता तासाम्। तथा चाऽनवधारणेत्याह—अनवधारणं चाऽनन्तमिति कथम्? तस्य सर्वस्याऽवधारणात्। न चाऽनवधार्यमाणं प्रमेयमिति भावः।

शङ्कते—कालत्रयाऽवच्छिन्नास्तर्ह्यर्थाः सर्वे। न वयमनन्त-

शाऽविशेषात् । तस्मात्क्रमाऽक्रमाऽतिरिच्यमानविधाऽभावात्ताभ्यां व्याप्तेर्ज्ञानस्य तदनुपपत्तावनुपपत्तिः । प्रमेयाऽभावाच्च । प्रत्यक्षपूर्वत्वाच्चाऽनुमानादीनामपि सर्वस्मिन्न कारणत्वम् । प्रत्यक्षेण साक्षात्पारम्पर्येण वा सम्बन्धग्रहणाऽभावान्नाऽनुमानम् । न शब्दो ऽत एव । पदार्थान्तरो-

तामेव सर्वतां ब्रूमः, किं त्वेकेनैव कालेनोपाधिवशलब्धाऽतीताद्यर्थव्यवस्थाभेदेनाऽवच्छिन्नाऽभावात्सर्वमित्यर्थः । निराकरोति—न तेष्ववच्छेदाऽभावात् । हेतोरेकदेशाऽविशेषात् सर्वप्रतिपत्तेरनुपपत्तेः । न ह्येकेनोपसंगृहीता इत्येतावन्तः किं तु एतावत्ता । न च यावदयिमेको दोषग्रहणाऽनवच्छिन्नो नित्यः कालो ऽन्तवानिति कथं तदवच्छिन्नाप्येतावान् । न चाऽतीताऽनागतप्रत्युत्पन्नत्वान्यप्यस्य समुच्चिनान्यन्तवन्तीत्यर्थः । कारिकायाः पश्चार्धं प्रमाणयन्नुपसंहरति—तस्मात् क्रमाऽक्रमाऽतिरिच्यमानविधाऽभावाद्धेतोस्ताभ्यां व्याप्तेः ज्ञानस्य तदनुपपत्तावनुपपत्तिः । प्रमेयाऽभावाच्च प्रमेयं च न निरूप्यते । प्रमेयाऽनिरूपणादेव च सर्वग्रहणसामर्थ्यमात्रेण सर्वज्ञता प्रत्युक्ता वेदितव्या । मनु मा नाम सर्वं प्रत्यक्षेण ज्ञासीत्, अनुमानादिभिस्तु ज्ञास्यतीत्यत आह—प्रत्यक्षपूर्वकत्वाच्चाऽनुमानादीनामपि सर्वस्मिन् अकारणत्वम् प्रमाणत्वम् ।

प्रत्यक्षपूर्वकत्वं प्रमाणानां प्रत्येकमादर्शयति—प्रत्यक्षेण साक्षात्पारम्पर्येण वा सम्बन्धस्य पक्षधर्मतानियमलक्षणस्याऽग्रहणं हेतुस्तस्य च सर्वस्मिन्नभावान्नाऽनुमानम् । न शब्दो ऽत एव प्रत्यक्षेण सम्बन्धग्रहणलब्धजन्मत्वात् । नन्वगृहीतसम्बन्धं सर्वं मा भूत्पदार्थो वाक्यार्थस्तु भविष्यतीत्यत आह—पदार्थान्तरो-

पहितविशेषपदार्थस्यैव वाक्यार्थत्वात् । नाऽर्थापत्तिः । तदभावेऽनवकल्पमानदर्शनाऽनुपपत्तेः । नोपमानम् । सादृश्यविषयत्वात् । नाऽभावः । अभावविषयत्वात् । प्रत्यक्षस्येव चेतरेषामपि प्रमाणानां क्रमाऽक्रमौ न कल्पेते प्रमेयं न च निरूप्यते । एवं तावदनुपपत्तिः । ज्ञानमपि ।

सर्वादृशामन्यवित्तमिन्द्रियाणां न गोचरः ।
अत एव न सर्वज्ञज्ञानकार्य्यं प्रसिद्ध्यति ॥

पहितविशेषस्य पदार्थस्येव वाक्यार्थत्वात् । कृतोपपादनमेतन्नियोगपरीक्षायाम् । नाऽर्थापत्तिः । कुतः ? तस्य सर्वस्याऽभावे ऽनवकल्पमानस्याऽघटमानस्य कस्य चित् दर्शनाऽनुपपत्तेः । नोपमानम् । दृष्टस्य[1] स्मृत्यारूढस्य गवादेर्दृश्यमानेन गवयादिनोपमेयत्वात् । सर्वस्य क्व चिददर्शनात् । सादृश्यविषयत्वाच्च । सर्वस्य चाऽसादृश्यरूपत्वात् । न प्रमाणाऽभाव,स्तस्य प्रमेयाऽभावविषयत्वात् । सर्वस्य च सदसद्रूपतया तदनुपपत्तेः । प्रत्यक्षस्येव चेतरेषामपि प्रमाणानां क्रमाऽक्रमौ न कल्पेते न घटेते । प्रमेयं च न निरूप्यते ।

एवं तावदनुपपत्तिप्रमाणादारु परिशोधितम् । ज्ञानमपि परिशोध्यते । तथा हि—

सर्वादृशामन्यवित्तमिन्द्रियाणां न गोचरः ।
अत एव न सर्वज्ञज्ञानकार्यं प्रसिध्यति ॥

न तावदनतीन्द्रियदृशो ऽस्मदादेः सदपि परवर्त्ति सर्वसंवेदनं प्रत्यक्षगम्यम् । ननु यथा जातमात्रस्य बालस्य स्मितरुदितादिकार्यदर्शनादप्रत्यक्षा अपि हर्षविषादादयः प्राग्भवीयश्चाऽनुभवो ऽनुमीयते तथोपदेशादिलक्षणकार्यदर्शनात्परवृत्ति सर्वविषयं विज्ञानमनुमास्यतइत्यत आह—अत एव चात्यन्ताऽप्रत्यक्षत्वादेव

१ सदृशस्य । २ पु॰ पा॰ ।

न तावदनतीन्द्रियदृशः सदपि परवर्ति संवेदनं प्रत्यक्षम् । अत एव नाऽनुमेयम् । तदसिद्धौ तत्कार्याऽसिद्धेः । नन्वतिशयानां काष्ठाप्राप्तिः परमाणानामुपलब्धा, साऽतिशयं च ज्ञानम्, अतः क्व चित्काष्ठाप्राप्तं सर्वविषयमिति । उच्यते–

नाऽनुमेयम् । ननूक्तं कार्यदर्शनादनुमेयमित्यत आह–तत्सर्वज्ञानाऽसिद्धौ प्रत्यक्षेण तत्कार्याऽसिद्धेः । न जात्वपरिदृष्टधूमकेतनो धूमं तत्कार्यमवैति । स्मितरुदितादयस्तु मानसप्रत्यक्षसमधिगमनीयशोकादिकार्यतया स्वात्मनि प्रतीता इति वैषम्यम् । उपदेशस्तु मन्वादीनां चरकादीनां वा वेदात् उपदेशान्तरप्रभवप्रवृत्तिप्रसूतादन्वयव्यतिरेकाऽवगमाद्वा । न च वैद्यचरको[1]पदेशानामादिरस्ति । न खलु सर्वासामौषधीनां तत्संयोगानां च सहस्रेणापि पुरुषैरागमाधीनः शक्तः कर्तुं कश्चिदन्वयव्यतिरेकौ । चैत्यवन्दनाद्युपदेशस्तु व्यामोहाद्विप्रलम्भाद्वेति निरवद्यम् । परोक्तास्तु हेतवोऽधस्तादेव निरस्ता इति नाऽत्र तिरोहितमिव किं चित् ।

सम्प्रति स्वायम्भुवाऽभिमतं सार्वज्ञ्यं निरसितुमुपन्यस्यति–ननु साऽतिशयानां काष्ठाप्राप्तिः परिमाणानामुपलब्धा, तद्यथा कुवलाऽऽमलकबिल्वेषु महत्त्वस्य साऽतिशयस्याऽऽकाशे काष्ठाप्राप्तिः । यत आकाशं परममहद्भवति । साऽतिशयं चेदं विज्ञानमुपलभ्यते । तत्तदेकद्विबहुविषयादिव्याप्त्या तदिदमपि क्व चित्काष्ठाप्राप्तं युक्तम् । इयमेव चाऽस्य काष्ठाऽऽप्तिः यद्विदितसमस्तवेदितव्यस्य तदभावेऽव्यवस्थानमिति । यथाह भगवान् पतञ्जलिः 'तत्र निरतिशयं

१ न चरक । २ पु॰ पा॰ ।

काष्ठा यद्यवधिः कामं परं यस्मादसम्भवि ।
कार्य्यद्रव्यैरनैकान्तो गुणैश्च गरिमादिभिः ॥

यदि यतः परं नास्ति सा कष्ठा, भवतु तत्प्राप्तिः । न च तया सर्वविषयत्वसिद्धिः । भूयिष्ठविषयत्वं तु भवेत् । पार्थिवस्येव गोलकस्य पार्थिवान्तराऽपेक्षं बहुतराऽऽकाशाऽवकाशव्यापित्वं न सर्वव्यापिता । अथ यतः परं न सम्भाव्यते, कार्य्यद्रव्यैर्व्यभिचारः । न हि साऽतिशया अपि घटादयः परिमाणतः पराऽसम्भवनीयाऽति-

सर्वज्ञविज्ञान'मिति । अत्रोत्तरमाह । उच्यते—

काष्ठा यद्यवधिः कामं परं यस्मादसम्भवि ।
कार्यद्रव्यैरनेकान्तो गुणैश्च गरिमादिभिः ॥

तामिमां काष्ठां विकल्प्य दूषयति—यदि यतः परं नास्ति सा काष्ठा, भवतु तत्प्राप्तिर्न तया सर्वविषयत्वसिद्धिः । सर्वमेव विज्ञानं स्वहेतुसमासादितजन्मभेदं स्वगोचराऽवधि नाऽतिवर्तते इत्यत्र न विप्रतिपद्यामहे । नो खल्वेतावता सर्वविषयविज्ञानसिद्धिरित्यर्थः । भूयिष्ठविषयत्वं तु भवेत् प्राज्ञानां षट्प्रमाणीनिपुणानां विज्ञानस्य पार्थिवस्येव गोलकस्य सकलजीवलोकाऽधिष्ठानस्य गण्डशैलशिलादिपार्थिवान्तराऽपेक्षं बहुतराऽऽकाशाऽवकाशव्यापित्वं, न पुनः सर्वव्यापिता ।

कल्पान्तरमाशङ्कते—अथ यतः परं न सम्भाव्यते सा काष्ठा, यथा व्योम्नः परममहत्परिमाणं परमाणूनां पारिमाण्डल्यम् । न ह्याभ्यां परं महीयः क्षोदीयो वा सम्भवति । तद्दूषयति—कार्यद्रव्यैर्व्यभिचारः । तं दर्शयति—न हि साऽतिशया अपि कुटकुम्भमणिकादयः परिमाणतः पराऽसम्भवनीयव्यपदेशाऽतिशायिनः । कस्मात् ?

शायिनः। अन्याऽनवकाशप्रसङ्गात्। एकेन सर्वव्याप्तेः। न च गुणधर्म्मो ऽयमिति साम्प्रतम्। तद्गतानां गरिमादीनां[1] तदवस्थाऽसम्भवात्। सर्वैर्गुरुत्ववद्भिरेककार्य्यारम्भाऽभावात्। प्रयत्नविशेषाच्चाऽन्तिकदूरप्राप्तिर्मनुष्यवातहरिणहरिपतत्रिणाम्। न च तस्याऽसम्भवनीयपराऽवस्थो ऽतिशयः। अनन्तत्वान्नभसः। केषां चिन्निरतिशयप्राप्तानां[2] पातप्रसङ्गात्। निरवशेषगन्तव्य[3]देशप्राप्त्या हि प्रयत्नो निरतिशयः स्यात्। तदनन्ततया कुतो ऽस्य निरतिशयता?

अन्याऽनवकाशप्रसङ्गात्। स्पर्शवता गगनपरिमाणेन एकेनैव द्रव्येण सर्वव्याप्तेः स्पर्शवतामन्येषामनवकाशः स्यात्। प्रथमं गुणत्वे सतीति विशेषणान्न कार्यद्रव्यैर्व्यभिचार इति तत्राह— न च गुणधर्मो ऽयमिति साम्प्रतम्। कुतः? तत्कार्यद्रव्यगतानां गरिमादीनां तदवस्थायाः काष्ठाया असम्भवात्। एवं हि गरिमा नाऽवस्थोदयं पश्येद्यदि सर्वैरेव गरिमगुणशालिभिः सम्भूय परमगरिमगुणमेकं कार्यमारभ्यते। न त्वेतत्सम्भवतीत्याह—सर्वैर्गुरुत्ववद्भिरेककार्यारम्भाऽभावात्। अथाऽसाधारण्ये गुणत्वे सतीति विशेषणान्न व्यभिचारः? तत्राह—प्रयत्नविशेषाच्चाऽन्तिकदूरप्राप्तिर्मनुष्यवातहरिणहरिपतत्रिणाम्। न च तस्य विशेषस्याऽसम्भावनीयपराऽवस्थो ऽतिशयः। कस्मात्? दनन्तत्वाद्गन्तव्यस्य नभसः। केषां चिन्निरतिशयप्रयत्नानां पात[4]प्रसङ्गात्। निरवशेषगन्तव्यदेशप्राप्त्या हि प्राप्यप्रापणीयतया गतिहेतुः प्रयत्नो निरतिशयः स्यात्। तदनन्ततया कुतो ऽस्य निरतिशयता?

१ परिमाणादीनाम्. मू॰ पु॰ पा॰। २ प्रयत्नानामिति २ पु॰ पा॰। ३ निःशेषगन्तव्य मू॰ पु॰ पा॰। ४ निरतिशयप्राप्तानां पात। २ पु॰ पा॰।

तस्मात्प्रयत्नेनैवाऽसाधारणगुणेन बुद्धिगुणेन वा व्यभिचारः । ऐश्वर्य्यफलस्य धर्मस्य न सा काष्ठा । तद्वदैश्वर्य्यजननाद्धर्मस्यापि । ईश्वरैश्वर्य्यस्य धर्म्मफलत्वाऽभावात् । क्लेशकर्म्मविपाकाऽऽशयाऽपरामर्शादनेकैश्वर्य्यप्रसङ्गादैश्व-

तस्मात्प्रयत्नेनैवाऽसाधारणगुणेन बुद्धिगुणेन वा व्यभिचारस्तदवस्थ इत्यर्थः ।

यद्युच्येत धर्मात् खल्वशुक्लादकृष्णात् ज्ञानवैराग्यैश्वर्याणि जायन्ते,[1] तत्र यथा धर्मविशेषजन्मनी वैराग्यैश्वर्ये निरतिशयमेव तज्जन्मविज्ञानमपि तत्र व्यभिचार इति, तत्राह—ऐश्वर्यफलस्य धर्मस्य न सा ऽस्ति काष्ठा तद्वदैश्वर्यादिजननाद्धर्म्मस्यापि तद्वत्तया व्यपदेश इति । कुतः पुनरशुक्लकृष्णस्य न सा काष्ठे? त्यत आह—ईश्वरैश्वर्यस्य धर्मफलत्वाऽऽपातात्[2] । अशुक्लाऽकृष्णो धर्मो योगिनां मात्रस्यैश्वर्यस्य न पुनर्निरतिशयस्य । तत् खल्वनुपचरितं भगवति परमेश्वर एव । न च तद्धर्म एवं तज्ज्ञानमपि । तदयमसिद्धो हेतुः । दृष्टान्तश्च साधनहीनः । कुतः पुनरैश्वर्यं परमेश्वरस्य न धर्मजनित? मित्यत आह—क्लेशकर्मविपाकाऽऽशयाऽपरामर्शात् । यथाहाऽत्रभगवान् पतञ्जलिः 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति । अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः क्लेशाः । कुशलाऽकुशलानि कर्माणि । तद्विपाका जात्यायुर्भोगाः । आशेरते इत्याशयाः कर्मवासनाः धर्मधर्म्मविषयत्वात् । तथापि मुक्तात्मभ्यश्च प्रकृतिलयवैदेह्यप्राप्तेभ्यश्च क्लेशादिभिरपरामृष्टेभ्यो ऽस्य भूतवतो न भेद इत्याशङ्क्योक्तं पुरुषविशेष इति । मुक्तात्मनां खलु पूर्वा बन्धकोटिः, उत्तरा च विदेहप्रकृतिलयानां सनत्कुमारप्रभृतीनां समस्ति । तस्य तु भगवतो ऽयमेव विशेषस्तेभ्यो यतः क्लेशादीनामिह वैकल्पिकता इति तत्र कुतोऽस्य धर्मविशेषजनितमैश्वर्यं? मित्यर्थः ।

१ कायन्ते । पु॰ पा॰ । २ अभावात् । पु॰ पा॰ ।

पूर्वं प्रति कर्मणोऽपूर्वस्य च स्वध्वंसे कारणत्वस्य च कल्पनापेक्षया लाघवेन चरमसुखोत्पत्तिक्षणोत्पत्तिकध्वंसस्य तद्व्यक्तित्वेन विजातीयसुखध्वंसस्य वा तत्त्वेन प्रतिबन्धकत्वस्वीकारस्यैवोचितत्वात् । वैजात्यं भवन्मते चरमसुखे तदव्यहितपूर्वक्षणोत्पन्नसुखे वा । अस्मन्मते चरमसुखोत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिसुखवृत्ति । न च विजातीयसुखध्वंसस्य तत्तद्ध्वंसस्य वा प्रतिबन्धकत्वेऽग्रेपि ज्योतिष्टोमान्तरजन्यस्वर्गो न स्यात् । अस्मन्मते विजातीयसुखस्य समवायेन ज्योतिष्टोमजन्यधर्मस्य विजातीयधर्मस्य वा नाशकत्वान्नाग्रे तादृशस्वर्गानुपपत्तिरिति वाच्यम् । येन ज्योतिष्टोमद्वयं कृतं तस्यैकज्योतिष्टोमफलवतः कर्मान्तरभोगोत्तरं ज्योतिष्टोमजन्यस्वर्गो न स्याद्विजातीयस्वर्गेण ज्योतिष्टोमजन्यादृष्टमात्रनाशात् । तत्तज्ज्योतिष्टोमजन्यधर्मे तत्तद्धर्मे वा तत्तज्ज्योतिष्टोमजन्यविजातीयस्वर्गस्य तत्सुखव्यक्तेर्वा नाशकत्वं यदि तदा तत्तज्ज्योतिष्टोमजन्यस्वर्गे तत्तज्ज्योतिष्टोमजन्यविजातीयस्वर्गनाशस्य तत्तत्सुखनाशस्य तत्तन्नाशस्य वा प्रतिबन्धकत्वादित्येके ।

परे तु अनन्तकार्यकारणभावकल्पनागौरवभयेन ज्योतिष्टोमजन्यापूर्वस्य विजातीयापूर्वस्य वा विजातीयस्वर्गनाश्यत्वात्, ज्योतिष्टोमद्वयजन्यस्वर्गयोरव्यवधानेनैवोत्पत्तिः कल्प्यते, वैजात्यस्य तत्र फलबलेन चरमस्वर्गे स्वीकारात् । युगपदेवादृष्टद्वयनाशः । भवन्मते त्वनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिः ।

किं च कलञ्जभक्षणोत्तरं कृतप्रायश्चित्तस्यापि कलञ्जभक्षणजन्यफलापत्तिः । न च प्रायश्चित्तं तद्ध्वंसो वा प्रतिबन्धक इति वाच्यम् । कलञ्जभक्षणान्तरजन्यफलस्या-

भावापत्तेः । प्रायश्चित्तजादृष्टध्वंसस्य प्रतिबन्धकस्य विद्यमानत्वात् । तत्कलञ्जभक्षणजन्यफले प्रतिबन्धकत्वं त्वप्रसिद्ध्या न सम्भवति । अस्मन्मते प्रायश्चित्तस्य पापनाशकत्वात् पूर्वकलञ्जभक्षणजन्यपापस्य प्रायश्चित्तेन नाशेऽपि कलञ्जभक्षणान्तरजन्यस्य सत्त्वान्न फलानुपपत्तिरित्याहुः ।

केचित्तु अपूर्वाभावे ध्वंसद्वारा प्रधानानां फलकारणत्वाविशेषात् समप्राधान्यापत्तिरित्याहुः । तन्न । अङ्गध्वंसविशिष्टस्वध्वंससम्बन्धेन प्रधानस्यैव कारणत्वस्वीकारात् । आगमस्यैव विनिगमकत्वान्न वैपरीत्यम् । अन्यथाङ्गापूर्वविशिष्टप्रधानापूर्वं परमापूर्वं जनयति प्रधानापूर्वविशिष्टमङ्गापूर्वं वा इत्यत्रापि विनिगमकाभाव इति प्राहुः ।

ननु लाघवाद्यदापूर्वकल्पनं तदा तच्छ्राद्धादौ कर्तृनिष्ठमेकमेव कल्प्यतां पुरुषनिष्ठानेकादृष्टकल्पनायां गौरवादिति चेन्न । अमुक्तपुत्रश्राद्धेन मुक्तस्य स्वर्गोत्पादापत्तेः । मुक्तपुत्रश्राद्धेनामुक्तस्य स्वर्गानुत्पादापत्तेश्च । मुक्ते धर्माभावात् । न च तत्फलजनकधर्मं प्रति तदीयवासनाया हेतुत्वं, गौरवात् । किं चामुक्तपुत्रकृतकूटसाक्ष्यादिजनितपापेन नरकादिसंशयान्निःशङ्कं मोक्षे कोऽपि न प्रवर्तेत । अपि चादृष्टस्य कर्तृनिष्ठत्वे पितृगतचरमफलस्य परम्परया नाशजनकत्वे गौरवम् । मातृनिष्ठत्वे[1] समवायेन नाशकत्वे लाघवादिति दिक् ।

ननु विधेरिष्टधानत्वे शक्तिः, स्वर्गादिसाधनत्वे, वा । नाद्यः । स्वर्गादिसाधनत्वेन प्रवर्तके ज्ञानस्यानुपपादनात् । नान्त्यः । अनन्तशक्तिकल्पनापत्तेरिति चेत् ।

१ पुरुषनिष्ठत्वे इत्यर्थः ।

अत्र केचित् बुद्धिस्वत्ववदिच्छाविषयत्वेन स्वर्गादेरनुगमादिच्छाविषयसाधनत्वेन स्वर्गादिसाधनत्वेषु शक्तिर्बुद्धिस्वत्ववदिच्छाविषयत्वमेषामात् स्वर्गसाधनत्वादिप्रकारको बोधः ।

परे तु लिङादेर्नानार्थत्वमिष्टमेवेति स्वर्गादिसाधनत्वेषु शक्तिः, स्वर्गकामादिपदस्य स्वर्गसाधनत्वे तात्पर्यग्राहकत्वात् स्वर्गकामेत्यादौ न फलान्तरसाधनत्वबोधः । न च विश्वजिता यजेतेत्यत्र स्वर्गकामपदाभावात् कथं स्वर्गसाधनत्वबोधः । तत्रापि न्यायेन स्वर्गसाधनत्वे तात्पर्यग्रहात् । न च प्रतितिष्ठन्ति इत्यादि न्यायेन स्वर्गसाधनतात्पर्यग्रहे स्वर्गसाधनत्वबोधापत्तिरिति वाच्यम् । तत्रार्थवादेन फलोपस्थितौ तादृशन्यायाभावेनार्थवादोपस्थितफलसाधनत्वे तात्पर्यग्रहादित्याहुः ।

ननु अर्थवादानां न बोधकत्वं कार्यान्विते पदानां शक्तिः । तथा हि प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यस्य प्रवृत्तिमुपलभमानो बालस्तत्प्रयोजकतया कार्यताविशिष्टज्ञानमनुमिनोति स्ववृत्तौ कार्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणात् । ततस्तद्धेत्वाकाङ्क्षायामुपस्थितत्वाच्छब्दमेव तथावधारयति ततस्तन्निर्वाहिकां शक्तिं कार्यान्विते शब्दत्वावच्छेदेन कल्पयति तदनु आवापोद्वापाभ्यां घटादिपदे शक्तिग्रहोऽपि प्रथमकल्पनानुरोधात् कार्यान्वितघटादिविषयो जायते ।

ननु पदानां कार्यान्वितघटादौ यदि शक्तिस्तदाघटमानयेत्यतः कार्यान्वितघटत्वेन कार्यान्वितानयनत्वेन च बोधापत्तिः । गृहं घटवदित्यादितोऽपि शाब्दबोधापत्तिश्च । सर्वेषां पदानां कार्यान्वितवाचकत्वादिति चेन्न । घटादिपदा-

नां कार्यान्वितविषयकघटादिशाब्दबोधजनकत्वरूपा शक्तिर्गृहीता अतः कार्यवाचकपदाभावेन वृत्त्या पदजन्यकार्योपस्थितेरभावेन गृहं घटवदित्यादीनां शाब्दबोधाजनकत्वात् । न च वस्तुगत्या कार्यान्वितबोधजनकत्वं चेदर्थवादादेरपि बोधकत्वापत्तिः । कार्यत्वेन कार्यबोधकत्वं च न लौकिकलिङां कार्ये शक्तेरभावादिति वाच्यम् । लौकिकविधेः कार्यत्वे लाक्षणिकत्वेन सर्वेषां कार्यत्वान्वितविषयकशाब्दबोधे हेतुत्वान्न पुराणकाव्यनाटकादीनां प्रमाण्यमिति चेन्न । कार्यतावच्छेदकाग्रहेऽपि स्वर्गकामो यजेतेत्यादौ कारणत्वग्रहवदिहापि घटपदं कार्यान्वितघटज्ञानजनकमिति गृहीत्वा पश्चाल्लिङः कार्ये शक्तिं कल्पयित्वा घटशाब्दत्वं घटपदज्ञानजन्यतावच्छेदककार्यत्वविषयकघटज्ञानं तु कार्यत्वोपस्थापकपदसमभिव्यहारादि कल्पयतीति नाद्यव्युत्पत्तिविरोधः । यद्वा घटादिपदज्ञानानामस्तुकार्यत्वविषयकघटादिशाब्दत्वे कार्यतावच्छेदकत्वग्रहस्तथापि अग्रे लाघवेन घटादिशाब्दत्वं घटादिपदज्ञानानां कार्यत्वविषयकशाब्दत्वं कार्यवृत्तपदज्ञानानां कार्यतावच्छेदकं कल्पयति । न च प्रथमप्रवृत्तं बलवदिदं रजतमिति प्रथमप्रवृत्तस्यापि नेदं रजतमित्यनेन बाधादिति सिद्धं अर्थवादानामपि प्रामाण्यमिति दिक् ।

ननु तत्तच्छाब्दबोधे तत्तद्वृत्तपदस्य हेतुत्वात्, घटमानयेत्यादावन्वयशाब्दबोधात्, घटादिपदानामन्वयेऽपि शक्तिरावश्यकीति चेन्न । निरूपकत्वादिसम्बन्धेन घटप्रकारककर्मत्वादिविशेष्यकबोधे घटादिपदोत्तरद्वितीयात्वेन द्वितीयादिज्ञानस्य हेतुत्वेनैवान्वयबोधसम्भवेन तत्र शक्तेरकल्पनात् । तत्तत्प्रकारकशाब्दबोधे तत्तत्प्रकारेण

तदुपस्थित्यर्थं तेन तेन रूपेण तत्र वृत्तिपदज्ञानापेक्षेति नान्वये शक्तिरिति दिक्।

अत्र मीमांसकाः, लाघवेन घटादिपदानां घटत्वादौ शक्तिस्तथा च घटत्वप्रकारकघटशाब्दबोधस्य घटत्वेन घटवृत्तपदज्ञानाभावेऽपि जायमानत्वान्नोक्तरूपेण हेतुत्वम्। न च व्यक्तिबोधाभावापत्तिः। घटत्वविशिष्टशक्तिज्ञानस्य घटत्वविशिष्टशाब्दत्वं कार्यतावच्छेदकं त्वन्मते, तच्च मन्मते घटत्वशक्तिज्ञानस्य कार्यतावच्छेदकं, कारणतावच्छेदके लाघवादित्याहुः। तन्न। घटत्वशक्तं घटपदमिति ग्रहत्वापेक्षया लाघवेन घटशक्तमिति ग्रहत्वेनैव घटशाब्दबोधे हेतुत्वात्। न च घटत्वेनैतद्घटे शक्तिग्रहाद्घटत्वेनान्यबोधो न स्यात्। न च घटत्वप्रकारकशक्तिग्रहस्य घटत्वाश्रयशाब्दत्वं कार्यतावच्छेदकमिति वाच्यम्। घटत्वेन पटे शक्तिग्रहात् घटत्वेन घटबोधापत्तेः। घटत्वेन पटबोधाभावापत्तेश्चेति वाच्यम्। सामान्यलक्षणया सर्वघटे शक्तिग्रहेण समानप्रकारकसमानविशेष्यतया शक्तिग्रहपदार्थस्मरणशाब्दबोधानां कार्यकारणभावाङ्गीकारात्।

शक्तिश्च घटशब्दाद्घटत्वविशिष्टो बोधव्य इतीश्वरेच्छा। न च तादृशेच्छा विषयतया घटवत् पटेऽपि सत्त्वात् पटेऽपि घटपदशक्तिः स्यादिति वाच्यम्। घटत्वविशिष्टेच्छाया घटपदशक्तित्वस्वीकारात्। आधुनिकचैत्रादिपदेऽपि चैत्रत्वादिविशिष्टतादृशेच्छाया द्वादशेऽहनि पिता नाम कुर्यादित्यनेन वाचकत्वरूपनामत्वसिद्धा तस्याः शक्तित्वकल्पनात्। तद्भिन्नाधुनिकसङ्केतस्तु न शक्तिरिति प्राञ्चः।

परे तु अस्माच्छब्दादयमर्थो बोद्धव्य इतीच्छैव शक्तिरत आधुनिकसङ्केतोऽपि शक्तिः। अन्यथा नदीवृद्ध्यादि-

संज्ञातो विभक्तिर्न स्यात् । अर्थवत्वाभावात् । ईश्वरेच्छाशक्तिरिति प्रवादस्त्वनादिगवादिपदाभिप्रायेणेति वदन्ति । तन्न । तत्रापीश्वरेच्छासत्त्वात् ।

नव्यास्तु नेश्वरेच्छाशक्तिः । अपभ्रंशे लाक्षणिके च तादृशेच्छासत्त्वेन शक्त्यापत्तेः । ईश्वरज्ञानकृतिभ्यामस्माकं सर्वमिति सामान्यलक्षणाजन्यज्ञानेन च विनिगमनाविरहाच्च । तस्यापि घटत्वविशिष्टस्य घटपदशक्तेर्वक्तुं शक्यत्वात् । घटत्वोपहितेच्छेत्यत्रेच्छांशवैयर्थ्याच्च । किं तु स्वरूपसंबन्धविशेष इति दिक् ।

शक्तिग्रहस्तु व्यवहारात् प्रसिद्धार्थपदसमभिव्याहारात्, विवरणात्, आप्तवाक्याद्व्याकरणादुपमानात्कोशात्, तथाचाहुः ।

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्यव्यवहारतश्च ।
वाक्यस्य विशेषाद्विवृत्तेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

तथा चानुमानादित्रयेण शक्तिग्रहः । व्यवहारादीनां तत्रैवान्तर्भावात् । तत्र तत्पदशक्तिग्रहस्तु बुद्धिविषयतावच्छेदकावच्छिन्ने बुद्धिविषयतावच्छेदकत्वं घटत्वादीनामनुगतमेकं, तस्य मोषात्, घटत्वादिनैव घटादिस्मरणं शाब्दबोधश्चेति कश्चित् ।

अन्ये तु बुद्धिविषयत्वादिनैव शक्तिः । बुद्धिविषयत्वेनैव शाब्दबोधः । यद्धर्मविशिष्टे बुद्धिविषयत्वज्ञानं तद्धर्मविशिष्टमानयतीत्याहुः ।

अपरे तु घटत्वादिलघुधर्मविशिष्टे तत्पदशक्तिस्वीकारात्, नानैव शक्तयः गुरुधर्मविशिष्टे तु लक्षणा । यद्धर्म-

र्मविशिष्टे बुद्धिविषयत्वज्ञानं तद्धर्मविशिष्टं बोधयतीति वदन्ति । इदम्पदस्य प्रत्यक्षविषयताऽवच्छेदकावच्छिन्ने, एतत्पदस्य पर्याप्तिसंबन्धेन समीपवर्तितावच्छेदकावच्छिन्ने, अदः पदस्य विप्रकृष्टवर्तितावच्छेदकावच्छिन्ने, सर्वपदस्य पर्याप्तिसम्बन्धेन बुद्ध्यवच्छिन्ने शक्तिः । सर्वेषु घटेषु द्रव्यत्वमित्यत्र घटपर्याप्तबुद्ध्यवच्छिन्ने द्रव्यत्वमिति बोधः। सर्वेषु घटेषु रूपमित्यादौ कस्यापि रूपस्य सर्वघटवृत्तित्वाभावेन सर्वपदस्य व्यापकत्वे लक्षणा ।

वस्तुतस्तु सर्वशब्दस्य तत्तद्बुद्धिविषयतापर्याप्ते शक्तिः। सर्वान् घटान् नयेत्यत्र प्रकरणात् स्वगृहवृत्तित्वेन घटादेरुपस्थितत्वात् तादृशबुद्धिविषयान् घटान् नयेत्यर्थः। एवं तत्र तत्र बोध्यम् । सर्वेषु घटेषु रूपमित्यत्र तादृश बुद्धिपर्याप्तेषु न रूपान्वयः। किं तु सर्वशब्दस्य लक्षणया तादृशबुद्धिविषये रूपान्वयः ।

वस्तुतो घटेषु रूपमित्यत्र बहुत्वान्वयिषु घटेषु रूपान्वयवत् सर्वेषु घटेषु रूपमित्यत्रापि रूपान्वयः ।

किं पदस्य जिज्ञासाविषयत्वविशिष्टे। अतः किं पचतीति वाक्याज्जिज्ञासाविषयकर्मकपाकानुकूलकृतिमानिति बोधः। अत एव तण्डुलं पचतीत्यस्य जिज्ञासानिवर्त्तकत्वम्।

युष्मत्पदस्य तत्कालीनसम्बोध्यचैत्रत्वादिविशिष्टे शक्तिः। सम्बोध्यत्वं त्वनुगमकं न तु शाब्दबोधविषयः।

अस्मत्पदस्य तत्कालीनाहम्पदस्वतन्त्रोच्चारयितृचैत्रादि विशिष्टे शक्तिः । यदा यच्छरीरावच्छिन्नोऽहम्पदेस्वतन्त्रोच्चारयिता तच्छरीरावच्छिन्नस्याहम्पदेन भानम् ।

अत एवं वाच्यस्त्वया मद्वचनात् । सरोजेत्यादौ नाहम्पदात् कालिदासादेर्भानम्। तेषामहंपदस्वतन्त्रोच्चा-

रयितृत्वाभावात् । न च मैत्रोच्चारयिता चैत्रोऽहमिति जानातीति वाक्यान्मैत्रबोधापत्तिः । तस्याहम्पदे स्वतन्त्रोच्चारयितृत्वसत्त्वादिति वाच्यम् । अन्यबोधाभिप्रायेणानुच्चारयितृत्वरूपस्वातन्त्र्यस्य तत्राभावात् । न च चैत्रस्यापि बोधो न स्यात् तस्याहंपदे स्वतन्त्रोच्चारयितृत्वाभावादिति वाच्यम् । तत्राहंपदलक्षणया तादृशबोधाङ्गीकारात् । वयं गच्छाम इत्यत्र स च त्वं चाहं चेति वयमिति एकशेष इति न दोषः ।

केचित्तु सीतायाः स्वतन्त्रोच्चारयितृत्वाभावेन तस्या बोधाभावापत्त्यानुवादरूपाहम्पदमात्रस्योच्चारयितृत्वावच्छेदकावच्छिन्नबोधकत्वम् । अनुवादरूपाहंपदे तु यस्य यस्य बोधोऽनुभवसिद्धस्तत्तद्व्यक्तित्वेन तत्तद्बोधकत्वम् । अन्यबोधाभिप्रायेणोच्चारयितृत्वमनुवादत्वमिति दिक् ।

स्वतन्त्रोच्चारयितृत्वेन ज्ञातृबोधकत्वम् । अहंपदे सीतायास्तु लक्ष्मादेव बोध इति मिश्रानुयायिनः ।

लक्षणा च न शक्यादशक्योपस्थितिः । उपस्थितिप्रयोजिका हि लक्षणा न तु सैव । अत एवाशक्ये तात्पर्यमपि लक्षणा न । तात्पर्यनिर्वाहिका हि लक्षणा न तु तात्पर्यात्मिकैव । शक्तेरपि तत्त्वापत्तेः । अन्वये तात्पर्यस्यापि लक्षणापत्तेश्च । किं तु स्वशक्यसम्बन्धः । सा च द्विविधा । गौणी तदन्या च । तत्र सादृश्यात्मकः शक्यसम्बन्धो गौणी । यथा राज्ञि ऋषिशब्दस्य । तदन्या च तीरादौ गङ्गापदस्य ।

व्यञ्जना च न वृत्यन्तरम् । गच्छ गच्छसीत्यादौ गमनाभावे तात्पर्यान्यथानुपपत्त्या कस्य चित् पदस्य लक्षणयैव बोधसंभवात् । अन्येषां पदानां तात्पर्यग्राहकत्वात् ।

न च सत्यपि बाधग्रहे क्वचिदर्थविशेषाणां प्रतीतिरस्ति। सा च न लक्षणया, लाक्षणिके बाधस्याविरोधित्वात् प्रतिबध्यतावच्छेदके दोषविशेषाजन्यत्ववत् व्यञ्जनाजन्यत्वस्यापि दानादिति वाच्यम् । वृत्तिविशेषाजन्यत्वस्यैव प्रतिबध्यतावच्छेदके निवेशात् । किं वृत्त्यन्तरेणेति दिक् ।

सा च लक्षणा द्विविधा जहत्स्वार्थाऽजहत्स्वार्था च । यत्र स्वार्थस्य न भानं तत्र जहत्स्वार्था । यथा गङ्गापदस्य तीरत्वेन लक्षणा । गङ्गापदस्य गङ्गातीरत्वेन लक्षणा अजहत्स्वार्था । काकपदस्य दध्युपघातकत्वेन लक्षणाप्यजहत्स्वार्था । स्वशक्यसाधारणरूपेण लक्षणाऽजहत्स्वार्था । स्वशक्यावृत्तिलक्ष्यतावच्छेदकविशिष्टलक्षणा च जहत्स्वार्था ।

लक्षितलक्षणा च स्ववाच्यघटितसम्बन्धेन लक्षणा । यथा द्विरेफपदे रेफद्वयवत्पदवाच्यत्वसम्बन्धेन लक्षणा ।

सा च जहत्स्वार्थेति केचित् ।

परे तु यत्र शक्यतावच्छेदकरूपेण न शक्यभानं सा जहत्स्वार्था । यत्र येन केन चिद् रूपेण शक्यभानं तत्राजहत्स्वार्थेति ।

यत्तु द्विरेफपदे द्विपदं तात्पर्यग्राहकं रेफपदेन भ्रमरपदं लक्ष्यते तेन भ्रमरबोध इति । तन्न । द्विरेफपदोत्तरविभक्त्यर्थस्य तत्रान्वयाप्रसङ्गात् । तस्याप्रकृत्यर्थत्वात् । विभक्त्यन्तभ्रमरपदे तु लक्षणया न दोष इति ध्येयम् ।

अनादिप्रयोगानुसारिणी लक्षणा निरूढलक्षणा । यथा नीलपदस्य नीलवति ।

यत्र मानान्तराद्गूढ्यर्थसंबन्धिनि तात्पर्यमवधार्यते

तत्र रूढिपूर्विका लक्षणा । यथा मण्डपपदस्य, गृहसम्बन्धिनि पुरुषे यत्र न तात्पर्यं तत्र योगादेव पुरुषान्वयबोधः ।

ननु स्वर्गकामो यजेतेत्यत्र योगात् स्त्रीशूद्रयोरपि अधिकारापत्तिरिति चेन्न। तयोर्विद्यानिषेधेन स्वर्गकामपदसंकोचेन तदतिरिक्तस्वर्गकामग्रहणात् ।

परे तु अध्ययनजन्यज्ञानवन्तमादाय क्रतुविधयश्चरितार्था नान्यस्य विद्यामाक्षिपन्ति तेन न तेषामधिकार इति दिक् ।

लक्षणाबीजं तात्पर्यानुपपत्तिः। न तु शक्यान्वयायोग्यत्वम् । यष्टीः प्रवेशयेत्यादावभावात् । तात्पर्यविषयशक्यान्वयानुपपत्तिस्तत्रापीति चेन्न। तात्पर्यविषयशक्यान्वयानुपपत्त्यपेक्षया तात्पर्यानुपपत्तिरेव लाघवाल्लक्षणाबीजमिति केचित् ।

अन्ये तु मुख्यार्थान्वयानुपपत्तिः क्वचित्तात्पर्यानुपपत्तिर्लक्षणाबीजम् । तथा हि मुख्यार्थान्वयानुपपत्तिज्ञानं न लक्ष्यार्थान्वयबोधे कारणं किं तु गङ्गापदं शक्यसम्बन्धेन घोषान्वितार्थोपस्थापकं घोषानन्वितमुख्यार्थकत्वे सति घोषान्वितार्थबोधकत्वेन तात्पर्यविषयकत्वादिति क्रमेण मुख्यार्थान्वयानुपपत्त्या लक्षणाकल्पनम् । ततश्च लक्ष्यार्थान्वयबोधः । एवं गङ्गापदं तीरबोधकं तीरबोधकत्वेन तात्पर्यविषयकत्वादित्यनुमितेस्तन इदं पदं शक्यसम्बन्धेन तीरोपस्थापकतया तीरबोधकं तीरशक्तत्वेनागृह्यमाणत्वे सति तीरबोधकत्वादिति क्रमेण तात्पर्यानुपपत्त्या लक्षणाकल्पनम् । एवं च लक्षणाकल्पकत्वेन द्वयोरप्युपयोगः । काल्पकाननुगमस्यादोषत्वात् । वन्हौ धूमालोकवदित्याहुः ।

ननु गङ्गापदस्य तीरे शक्त्यभावेनासाधुत्वापत्तिरिति-चेन्न। वृत्तिमत्त्वं पदसाधुत्वं न तु शक्तत्वम् । लाक्षणिक-स्यापि सधुत्वादिति केचित् ।

परे तु न वृत्तिमत्त्वं साधुत्वं केवलप्रकृतिप्रत्यययो-र्बाधति ग्राम ग्राम इत्यादेः साधुत्वापत्तेः किं तु व्याकर-णपरिगृहीतत्वम् । न च साधुशब्दव्युत्पादकत्वमेव व्याक-रणत्वमित्यन्योऽन्याश्रयः। तावदध्यायकूटस्यैव व्याकरण-त्वादित्याहुः ।

एवं पङ्कजपदं पद्मत्वविशिष्टे शक्तमनुपपत्त्यादिज्ञानं विनापि पद्मत्वविशिष्टबोधकत्वात्। न च पद्मत्वेन रूपेणा-नुभवस्तु सन्दिग्धः पद्मानुभवस्तु पङ्कजनिकर्तृत्वेन योगा-देवेति वाच्यम् । योगेन कुमुदादावपि धीप्रयोगप्रसङ्गात्। रूढिस्वीकारे तु पद्मत्वविशिष्टे रूढिज्ञानस्य पद्मान्यविशे-ष्यकबोधप्रयोगयोः प्रतिबन्धकत्वान्न दोष इति प्राञ्चः ।

चिन्तामणिकृतस्तु व्यक्तिवचनानां सन्निहितपरत्व-नियमेन प्रत्ययेनाश्रयवाचकेन पद्मत्वविशिष्टरूढ्योपस्थित-पद्मत्वविशिष्टं पङ्कीयोत्पत्त्याश्रयत्वेन बोध्यते । पङ्कवा-चकपदोत्तरधातोरुत्पत्तिवाचकत्वाद्रूढिज्ञानजन्यपद्मत्वो-पस्थितिकालीनशक्तिजन्यावयवोपस्थितेः । पङ्कजविशेष्य-कपङ्कीयोत्पत्त्याश्रयत्वप्रकारकशाब्दबोधत्वस्य कार्यताव-च्छेदकत्वेन न तदा कुमुदबोध इत्याहुः । तन्न। रूढिज्ञाना-भावकालीनबोधवद् रूढिज्ञानकालेऽपि सामान्यसामग्र्या कुमुदबोधवारणाय रूढिज्ञानकालीनपङ्कजनिकर्तृत्वप्रकार-कबोधे रूढिजन्यपद्मोपस्थितेर्विशेष्यतया हेतुत्वं वाच्यम् । रूढिज्ञानाभावकालीनतादृशबोधे तु तादृशोपस्थितेरभा-वस्य हेतुत्वं वाच्यम् । तदपेक्षया रूढिप्रतिबन्धकस्यैव लघुत्वादिति दिक् ।

परे तु पङ्कजपदस्य पद्मत्वविशिष्टबोधार्थं न शक्तिः । डप्रत्ययस्य पद्मत्वविशिष्टे निरूढलक्षणया तादृशबोधसम्भवात् । नापि कुमुदज्ञानप्रतिबन्धार्थम् । डप्रत्ययनिरूढलक्षणायाः तादृशबोधप्रतिबन्धकत्वसम्भवादिति । तन्न । एकपदोपस्थाप्यानामभेदान्वयस्याव्युत्पन्नत्वेन पङ्कजनिकर्तृपद्ममिति बोधासम्भवादिति दिक् ।

अत्र मीमांसकाः । पङ्कजप्रयोगनियतविषयपद्मानुभवजन्यसंस्कारादेव पद्मविशिष्टस्मरणसम्भवान्न तदर्थं शक्तिः । अवयवशक्तिग्रहकाले पद्मत्वविशिष्टोपस्थित्या तेन रूपेण पङ्कजपदात् स्मृतेः । नाप्यनुभवार्थम् । तच्छाब्दबोधे तदन्वयप्रतियोगशक्तपदत्वेनावयवैरेवानुभवसम्भवादिति । तन्न पङ्कपदस्य पङ्केशक्तिर्यथा व्यवहारात्तथा पङ्कजपदस्यापि शक्तेरनिवार्यत्वात् । यद्धर्मावच्छिन्नवृत्तिजन्यपदार्थोपस्थितेस्तद्धर्मावच्छिन्नशाब्दबोधसामान्ये हेतुत्वाच्च । किं च रथकारशब्दस्यापि जातिविशेषावच्छिन्ने शक्तिर्न स्यात् । पद्मविशिष्टबोधवज्जातिविशेषावच्छिन्नबोधस्यापि सम्भवात् । तथा च वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रूढया जातिविशेषावच्छिन्नस्य शीघ्रमुपस्थितत्वात् तस्यैवाधानं विधीयते इति व्याकोपश्च स्यादिति दिक् ।

अपरे तु तद्बोधकत्वं तत्र तत्साधुत्वं पङ्कजपदस्य कुमुदाबोधकत्वेन तत्र साधुत्वाभावादेव न कुमुदबोध, इति तन्न । साधुत्वज्ञानस्य शाब्दबोधेऽहेतुत्वात् । बाधतीत्यादितोऽपि बोधापत्तिरिति चेन्न । व्याकरणानिष्पन्नत्वरूपासाधुत्वनिश्चयेन प्रतिबन्धात् । यद्वा साधुत्वनिश्चयेऽपि अपभ्रंशाच्छाब्दबोधस्य जायमानत्वात् स न प्रतिबन्धक इति । नन्वपभ्रंशानां बोधकत्वात्तेषु व्यवहारा-

च्छक्तिरनिवार्या । न च लक्षणया तेषां बोधकत्वम् । शक्याभावेन तस्या अभावात् । न चापभ्रंशस्मारितसाधुशब्दादेवार्थप्रत्ययः । साधुशब्दमजानतां पामराणां ततोऽर्थप्रत्ययात् । न च शक्तिभ्रमाद्बोधकत्वम् । शक्तिग्राहकस्य व्यवहारस्योभयत्र सत्त्वात् । अन्यथा वैपरीत्यस्यापि सुवचत्वादिति चेन्न । एकशक्त्यारोपेणाप्युपपत्तौ नोभयत्र शक्तिः, गौरवात् । न चापभ्रंशे शक्तिः संस्कृते शक्त्यारोपोऽस्त्विति वाच्यम् । अपभ्रंशानां देशभेदेन नानात्वादनेकशक्तिकल्पने गौरवापत्तेः । संस्कृतस्य सर्वत्रैकत्वात् । अत एव प्राकृतेऽपि न शक्तिः । तस्यापि नानात्वाच्छक्तिबाहुल्ये गौरवात् ।

परे तु प्रत्येकमपभ्रंशेन विनिगमनाविरहात् तत्रापि शक्तिः । न च तेषां यज्ञे प्रयोगापत्तिः । साधुभिर्भाषितव्यमित्यत्र साधुशब्दस्य साधुविशेषसंस्कृते तात्पर्यादित्याहुः ।

ननु शक्तेरीश्वरेच्छात्वेनातिरिक्तपदार्थत्वेन वा न ज्ञानं हेतुः । नैयायिकानां मीमांसकानां च शाब्दबोधत्वावच्छिन्ने तेन तेन रूपेण कारणत्वे व्यभिचारात् तद्धिजनकतावच्छेदकसम्बन्धवत्त्वेन ज्ञानं हेतुस्तथा च तद्धिजनकत्वज्ञानमेव बोधे हेतुरस्तु । न चैवं लक्षणोच्छेदे गङ्गापदाद् विलम्बेन तीरधीर्न स्यादिति वाच्यम् । पूरज्ञापकत्वेन ज्ञानात् पूरोपस्थितौ तत्र घोषबाधग्रहे गङ्गापदस्य कुत्र तात्पर्यमिति गवेषणेन विलम्बात् । यत्र भूरिप्रयोगस्तत्र शक्तिरिति व्यवहारः । यत्र न भूरि प्रयोगस्तत्र लक्षणेति व्यवहारसम्भवात् । तृणारणिमणिष्ववच्छेदकाऽग्रहेऽपि स्वरूपयोग्यतारूपवह्निजनकताग्रहवत्तद्धिस्वरूपयोग्यतारूपजनकता सुग्रहैवेति चेन्न । अपभ्रंशस्यापि तद्धिजनकतयाऽर्थवत्त्वेन तत्र विभक्त्यापत्त्या साधुत्वापत्तिरिति केचित् ।

परे तु पङ्कजपदस्य पद्मत्वविशिष्टबोधार्थं न शक्तिः । डप्रत्ययस्य पद्मत्वविशिष्टे निरूढलक्षणया तादृशबोधसम्भवात् । नापि कुमुदज्ञानप्रतिबन्धार्थम् । डप्रत्ययनिरूढलक्षणायाः तादृशबोधप्रतिबन्धकत्वसम्भवादिति । तन्न । एकपदोपस्थाप्यानामभेदान्वयस्याव्युत्पन्नत्वेन पङ्कजनिकर्तृपद्ममिति बोधासम्भवादिति दिक् ।

अत्र मीमांसकाः । पङ्कजप्रयोगनियतविषयपद्मानुभवजन्यसंस्कारादेव पद्मविशिष्टस्मरणसम्भवान्न तदर्थं शक्तिः । अवयवशक्तिग्रहकाले पद्मत्वविशिष्टोपस्थित्या तेन रूपेण पङ्कजपदात् स्मृतेः । नाप्यनुभवार्थम् । तच्छाब्दबोधे तदन्वयप्रतियोगिशक्तपदत्वेनावयवैरेवानुभवसम्भवादिति । तन्न पङ्कपदस्य पङ्के शक्तिर्यथा व्यवहारास्तथा पङ्कजपदस्यापि शक्तेरनिवार्यत्वात् । यद्धर्मावच्छिन्नवृत्तिजन्यपदार्थोपस्थितेस्तद्धर्मावच्छिन्नशाब्दबोधसामान्ये हेतुत्वाच्च । किं च रथकारशब्दस्यापि जातिविशेषावच्छिन्ने शक्तिर्न स्यात् । पद्मविशिष्टबोधवज्जातिविशेषावच्छिन्नबोधस्यापि सम्भवात् । तथा च वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रूढ्या जातिविशेषावच्छिन्नस्य शीघ्रमुपस्थितत्वात् तस्यैवाधानं विधीयते इति व्याकोपश्च स्यादिति दिक् ।

अपरे तु तद्बोधकत्वं तत्र तत्साधुत्वं पङ्कजपदस्य कुमुदाबोधकत्वेन तत्र साधुत्वाभावादेव न कुमुदबोध, इति तन्न । साधुत्वज्ञानस्य शाब्दबोधेऽहेतुत्वात् । बाधतीत्यादितोऽपि बोधापत्तिरिति चेन्न । व्याकरणानिष्पन्नत्वरूपासाधुत्वनिश्चयेन प्रतिबन्धात् । यद्वा साधुत्वनिश्चयेऽपि अपभ्रंशाच्छाब्दबोधस्य जायमानत्वात् स न प्रतिबन्धक इति । नन्वपभ्रंशानां बोधकत्वात्तेषु व्यवहारा-

च्छक्तिरनिवार्या। न च लक्षणया तेषां बोधकत्वम्। शक्याभावेन तस्या अभावात्। न चापभ्रंशस्मारितसाधुशब्दादेवार्थप्रत्ययः। साधुशब्दमजानतां पामराणां ततोऽर्थप्रत्ययात्। न च शक्तिभ्रमाद्बोधकत्वम्। शक्तिग्राहकस्य व्यवहारस्योभयत्र सत्त्वात्। अन्यथा वैपरीत्यस्यापि सुवचत्वादिति चेन्न। एकशक्त्यारोपेणाप्युपपत्तौ नोभयत्र शक्तिः, गौरवात्। न चापभ्रंशे शक्तिः संस्कृते शक्त्यारोपोऽस्त्विति वाच्यम्। अपभ्रंशानां देशभेदेन नानात्वादनेकशक्तिकल्पने गौरवापत्तेः। संस्कृतस्य सर्वत्रैकत्वात्। अत एव प्राकृतेऽपि न शक्तिः। तस्यापि नानात्वाच्छक्तिबाहुल्ये गौरवात्।

परे तु प्रत्येकमपभ्रंशेन विनिगमनाविरहात् तत्रापि शक्तिः। न च तेषां यज्ञे प्रयोगापत्तिः। साधुभिर्भाषितव्यमित्यत्र साधुशब्दस्य साधुविशेषसंस्कृते तात्पर्यादित्याहुः।

ननु शक्तेरीश्वरेच्छात्वेनातिरिक्तपदार्थत्वेन वा न ज्ञानं हेतुः। नैयायिकानां मीमांसकानां च शाब्दबोधत्वावच्छिन्ने तेन तेन रूपेण कारणत्वे व्यभिचारात् तद्धिजनकतावच्छेदकसम्बन्धवत्त्वेन ज्ञानं हेतुस्तथा च तद्धिजनकत्वज्ञानमेव बोधे हेतुरस्तु। न चैवं लक्षणोच्छेदे गङ्गापदाद् विलम्बेन तीरधीर्न स्यादिति वाच्यम्। पूरज्ञापकत्वेन ज्ञानात् पूरोपस्थितौ तत्र घोषबाधग्रहे गङ्गापदस्य कुत्र तात्पर्यमिति गवेषणेन विलम्बात्। यत्र भूरिप्रयोगस्तत्र शक्तिरिति व्यवहारः। यत्र न भूरि प्रयोगस्तत्र लक्षणेति व्यवहारसम्भवात्। तृणारणिमणिष्ववच्छेदकाऽग्रहेऽपि स्वरूपयोग्यतारूपवह्निजनकताग्रहवत्तद्धिस्वरूपयोग्यतारूपजनकता सुग्रहैवेति चेन्न। अपभ्रंशस्यापि तद्धिजनकतयार्थवत्त्वेन तत्र विभक्त्यापत्त्या साधुत्वापत्तिरिति केचित्।

चिन्तामणिकृतस्तु देवदत्तादिपदार्थबुद्धौ सङ्केतस्य कारणत्वकल्पनात् । अन्यत्रापि तत्कारणत्वकल्पनम् । न च सादिपदजन्यशाब्दबोधे सङ्केतज्ञानं हेतुर्नान्यत्रेति वाच्यम् । लाघवेन शाब्दत्वावच्छिन्ने तद्धेतुत्वादित्याहुः । लक्षणा च पदवृत्तिः, वृत्तित्वात्, शक्तिवत् ।

ननु गभीरायां नद्यां घोष इत्यादौ पदे लक्षणाऽसम्भवाद् वाक्ये लक्षणाङ्गीकारेण नायं नियमः । तथाहि गभीरपदस्य न तीरे लक्षणा । नद्यनन्वयापत्तेः । नामार्थयोरभेदान्वयेनात्र बाधितत्वात् । नापि गभीरतीरे लक्षणा । नद्यास्तीरेऽन्वयासम्भवेन गभीरायामन्वयो वाच्यः । स च न सम्भवति एकदेशेऽभेदेनान्वयासम्भवात् । नापि नदीपदस्य तीरे गभीरायामित्यस्यानन्वयात् । तस्मात् सप्तम्यन्तवाक्यस्यैव गभीरनदीतीरे लक्षणा । न च शक्याभावेन स्वशक्यसम्बन्धरूपलक्षणाया असम्भव इति वाच्यम् । स्वबोध्यसम्बन्धस्यैव लक्षणात्वादिति चेन्न । गभीरायां नद्यामिति नदीपदोत्तरसप्तमीसहितस्य गभीरनदीतीरे लक्षणायां तत्राधारताप्रत्ययो न स्यात् । तदुत्तरसप्तम्यभावात् । नदीपदोत्तरसप्तमीरहितस्याबोधकत्वादेव न लक्षणा । यद्यपि सप्तमीसहितस्य गभीरनदीतीराधारत्वे लक्षणा सम्भवति तथाप्येकपदस्य तात्पर्यग्राहकत्वेनापरपदलक्षणयैव शाब्दबोधसम्भवेन पदद्वयलक्षणायां मानात् ।

एवं राजपुरुषमानयेत्यत्र राजपदस्य राजसम्बन्धिनि लक्षणया राजसम्बन्ध्यभिन्नः पुरुषबोधसम्भवान्न तत्रापि वाक्ये लक्षणा । न चैवं कर्मधारयापत्तिः । समासपूर्वदशायां पदयोस्तुल्यार्थत्वाभावात् । न च राज्ञः स्वामित्वेन तन्निरूपकत्वरूपसम्बन्धेन वा पुरुषेऽन्वयोपपत्तौ किं लक्षण-

येति वाच्यम् । नामार्थयोर्भेदान्वयानङ्गीकारात् । अन्यथा राजसम्बन्धः पुरुष इत्यत्र तथा बोधापत्तेरित्यन्ये ।

परे तु लुप्ता षष्ठ्येवान्वयबोधिका षष्ठीलोपमजानतस्तु शक्तिभ्रमादन्वयबोध इत्याहुः ।

कश्चित्तु समासातिरिक्तस्थले नामार्थयोरभेदान्वयानङ्गीकाराद् विग्रहसमासयोः समानार्थकत्वार्थं राजपदस्य राजसम्बन्धे लक्षणेत्याह ।

एवं चित्रगुमानयेत्यत्र गोपदस्य चित्रगोस्वामिनि लक्षणयैव बोधसम्भवान्न तत्रापि वाक्ये शक्तिः । न च चित्रपदस्यैव तादृशार्थे लक्षणा गोपदं तात्पर्यग्राहकमिति वाच्यम् । गोपदोत्तरविभक्त्यर्थकर्मत्वस्य तत्रान्वयापत्तेः । न च तत्पुरुषे पुरुषपदस्य राजसम्बन्धिपुरुषे लक्षणा राजपदं तात्पर्यग्राहकमस्त्विति वाच्यम् । अर्थबोधकत्वेन सार्थकत्वे सति तात्पर्यग्राहकत्वेन सार्थकत्वस्यानङ्गीकारात् । न च तद्धनमित्यत्र सर्वनाम्नि लक्षणाभावेनोत्तरपदलक्षणेति वाच्यम् । तस्य लघुन्येव शक्तिरन्यत्र लक्षणेत्यस्याभिहितत्वात् । न च बहुव्रीहावपि गोपदस्य गोस्वामिनि चित्रपदस्य चित्रसम्बन्धिनि लक्षणया गवि चित्रसम्बन्धिनोऽभेदेनान्वयसम्भवात् पदद्वयस्यार्थबोधकत्वेनैव सार्थकतास्त्विति वाच्यम् । एकदेशान्वयस्यास्वीकारात् पदद्वये लक्षणायां गौरवाच्च । अत एव चित्रपदस्य चित्रवत् सम्बन्धिनि गोपदस्य गोस्वामिनि लक्षणा निरस्ता ।

वैयाकरणास्तु बहुव्रीहौ शक्तिरेव । अन्यथा घटपदेऽपि टकारलक्षणया बोधसम्भवाच्छक्त्यभावापत्तेरित्याहुः । तन्न । समासान्तरेऽपि तुल्यत्वात् । किं च समासे शक्तिस्वीकारेऽर्थवत्वेनैव समासस्य प्रातिपदिकत्वसिद्धौ समासग्रहणमनर्थकं स्यादिति दिक् ।

शिंशपावृक्ष इत्यादिकर्मधारये न शक्तिर्न वा लक्षणा । नामार्थयोरभेदान्वयेनैव बोधसम्भवात् । अत एव तत्पुरुषात् कर्मधारयो लघीयानिति निषादस्थपतेरधिकार इति तस्याप्युपयुक्तवेदाध्ययनं कल्प्यते । साङ्गेष्टिविधानेन मन्त्राध्ययनस्यापि विधानेन निषेधस्य विध्यस्पृष्टपरत्वात् । अत एव नान्यमन्त्राध्ययनं तस्येति दिक् ।

ननु विशेषणं विशेष्येण बहुलमिति सूत्रे विशेषणादि समस्यत इत्येतावतैव समासबलादेव विशेष्यादिग्रहणे सिद्धेऽन्यतरपदवैयर्थ्यापत्त्या विशेषणतावच्छेदकयोर्व्यभिचार एव कर्मधारय इति ज्ञायते । तथा च कथं शिंशपावृक्ष इत्यत्र कर्मधारयः । परस्परव्यभिचाराभावादिति चेत् ।

अत्र केचित् ज्ञापकवशाद्विशेष्यतावच्छेदक एव व्यभिचारे कर्मधारयाभिधानात् । न तु परस्परव्यभिचारे कर्मधारयाभिधानं गौरवात् । न चैवं तक्षकः सर्प इत्यादावपि स्यादिति वाच्यम् । तत्र बहुलग्रहणेनैव समासनिषेधात् । अत एव वृत्तिकारैरपि वृक्षः शिंशपेत्येव प्रत्युदाहरणं दत्तम् । न च विशेषणस्य पूर्वनिपातविधायकसूत्रेणैव तादृशप्रयोगवारणे विशेषणं विशेष्येण बहुलमितिसूत्रेऽन्यतरपदवैयर्थ्यं तदवस्थमिति वाच्यम् । विशेषणविशेष्यभावस्य कामचारत्वेन वृक्षपदस्यापि विशेषणत्वसम्भवात् । न चैवं विशेषणविशेष्यभावस्य कामचारत्वे उत्पलनीलमिति प्रयोगापत्तिः । तादृशप्रयोगे उत्पलस्य विशेषणत्वविवक्षायां प्रामाणिकैरपीष्टापत्तेः स्वीकारात् । अत एव चन्द्रमुखमुखचन्द्रपदयोः साधुत्वमिति दिक् ।

यत्तु लोकप्रसिद्धमेव विशेषणं तद्वाचकमेव सूत्रे विशेषणपदमित्याह । तन्न । लोकपदस्य यावदेकदेशविकल्पग्रासात् ।

(६१) तत्र विभक्तिश्रुत्याऽङ्गत्वं, यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। न च "उत्पत्तिशिष्टपुरोडाशावरुद्धे यागे कथं व्रीहीणामङ्गत्वमिति" वाच्यम्, पुरोडाशप्रकृतितयोपपत्तेः। पशोरिव हृदयादिरूपहविष्प्रकृतितया[1] यागाङ्गत्वम्। न च "साक्षात्पशोरेवाङ्गत्वम् किन्न स्यादिति" वाच्यम्, तस्य विशसनात्, अवदीयमानत्वाच्च हृदयादीनाम्। अवदीयमानं हि हविः। यथा पुरोडाशादिमध्यात्पूर्वार्द्धाच्चावद्यतीति वाक्याद् हृदयादीनि चावदीयमानानि न पशुः हृदयस्याग्रेऽवद्यतीति वाक्यात्। अतो हृदयादीन्येव हवींषि, पशुस्तु प्रकृतिद्रव्यम्। पात्नीवतयागे तु साक्षात्पशुरेवाङ्गम्। तस्य जीवत एव पर्यग्निकृतं पात्नीवतमुत्सृजतीत्युत्सर्गविधानात्। यत्र तु विशसनं तत्र पशुः प्रकृतिद्रव्यमित्येव सिद्धम्।

(६२) एवं व्रीहयोऽपि प्रकृतिद्रव्यतया यागाङ्गं तृतीयाश्रुत्येति आरुण्यस्यापि क्रयाङ्गत्वन्तृतीयाश्रुत्या। न चामूर्त्तस्य[2] तस्य कथं क्रयाङ्गत्वमिति वाच्यम्। एकहायनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः। व्रीहीन्प्रोक्षतीत्यत्र प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या। तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम्, स्वरूपे

---

१ व्रीहिभिरेव पिष्टादिभिः पुरोडाशस्यनिष्पन्नत्वात्।

२ विनष्टस्य हेतुत्वाभावादिति भावः।

३ गुणस्येत्यर्थः।

आनर्थक्यात्, व्रीहिस्वरूपस्य प्रोक्षणं विनाऽनुपपत्त्यभावात्, किं त्वपूर्वसाधनत्वप्रयुक्तं यदि व्रीहिषु प्रोक्षणं क्रियते तदा तैर्यागे अनुष्ठिते ऽपूर्वं भवति नान्यथेति । अतः प्रकरणसहकृतया द्वितीयाश्रुत्या तण्डुलनिर्वृत्तिप्रणाड्या[1] यदपूर्वसाधनं तदङ्गत्वं प्रोक्षणस्योच्यत इति । एवं सर्वेष्वप्यङ्गेषु अपूर्वप्रयुक्तत्वं वेदितव्यम् ।

(६३) एवमिमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त[2] इत्यत्रापि द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम् । [3]यत्तु वाक्यीयोऽयं विनियोग इति तन्न । तथा सति वाक्याल्लिङ्गस्य बलीयस्त्वेन यावद्वाक्यादश्वाभिधान्यङ्गं भवति तावल्लिङ्गाद्रशनामात्राङ्गत्वमेव स्यात्, स्योनं ते सदनं कृणोमीत्यस्येव सदनाङ्गत्वम् । श्रौतविनियोगपक्षे तु यावल्लिङ्गाद्रशनामात्राङ्गत्वं सम्भवति तावच्छ्रुत्या ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्र तृतीयाश्रुत्या[4] ऐन्द्र्या ऋचः गार्हपत्योपस्थानाङ्गत्ववत् अश्वाभिधान्यां विनियोगः क्रियते इति युक्तं मन्त्रस्याश्वाभिधान्यङ्गत्वम् । तस्माच्छ्रौत एवायं विनियोगः ।

---

१ परम्परया ।

२ अभिधीयते बध्यते अनयेत्यभिधानी रज्जुः, अश्वस्याभिधानी अश्वाभिधानी, तदीयबन्धनरज्जुरित्यर्थः ।

३ सिद्धान्तलेशकृदुक्तिं खण्डयति ।

४ कदाचनस्तरीरसीति ऋचः ।

(६४) यदाहवनीये जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या । एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः ।

(६५) पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः[1]समानाभिधानश्रुत्या कारकाङ्गत्वम् । यजेतेत्याख्याताभिहितसङ्ख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेकपदश्रुत्या च यागाङ्गत्वम् । न चामूर्त्तायाः तस्याः कथं यागाङ्गत्वमिति वाच्यम् । कर्तृपरिच्छेदद्वारा तदुपपत्तेः । कर्ता चाक्षेपलभ्यः[2] । आख्यातेन हि भावनोच्यते । सा च कर्त्तारं विनाऽनुपपन्ना तमाक्षिपति ।

(६६) "ननु किमित्येवं वर्ण्यते आक्षेपलभ्यः कर्तेति । आख्यातवाच्य एव किन्न स्यात् । आख्यातश्रवणे भावनाया इव कर्त्तुरपि प्रतिपत्तेः[3] । न च भावनयैवाक्षेपसम्भवे किमिति तद्वाचकत्वं कल्पनीयमिति साम्प्रतम् । तथा सति आख्यातवाच्यकर्त्रैव भावनाक्षेपसम्भवे तद्वाचकत्वमपि न स्यात् । किं च भावनाया न केवलं कर्त्रैव सम्बन्धः, कारकान्तरेणापि सम्बन्धात् । अतः सा न झटिति कर्त्तारमेवाक्षिपेद् विशेषाभावात् । कर्त्ता तु भावनयैव सम्बद्धो न कारकान्तरेण, गुणानां च परार्थत्वादसंबन्धः सम-

---

१ प्रत्ययरूपया श्रुत्येत्यर्थः ।

२ आक्षेपो ह्यनुमानमर्थापत्तिर्वेति भावः ।

३ यथा भावयितृव्यापारमन्तरा भावनात्वमनुपपन्नं तमाक्षिपति, तथा भावनां विना कर्तृत्वमनुपपन्नं तामाक्षिपतीत्यर्थः ।

त्वात्स्यादिति न्यायात् (३ । १ । १२) । अतः स[1] झटिति तामाक्षिपेत् इति स एवाख्यातवाच्यः । भावना तु आक्षेपलभ्यैव किन्न स्यात् । किं चैवं तृतीयादिविभक्तीनामपि करणादिवाचकत्वं न स्यात्, तेषामपि कर्तृवदाक्षेपलाभसम्भवात् । किं च यदि कर्ता न वाच्यः स्यात्कथमेकत्वं तेनान्वियात् । न हि शाब्दमशाब्देनान्वेतीति युक्तम् । अन्यथा ऊहादिलोपप्रसङ्गः[2] । किं च देवदत्तः पचतीति सामानाधिकरण्यं न स्यात् । न हि केवलं भावनावाचकस्याख्यातस्य देवदत्तपदेन[3] सामानाधिकरण्यमुपपद्यते, एकार्थनिष्ठत्वाभावात् । कर्तृवाचकत्वे तूपपद्यत एव । लः कर्तरीतिव्याकरणस्मृतिविरोधस्तु कर्तुरनभिधेयत्वे स्पष्ट एव[4] । किं च कर्तुरनभिधेयत्वे देवदत्तेन पचतीति प्रयोगप्रसङ्गः । तृतीया हि अनभिहितयोः कर्तृकरणयोर्विहिता, आख्यातेन च कर्ता नाभिहित इति कर्तृवाचिनी तृतीया स्यादेव । कर्तुरभिधाने तु अभिहितत्वादेव तृतीया न प्राप्नोति, तस्या अनभिहिताधिकारत्वात् । देवदत्तः पचतीति प्रथमा तु

---

१ कर्तेत्यर्थः ।

२ शाब्दस्य निर्वापस्याशाब्देन सूर्येणान्वयासम्भवादिति भावः ।

३ एकसंख्याविधायकविभक्त्यन्तत्वं हि तत् । तच्च तत्सङ्ख्यान्वयव्याप्तमिति भावः ।

४ अयम्भावः । कर्तरि कृदिति सूत्रस्थं कर्तरीति पदं कृदभिधायकत्वात्कर्तृप्रतिपादकम् । तदेव लः कर्मणीति सूत्रेऽनुवृत्तं सत् कर्तुर्लकाराभिधेयत्वं प्रतिपादयति । अप्रतिपादकत्वे तु विशेषाभावात्तिङामिव शत्रादीनामपि कर्तृबोधकं न स्यादिति । जञ्जभ्यमानोऽनुब्रूयान्मयिदक्षमित्यादि क्रतुयुक्तपुरुषजपमन्त्रस्य तत्त्वं न स्यात् । एवं च मूले स्मृतिविरोध इत्यस्य तन्निरूपितजञ्जभ्यमानाधिकरणविरोध इत्यर्थ इति दिक् ।

प्राप्नोत्येव, प्रथमाया अभिहितकारकविभक्तित्वात् प्रातिपदिकार्थमात्रवाचित्वाद्वा। न च तदा प्रातिपदिकेनैवार्थस्योक्तत्वात्प्रथमावैयर्थ्यम्। लिङ्गसङ्ख्याप्रतिपत्त्यर्थं तस्यावश्यकत्वात्। केवलप्रातिपदिकस्य प्रयोगासाधुत्वाच्च[1]। ततश्च यदि कर्त्ता न वाच्यः स्याद्देवदत्तेन पचतीति प्रयोगः स्यात्। तस्मादाख्यातवाच्यः कर्तेति सिद्धम्"—इति पूर्वपक्षसंक्षेपः।

(६७) अत्राहुः। स एव हि शब्दस्यार्थो यः प्रकारान्तरेण न लभ्यते, [2]अनन्यलभ्यः शब्दार्थ इति न्यायात्। अत एव न गङ्गापदस्य तीरमर्थः। लक्षणयैव प्रतिपत्तिसम्भवात्। अत एव च न वाक्यार्थे शक्तिः। एवं चाख्यातवाच्यभावना कर्त्तारं विनाऽनुपपन्ना तमाक्षिपतीत्याक्षेपादेव कर्तुः प्रतिपत्तिसम्भवे किमिति तद्वाचकत्वमाख्यातस्य कल्पनीयम्। न च विनिगमनाविरहः[3]। कृतिमान् हि कर्ता, एवं च कृतेरेव भावनापरपर्यायाया आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वसम्भवे न तद्वतः कर्तुर्वाच्यत्वं कल्पनीयम्, गौरवप्रसङ्गात्[4]।

(६८) न च "भावना कारकान्तरेणापि सम्बद्धा तदुज्झित्वा न झटिति कर्तारमाक्षिपतीति" वाच्यम्।

---

१ न केवलेत्यादिभाष्यात्।

२ अन्येन प्रकारेण लभ्योऽन्यलभ्यः, न अन्यलभ्यः अनन्यलभ्यः, शक्यार्थ इति यावत्।

३ भावनाया एव वाच्यत्वं न कर्तुरित्येवंरूप इत्यर्थः।

४ व्यक्तीनामानन्त्येन तत्र गवादिपदानां शक्तिकल्पने गौरवं स्यादिति लाघवाज्जातावेव शक्तिरिति। न च जातौ दोहनाद्यसम्भवः, व्यक्तिवादे तु न दोषः। जात्युपलक्षितव्यक्तेराक्षेपादिति भावः।

सा हि यथा नियमेन कर्त्रा सम्बद्धा, न तथा करणादिकारकान्तरेण, तिष्ठतीत्यादिषु तया तदनाक्षेपात्। अतः प्रथमं सा कर्त्तारमेवाक्षिपति न कारकान्तरम्। अत एव चाख्याताभिहिता सङ्ख्या न कारकान्तरेण सम्बध्यते, तस्य प्रथममनुपस्थितेः। अत एव तृतीयादिविभक्तीनां करणादिवाचित्वम्, भावनायास्तैः सह नियतसम्बन्धाभावेन तया तेषां नियमेनानाक्षेपात्। आख्यातश्रवणात्प्रागपि तृतीयादिविभक्तिश्रवणे करणादिप्रतीतेर्जायमानत्वाच्च। न च "शाब्दी सङ्ख्या कथमशाब्देन कर्त्राऽन्वेतीति" वाच्यम्। कर्तुर्लक्षणाङ्गीकारात्। यथा च लक्षितं तीरं शाब्देन घोषेणान्वेति, एवं लक्षितः कर्ता एकत्वेनान्वेष्यति अत एव देवदत्तः पचतीति सामानाधिकरण्यमुपपद्यते, कर्तुर्लक्षणात्। न च "मुख्ये सम्भवति किमिति लाक्षणिकत्वं स्वीकार्यमिति" वाच्यम्। अनन्यलभ्यशब्दार्थत्वस्य व्यवस्थापितत्वात्। अन्यथा सिंहो देवदत्त इति सामानाधिकरण्यं मुख्यं स्यात्।

(६९) किं च आख्यातवाच्यः कर्तेति वादिनोऽपि मते देवदत्तः पचतीति सामानाधिकरण्यं न मुख्यम्। तन्मते आख्यातेन तृतीयावन्निष्कृष्टशक्तिमात्ररूपकर्तृकारकाभिधानात्, शक्तिमद्द्रव्यस्याकृत्यधिकरण*न्यायेनानभिधानात्, देवदत्तशब्देन च द्रव्यमात्राभिधानात्। अतश्च भिन्नार्थनिष्ठत्वात्तन्मतेऽपि न

* १।३।१०।

मुख्यं सामानाधिकरण्यम्, किं तु लाक्षणिकमेवेति न कश्चिद्विशेषः ।

(७०) न "च लः कर्तरीति व्याकरणस्मृतिबलादाख्यातवाच्यः कर्त्तेति" वाच्यम् । न हि वाच्यवाचकभावो व्याकरणस्मृत्यधीनः । तस्य न्यायसहितान्वयव्यतिरेकगम्यत्वात् । भवतु वा स्मृतिगम्यः । तथाऽपि नेयं स्मृतिः कर्तुराख्यातवाच्यत्वे प्रमाणम्, किं तु कर्तुरेकत्वे एकवचनात्मको लकारः द्वित्वे द्विवचनात्मकः बहुत्वे बहुवनात्मक इत्यस्मिन्नर्थे प्रमाणम्, द्व्येकयोर्द्विवचनैकवचने (पाणिनि १।४।२२) बहुषु बहुवचनम् (पाणिनि १।४।२१) इत्यनेनास्याः स्मृतेरेकवाक्यत्वात् ।

(७१) यत्तूक्तम् कर्त्तुरनभिधाने देवदत्तेन पचतीतित्तृतीयाप्रसङ्ग इति तन्न । तृतीया हि कर्त्तुः प्रतिपत्त्यर्थं तद्गतसङ्ख्याप्रतिपत्त्यर्थं वा । तत्र कर्त्ता तु भावनाक्षेपादेव लभ्यते इति न तत्र तृतीयापेक्षा । तत्सङ्ख्या तु आख्यातेनैव प्रतीयते इति न तत्राप्यपेक्षा । यथाऽऽहुः ।

सङ्ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्त्तते ।
उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तित इति

(तन्त्रवार्तिकम् पृ. ६७०)

यत्र तु नाख्यातेन तद्गता संख्योच्यते तत्र भवत्येव तृतीया । तथा देवदत्तेन ओदनः पच्यते इति । तस्मान्न कर्त्तुरनभिधाने किं चिद्दूषणमित्यलमतिविस्तरेण ।

(७२) प्रकृतमनुसरामः। तत्सिद्धस्त्रिविधः श्रुतिविनियोगः।

सेयं श्रुतिर्लिङ्गादिभ्यः प्रबलं प्रमाणम्। लिङ्गादिषु हि न प्रत्यक्षो विनियोजकः शब्दोऽस्ति, किं तु कल्प्यः। यावच्च तैर्विनियोजकः शब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वात् तेषां कल्पकत्वशक्तिर्विहन्यते इति श्रुतेः प्राबल्यम्। अत एव ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावल्लिङ्गाद् ऐन्द्र्या इन्द्रोपस्थानाङ्गत्वं कल्प्यते तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानाङ्गत्वं क्रियत इति ऐन्द्री गार्हपत्योपस्थानाङ्गम्॥

(७३) सामर्थ्यं लिङ्गम्। यदाहुः।

[1]सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते इति

(तन्त्रवार्तिकम् १२५)

तेनाङ्गत्वं, यथा [2]बर्हिर्देवसदनं दामीत्यस्य लवनाङ्गत्वम्। [3]स हि लवनं प्रकाशयितुं समर्थः।

(७४) तच्च लिङ्गं द्विविधम्। सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षं [4]तदपेक्षं च। तत्र यदन्तरेण यन्न सम्भवत्येव तस्य तदङ्गत्वं तदनपेक्षं केवललिङ्गादेव। यथा ऽर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम्॰।

---

१ सामर्थ्यं शब्दशक्तिः। तथा च शब्दानुपूर्वी बोध्यार्थोपस्थितिर्लिङ्गमित्यर्थः पर्यवस्यति।

२ देवानां सदनं देवसदनम्। यागसम्बद्धदेवासनरूपं कुशं दामि खण्डयामीत्यर्थः। दो अवखण्डने इत्यस्य रूपम्।

३ मन्त्रः।

४ सामान्यसम्बन्धबोधकप्रमाणान्तरानपेक्षं चेत्यर्थः।

न हि अर्थज्ञानमन्तरेणानुष्ठानं सम्भवति । यदन्तरेण यत्सम्भवति तस्य तदर्थत्वं तदपेक्षम्, यथोक्तस्य मन्त्रस्य लवनाङ्गत्वम् । लवनं हि मन्त्रं विनाऽपि उपायान्तरेण स्मृत्वा कर्तुं शक्यम् । अतो न मन्त्रो लवनस्वरूपार्थः सम्भवति, किंत्वपूर्वसाधनीभूतलवनप्रकाशनार्थः । [1]तत्त्वं च न सामर्थ्यमात्रादवगम्यते, लवनप्रकाशनमात्रे सामर्थ्यात् । अतोऽवश्यं प्रकरणादि सामान्यसंबन्धबोधकं स्वीकार्यम् । दर्शपूर्णमासप्रकरणे हि मन्त्रस्य पाठादेवमवगम्यते- अनेन मन्त्रेण दर्शपूर्णमासापूर्वसम्बन्धि किंचित्प्रकाश्यते इति । अन्यथा प्रकरणपाठवैयर्थ्यप्रसङ्गात् । किं तदपूर्वसंबन्धि प्रकाश्यमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते । तद्धि बर्हिःसंस्कारद्वाराऽपूर्वसम्बन्धीति मन्त्रस्य सामर्थ्यात्तदर्थत्वे सति नानर्थक्यं प्रसज्यते । तस्माद्बर्हिर्देवसदनं दामीत्यस्य प्रकरणाद्दर्शपूर्णमाससम्बन्धितयाऽवगतस्य सामर्थ्याल्लवनाङ्गत्वमिति सिद्धम् ।

(७५) [2]पूषानुमन्त्रणमन्त्राणां तु यागानुमन्त्रणसमाख्यया यागसामान्यसम्बन्धेऽवगते सामर्थ्यात्पूषयागसंबन्धोऽवगम्यते ।

(७६) "ननु तेषां यावत्समाख्यया पूषयागेन सामान्यसंबन्धोऽवगम्यते, तावत् प्रकरणाद्दर्शपूर्णमा-

---

१ अपूर्वसाधनीभूतलवनप्रकाशनार्थत्वम् ।

२ पूषानुमन्त्रणप्रभृतयो मन्त्राः पूषानुमन्त्रणमन्त्राः तेषाम्, मध्यमपदलोपे समासः । ते च 'पूष्णोरहं देवयज्यया' इत्यादयः ।

साभ्यामेव सामान्यसम्बन्धोऽवगतः समाख्यातस्तस्य[1] बलीयस्त्वात्। अत एव पौरोडाशिकमिति समाख्याते ब्राह्मणे आम्नातानामपि प्रयाजानां प्रकरणात्साम्नाय्योपांशुयागाङ्गत्वमपीत्युक्तम्। किं च यागानुमन्त्रणसमाख्ययाऽपि न पूषयागेन सामान्यसम्बन्धोऽवगम्यते, किं तु यागमात्रेण। प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेषसंबन्धोऽवगम्यते। अतः प्रकरणात् झटिति तत्सम्बन्धस्यैवावगतत्वात्तदर्थत्वमेव तेषां युक्तम्। पूषेति शब्दस्य पुष्णातीति व्युत्पत्त्या कथंचिदग्न्याद्यभिधायित्वात्"।

(७७) नैवम्। पूषानुमन्त्रणमन्त्रे हि श्रूयमाणे एवमवगम्यते-पूषाभिधानसमर्थत्वादयं मन्त्रस्तत्प्रकाशनार्थ इति लवनमन्त्र इव लवनप्रकाशनार्थः। न तत्र प्रकरणाद्यपेक्षा, येन तेषामुपजीव्यत्वेन प्राबल्यं स्यात्। प्रकरणात्तु दर्शपूर्णमासार्थत्वे तस्य वाक्यलिङ्गश्रुतिकल्पनेन विनियोजकत्वात् लिङ्गस्योपजीव्यत्वेन प्राबल्यम्। अतो लिङ्गात्पूषप्रकाशनार्थत्वेऽवगते तन्मात्रप्रकाशनार्थत्वेऽवगते तन्मात्रप्रकाशनमनर्थकमित्यपूर्वसाधनपूषप्रकाशनार्थत्वं वक्तव्यम्। किं तदपूर्वमित्यपेक्षायां यागानुमन्त्रसामर्थ्यानुगृहीताल्लिङ्गात्पूर्वसम्बन्धिदेवताप्रकाशनार्थोऽयमित्यवगम्यते। अतो यद्यपि समाख्यातः प्रकरणं बलीयस्तथाऽपि तस्य लिङ्गेन बाधितत्वात् समाख्याया दुर्ब-

१ प्रकरणस्येत्यर्थः।

लाया अपि प्रबललिङ्गाश्रितत्वेन प्राबल्यात्सैव सामान्यसंबन्धे प्रमाणं सम्भवति, दुर्बलस्य प्रबलाश्रितस्य[1] प्राबल्यात् । अत एव श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यात्पदार्थधर्मगुणभूतश्रौतक्रमत्यागेन वेदकरणानन्तरं क्षुते आचमनमेव कार्यमित्युक्तम् । यथाऽऽहुः ।

अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः ।
दुर्बलैरपि बाध्यन्ते पुरुषैः[2]पार्थिवाश्रितैः इति ।

तन्त्रवार्तिकम् ८६३

(७८) यत्तु "पूषेति शब्दः[3] कथं चिदग्न्याद्यभिधायीति" तन्न । तस्यादन्तको हि स[4] इत्यादिवाक्यशेषेण वैदिकप्रसिद्ध्या च अर्थविशेषे रूढत्वात् । रूढेश्चावयवार्थालोचनसव्यपेक्षाद्योगाद्बलीयस्त्वात्[5] । अत एव वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रथकारशब्देन सौधन्वनापरपर्य्यायो वर्णविशेष उच्यते, रूढेः प्राबल्यात्, न तु रथं करोतीति व्युत्पत्त्या द्विजातयः, योगस्य दौर्बल्यादित्युक्तं षष्ठे (६ । १ । १)

(७९) तस्मादुक्तं समाख्यया सामान्यसम्बन्धे-

---

१ इदमत्र तत्त्वम् । प्रकरणापेक्षया समाख्याया दौर्बल्ये श्रुतिविप्रकर्षो हेतुः । समाख्यायास्थानादिकल्पनाक्रमेण श्रुतिपर्यन्तानुधावने विप्रकर्षात् । प्रकरणस्य तु सन्निकर्षात्, इति यद्यप्यस्ति तथापि लिङ्गानुगृहीतायास्तस्याः प्रकरणात्सन्निकर्षः ।

२ राजपुरुषैः योद्धृभिरिति यावत् ।

३ गौणया वृत्त्या ।

४ सः पूषा अदन्तकः दन्तरहित इत्यर्थः ।

५ योगार्थविषयकबोधं प्रति शुद्धरूढ्यर्थोपस्थितेः प्रतिबन्धकत्वादिति ।

ऽवगते सामर्थ्यात्पूषयागसंबन्धः पूषानुमन्त्रणमन्त्राणामिति । यथाऽऽहुः ।

यागानुमन्त्रणानीति समाख्या क्रतुयोजिका ।
तस्माच्छक्त्यनुरोधेन प्राप्तिस्तद्देवते[1] क्रतौ इति ।
(तन्त्रवार्तिकम् ७६८)

तत्सिद्धं प्रमाणान्तरसिद्धसामान्यसंबन्धस्य पदार्थस्य विनियोजकं लिङ्गमिति ।

(८०) तत्र मन्त्रविनियोजकं लिङ्गं मुख्ये एवार्थे विनियोजकं न गौणे । मुख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धौ पर्य्यवसन्नायां पुनर्गौणेऽर्थे विनियोगकल्पनायां गौरवप्रसङ्गात् । अत एव बर्हिर्देवसदनं दामीति मन्त्रः सामर्थ्यात्कुशलवनाङ्गम्, तेषां मुख्यत्वात्, न [2]उलपराजिलवनाङ्गमित्युक्तम् ।

(८१) तदिदं लिङ्गं वाक्यादिभ्यो बलवत् । तेषां हि न साक्षाद्विनियोजकत्वं किं तु लिङ्गं श्रुतिं च कल्पयित्वा । न चासमर्थस्य श्रुतिं कल्पयित्वा विनियोगकल्पना सम्भवतीति सामर्थ्यस्यापि कल्प्यत्वेनोपजीव्यत्वात् । अतस्तैर्यावत्सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्यते तावदेव क्लृप्तेन सामर्थ्येन श्रुतिं कल्पयित्वा विनियोगः क्रियते इति तस्य प्राबल्यम् । अत एव स्योनं[3] ते सदनं कृणोमि घृतस्य धारया सुशेवं

---

१ सा देवता यस्मिन् क्रतौ स तस्मिन् इत्यर्थः ।

२ तृणविशेष इत्यर्थः ।

३ हे व्रीहिसारभूतपुरोडाश ते समीचीनं स्थानं करोमि, तं च घृतस्य धारया सुखेनोपवेशनयोग्यं करोमि, तस्मिन् अमृते स्थाने प्रसन्न मनास्त्वमुपविशेति मन्त्रार्थः ।

कल्पयामीत्यस्य सदनाङ्गत्वं लिङ्गात्, न तु वाक्यात्सादनाङ्गत्वम्, तस्य दौर्बल्यादिति ।

(८२) समभिव्याहारो वाक्यम्[1] । समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणम् । यथा यस्य[2] पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति । अत्र हि न द्वितीयादिविभक्तिः श्रूयते, केवलं पर्णताजुह्वोः[3]समभिव्याहारमात्रम् । तस्मादेव च पर्णताया जुह्वङ्गत्वम् । न चानर्थक्यम्, जुहूशब्देनापूर्वलक्षणात् । तदयं वाक्यार्थः पर्णतया अवत्तहविर्धारणद्वारा यदपूर्वसाधनं तद्भावयेदिति । एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यम् । अवत्तहविर्धारणद्वारेति चावश्यं वक्तव्यम्, अन्यथा स्रुवादिष्वपि पर्णतापत्तेः । सा चेयं पर्णताऽनारभ्याधीता[4] न सर्वक्रतुषु गच्छति, विकृतिषु चोदकेनापि[5] प्राप्तिसम्भवेन द्विरुक्तत्वापत्तेः । किन्तु प्रकृतिषु । तदुक्तं प्रकृतौ वा द्विरुक्तत्वादिति (जैमिनि ३।६।२) । अत्र विकृतिर्यतोऽङ्गानि गृह्णाति सा प्रकृतिरिति न प्रकृतिशब्देन विवक्षितम्, गृह्ण-

१ साध्यत्वादिबोधद्वितीयादिश्रुत्यभावे सति वास्तविकाङ्गाङ्गिबोधकपदद्वयोच्चारणं समभिव्याहारः ।

२ पर्णमयी पालाशवृक्षविकारभूता, दलं पर्णमिति कोशात् ।

३ सहोच्चारणमात्रमित्यर्थः ।

४ सामान्यप्रकरणपठिता ।

५ प्रकृतिवद्विकृतिः कर्तव्येत्यतिदेशवाक्येनेत्यर्थः ।

धीये पर्णताया अप्राप्तिप्रसङ्गात्, न हि गृहमेधीया-त्काचन विकृतिरङ्गानिगृह्णाति मानाभावात्, किं तु चोदकाद्यत्राङ्गप्राप्तिस्तत्कर्म प्रकृतिशब्देन विवक्षि-तम् । यथा दर्शपूर्णमासौ । तत्र हि न चोदकादङ्ग-प्राप्तिः, प्रकरणपठितैरेवाङ्गैर्नैराकाङ्क्षात् ।

(८३) गृहमेधीयादिष्वपि न चोदकादङ्गप्राप्तिः । क्लृप्तोपकारैरेव आज्यभागादिभिर्नैराकाङ्क्षात् । अतो यत्र चोदकाप्रवृत्तिस्तत्रानारभ्याधीतानां सन्निवेशः । साप्तदश्यं त्वनारभ्याधीतमपि न प्रकृतौ गच्छति प्रकृतेः पाञ्चदश्यावरोधात् । किं तु विकृतिषु गच्छति । तत्रापि न सर्वासु गच्छति, चोदकप्रा-प्तपाञ्चदश्यबाधप्रसङ्गात् । किन्तु प्रत्यक्षश्रुतसाप्तद-श्यासु मित्रविन्दादिषु गच्छति । यथाऽऽहुः ।

एवं च प्रकृतावेतत्पाञ्चदश्यं प्रतिष्ठितम् ।
विकृतौ च न यत्रास्ति साप्तदश्यपुनःश्रुतिः-इति ।

(तन्त्रवार्तिकम् १००८)

न च वाक्यवैयर्थ्यम् । अनारभ्याधीतस्यैव साप्तदश्यस्य मित्रविन्दादिप्रकरणस्थेन वाक्येनोपसंहारात् । उप-संहारो नाम सामान्यप्राप्तस्य विशेषे नियमनम् । यथाऽऽहुः । सामान्यविधिरस्पष्टः संह्रियेत विशेषत इति (तं. वा. १०२०) । तत्रानारभ्यविधिः सामान्य-विधिः, मित्रविन्दादिप्रकरणस्थस्तु विशेषविधिरि-त्यास्तां तावत् ।

(८४) प्रकृतमनुसरामः । तत्सिद्धं वाक्यादङ्गत्वम् ।

४१५

(८५) तदिदं वाक्यं प्रकरणाद्बलीयः। प्रकरणं हि न साक्षाद्विनियोजकम्, तद्ध्याकाङ्क्षारूपम्। न चाकाङ्क्षा स्वयं प्रमाणं किन्तु साकाङ्क्षं वाक्यं दृष्ट्वा भवत्येतादृशी मतिः-नूनमिदं वाक्यं केन चिद्वाक्येनैकवाक्यभूतमिति। ततश्चाकाङ्क्षारूपं प्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणम्। एवं च यावत्प्रकरणं वाक्यं कल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिङ्गश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं बलीयः। अत एवेन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामित्यत्रेन्द्राग्नीपदस्य लिङ्गाद्दर्शाङ्गत्वे सिद्धे इदं हविरित्यादेरपि तदेकवाक्यत्वाद्दर्शाङ्गत्वम्, न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम् प्रकरणाद्वाक्यस्य बलीयस्त्वादिति॥

(८६) उभयाकाङ्क्षा[1] प्रकरणम्। यथा प्रयाजादिषु समिधो यजतीत्यत्र हि इष्टविशेषस्यानिर्देशात्समिद्यागेन भावयेत् किमित्यस्त्युपकार्य्याकाङ्क्षा[2]। दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकारकाकाङ्क्षा[173]। अत उभयाकाङ्क्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं सिध्यति।

(८७) "ननु यदि प्रयाजादिवाक्ये इष्टविशेषो न श्रूयते तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यताम्।

१७१ फलाकाङ्क्षाविशिष्टकथम्भावाकाङ्क्षेत्यर्थः।
१७२ फलाकाङ्क्षेत्यर्थः।
१७३ कथम्भावाकाङ्क्षेत्यर्थः।

विश्वजिदधिकरणे (४।४।१०-१६) हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात् फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः फलमित्युक्तम्। तदुक्तम्। सः स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादिति (४।३।१५)। रात्रिसत्रन्यायेन वाऽऽर्थवादिकं फलं कल्प्यताम् रात्रिसत्राधिकरणे (४।३।१७-१८) हि[1] प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यत्र विध्युद्देशे फलाश्रवणात्फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये आर्थवादिकं प्रतिष्ठाख्यं फलमित्युक्तम्। विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसम्बन्धकल्पने गौरवादर्थवादोपस्थितस्यैव प्रकृतसंबन्धकल्पने लघवात्। तदुक्तम्। फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादिति (४।३।१८)। तस्माद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन (४।३।१७-१८) वा स्वतन्त्रफलार्थत्वे सम्भवति किमिति दर्शपूर्णमासाङ्गत्वं स्वीक्रियते इति"

(८८) मैवम्। स्वतन्त्रफलार्थत्वेऽन्यतराकाङ्क्षया सम्बन्धः स्यात्। न ह्यत्र फलस्य साधनाकाङ्क्षाऽस्ति। श्रूयमाणं हि फलं साधनमाकाङ्क्षति, न चात्र तच्छ्रूयते। एवं च फलस्याकाङ्क्षाभावात् केवलं किं भावयेदिति प्रयाजानां भाव्याकाङ्क्षयैव स्वतन्त्रफलार्थत्वं स्यात्। दर्शपूर्णमासार्थत्वे तूभयाकाङ्क्षा प्रमाणम् प्रया-

१ एतस्य च विपरिणामेनान्वयः, ये प्रतिष्ठासन्ति त एता रात्रीरुपयन्तीति भावः।

परिहर्तुं शक्यत्वात्सुपरिहारः प्रमादतः प्रायश्चित्ताकरणेऽपि स प्रत्यवमर्शः । बहुसुखमध्येऽल्पदुःखदत्वात्सहनयोग्यो भोजननान्तरीयकदुःखवद्, अतः कुशलस्य यागादेरपकर्षाय हेयत्वाय नालं समर्थः, कस्मादिति प्रश्ने, पुण्यवदुत्तरं, दीक्षणीयाऽऽदिदक्षिणाऽन्तजन्यं पुण्यं मे बह्वस्ति यत्रायं सङ्करः स्वल्पोऽस्य फले स्वर्गे सर्वथा दुःखासम्भिन्नेऽप्यल्पमपकर्षमल्पदुःखसंभेदं करिष्यति स्वर्गादल्पं दुःखमित्यर्थः । ननु तृतीया गतिः कथं, कर्मविशेषस्य चिरमवस्थाने सर्वकर्मणामेकदैव मरणादभिव्यक्तेरुक्ताया अनुपपत्तेरिति चेन्न । नियतविपाककर्मणो दृष्टजन्मवेदनीयस्यैवैकमरणेनाभिव्यक्तौ तात्पर्याद् न त्वनियतविपाकस्यापीति बोध्यम् । ननु तृतीयगतौ चिरावस्थानस्य कोऽवधिरिति चेत् । शृणु, यावदेतदविरुद्धबलवद् यत्कर्म तदभिव्यञ्जकं निमित्तमेतस्य फलोन्मुखत्वं करोति । बलवत्त्वं च नियतविपाकत्वेनानवकाशत्वाद् । अनियतविपाकस्य त्वन्यदा सावकाशत्वाद्दुर्बलं, चिरावस्थानं च बीजरूपेण बोध्यम् । अत एवेयमभिभूतकर्मगतिस्तद्विपाचकदेशकालनिमित्तानामनवधारणात् चित्राऽद्भुतरूपा दुर्विज्ञाना चेत्युच्यते । न चैवमेकभविकत्वं हतं, क्व चिदपवादेऽप्युत्सर्गस्याहतेः । एवं चौत्सर्गिकमेकभविकत्वं कर्माशयस्यानुमन्यत इति दिक् । न चापवादाशङ्कयाऽनाश्वासतादवस्थ्यम् । अपवादनिश्चयस्यैव स्वानुष्ठानपरिहारनिमित्तत्वादित्याहुः ।

इदानीं क्लेशानां कर्म तद्विपाकद्वारकं मुख्यं फलमाह ।—

**ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥**

ते जात्यायुर्भोगरूपा विपाका पुण्यहेतुकत्वाद् भोग्यतया सुखफलाः, अपुण्यहेतुकत्वाद्दुःखफला, इत्यर्थः । विपाकान्तर्गतभोगश्च शब्दाद्याकारा वृत्तिरेवेति तस्यापि सुखदुःखफलकत्वम् । ननु ब्रह्मलो-

कादौ दुःखासम्भिन्नसुखसत्त्वात्कथं सर्वविपाकानामुभयफलकत्वमिति चेन्न। यथेदानीं परिदृश्यमानसुखकाले दुःखं द्वेष्यस्य भावप्रतिकूलात्मकं, तथा ब्रह्मलोकादौ योगिनां विषयसुखकालेऽपि प्रतिकूलात्मकस्य सूक्ष्मदुःखस्य सत्त्वात्। मूढानां तु सुखनान्तरीयकसूक्ष्मदुःखेषु दृष्ट्यभावात् योगिनामित्युक्तं, तेषां हि तथाल्पदुःखमपि बलवद्द्वेषविषयः। बलवत्त्वं च सुखाभिलाषाभिभावकत्वं यथा दुःखाद् द्वेषः पुरुषस्य, न तथा सुखादभिलाष इति साङ्ख्यसूत्रोक्तेर्जीवन्मुक्तानामपि प्रारब्धविपाके च सुखदुःखे शारीरे भवत एव, आभिमानिके तु न, तत्कारणक्लेशाभावादिति सिद्धान्तः। "न ह वै सतः शरीरस्य प्रियाप्रिययोरपहतिरस्ती"ति,

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन्कस्य कामाय शरीरमनुसञ्ज्वरेदिति॥

च श्रुतेः।

कथमेतदुपपद्यते तत्राह।—

**परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः॥ १५॥**

परिणामतापसंस्कारैर्जन्यानि यानि दुःखानि तैः सम्बन्धात्तत्कारणत्वाद्, गुणवृत्तिविरोधाच्च विवेकिनः सुखदुःखसाक्षात्कारवतः सर्वं प्रकृतितत्कार्यसुखादिकं दुःखमेवेत्यर्थः। मूढस्तु सुखकाले दुःखतया न जानातीति विवेकिन इत्युक्तं स हि सुखकालेऽपि तस्यं दुःखात्मकत्वं पश्यति सुखसम्भिन्नत्वात्सुखमेव तु न सर्वं,दुःखे बलवद्द्वेषाद् दुःखबाहुल्याच्च।

कलत्रमित्रपुत्रार्थं गृहक्षेत्रधनादिकैः।
क्रियते न तथा भूरिसुखं पुंसां यथा सुखमिति, स्मृतेः।

*Answer*: *In the regions of Varuṇa.* The existence of this body is to be believed in on the strength of scriptural texts pointing to the existence of such bodies.

**Page 38.]** *Question*: "In as much as Water has the character of a single substance, the Aqueous body would always be in the form of the *Bubble* &c.; and as much how could such a body be capable of bringing about the ordinary experieneces. ?"

*Answer*: The aqueous body is capable of bringing about experiences, by reason of its containing particles of earth also. In the production of the aqueous body the particles of Earth serve as the instrumental causes; and the natural fluidity of water having been controlled by these earth-particles, there is brought into existence a peculiar body, not in the shape of mere watery bubbles &c.

Some people define the Body as something that is made up of the five elementary substances (*lit.* having these for its material cause). But if it were so, then, *firstly* the body could not have any odour; because such odour could only be produced by the odour in one of its material causes, which is not possible. *Secondly* the body would have a variegated colour and touch; in as much as its five constituent causes would have distinct colours and touches; and as a matter of fact we do not find this to be the case; hence the Body can not be rightly regarded as made up of the five elementary substances. For similar reasons it can not be regarded as made up of Earth and Water; nor could it be held to be made up of Earth, Water and Air; and if it were made up of Earth, Air and *Akāça*, then it would be wholly devoid of colour, taste and odour (as the *Akāça* is devoid of these); if it were made up of Fire, Water and *Akāça*, then it would be without Odour and Taste; and so forth. *Thirdly*, if the body had the five elementary substances for its material cause, then it could not be *one* only; as a diversity of causes must bring about diversity in the effect. Therefore we must admit that the human body is made up of earth,—because

it has odour—like the Earth in the atomic state. As for the presence of the properties of Water and other substances that we meet with in the Earth, they must be regarded as belonging to the Water &c. mixed up with the Body.

*The Sense-organ is that which renders Taste perceptible to all living beings.* That is to say, that sense-organ which makes Taste perceptible for all living beings is one that is made up of Water-molecules. In order to account for the fact of that organ alone, and no other aqueous object, making Taste perceptible, the author adds: The water molecules of which the sense-organ is made up is not affected (or accompanied) by any heterogenous molecules, such as those of the Earth and other substances. That is to say, these latter do not in any way weaken the effeciency of the aqueous molecules making up the organ in question. This is the reason why this organ is wholly distinct in character from all other substances; and thus having its production of a character distinct from everything else, it is this organ alone that brings about a perception of Taste, which can not be done by any thing else; as nothing else is produced in the same way as the organ under consideration. All this is assumed on the ground of our actual experience, which shows that taste is perceived by the organ of Taste, and by nothing else.

The existence of the organ of Taste is proved by the perception that we have of Taste; as every action must be brought about by some instrumental cause. And the fact of this organ being aqueous in its nature is inferred from the fact of its bringing about the perception of Taste only, from among colour and the rest,—like the saliva which is evaporised in the mouth.

The aqueous objects are—the Rivers, the Oceans, Snow, Hail and other such things,—which are enjoyed, and as such become the means of the accomplishment of the experience of the agent.

## SECTION (3).—Of Fire.

*Text (38). Fire is that which belongs to the class of 'Fire.' It is endowed with—Colour, Touch, Number, Dimension, Separateness, Conjunction, Disjunction, Distance, Proximity, Fluidity, and Faculty.*

**Page 39.]** *The fact of these belonging to Fire is to be shewn, as before, to be indicated in the sūtras. Its colour is white and brilliant. Its touch is hot only.* (II—i—3, 7; IV—i—ii; V—ii—8; II—ii—4; V—i—17). *This also is twofold, in the form of the atom and the products. These products are threefold, in the shape of the Body &c.,* (IV—i—1 to 5; VII—i—20, 21; IV—ii—1). *The Body of fire is such only as is not born of the womb, existing in the regions of the Sun (Āditya); and it is made capable of experience by the admixture of earth-molecules.* (IV—ii—6 to 11). *The Sense-organ is the Eye which makes colour perceptible, by all living beings, and which is made up of fire-molecules unaffected by the molecules of any other substance.* (VIII—ii—6).

*This object is fourfold: Earthly, Heavenly, Stomachic (organic) and Mineral. The Earthly fire is that which consists of Flames produced by wooden fuels, and is capable of accomplishing cooking, burning, softening (according to the Kandalī) sweating &c. The Heavenly Fire is that which is produced by watery fuel, and exists in the form of the Sun, the Lightning and the like. The Stomachic Fire is that which brings about the digestion of the food that is eaten. The Mineral Fire exists in the form of Gold and other metals.* (IV—ii—1; V—ii—13).

*The experience of taste &c. in these minerals belongs to another substance compounded with the Fire-molecules.*

र्यव्याघातात् । अपि च—

नाऽसम्भाव्यपराऽवस्थं नभः परिमितं यदि ।
अथाऽनन्ततया तत्त्वं न त्वेषां परिमाणता ॥

यस्तु वैयात्यात् वृद्धवचनमतिक्रम्य परमेश्वरैश्वर्यस्यापि धर्मजनितत्वमभ्युपैति तं प्रत्याह—अनेकश्वरप्रसङ्गाद्धेतोः सर्वेषामैश्वर्यव्याघातात् । अयमर्थः । धर्मजनितत्वे ह्यीश्वरत्वस्य य एव तद्वान् स एवेश्वरो बहवश्च तद्वन्त इति तद्वशाद् बहव ईश्वराः प्रसज्येरन् । तत्रैकस्यैश्वर्येण सर्वेषां समं न्यूनं वा ऐश्वर्यम् । न्यूनत्वे च यदेवाऽतिशायि तदेव तत्स्यादिति भाक्तमैश्वर्यमितरेषाम् । तच्च स्वाभाविकत्वादुपपद्यते । स्वभावस्याऽव्यवस्थानात् । ननु धर्मजत्वे तस्याऽव्यवस्थितेः साम्ये ऽपि वा अविरोधेन संभूयेशते परिषद्वत् प्रत्येकं वा ? पूर्वस्मिन्कल्पे परिषदिव न कश्चिदीश्वरः स्यात्, संभूयेशत्वात् । उत्तरत्र त्वेकेनैवेशनायाः कृतत्वादन्यः किं कुर्वन्नीशः स्यात् ? न हीशनामकुर्वन्नीशः, न च स्वतन्त्राणामेकाऽभिप्रायसंभवः । ततश्च विरुद्धाऽभिप्रायत्वे सति न कस्यचित्कार्यस्योत्पादः । उत्पादे वा परस्परविरुद्धस्वभावसमालिङ्गितमपर्यायेण जगदुपलभ्येत । कर्म्मत्रदैश्वर्यं कर्मजनितमित्यप्यागमविरुद्धम् । धर्मजस्याप्यपर्यायेण श्रुतेरिति । यच्च काष्ठाप्राप्तिरुपलभ्यते परिमाणानामित्युक्तं , तद्विकल्प्य दूषयति—अपि च—

नाऽसंभाव्यपरावस्थं नभः परिमितं यदि ।
अथाऽनन्ततया तत्त्वं न त्वेषां परिमाणता ॥

परिमितं चेदाकाशमिति ततो ऽधिकं किमिति न संभाव्येत । साऽतिशयपरिमाणदर्शनादेव कुवलाऽऽमलकबिल्वादिषु संभावनीयमेतत् । इयतो ऽपि नभसो भविष्यति किं चिदधिकपरिमाणमिति

अनन्तत्वादिति चेत् । किमदमानन्त्यम् ? अपरिच्छिन्नता । नन्वेष परिमाणाऽभावः । एतावत्तर्हि परिमाणम् । ईदृशीं च काष्ठाप्राप्तिमीश्वरज्ञानस्य वदन्नज्ञानमाविर्भावयति । सोऽयं शान्तिकर्मणि वेतालोदयः । सर्वकार्याणां कर्तृत्वादेव तर्हि सर्वज्ञत्वम् । उपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञा हि कुलालादयः कर्तारः । सर्वेषां

शङ्कते—अनन्तत्वान्नभसो ऽसम्भावनीयमेतत् । शङ्कां निराचिकीर्षुः पृच्छति—किमिदमानन्त्यम् ? शङ्किता ब्रूते । अपरिच्छिन्नतैवाऽऽनन्त्यम् । नैतस्या अन्यदानन्त्यं नाम किंचित् । उत्तरम्—नन्वेष परिमाणाऽभाव एव वचनव्यक्त्यन्तरेणाऽऽश्रितः । तदेव स्फुटयति—एतावत्तर्हि परिमाणं तद्विपरीतता तु तदभावः । अस्तु तर्हि व्योमवदनन्तमीश्वरज्ञानं सैवाऽस्य काष्ठाप्राप्तिः किं नः परिमाणग्रहणेने ? त्यत आह—ईदृशीं च काष्ठाप्राप्तिमीश्वरज्ञानस्य वदन्नज्ञानमीश्वरस्याऽऽविर्भावयति । आत्मीयस्यैव विज्ञानस्य साकल्येनाऽपरिज्ञानात् । ज्ञाने वा कुतोऽस्याऽऽनन्त्यं साकल्ये परिच्छेदनान्तरीयकेण इयत्ताऽवधारणेनाऽपास्तत्वात् । सोऽयं शान्तिकर्मणि ईश्वरज्ञानस्याऽऽनन्त्येन विज्ञत्वसमर्थनलक्षणे ईश्वरस्यैव वस्त्वज्ञानलक्षणोपेतो वेतालोदयः ।

संप्रति नैयायिकाः प्रत्यवतिष्ठन्ते—सर्वकार्याणां कर्तृत्वादेव तर्हि सर्वज्ञत्वम् । सर्वकार्याणां तनुभुवनादीनामुपलब्धिमान् कर्ता प्रतीयमानोऽन्तर्भावितसर्वज्ञत्व एव प्रतीयते प्रदीप इवाऽन्तर्भावितप्रभावितानः, स्वप्रमाणादित्यर्थः । ननु भवतु कर्तृता, सर्वज्ञता तु कस्मा ? दित्यत आह—उपादानोपकरणसंप्रदानप्रयोजनाऽभिज्ञा हि कुलालादयः कर्तारः । उपादानमिह परमाणुजातिचतुष्टयम् । उपकरणं समस्तचेतनसमवायिनौ धर्माऽधर्मौ । संप्रदानं

च कार्य्याणामीश्वरः कर्त्तेति समस्तकार्य्योपादानाद्यभिज्ञः। तथा च सर्वज्ञ इति। किमेते स्वकार्यस्य निरवशेषोपकरणवेदितः कतिपयोपकरणवेदिनो वा? न तावदशेषोपकरणवेदिनस्ते। अदृष्टस्याऽज्ञानात्। नापि सम्प्रदानप्रयोजनविशेषवेदिनः। तस्याऽनेकस्यापि सम्भवात्। तन्मात्रज्ञाने न सर्वज्ञतासिद्धिः। बालोन्मत्तादयश्च सर्वकार्य्याणां न प्रयोजनादिवेदिनः। साध्यं चेत्कर्तृत्वं तत्कथमनन्तर्भावितसर्वज्ञत्वं हेतुमन्तरेण सेद्धुमर्हति।

चेतनाः, यानयं भगवान् स्वकर्मभिरभिप्रैति। प्रयोजनं सुखदुःखोपभोगः। चेतनानां कुलालादिकर्तृव्यापारविषयस्तूपादानादिः प्रसिद्ध एव। एतदुक्तं भवति। ये यत्कर्तारः ते तदुपादानाद्यभिज्ञाः कुलालादयः। सर्वेषां च कार्याणामीश्वरः कर्त्तेति समस्तकार्योपादानाद्यभिज्ञः। तथा च सर्वज्ञ इति।

तमेतं परतन्त्रसिद्धान्तं सनिदर्शनमुपन्यस्य दूषयितुमुपक्रमते-किमेते कुलालादयः स्वकार्यस्य निरवशेषोपकरणादिवेदिनः कतिपयोपकरणादिवेदिनो वा? न तावदशेषोपकरणादिवेदिनस्ते। कुतः? अदृष्टस्य सर्वोत्पत्तिमतां निमित्तहेतोरपरिज्ञानात्। नापि संप्रदानप्रयोजनविशेषवेदिनः। तस्य संप्रदानभेदस्य देवदत्तादेः प्रयोजनभेदस्य मधूदकादिधारणादेरनेकस्यापि संभवात्। अथोपकरणादिमात्रविज्ञानं न समस्तोपकरणादिज्ञानं कुलालादीनां तर्हि तेनैव निदर्शनेनेश्वरस्यापि तदुपकरणादिमात्रज्ञानं तन्मात्रज्ञाने च न सर्वज्ञतासिद्धिः। कतिपयज्ञो हि तथा सति स्यादिति।

न च तन्मात्रज्ञानमपि ईश्वरस्य बालादिवदित्याह—बालोन्मत्तादयश्च स्वकार्याणां न प्रयोजनादिवेदिनो, निरभिप्रायाणां तत्र प्रवृत्तिदर्शनात्। न च कुलालादयो निदर्शनं न बालादय इत्यत्र

**ननु सिद्धमेव, सन्निवेशादिमतां बुद्धिमत्पूर्वकत्वात् । नियमहेतुरस्ति । साध्यं चेत्तत्कर्तृत्वं तत्कथमनन्तर्भावितसर्वज्ञत्वं हेतुमन्तरेण वेदुमर्हति ?**

अत्र चोदयति—ननु सिद्धमेव । कुतः ? संनिवेशादिमतां बुद्धिमत्पूर्वकत्वात् । त्रयो हि खलु जगति भावा भवन्ति । प्रसिद्धचेतनकर्तृकाश्च यथा प्रासादाऽट्टालगोपुरतोरणादयः । प्रसिद्धतद्विपर्ययाश्च यथा परमाण्वाकाशादयः । संदिग्धतत्कर्तृकाश्च यथा तनुतरुमहीमहीधरादयः । तत्र विवादाध्यासिता उपलब्धिमत्कर्तृकाः कार्यत्वादचेतनोपादानत्वाद्वा, यत्कार्यमचेतनोपादानं वा तत्सर्वमुपलब्धिमत्कर्तृकं यथा प्रासादादि, तथा च तनुभुवनादयः, तस्मात्ते ऽप्युपलब्धिमत्पूर्वका इति । उक्तहेतुद्वयोपलक्षणार्थं संनिवेशादिमत्त्वग्रहणम् । इतरथा गुणकर्मणोरव्यापनेन हेतोरेकदेशाऽसिद्धत्वप्रसङ्गात् । न च पृथिव्यादीनां कार्यत्वमसिद्धं महत्त्वे सति क्रियावत्त्वेन वा साऽवयवत्वेन वा वस्त्रादिवत्तत्सिद्धेः । यदि मन्येताऽबुद्धिमत्पूर्वकत्वमात्रे साध्ये सिद्धसाधनम्, अभिमतं हि परेषामपि कर्मजत्वात्कार्यजातस्य कर्मणश्चेतनहेतुत्वात्तत्कारणत्वं जगतः । सर्वज्ञपूर्वकत्वे तु न तेन हेतोर्व्याप्तिर्दृष्टचरी । दृष्टान्तश्च साध्यहीनः । कुलालादीनामसर्वज्ञत्वात् । विरुद्धता च हेतोः । असर्वज्ञपूर्वकत्वेनैव कुम्भादावुत्पत्तिमत्त्वस्य वा चेतनोपादानत्वस्य वा व्याप्तेरुपलब्धेः । न चोपलब्धिमत्पूर्वकत्वमात्रं साधनविषयः ? तद्विशेषस्य तु सर्वज्ञपूर्वकत्वस्याऽतद्विषयस्यापि ततः सिद्धिरिति साम्प्रतम् । तथा हि । यद्यसौ विशेषो न साधनव्याप्तः कथमतस्तत्सिद्धिः, सिद्धत्वात्कथमविषयः, विषयश्चेत्कथं न स्वाश्रयात्तद्दोषगतिं स्पृशे ? दिति । तदयुक्तम् । सामान्यमात्रव्याप्तावप्यन्तर्भावितवि-

शेषस्यैव सामान्यस्य पक्षधर्मतावशेन साध्यधर्मिण्यनुमानात्। इतरथा सर्वाऽनुमानोच्छेदप्रसङ्गात्। तथा हि। वह्न्यनुमानमपि न वह्निसामान्यमात्रविषयं, तस्य प्रागेव सिद्धत्वात्। नापि तद्विशिष्टगिरिगोचरो, वह्नित्वसामान्यस्य तत्सम्बन्धाऽभावेन तद्विशेषणत्वाऽनुपपत्तेः। इतरथा गोत्वसमवायादिव गावः शाबलेयादयः पर्वतोऽपि वह्नित्वसमवायाद्वह्निः प्रसज्येत। अस्ति च वह्नित्वेन गिरेः संयुक्तसमवायः सम्बन्ध इति चेत्, तर्हि नाऽप्रतिपद्य पर्वतसंयुक्तं वह्निविशेषमसौ शक्यप्रतिपत्तिरिति वह्निविशेषस्याप्यनुमानम्। तथा च पूर्वोक्तदोषप्रसङ्गः।

एवमिन्द्रियाऽनुमानेऽपि स एव दर्शनीयः। तथा हि। तथापि नेन्द्रियकरणिका काचित् क्रियोपलब्धा। न खलु छिदादयः क्रिया इन्द्रियसाधनाः, व्रश्चनादीनामनिन्द्रियत्वात्। न च व्रश्चनादिसाधनाः सम्भवन्ति रूपादिपरिच्छिन्नलक्षणाः क्रियाः। तस्माद्यथैव क्रियात्वसामान्यस्य सत्यपि करणमात्राऽधीनत्वाव्याप्तत्वे पक्षधर्मतावशादिन्द्रियलक्षणकरणविशेषसिद्धिः तथेहापि सत्यप्युत्पत्तिमत्त्वस्याऽचेतनोपादानत्वस्य चोपादानोपकरणसंप्रदानप्रयोजनज्ञकर्तृमात्रव्याप्तत्वे विवादाध्यसितेषु पक्षधर्मताबलाद्विशिष्टस्य तस्य सिद्धिः। अन्यथा सामान्यस्यापि व्यापकाऽभिमतस्याऽसिद्धिः स्यात्, निर्विशेषस्याऽसम्भवात्, विशेषस्य चाऽन्यस्याऽनुपपत्तेः। असर्वज्ञस्य चाऽचादृष्टादिभेदविज्ञानरहितस्याऽधिष्ठातृभावाऽसम्भवात्। तेन यद्यप्युपलब्धिमत्कर्तृकत्वं व्याप्तिविषयस्तथापि तद्विशेषस्य पक्षधर्मताबलात् प्रतिलम्भ इति विशेषविषयमनुमानम्। न चोक्तदोषप्रसङ्गः। तस्य साध्यदृष्टान्तयोर्धर्मविकल्पादुत्कर्षाऽपकर्षाऽनुयोगस्य सर्वाऽनुमानसाधारण्येनाऽनुमानमात्रप्रामाण्यप्रतिक्षेपहेतुत्वात्। तत्सिद्धं विवादाऽध्यासिता उपलब्धिमत्कर्तृका इति।

अपेक्षितप्रसिद्ध्यायत्तसाधनं शब्दोक्तं तदायत्तोपादानादिविषयत्वात् यस्य यदायत्तमुपादानादिविषयत्वं तत्तत्प्रसिद्ध्यायत्तसाधनं यथा धूमो वन्ह्यादेर्दृष्टविशेषसिद्ध्यधीनोपादानादिविषयत्वस्तदधीनसिद्धिरिति । न चाऽस्य सकलक्षेत्रज्ञसमवायिधर्म्माऽधर्मज्ञानकारणाऽभावेन तदज्ञानम् । तत्समवेतानां ज्ञानचिकीर्षाप्रयत्नानां नित्यत्वात् । न च बुद्धितन्नित्यत्वयोः कश्चिद्विरोधः । बुद्धेरनित्यायास्तत्र तथोपलब्धेर्विरोध इति चेत् ? तर्हि तोयादिपरिमाणवोऽपि न रूपादिमन्तः प्रसज्येरन् । पार्थिवानां रूपादीनां कार्याणामुपलब्धेः, इह च तेषामकार्यत्वात् । हिमकरकादौ रूपादिदर्शनात् कार्यद्रव्यगतानां च तेषां कारणगुणप्रक्रमेण भावात् । पाथसीयानामपि रूपादिमत्ता । सदा कारणतया च तद्गतानि रूपदीनि नित्यानीति चेत् । इहापि कार्यत्वेनाऽचेतनोपादानत्वेन वा समस्तविषयज्ञानाऽनुमानात् तस्य च सदा कारणतया नित्यत्वसिद्धेः समानत्वात् परपुरुषसमवेतावपि धर्म्मेऽधर्मावधिष्ठातुं शक्नोति सम्बन्धात् । न हि साक्षात्संयोगसमवायावेव सम्बन्धौ, संयुक्तसंयोगिसमवायस्यापि तद्भावात् । प्रयुक्ताः खल्वीश्वरेण परमाणवः नैव क्षेत्रज्ञाः तत्समवेतौ धर्माधर्माविति संयुक्तसमवायो वा क्षेत्रज्ञैरीश्वरस्य संयोगात् । अनुमानात् संयोगसिद्धेः । ईश्वरः क्षेत्रज्ञसंयुक्तो मूर्तद्रव्यसंयोगित्वात् यो मूर्तद्रव्यसंयोगी स क्षेत्रज्ञसंयुक्तः यथा घटादिः । स चास्य संयोगो ऽन्यतरोभयकर्मसंयोगानां तत्कारणानामभावादजन्यः । कार्यारम्भाऽऽभिमुख्यमेव धर्म्माऽधर्मयोः प्रवृत्तिः । सा च देशकालादिवदीश्वरप्रयत्नमप्यपेक्षते । न चैवं वाच्यं धर्म्माऽधर्म्मौ परमाणून्वा स्वधर्माऽगृहीतान् कथमीश्वरः प्रयत्नेन प्रेरयतीति । विषविद्याविदा तदीयधर्माऽधर्म्माऽनुपगृहीतस्य विषशकलस्य प्रेरणदर्शनात् । ज्ञानेच्छाप्रयत्नानां च तद्वर्तिनां नित्यत्व-

सिद्धौ कृतमस्य शरीरग्रहणेन । तन्मते चाऽत्र परमाणूनामदृष्टादीनां च प्रवृत्तौ शरीरपृथिव्यादिलक्षणस्य कार्यस्योत्पत्तेरुपपत्तेः । न चैतद्वाच्यं नेश्वरः कर्त्ता पृथिव्यादीनां, प्रयोजनाभावादनित्यं चेश्वरविज्ञानं विज्ञानत्वादिति । ईश्वरस्य तज्ज्ञानस्य चाऽधर्म्मिणोऽप्रसिद्धौ हेतोराश्रयाऽसिद्धत्वात् । तत्सिद्धौ वा कर्तुर्नित्यज्ञानस्येश्वरस्याऽनुमानादेव धर्म्मिग्राहिणः सिद्धेस्तद्विरोधान्न तदाश्रयमनुमानम् आत्मानमासादयितुमर्हति । तत्किमीश्वरज्ञानाऽनित्यत्वग्राहिणोऽनुमानस्य विशेषविषयतया दलं यस्त्वप्रसाधनप्रयत्नेन ? मूलमेवास्य विहितः कुठारः । न चाऽज्ञातरूपाणामिन्द्रियमनसां विज्ञानोत्पत्तिं प्रति साधनभावस्य च वत्सविवृद्धिनिमित्तस्याचेतनस्य क्षीरस्य स्वातन्त्र्येण प्रवृत्तेश्च । वनविटपिनां च विना प्रयत्नमुत्पादस्य च दर्शनाद्व्यभिचार इति साम्प्रतम् । सर्वेषामेव तेषां विवादास्पदत्वेन पक्षपक्षे निक्षेपात् । न च शशशृङ्गाऽस्तिता, तदनुपलब्धिविरोधात् । अपरोक्षदर्शनाऽर्हतया भगवतस्तद्विरोधाऽनुपपत्तेः । अन्यथा सर्वत्राऽनुमानोच्छेदप्रसङ्गात् । शृङ्गस्य तु शशशिरोवर्त्तिनो गवादिगतस्येव दर्शनार्हस्याऽनुपलब्धिनिराकृतस्य साधनार्हत्वात् । न च पक्षेण व्यभिचारः । सर्वत्र तस्य सुलभतया सर्वत्राऽनुमानोच्छेदप्रसङ्गात् । व्यतिरेकी वा हेतुः कार्यमात्रं पक्षीकृत्य प्रयोक्तव्यः । स चैवं प्रयोगमारोहति । नित्येतरत्समस्तं सर्वज्ञपूर्वकमुत्पत्तिमत्त्वादचेतनोपादानत्वाद्वा । यत्पुनर्न सर्वज्ञपूर्वकं न तदुत्पत्तिमत् अचेतनोपादानं वा । यथा परमाण्वादि । न चेदं तथा तस्मात्सर्वज्ञपूर्वकमिति । सर्वज्ञपूर्वकत्वेन च परं प्रत्यसिद्धेन कार्यमात्रमेव पक्ष्यतइति भवति पक्षः । यदि पुनश्चेतनाऽनधिष्ठितानि स्वं कार्यं कुर्युः ततो यत्र क्व चनाऽवच्छिन्नानि कार्यं जनयेयुरिति न देशकालप्रतिनियतप्रसवं कार्यमुपलभ्येत । हेतुसमवधानजननतया कार्यं न प्रत्येकं कारणैर्जन्यत इति चेत्सत्यं, समवधानमेव

वार्तमेतत् ।

तु कारणानामन्योन्यम् । कुतः ? कादाचित्कपरिपाकाददृष्टविशेषादिति चेत्, न खल्वयमप्यचेतनः कथं यथावत्कारणानि संनिधापयेत् । नो खलु यत्र क्व चनाऽवस्थितानि दण्डादीनि विना कुम्भकारप्रयत्नमदृष्टविशेषादेव परस्परं संनिधीयन्ते, सन्निहितानि वा कार्यस्येशते । तस्मात् कारणसमवधानव्याप्तत्वात् कार्योत्पादनस्य तस्य चोपलब्धिमत्पूर्वकत्वाऽभावे ऽनुपपत्तेः व्यापकनिवृत्त्या विपक्षात्कार्योत्पादे निवर्तमामाने उपलब्धिमत्त्वेन व्याप्यतइति प्रतिबन्धसिद्धिः । न चेश्वरज्ञानमप्रत्यक्षमिन्द्रियार्थसंनिकर्षाऽनुत्पादादिति साम्प्रतम् । लोकस्य हि प्रत्यक्षस्य तल्लक्षणम् । अस्य हि निखिलाऽर्थसाक्षात्कारित्वं लक्षणं वेदितव्यम् । अत्र चाऽऽम्नायो भवति "एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः" "द्यावाभूमी जनयन् देव एक" इति । स्मृतिश्च भवति ।

"अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा" ॥

न चेश्वरज्ञानस्य शरीरेन्द्रियाऽपेक्षयोत्पादः । अस्ति हि श्रुतिः 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न हि तस्याऽस्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्' इत्यादिका । तदनुमानाऽऽगमाभ्यां सिद्धमीश्वरस्य कर्तृत्वं सर्वज्ञत्वं चेति ।

तदेतद्दूषयति—वार्तमेतत् । इदमत्राऽऽकूतम् । न तावत्पक्षधर्मतावशात्तदधिष्ठानविशेषो युगपदसंख्येयस्थावरादिलक्षणकार्यदर्शनादखिलविषयनित्यविज्ञानमाक्षशाली षड्गुण ईश्वरः सेद्धुमर्हति, न ह्येतावता विश्वं कार्यमुपजायते । न जातूपादानादिज्ञो ऽपि कुम्भकारः कुम्भमचिकीर्षुश्चिकीर्षुर्वा तदुपादानादिष्वलसतया ऽप्रयतमानः

कुम्भाऽऽरम्भाय कल्पते । तस्मात् ज्ञानचिकीर्षाप्रयत्नसमुदायजन्मा कार्योत्पादो न ज्ञानमात्राद् भवितुमर्हति ।

मा भूदार्द्रेन्धनदहनजन्मा धूमः केवलाऽऽर्द्रेन्धनाद्वन्हेर्वा पृथग्जनज्ञानविलक्षणमीश्वरज्ञानमसहायमेव विश्वस्मिन् कार्ये पर्याप्तमिति चेत्? हन्त भोः किमस्य ज्ञानेनापि स्वरूपाऽतिशय एवाऽस्याः सहायस्तत्र तत्र कार्ये वर्त्स्यतीति न किं चित्कार्यमसहायादेकस्मादिति चेत्। ननु तस्यैव स्त एव चेतनगतौ धर्माऽधर्मौ, सन्ति च परमाणवः सहाया इति किमस्य ज्ञानेन? अविज्ञातास्ते न प्रवर्तन्तइति ज्ञानमेषितव्यमिति चेत्। अथाऽविज्ञातास्ते कस्मान्न प्रवर्त्तन्ते? तथाऽनुपलम्भात् कुम्भाद्युपायेष्विति चेत् । तर्हि ज्ञानवच्चिकीर्षाप्रयत्नावप्यास्थेयौ तत्रापि च ज्ञानं चिकीर्षाविशेषे उपयुज्येत। स च प्रयत्नभेद इति प्रयत्नहेतुभेद एव साक्षात्कारोदये हेतुरिति कथं तमन्तरेण तंत्सम्भवः? न हि वह्निमन्तरेण तुषप्रक्षेपफूत्कारमात्रादेवौदनं सिद्ध्यति ।

यदि मन्येत स्त एव चिकीर्षाप्रयत्नावपि भगवतीश्वरे इति? अथ किमेतौ नित्यावनित्यौ वा? नित्यौ चेत्कृतमीश्वरस्य ज्ञानेन चिकीर्षाप्रयत्नोत्पादाऽनुपयोगिना । तयोर्नित्यतया स्वोत्पादोपयोगाऽनपेक्षणात् । न च प्रयत्नवत् ज्ञानमपि साक्षात्कार्योत्पादनाङ्गम् । प्रयत्नभेदेन खल्वयमधितिष्ठन्त्युपादानादि, न तु समये ज्ञानस्य कश्चिदुपयोगश्चिकीर्षाया वा निष्पादितक्रिये कर्म्मण्यविशेषाधायिनः साधनस्य साधनन्यायाऽतिपातादिति दत्तजलाञ्जलिरीश्वरस्य सर्वज्ञता। अथाऽनित्यौ, ततस्तयोरुत्पत्तिकारणं वक्तव्यम् । ननु नित्यज्ञानमेवोत्पत्तिमूलकारणमस्ति । ततः किमपरेण कारणेन? अहो बत प्रमादो यदयमात्ममनः संयोगविशेषाऽसमवायिकारणौ इच्छाप्रयत्नौ तमन्तरेण ज्ञानमात्रादेव भवत इत्यपि वक्तुमध्यवसितः । तथा सत्ययमतण्डुलमपि मण्डं साधयेदेव ।

सन्त्येवाऽस्य मुक्तात्ममनोभिः संयोगास्तेन तत्सहायस्तत्र चिकीर्षाप्रयत्नप्रचयं युगपत्प्रसूते तत्कार्यप्रजननायेति चेत्? ननु मनांसि तत्संयोगाश्च किमनधिष्ठितानि चिकीर्षाप्रयत्नौ प्रसुवते अधिष्ठितानि वा? यद्यनधिष्ठितानि[1] ततस्तैरेव व्यभिचारः। अधिष्ठानं तु प्रयत्नमन्तरेणाऽयुक्तमेव। प्रयत्नान्तरेण चिकीर्षान्तरजन्मना तदधिष्ठानम्। न चाऽनवस्थानम्। अनादित्वाच्चिकीर्षाप्रयत्नप्रवाहस्येति चेत्? यदाऽयमुत्पन्नसंजिहीर्ष ईश्वरः क्षेत्रज्ञेषु प्रतिबन्धवृत्तधर्माधर्मनिचयेषु जगति च परमाण्ववस्थामापन्ने निर्व्यापारः कियन्तमपि कालं स्थित्वा यदा चिकीर्षति प्रयतते वा तदा तस्य चिकीर्षाप्रयत्नयोर्जनयितव्ययोर्न स्थितं चिकीर्षान्तरं वा प्रयत्नान्तरं समस्तीति कुतो मनसां तत्संयोगानां वाऽधिष्ठान? मित्यनधिष्ठितेभ्यो मनस्तत्संयोगेभ्यो न प्रयत्नचिकीर्षे उत्पद्येयाताम्। उत्पद्यमाने वा कथं कार्यत्वमचेतनोपादानत्वं वा न हेतुं व्यभिचारयतः। न च सवितृप्रकाशवदीश्वरस्य ज्ञानमेकमिच्छामात्रं प्रयत्नमात्रं तत्तद्भावभेदोपधानात्तद्विषयं भवतीत्यपि साम्प्रतम् परस्पराश्रयदोषप्रसङ्गात्। तत्तद्भावोपधाने तत्तद्विषयत्वे च तत्तदुपधानम्। उपधीयमानाऽनधिष्ठाने तदुपधानस्य कार्यस्याऽनुत्पादात्। तस्य चाऽधिष्ठानादुत्पत्तेरिति। ज्ञानानित्यत्वपक्षे च दूषणमुपरिष्टात्प्रवेदयिष्यते।

सोऽयमीदृशो विशेषो विचाराऽसहः कथं पक्षधर्मताबलादपि साध्यधर्मिण्युपसंह्रियते? न हि स्वयमनुपपद्यमानमन्यस्योपपादनायाऽलम्। का तर्हि सामान्यस्याऽऽनुमानिकस्याऽसति विशेषे गतिः? किमवश्यंभवितव्यमस्य गत्या? ननु प्रमाणसिद्धमुपपादनीयं यस्याऽनुमोपपद्यते यत् नामाऽनुपपद्यमानम् अस्तु तस्य परमनुपपत्तिरेव। ननु प्रमाणसिद्धमनुपपन्नमिति विप्रतिषिद्धम्। एवं तर्हि

१ अधिष्ठितान्यनधिष्ठितानि. २ पु. पा. ।

सन्निवेशादिमत्सर्वं बुद्धिमद्धेतु यद्यपि ।
प्रसिद्धेः सन्निवेशादेरेककारणता कुतः ॥

प्रमाणसिद्धिप्रतिघात स्वशास्त्रविप्रतिषेधाय, न पुनरनुपपन्नस्योपपत्तिः । कतमत्तर्हि साधनस्येदं दूषणम्? न दूषणम् । साधनस्य तस्य नाम वादिनः यः ससहायनिःसहायनित्याऽनित्यत्वादिविशेषपरिहाराय गगनकुसुमायमाने क्षित्यादिवर्तिनि बुद्धिमत्पूर्वकत्वसामान्ये साधनाऽनर्हे साधनं प्रयोजयति । न च सम्भवति तादृशो विशेषो यमास्थाय क्षित्यादौ बुद्धिमत्पूर्वकत्वसामान्यं व्यवतिष्ठेत । न चैवं सर्वाऽनुमानोच्छेदप्रसङ्गः । सम्भवद्विशेषविषयत्वादितरेषामनुमानानाम् । न हि न सम्भवति सर्वजनितम्बवर्तिवह्निविशेषो ऽनुद्भूतरूपस्पर्शो वा तैजसश्चक्षुरवयवो रूपोपलब्धिसाधनम् । कारणानां च चित्ररूपसंस्थानसामर्थ्यानां तत्र तत्रोपलब्धेः । तस्माद्यथा कश्चिन्निशातमसिमच्छेद्यमाकाशं प्रति व्यापारयन्पुरुषो निगृह्यते न पुनरसिमाकाशं वा तद्वत्कार्यत्वमचेतनोपादानत्वं वा तर्कसहायं लब्धपरिपाकाऽदृष्टवत्क्षेत्रज्ञपरमाण्वादिसंयोगकारणमात्रविषयमीश्वरे सर्वज्ञे इति । तदिदमुक्तं वार्तमेनदिति ।

यत्तु वृद्धैर्दूषितं तदतिप्रसिद्धतयोपेक्ष्य दूषणान्तरमाह—

संनिवेशादिमत्सर्वं बुद्धिमद्धेतु यद्यपि ।
प्रसिद्धेः संनिवेशादेरेककारणता कुतः ॥

तत्र वृद्धा दूषयांबभूवुः । किमुत्पत्तिमत्त्वमात्रमत्र हेतुः क्रियते किं वा तद्विशेषः? यद्दृष्टेरक्रियादर्शिनोऽपि कृतबुद्धिरुपजायते । एतदुक्तं भवति । तएव खलूत्पत्तिमन्तो ऽचेतनोपादानबुद्धिमत्पूर्वका ये बुद्धिमदन्वयव्यतिरेकानुविधायिभावाऽभावाः प्रमाणेनोपलब्धाः, प्रासादाऽट्टालगोपुरतोरणादयश्च तथा, न तु तनुभुवनादयः । न खलु तदभावाऽभावये बुद्धिमद्भावाऽभावाऽनुविधानं कदाचिदप्युपलब्धम् । घटादेरुत्पत्तिमतस्तथोपलम्भादनुत्पत्तिमतश्च

गगनादेरनुपलम्भादुत्पत्तिमत्त्वस्य च तनुभुवनादावप्यभेदात् तथाभाव इति चेत्? तत्किमिदानीं मृद्विकारस्य घटादेर्मनुष्यकार्यत्वमुपलब्धमिति शक्रमूर्धाऽपि तत्कार्यः। न च मृद्विकारत्वं संस्थानं वा भिद्यते। तद्विधसंस्थानस्यापि मृद्विकारस्य मनुष्यनिर्माणादर्शनात्। तादृशत्वेऽपि तस्य तदन्वयव्यतिरेकाऽनुविधानाऽदर्शनात् न तत्कार्यत्वमिति चेत्। न। इहापि साम्यात्। अत्रापि हि यस्य यस्य बुद्धिमद्भावाऽभावाऽनुविधानमस्ति तस्य तस्य सर्वस्याऽस्तु नाम तत्पूर्वता प्रासादादेः, न पुनस्तद्विधस्यापि भुवनादेर्भवितुमर्हति। तस्य तदन्वयव्यतिरेकाऽनुविधानाऽभावात्। नन्वयं योऽसौ धूमविशेषो वन्हिभावाऽभावाऽनुविधायिभावाऽभाव उपलब्धः स सर्वो वन्हिपूर्वोऽस्तु न तु पर्वतनितम्बवर्ती तथेति कथं ततो वन्हिरनुमीयते। सामान्यवद्विषयत्वेऽपि तु कार्यकारणभावाऽवधारणस्येहापि साम्यम्।

तत्किमिदानीं मनुष्यकार्याः कुड्यादय उपलब्धा इति शक्रमूर्द्धापि[1] तथास्तु? कस्य चिद्विशेषस्य कुड्यादिभ्यः शक्रमूर्द्धादेः सम्भवान्नेत्यमिति चेत्। स तर्हि प्रासादादिभ्यः संवति तनुभुवनादावपीति न विशेषः। न त्वयमेवं विधो धूमविशेषाणां वह्न्यन्वयव्यतिरेकाऽनुविधायिनामस्ति पर्वतगतधूमात्स्वरूपेण विशेषः। अत एव न पाण्डुद्रव्यमात्रात्कुमुदकपोतादेरनुमानम्[2]। धूमत्वसामान्यस्येव तेभ्यो भेदाऽऽपादकत्वात्। न च हेतुसमवधानं चेतनमन्तरेणाऽसम्भवि। अदृष्टपरिपाकादेव कादाचित्काद्देशकालभेदसमासादितजन्मनस्तदुपपत्तेः। ततश्च कार्यनियमसिद्धेः। न खलु नियतप्रकारसामर्थ्येभ्यः कारणेभ्यः कार्यमनियमेनोत्पत्तुमर्हति। अन्यथा कर्तृचैतन्येऽप्ययं दुर्वारः प्रसङ्गः। तस्यापि कारणसामर्थ्याऽनुरोधेन नियोजकत्वात्। न च चेतनमन्तरेण कुम्भादिकारणानि न प्रवर्त्तन्ते इति पृथिव्यादिकारणैरपि न प्रवर्तितव्यम्। यथा हि

१ राजमूर्धा २ पु० पा०। २ छविनानुमानं २ पु० पा०।

दृष्ट्वा प्रेक्षापूर्वप्रासादादिसन्निवेशवैलक्षण्ये ऽपि चेतरेषां तरुगिरिसागरादीनां यद्यपि सन्निवेशमात्रसादेहवत् प्रयत्नमन्तरेण कुम्भादिकारणेष्वप्रवर्तमानेष्वपि पृथिव्यादिकारणानि न देहवतः प्रयत्नमपेक्षन्ते स्वप्रवृत्तिं प्रति तथा चेतनमात्रप्रयत्नमपि नाऽपेक्षिष्यन्ते, किं त्वदृष्टपरिपाकवत्क्षेत्रज्ञसंयोगा[1]देव प्रवर्त्स्यन्तीति किं तदधिष्ठानेन कल्पितेन ? तस्माद्विशिष्टमुत्पत्तिमत्त्वमसिद्धम् ।

पृथिव्यादिषु उत्पत्तिमत्त्वमात्रं त्वप्रयोजकं विशेषप्रयुक्तव्याप्त्युपजीवित्वेन स्वाभाविकप्रतिबन्धवैकल्यात् । स्वाभाविकप्रतिबन्धवतश्च हेतोरनुमानाऽङ्गत्वात् । इतरथोपाध्यायदर्शनादेरपि शिष्याद्यनुमापकत्वप्रसङ्गात् । अपि च प्रेक्षावतां प्रवृत्तिः प्रयोजनवत्तया व्याप्ता । न चेश्वरस्य प्रेक्षावतो जगन्निर्माणे प्रयोजनं पश्यामः । प्राप्तनिखिलप्रापणीयस्य प्राप्त्याऽभावात् । अन्ततः क्रीडासाध्यस्यापि सुखस्याऽवाप्तत्वात् । नापि कारुण्येन परार्थे प्रवर्त्तते । सुखमयजीवलोकसर्जनप्रसङ्गात् । दुःखमयी तु सृष्टिर्बहुल[2]मुपलभ्यते । न च धर्माऽधर्मसहायस्य निर्माणवैचित्र्यमिति साम्प्रतम् । अधर्मस्य जगद्दुःखाऽहेतोः कारुणिकाऽनधिष्ठानाऽनुपपत्तेः । अनधिष्ठितस्य वा कार्यकरणे हेतोर्व्यभिचारप्रसङ्गात् । न च दुःखाऽनुभवनं वैराग्योत्पादनद्वारेणाऽपवर्गोपयोगीति परहितकाम्यया तदीयमधर्ममधितिष्ठतीति साम्प्रतम् । ईश्वराऽधीनत्वाद् दुःखोत्पादनस्य तस्य च तत्र वैमुख्येन[3] तदनुत्पादे तदत्यन्तविमोक्षलक्षणस्याऽपवर्गस्य फलतः प्राप्तेः । न चाऽप्रयोजनमपि स्वभावादेव भावयतीति युक्तं, प्रेक्षावत्त्वव्याघातात् । तथा च तत्प्रणीतेष्वागमेष्वनाश्वास इति तदपेक्षां दर्शयित्वा दूषणान्तरमाह—

दृष्ट्वा प्रेक्षापूर्वप्रासादादिसंनिवेशवैलक्षण्येऽपि चेतरेषां तरुगिरि-

१ परिपाकवदेवक्षेत्रज्ञसंयोगात् २ पु॰ पा॰ ।
२ बहुला २ पु॰ पा॰ ।
३ वैगुण्येन २ पु॰ पा॰ ।

मान्यात्, तथा सति विभक्तेशतया स्वार्थे पराऽनुग्रहे वा दुःखोत्तरसर्गदर्शनात् प्रयोजनाऽभावनिराकृता ऽपि चैतन्यमात्रसिद्धिः स्यात् एकत्वं तु तस्य कुतस्त्यम् ? न हि घटरथादय एकबुद्धिमत्पूर्वकाः। ईश्वरपूर्वकत्वेन तथेति चेत् साध्यं तच्चेतनमात्रनान्तरीयकत्वात्सन्निवेशस्य केषांचित्तथा दर्शनात् अन्यत्रापि तथाभाव इति चेत्। दृष्टान्तसाध्याभ्यामनेकान्तः। सर्वसाध्यत्वे दृष्टान्ताऽभावः।

सागरादीनां यद्यपि संनिवेशमात्रसामान्याच्चैतन्यमात्रसिद्धिः स्यादिति परेण सम्बन्धः। तथा सति विभक्तेशतया स्वार्थे पराऽनुग्रहे वाऽसति कस्मान्न परार्थाऽनुग्रह ? इत्यत आह—दुःखोत्तरसर्गदर्शनात्। प्रयोजनाऽभावनिराकृतापि चैतन्यमात्रसिद्धिः स्याद् यद्यपि एकत्वं तु तस्येश्वरस्य कुतस्त्यं घटरथादीनां कर्तुस्तथा दर्शनादिति चेत् तत्राह—न हि घटरथादय एकबुद्धिमत्पूर्वकाः।

शङ्कते—ईश्वरकर्तृकत्वेन सर्वस्य कार्यजातस्य तथैककर्तृकत्वमिति चेत् साध्यमीश्वरपूर्वकत्वं सर्वस्य कार्यजातस्य तत्कथं तदेव साधनतयोपादीयतइत्यर्थः। पुनः शङ्कते—तच्चेतनपूर्वकत्वमात्रनान्तरीयकत्वात् संनिवेशस्य केषांचिद् घटरथादीनां तथा दर्शनादन्यत्रापि क्षित्यादौ तथाभाव इति सिद्धमीश्वरपूर्वकत्वम्। तथा चैककर्तृकत्वमिति चेत्। निराचष्टे—दृष्टान्तसाध्याभ्यामनेकान्तः। दृष्टान्ते हि घटादावेकः कर्ता कुलालादिः, साध्ये च क्षित्यादौ ईश्वर इति व्यभिचारान्नोत्पत्तिमत्त्वमचेतनोपादानत्वं वा चेतनात्मानं कर्तारं तनुभुवनादीनां साधयितुमर्हति। अनेककर्तृकस्य दृष्टान्तसाध्ययोर्दर्शनादित्यर्थः।

यदि तु सर्वमेवेश्वरपूर्वकत्वेन साध्येत ततो घटादीनामीश्वरपूर्वकत्वेन पक्षविनिक्षेपात् दृष्टान्ताऽभाव इत्याह—सर्वसाध्यत्वे

द्विकर्तृकत्वे च घटादेर्भुवनाद्यपि तथेति ईश्वरेश्वरप्रसङ्गादनवस्था । अत एव न द्वितीयाऽनुमानम् । एकाऽनुमानमपि तर्हि मा भूत्, तथाप्यनवस्थायास्तुल्यत्वात् । अथ न ह्यधिष्ठातृका घटादयः सर्वमेकाधिष्ठातृकमिति । न सर्वज्ञदृष्टान्ताऽभावः । न च व्यतिरेकी हेतुः सम्भवति । कादाचित्काऽदृष्टपरिपाकादेव देशकालादिप्रतिनियतकार्योत्पादोपपत्त्या व्यतिरेकाऽव्यभिचारस्याऽनिश्चयादिति भावः । यथा चैतत्तथोपपादितमधस्तात् ।

अपि चाऽस्त्वीश्वरः कर्ता घटादीनां तथापि प्रत्यक्षपरिदृष्टकुलालादिरपि कर्तेति द्विकर्तृकत्वे च घटादेर्भुवनाद्यपि तथा तेनैव निदर्शनेन द्विकर्तृकत्वमितीश्वरस्येश्वरप्रसङ्गादनवस्था ।

एतदुक्तं भवति । यथा प्रत्यक्षपरिदृष्टकुलालादिकर्तृके ऽपि घटादौ तावतैवोपपद्यमानोत्पादे चेतनान्तरमीश्वरस्तत्कर्तारं कुलालमधिष्ठातुं कल्प्यते तथेश्वरमधिष्ठातुमीश्वरान्तरम्, एवं तमित्यनवस्थेति । अत एव चोदयति—अनवस्थाप्रसङ्गादेव न द्वितीयेश्वरस्याऽनुमानम् । ततो न द्विकर्तृकतेति चेत् । परिहरति—एकाऽनुमानमपि तर्हि मा भूत् । कस्मात्? तथा एकानुमाने ऽप्यनवस्थायास्तुल्यत्वात् । लब्धपरिपाकाऽदृष्टवत्क्षेत्रज्ञसंयोगादेव क्षित्यादिलक्षणकार्योत्पत्तावेकस्याऽपीश्वरस्याऽनुमाने तुल्यैवाऽनवस्थेत्यर्थः ।

शङ्कते—अथ न ह्यधिष्ठातृका घटादयः किं त्वेकैककुलालाद्यधिष्ठातृकाः सर्वे । ततश्च नेश्वरान्तराऽनुमानं न चाऽनवस्थेति । निराकरोति—न सर्वज्ञत्व[1]सिद्धिः । यदि हि सर्वकार्याणामेकः कर्ता स्यात्ततो ऽज्ञस्य तत्त्वाऽनुपपत्तेः सर्वज्ञता स्यात् । अथ पुनरेकैककार्यमेकैकेन कर्त्रा जन्यतइति यो यज्जनयति स तत्कारणमात्रज्ञ

१ सर्ववित्त्व २ पु॰ पा॰ ।

त्वसिद्धिः । रथाङ्गाद्यवयवा नानातक्षनिर्म्मिता अपि दृश्यन्ते जगति प्राय उपकार्य्योपकारकाः, एवं च रथाङ्गाद्येकतक्षपूर्वकं दृष्टम् । तस्माज्जगदप्येककर्तृपूर्वकमिति । तदेतद् व्यभिचारि । नानातक्षपूर्वकस्यापि दर्शनात् ।

हेत्वभावप्रतिक्षिप्तं न कार्य्यमनुमीयते ।
हेतुर्न चेतनामात्रं प्रेक्षा त्वनुपपत्तिका ॥

न हि कर्म्माशयाऽभावे तस्य शरीरेन्द्रिययोगो बुद्धिरैश्वर्य्यं वा सम्भवतीति प्रमाणविरुद्धस्तदुपगमः । हेत्वभावे कार्य्याऽनुपपत्तेः । उपपत्तौ वा न संनिवेशात्त एवेति न सर्वज्ञ इत्यर्थः ।

यदपि कश्चित् प्रमाणयेत् यत्परस्परोपकार्योपकारकत्वेन व्यवस्थितं तदेककर्तृकं दृष्टं, यथा रथाऽवयवा एकतक्षपूर्वका दृष्टाः, तथा च तनुभुवनानि ।

अत्रापि समस्ति कथं चित् परस्परोपकार्योपकारकभाव इत्यत्राह -रथाद्यवयवा नानातक्षनिर्मापिता अपि दृश्यन्ते जगति प्राय उपकार्योपकारकाः । सर्वं जगत् परस्परोपकार्योपकारकं दृष्टं, ततः किमेवंविधं रथाङ्गाद्येकतक्षपूर्वकं दृष्टम् ? तस्माज्जगदप्येककर्तृपूर्वकं तथा च जगत्कर्ता सर्वज्ञ इति ।

दूषयति—तदेतद् व्यभिचारि । कुतः ? नानातक्षपूर्वकत्वस्यापि दर्शनात् ।

हेत्वभावप्रतिक्षिप्तं न कार्यमनुमीयते ।
हेतुर्न चेतनामात्रं प्रेक्षा त्वनुपपत्तिका ॥

ईश्वरस्य क्लेशकर्मविपाकाशयाऽपरामर्शाऽभ्युपगमात् । न हि कर्माऽऽशयाऽभावे तस्य शरीरेन्द्रियादियोगो बुद्धिरैश्वर्यं वा सम्भवतीति प्रमाणविरुद्धस्तदुपगमः । प्रमाणविरोधमाह—हेत्वभावे कार्याऽनुपपत्तेः । न ह्यस्ति सम्भवो वन्हिर्नास्ति समस्ति च धूम

केचित्तु विशेष्यतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वेनैव विषेषणत्वादुत्पलनीलनीलोत्पलयोरपि साधुत्वम्। न चैवं वृक्षशिंशपादिप्रयोगस्य विशेषणपूर्वनिपातेनैव वारणे सूत्रेऽन्यतरपदवैयर्थ्यमिति वाच्यम्। बहुलग्रहणेनैव क्वचिन्नित्यसमासः, कृष्णसर्पः, लोहितशालिः। क्वचिन्न रामो जामदग्न्यः, व्यासः पाराशर्य इत्याद्यनिष्टप्रयोगवारणस्येष्टत्वादित्याहुः।

यच्चोक्तं शब्दकौस्तुभे। उपसर्जनमिति तावदन्वर्थसंज्ञेत्युक्तम्। अप्रधानमुपसर्जनमिति। तदिह जातिगुणशब्दयोः सन्निपाते गुण एव विशेषणं तस्य द्रव्यावच्छेदद्वारैव क्रियानिवर्तकत्वात्। श्रौतव्यवहारेऽप्येवम्। श्वेतं छागमालभेत इति हि चोदनायां श्वेतच्छागालाभे कृष्णच्छाग आलभ्यते न तु श्वेतमपि पश्वन्तरम्। क्रियाजात्योरप्युपनिपाते एवमेव। तेन नीलोत्पलं पाचकब्राह्मण इति व्यवस्थित एव प्रयोगः। यत्र तु गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोर्वा निपातस्तत्रापि नियम एव। खञ्जकुब्जः याजकपाठकः पाठकपाचकः पाचकखञ्ज इति। शिंशपावृक्ष इत्यत्र तु शिंशपात्वस्य व्याप्यत्वाद् वृक्षत्वस्य व्यापकत्वात् विशेषणविशेष्यभावव्यवस्था स्पष्टैव।

तदसत्। यत् साक्षात्क्रियान्वयि तत्प्रधानं यत्परंपरया क्रियान्वयि तदप्रधानम्। एतावतैव श्रौतव्यवहारनिर्वाहे विशेषणविशेष्यभावकामचारस्य दुर्वारत्वात्। नीलोत्पलमुत्पलनीलं तिष्ठतीत्यादौ साक्षात्क्रियान्वयित्वस्य कदाचित् नीले कादाचिदुत्पले सम्भावाद्विशेषणविशेष्यभावकामचारादुत्पलनीलं नीलोत्पलमिति प्रयोगः साधुरेव। एवं पाचकब्राह्मण इत्यादिद्रष्टव्यम्।

यच्चोक्तं शिंशपात्वस्य वृक्षत्वव्याप्यत्वाद् शिंशपाविशेषणमेवेति । तदपि न विशेषणविशेष्यभावस्य कामचारत्वेन व्यवस्थायोगात् । अन्यथा प्रमेयः पदार्थ इत्यत्र विशेषणविशेष्यभावापत्तिरिति दिक् ।

उपकुम्भम् अर्धपिप्पलीत्यादावुत्तरपदलक्षणयैवोपपत्तौ न शक्तिर्न वाक्ये लक्षणा । पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतेर्न वाक्ये लक्षणा । समाहारसंज्ञा तु न समाहारबोधकत्वेन नदीवृध्यादिवत् परिभाषिकी । न च द्विवचनापत्तिः । असाधुत्वात् ।

परे तु पाणिपादं पाणिप्रतियोगिकं पादपदं पदप्रतियोगिकं समाहारं लक्षयति । तत्र परंपरया वादनकर्मान्वयः समाहारस्तु तुल्यवदेकक्रियान्वयित्वरूपं साहित्यम् । सेनावनादिवदपेक्षाबुद्धिविशेषविषयत्वं वेत्याहुः । इतरेतरद्वन्द्वे तु धवखदिरावित्यादौ धवखदिरमात्रप्रतीतेर्न लक्षणा शक्तिर्वेति दिक् ।

नञ्तत्पुरुषेऽघटः पट इत्यत्र घटपदं घटसंम्बन्धिनो लक्षकं नञ्पदमन्योन्याभाववतो लक्षकं ससम्बन्धिस्थले चैत्रस्य नप्तेत्यादौ एकदेशान्वयस्वीकारात् । तथा च घटसंबन्ध्यभिन्नान्योन्याभाववदभिन्नः पट इति बोधः ।

परे तु चैत्रस्य नप्तेत्यादौ पुत्रपुत्रे षष्ठ्यर्थे सम्बन्धस्यान्वयाङ्गीकारात् । अघटः पट इत्यादावन्योन्याभाववृत्त्येव घटसम्बन्धिनोऽन्वयः । अत एव घटं भूतलमित्यादौ समानविभक्तिकत्वेत्याहुः ।

अन्ये तु निपातातिरिक्तनामार्थयोरेव भेदातिरिक्तसम्बन्धेनान्वयानङ्गीकारेणाघटः पट इत्यत्र घटस्य प्रतियोगितयाऽन्योन्याभावे तस्य चाधिकरणतया पटे

अन्वयबोधसम्भवान्नात्र लक्षणा। अत एव चन्द्र इव मुखमित्यत्रेवार्थे सादृश्ये प्रतियोगितया चन्द्रान्वयः। न च घटो नास्तीत्यत्र कथं घटात्यन्ताभावबोधो नञो ऽन्योन्याभावे शक्तत्वादिति वाच्यम्। अन्योन्याभावसंसर्गाभावसाधारणाभावत्वस्य शक्यतावच्छेदकत्वात्। यत्राधिकरणप्रतियोगिवाचकपदयोः समानविभक्तिता तत्र तादात्म्यसंबन्धावच्छिन्नप्रतियोगितया नञर्थे प्रातिपदिकार्थान्वयेन तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वेनाभावबोधादन्योन्याभावबोधः। यत्र चाधिकरणवाचकपदे सप्तमी तत्र तादात्म्यातिरिक्तसंयोगादिसंबन्धावच्छिन्नप्रतियोगितया नञर्थे प्रातिपदिकार्थान्वयेन तत्र संसर्गाभावबोधः। अन्योन्याभावत्वेनान्योन्याभाववत्संसर्गाभावत्वेनापि संसर्गाभावे शक्तिस्वीकाराद्वा।

न चैवं चैत्रो न पचतीत्यादौ संसर्गाभावबोधो न स्यादधिकरणवाचकपदे सप्तम्यभावादिति वाच्यम्। विभक्त्यर्थस्य नञर्थे तादात्म्यातिरिक्तसंबन्धावच्छिन्नप्रतियोगितयैवाकाङ्क्षावशादन्वयेन तत्रापि संसर्गाभावबोधात्। अतोऽन्यकालिकसंबन्धेन स्वार्थप्रकारकान्वयबोधाजनकत्ववत्तादृशसमभिव्याहारस्यापि न तादात्म्यसंबन्धावच्छिन्नप्रतियोगितासंबन्धेन नञर्थे प्रकारतयाऽन्वयबोधजनकत्वम्। अत एव कालं पचतीति न प्रयोगः। एवं न नञर्थस्य भेदेन धात्वर्थे प्रकारतयाऽन्वयः। अतो घटो न पश्यति चैत्रइत्यादितो घटाभावं पश्यति चैत्र इति बोधः। एवं नञर्थस्योद्देश्यतयापि न बोधः। अत एव चैत्रस्य न ग्राम इत्यादितश्चैत्रस्वत्वाभावो ग्रामे इति न बोधः। न च घटोनास्तीति अत्र घटाभावोस्तीति बोधाङ्गी-

कारे भावनया अन्वयभावे एवाख्यातोपस्थितसंख्याया अन्वयः स्यात्तथा च घटौ नास्तीति प्रयोगापत्तिर्द्वित्वावच्छिन्नप्रतियोगिताकघटाभावस्यैकत्वादिति वाच्यम्। भावनान्वयभावप्रतियोगिन्येव संख्यान्वयः समभिव्याहारविशेषबोधनादित्याहुः।

परे तु भूतले घटो नास्तीत्यत्र नाभावविशेष्यको बोधः। किं तु भूतलवृत्तित्वास्तित्वाभाववान् घट इत्याख्याताश्रयत्वप्रकारको घटविशेष्यको बोध इति तत्रैव संख्यान्वयः। जातौ सत्ता नास्तीत्यत्र साक्षात्संबन्धेन जातिवृत्तित्वाभावस्य सत्तायां बोधः, सत्ता न जातिवृत्तिरित्यत्रैव। न तु भूतलवृत्त्यभावप्रतियोगिघटोऽस्तीति बोधः, क्वेति साकाङ्क्षतापत्तेरित्याहुस्तन्न।

चैत्रे न पचतीत्यतश्चैत्रसमवेतत्वाभाववती पाककृतिरिति आख्यातार्थकृतिविशेष्यकबोधापत्तेरित्यपरे।

तन्न। भवन्मतेऽपि चैत्रे पाककृत्यभाव इत्येवं बोधापत्तेः। सप्तम्यन्तकारकस्य धात्वर्थ एवान्वय इति चेत्तुल्यम्।

अन्ये तु ननु रथो गच्छतीति प्रयोगात् नाख्यातार्थः कृतित्वेन कृतिः, किं तु व्यापारत्वेन व्यापारः। न च तत्र व्यापारे लक्षणा, विभक्तौ लक्षणानङ्गीकारात्। अन्यथा कर्मणि षष्ठीत्यानुशासनवैयर्थ्यात्। अनुशासनं विनापि गङ्गापदलक्षणावत्तस्यापि लक्षणा संभवादिति चेत्? न। लाघवेन यत्नत्वास्याख्यातशक्यतावच्छेदकत्वेन रथो गच्छतीत्यत्र व्यापारे आश्रयत्वे वा लक्षणास्वीकारात्। एवं जानाति विद्यते निद्रातीत्यादावपि। घटो नश्यतीत्यादौ नाश्रयत्वे किं तु प्रतियोगित्वे लक्षणा। अत एवान्यदी-

यद्गमनानुकूलचोदनादिमति न गच्छतीति प्रयोगः। तस्य गमनाश्रयत्वाभावात्। न च विभक्तौ लक्षणा, सुब्विभक्त्यभावेऽपि तिङ्विभक्तौ लक्षणायां बाधकाभावात्। यद्वानुशासनबलात् सुब्विभक्तेः सुब्विभक्त्यन्तरार्थे लक्षणाया अस्वीकारात्। कथमन्यथा कर्मणि शक्ताया द्वितीयाया घटं जानातीत्यत्र विषये लक्षणा। कथं वा वृक्षात्पततीत्यत्र विभागशक्तायाः पञ्चम्याः धूमादित्यत्र ज्ञाप्यत्वे लक्षणा। गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्ने पतिधातोः शक्तिः, तादृशक्रियायां जनकत्वसंबन्धेन पञ्चम्यर्थविभागान्वयेन वृक्षनिष्ठविभागजनकविलक्षणक्रियाश्रयबोधात्, विभागे पञ्चम्या शक्तिः।

न च रथो गच्छतीत्यादावाख्यातार्थयत्नस्य बाधादनन्वयेऽपि धात्वर्थस्यैव गमनादेः रथेऽन्वयबोधोपपत्तौ किमर्थमाश्रयत्वेन लक्षणेति वाच्यम्। तण्डुलः पचतीत्यत्र तण्डुलस्य पाके कर्मतासंबन्धेनानन्वयात्, विशेष्यतासंबन्धेनाभेदातिरिक्तसंबन्धेन प्रातिपदिकार्थप्रकारकबोधं प्रति निपातसुप्तद्धितान्यतमजन्योपस्थितेः कारणत्ववत् तण्डुलं पचतीत्यादितः पाकवत्तण्डुलविषयककृतिमान् इति बोधाभावात् द्वितीयाया विषयार्थकत्वाभावात्। [1]सुबर्थस्य तिङर्थान्वयाभावे तु घटेन स्थीयते रूपमित्यतः स्थितिमद्घटजन्यं रूपमिति बोधापत्तेः। अत एव नामार्थस्याख्यातार्थान्वयाभावात् तण्डुलः पचतीत्यत्र पाकवत्तण्डुलकृतिमानिति बोधाभावेऽपि न क्षतिः। धात्वर्थप्रकारकबोधस्यापि विशेष्यतासंबन्धेन नामार्थेऽभावेन विशेष्यतासंबन्धेन धात्वर्थप्रकारकबोधं प्रति कृत्तिङाद्यन्यतरजन्योपस्थितेः करणत्वमिति न तादृशो बोध इति केचित्।

१ अत्रत्ययग्रन्थः किञ्चिच्छेषपूरणमपेक्षते।

यद्यपि ज्ञानं जानातीत्यादौ ज्ञानपदेन धातुना च सर्वज्ञानोपस्थानात् धातुजन्योपस्थितिविषयरूपधात्वर्थस्यसुबर्थान्वयेपि प्रातिपदिकार्थस्य धात्वर्थस्य च तिङर्थेपि प्रकारत्वाद्द्वयोर्व्यभिचारस्तथापि घटप्रकारककर्मत्वादिविशेष्यक निरूपितत्वसंसर्गकबोधविशेषे घटमेतादृशानुपूर्वीज्ञानं हेतुः ।

एवं यादृशानुपूर्वीकाद्यादृशो बोधोऽनुभवसिद्धस्तादृशानुपूर्वीज्ञानं कारणं तादृशबोधविशेषे, बोधविशेषश्चाव्यवहितोत्तरत्वमेवेति न व्यभिचारः ।

एवं विशेष्यतासंबन्धेनाभेदसंसर्गकनामार्थप्रकारकबोधं प्रति तन्नामसमानविभक्तिकपदजन्योपस्थितिः कारणम् । तन्नामोत्तरविभक्तिविजातीयविभक्त्यसमभिव्याहृतपदजन्योपस्थितिर्वा कारणम् । तेन नीलघट इत्यस्य च संग्रहः । तण्डुलं पचतीत्यत्र विक्लृत्तिरूपं कर्मत्वं द्वितीयार्थः । सविषयकधातुयोगे तु विषयत्वं द्वितीयार्थः । व्यापारबोधकेनाख्यातेन वर्तमानत्वादिकं व्यापारे बोध्यते व्यापाराबोधकेन तु धात्वर्थे तद्बोध्यते । भविष्यदतीतत्वे आख्यातविशेषवाच्ये, तत्र भविष्यत्त्वमाद्ये व्यापारेऽतीतत्वमन्त्ये व्यापारेऽन्वेति । तेनोत्तरकृतिं प्रागभावमादाय न कृतिकाले भविष्यदर्थकाख्यातप्रयोगः । न चाद्यकृतिध्वंसमादाय भूतार्थकाख्यातप्रयोगः । तण्डुलं पचति चैत्र इत्यत्र तण्डुलः कर्मत्वे तच्च पाके स च वर्तमानत्वं च कृतावन्वेति इति तण्डुलकर्मकपाकीयवर्तमानकृतिमांश्चैत्र इति बोधः । न च वृक्षाद्भूमिं पर्णं पततीति प्रयोगापत्तिः । भूमिनिष्ठसंयोगजनकक्रियानुकूलव्यापारस्य पर्णे सत्त्वादिति वाच्यम् । पततिसमभिव्याहारेण द्वितीयायाः साधुत्वाभावात् संयोगादिफलबोधकत्वाच्चेति केचित् ।

ननु ग्रामं गच्छतीत्यादौ संयोगादिरूपफलस्य द्वितीयार्थत्वं क्रियारूपव्यापारस्य धात्वर्थत्वं तदा त्यजिगम्योः पर्यायतापत्त्या ग्रामं गच्छतीति वक्तव्ये ग्रामं त्यजति इति प्रयोगापत्तिरिति चेन्न। गमिधातुसमभिव्याहृतद्वितीयायाः संयोगरूपफलस्य त्यजिधातुसमभिव्याहृतद्वितीयाया विभागरूपफलस्य बोधकत्वस्वीकारेण नातिप्रसङ्गसंभवादिति केचित्।

द्वितीयार्थ आश्रयत्वं संयोगानुकूलं कर्म गमेरर्थः। विभागानुकूलं कर्म त्यजेरर्थः। तेन न तयोः पर्यायता, न वा तद्धातुसमभिव्याहृतद्वितीयायास्तत्तत्फलबोधकत्वस्वीकारेणानेककार्यकारणभावाः।

न च भूमौ पर्णं पततीत्यादौ भूमिपदाद् द्वितीयापत्तिः संयोगाश्रयत्वस्य भूमावपि सत्त्वादिति वाच्यम्। समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयवतो बोधकत्वस्वीकारात्।

अत एव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति तल्लक्षणं न तु क्रियाजन्यफलशालित्वम्। वृक्षाद्भूमौ पततीत्यत्र कर्मजन्यसंयोगविभागाश्रयतया वृक्षभूम्योः कर्मतापत्तेः। न चाधःसंयोगानुकूलव्यापारस्य पतत्यर्थत्वे भूमेः कर्मत्वापत्तिरिति वाच्यम्। गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्नपतत्यर्थतया धात्वर्थतावच्छेदकफलाभावात्।

न च चैत्रो ग्रामं गच्छतीत्यादौ चैत्रादेः कर्मत्वापत्तिः संयोगानुकूलव्यापारस्य गम्यर्थत्वेन तदवच्छेदकसंयोगरूपफलाश्रयत्वादिति वाच्यम्। तद्धात्वर्थानधिकरणत्वेन विशेषणीयत्वादित्याहुः। तन्न। घटं जानातीत्यत्र धातो-

ज्ञानमात्रवाचकत्वेन धात्वर्थतावच्छेदकफलाभावेन घटे द्वितीयाया अभावापत्तेः। किं च यत्र मल्लमेषयोरुभयजन्यः संयोगस्तत्र मल्लो मेषं प्रति गच्छतीति न स्यात्। मेषस्य धात्वर्थानधिकरणत्वं तत्रास्ति मल्लनिष्ठक्रियानाश्रयत्वादिति चेत्? तर्हि स्वयं स्वं प्रति गच्छतीति प्रयोगापत्तेस्तस्य मल्लादेर्मेषनिष्ठधात्वर्थानधिकरणत्वेन कर्मत्वात्। एतेन परसमवेतत्वे सति क्रियाजन्यफलशालित्वं कर्मत्वमित्यपास्तम्।

अत्रेदं प्रतिभाति भेदो द्वितीयार्थः। कर्तरि कर्मभेदस्यापि प्रतीतेर्न तथा प्रयोगः। तथा च देवदत्तो ग्रामभिन्नः ग्रामनिष्ठसंयोगजनककर्मानुकूलकृतिमानिति बोधः। मल्लभेदस्य मल्लेऽभावाद् न तथा प्रयोगः। न च वृक्षाद्भूमिं पर्णं पततीति प्रयोगापत्तिः। भूमिभिन्नत्वे सति भूमिनिष्ठसंयोगानुकूलकर्माश्रयत्वस्य सत्त्वादिति वाच्यम्। द्वितीयायाः संयोगविभागाद्यर्थकत्वमते गमिधातुसमभिव्याहाराद् द्वितीयाया एव संयोगबोधकत्वान्न तथा प्रयोगः। न च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति मते घटं जानातीत्यत्र कर्मत्वं घटस्य न स्यादिति वाच्यम्। एकदेशिमतेन तदभिधानात्। न च क्रियाजन्यफलशालित्वं कर्मत्वमिति मते घटे कर्मत्वानुपपत्तिरिति वाच्यम्। क्रियाजन्यत्वस्य द्वितीयार्थत्वाभावात्। किं तु संयोगविभागविषयत्वादेरेव द्वितीयार्थत्वात्। धातोश्च ज्ञानक्रियादिवाचकत्वादिति संक्षेपः।

ननु पाकात्तण्डुलं जानातीति प्रयोगापत्तिः। द्वितीयार्थविक्लित्तिरूपफले पाकजन्यत्वस्य सत्त्वेन तद्वारणाय सुवर्थप्रकारकबोधे सुब्विभक्तिभिन्नपदजन्योपस्थितेः स-

मानविशेष्यतया हेतुत्वं वाच्यं तथा चेदं चैत्रस्य तेन क्रीतत्वादितश्चैत्रक्रयजन्यं यच्चैत्रस्वत्वमिति बोधो न स्यात् । षष्ठ्यर्थस्वत्वे जन्यत्वरूपपञ्चम्यर्थस्यानन्वयात् । न च षष्ठीभिन्ना या सुब्विभक्तिस्तद्भिन्नपदजन्योपस्थितेर्हेतुत्वमिति वाच्यम् । भूतले घटस्येति प्रयोगापत्तेः । घटसम्बन्धे भूतलाधेयत्वसत्त्वादिति चेन्न । पञ्चम्यर्थप्रकारकबोधे षष्ठीभिन्नसुब्भिन्नजन्योपस्थितेर्हेतुत्वात् । सप्तम्यर्थादिप्रकारके पञ्चम्यतिरिक्तसुबर्थप्रकारके वा बोधे सुब्भिन्नजन्योपस्थितेर्हेतुत्वात् । चैत्रेण तण्डुलं पाचयति मैत्र इत्यादौ चैत्रनिष्ठतण्डुलकर्मकपाकीया या कृतिस्तदनुकूलकृतिमान् मैत्र इति बोधः । तण्डुलः कर्मत्वे तच्च पाके स च तृतीयार्थे निष्ठत्वं च णिजर्थकृतौ सा च तिङर्थकृतौ तिङर्थकृतिश्च मैत्रेऽन्वेति । भिद्यते कूसूलः स्वयमेवेत्यादौ भेदानुकूलव्यापाररूपकर्तृत्वं भेदप्रतियोगित्वरूपं कर्मत्वं च एकदा कुसूलेऽन्वेति । धातुना आकाङ्क्षामर्यादया तत्कुसूलभेदव्यक्तिर्बोध्यते । किं वा तत्कुसूलकर्मकभेदत्वेनैव लक्षणया बोध्यते । यथौदनः पच्यते भुज्यते इत्यादौ अतिप्रसङ्गभङ्गाय यत्रौदनकर्मिका व्यक्तिस्तत्र चाकाङ्क्षावैचित्र्यात्पाककृतिमत्कर्तृकैव भोजनव्यक्तिर्भासते इति भिन्नकर्तृकेऽतिप्रसङ्गः ।

आकाशं न पश्यतीत्यत्र लौकिकविषयितया आकाशवचाक्षुषाश्रयत्वस्याभावो भासते । लौकिकविषयिता आकाशस्य प्रतियोगितावच्छेदकावच्छेदकः संबन्धः पश्यामीति विषयतारूपः स्वरूपसंबन्धो व्यधिकरणः । तेनाकाशघटोभयविषयविषयकचाक्षुषसत्त्वेऽपि मैत्रः आकाशं न पश्यतीति प्रयोगस्य नानुपपत्तिः । लौकिकविषयतावन्निरूपितसमवायेनाकाशविषयकचाक्षुषाभावो भासते

गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वान्नाकाशविषयक-त्वमात्रं प्रतियोगितावच्छेदकमित्यपरे ।

रजतं पश्यामीति बलात् भ्रमे विषये लौकिकविष-यता यदि तदा मेघादौ आकाशभ्रमेऽपि तादृशविषयता-सत्त्वात् । आकाशनिरूपित तादृशविषयतावच्चाक्षुषाभावः समानाधिकरणसंबन्धावच्छिन्न एव बुध्यते । शशविषा-णजन्यकार्मुकं नास्तीत्यत्र शशविषाणयोर्जन्यत्वरूपो व्यधिकरणः संबन्धः । तेन शशविषाणजन्यकार्मुकाभावो भासते । यद्वा । अकण्ठे कलङ्कादनङ्गे भुजङ्गादपाणौ कपा-लादभाले न लाक्षादित्यादौ व्युत्पत्तिवैचित्र्यात् कण्ठे-कलङ्काभा इत्यादिबोधवत् प्रकृते नञर्थे प्रतियोगितया-शशपदान्वयो रुचिदत्तादिमते बोद्धव्यः । भूत्यादेरधिक-रणस्यापि शशेऽन्वयात् । एवं पीतः शङ्खो नास्तीत्यादौ पीतत्वशङ्खत्वोभयावच्छिन्ना प्रतियोगिता शङ्खाभा-वयोः संसर्गः । यद्वा पीतत्वस्य शङ्खे समवायेन प्रति-योगितावच्छेदकसंबन्धोल्लेखवत् पीतसंयोगसंबन्धेन वा शङ्खत्वावच्छिन्नाभावबोधः ।

निर्धारणषष्ठ्या भेदोऽभेदश्चार्थः । भेदे चाप्रकृत्य-र्थस्य कृष्णापदार्थस्य प्रतियोगितयान्वयः प्रकृत्यर्थस्याधि-करणत्वेनान्वितस्य प्रतियोगितया भेदेऽन्वयः । भेदश्चाप्र-कृत्यर्थे प्रतियोगितयानन्विते अर्थान्तरे संपन्नक्षीरतमाप-दार्थे प्रकारतयाऽन्वेति संपन्नक्षीरतमा चाभेदसंबन्धेन कृ-ष्णापदार्थेऽभेदे प्रकृत्यर्थः प्रकारतया भेदश्चाप्रकृत्यर्थे कृष्णा-पदार्थे प्रकारतयाऽन्वेति । एवं गवभिन्ना कृष्णा कृष्णभि-न्नसंपन्नक्षीरतमाऽभिन्नेति भिन्नभिन्नविशेष्यको बोधः ।

केचित्तु गवां कृष्णा संपन्नक्षीरतमेत्यादौ च कृष्णभिन्नगोसामान्यभेदोऽभेदश्च षष्ठयर्थः। आकाङ्क्षावैचित्र्याच्च कृष्णभिन्नगोभिन्नसामान्यभेदः संपन्नक्षीरपदार्थेऽन्वेति। संपन्नक्षीरत्वावच्छिन्नत्वं च तयोः सम्बन्धः अभेदश्च कृष्णोपरि अभेदोपरि प्रकृत्यर्थो गौरन्वेति गवाभिन्नकृष्णावच्छिन्नोऽभेदश्च तादृशसंपन्नक्षीरगवाभिन्नकृष्णयोः संबन्धः। एवं च गवाभिन्ना कृष्णा कृष्णभिन्नगोसामान्यभिन्नसंपन्नक्षीराभिन्ना इति बोध इत्याहुः। नन्न। कृष्णभिन्नसामान्यभेदे क्षत्रियाणां कर्णः प्रचुरवदान्येत्याद्यनुरोधात् कर्णभिन्नभेदादौ च शक्तिकल्पने गौरवात्तेः।

अन्ये तु अभेदः षष्ठयर्थः स प्रकारतया क्षीरपदार्थकृष्णपदार्थयोरन्वेति गवाभिन्नकृष्णगवाभिन्न (तमयोश्च व्याप्यत्वविशिष्टव्यापकत्वविशिष्टयोर्भेदो) (वा भिन्नसंपन्नक्षीरतमा अभिन्नेति बोध इत्याहुः) (क्षीरपदार्थयोर्गोपदार्थस्याधिकरणत्वे) (स्वाधिकरणतयान्वयः। भेदाभेदयोः) (गवाभिन्नकृष्णशंपन्नक्षीर) चैत्रेण पच्यते तण्डुलइत्यादौतृतीयार्थः कृतिः। सा च विषयत्वरूपजन्यत्वसंबन्धेन पाके स चात्मनेपदार्थे फले। एवं च चैत्रकृतिविषयपाकजन्यफलाश्रयस्तण्डुल इति बोधः। घटं ज्ञानातीत्यत्र घटविषयकवर्तमानज्ञानाश्रय इति बोधः। चैत्रेण ज्ञायते घट इत्यत्र निष्ठत्वं तृतीयार्थः। विषयत्वमाख्यातार्थः। तेन घटश्चैत्रनिष्ठवर्तमानज्ञानविषय इति बोधः।

( ) एतादृशचिन्हमध्यमध्यगतो ग्रन्थो मूलपुस्तके त्रुटितः पुनः कान्तराभावात्तथैवात्रवस्थापितः।

प्राञ्चस्तु तृतीयार्थो वृत्तित्वं तच्च कृताचाख्यातार्थे तत्र पाकोऽपि प्रकारतयान्वेति । आख्यातार्थे धात्वर्थस्य प्रकारतयैव भानात् । तथा च चैत्रवृत्तिपाकीयकृतिविषयस्तण्डुल इति बोधः । संख्याकालाद्यतिरिक्ताख्यातार्थरूपभावनाया इतराननन्वितप्रथमान्तपदोपस्थाप्येऽन्वयस्तत्रैवाख्यातार्थसंख्यान्वयस्तेन चैत्रेण स्थियते चैत्राभ्यां स्थीयते चैत्रैः स्थीयते इत्यत्र संख्याया अनन्वयेन साधुत्वार्थं एकवचनप्रयोगोऽपि सङ्गच्छते प्रथमातिक्रमे कारणाभावात् । अत्र धात्वर्थस्य विशेष्यत्वादितराननन्वितत्वेन तत्र संख्यान्वयवारणाय प्रथमान्तदोस्थाप्यत्वमुक्तम् । चन्द्र इव मुखमित्यत्र चन्द्रे भावनान्वय वारणायेतराननन्वितत्वमुक्तम् ।

यत्तु चन्द्रस्येतरान्वयान्निराकाङ्क्षत्वादेव न तत्र भावनान्वय इत्याह । तन्न । नीलघटं जानातीत्यत्र कर्मत्वान्वितेऽपि घटे नीलान्वयवदितरप्रकारीभूतेऽपि चन्द्रे भावनायाः प्रकारतयाऽन्वये निराकाङ्क्षत्वाभावाद्विशेष्यतयैवान्यत्र चन्द्रस्यान्वये निराकाङ्क्षत्वमिति दिक् ।

कृञश्च यत्नवाचकत्वं न तद्वाच्यो व्यापारस्तेन तदाश्रयमात्रे बीजादौ बीजं करोतीति न प्रयोगः । रथादौ च गमनकर्तृपदप्रयोगो गौणः ।

ननु कृञो यत्नवाचकत्वे पाकं करोतीत्यत्र पाककर्मकृतिकृतिमान् इति बोधः स्यादिति चेन्न । तत्राख्यातस्याश्रयत्वे लक्षणाङ्गीकारस्योभयसंमतत्वात् । चैत्रो गन्ता गतो ग्राम इत्यादौ सामानाधिकरण्यानुभावात् कर्तृकर्मणी कृद्वाच्ये । तथा च चैत्रो गमनकृतिमदभिन्नोग्रामो गमनफलवदभिन्न इति बोधः । कृदर्थैकदेशकृतौ

फले च धात्वर्थस्यान्वयः, आकाङ्क्षावशान्मैत्रस्य नप्ते-त्यादाविव । न च धातूत्तरप्रत्ययत्वेनैव कृतौ शक्तिः, पाचकादिपदे निरूढलक्षणेति वाच्यम् । भावकृतोऽपि कृतिवाचकतापत्तेः । न चैत्रः पक्तेत्यत्र पाककृतिमान् चैत्र इत्येवान्वयबोधात् सामानाधिकरण्यमसिद्धम् । न च नामार्थकृतेर्भेदेनान्वयासम्भवः । अर्थवदधातुरप्रत्यये-त्यत्र कृत्प्रत्ययव्यावृत्तस्यैव नामत्वादिति वाच्यम् । भोक्ता तृप्यतीत्यादौ अन्वयप्रसङ्गाद् । भोजनकृतेस्तदा-श्रयत्वाभावात् । यदि च तत्र कृतिलक्षणया कृत्या-श्रयः तृप्यतीति बोधादन्यत्र कृतेर्भेदेनोक्तरीत्यान्वये न बाधकं तदा कृतौ शक्तिरनिवार्या लाघवात् । न च भोक्ता गुण इति प्रयोगापत्तिः । पचति गुण इति प्रयोगवदेत-स्यापि प्रत्ययोपस्थाप्यकृतेः समवायसम्बन्धेनैवान्वयेन वारणादिति दिक् ।

प्राभाकरास्तु क्रियानुकूलव्यापारो धात्वर्थः । आ-श्रयत्वमाख्यातार्थः । तथा च तण्डुलं पचतीत्यत्र तण्डुल-कर्मकक्रियानुकूलव्यापाराश्रय इति बोधः । तन्न । यत्नान-नुभवप्रसङ्गात् ।

फलं धात्वर्थो व्यापारश्चाख्यातार्थो वृत्तिमत्त्वं तद्द्वितीयार्थः । तथा च तण्डुलवृत्तिफलानुकूलव्यापारवा-निति बोधः । एवमन्यत्रापि इति मण्डनमिश्राः ।

संसर्गाभावोऽन्योऽन्याभावश्च नञर्थः । तत्रान्वयि-तावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं तेन नीलघटवति घटो नास्तीति न प्रयोगः । न वा नीलो न घट इति प्रयोगः । न च कम्बुग्रीवादिमान्नास्तीत्यत्रान्व-यितावच्छेदकस्य गुरुतया प्रतियोगितानवच्छेदकत्वान्नेयं

व्युत्पत्तिरिति वाच्यम् । गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वाङ्गीकारादिति केचित् ।

परे तु अन्वयितावच्छेदकसमव्याप्तधर्मावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिसिद्धं कम्बुग्रीवादिमान्नास्तीत्यत्र घटत्वं तादृशम् । अतस्तदवच्छिन्नप्रतियोगिता संसर्गतया भासते इत्याहुः । तन्न । गुणे सत्ता नास्तीति प्रयोगापत्तेः । विशिष्टसत्तात्वस्यान्वयितावच्छेदकसमनियतत्वेन तदवच्छिन्नप्रतियोगिताकाभावस्य गुणे सत्त्वात् ।

यत्तु अन्वयितावच्छेदकसमनियतो यः कश्चिद्धर्मस्तवच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिसिद्धं वाच्यम् । अन्यथा कम्बुग्रीवादिमत्त्वस्यापि अन्वयितावच्छेदकसमनियतत्वेन दोषतावस्थ्यात् । तथा चान्वयितावच्छेदकव्यापको यः कश्चित् धर्मः, तदवच्छिन्ना प्रतियोगिता संसर्गलभ्येत्याह । न चोपसर्गवन्नञोऽपि तात्पर्यग्राहकत्वेन द्योतकत्वाद् भूतले न घट इत्यादौ घटादिपदानां घटात्यन्ताभावे लक्षणयैव बोधे किमर्थं नञः शक्तिरिति वाच्यम् ।

भूतलं न घट इत्यत्र नामार्थस्यान्योन्याभावस्य भेदेन भूतलादावन्वयात् । अभाववति लक्षणायां भूतलविशेष्यकभेदप्रकारकबोधस्यानुभवप्रसङ्गात् ।

किं च नेदं चैत्रस्य यत्र सुब्विभक्तौ लक्षणानङ्गीकारेण चैत्रस्वत्वाभावबोधो न स्यात् । न च सुब्विभक्तेरपि सुबिभक्त्यर्थान्तरे लक्षणानङ्गीकारान्नोक्तदोष इति वाच्यम् । प्रातिपदिकस्यापि तद्विशिष्टेऽर्थे लक्षणयैव बोधोपपत्तौ कारकादीनामपि शक्त्यभावापत्तेः ।

षष्ठ्यर्थः स्वत्वं न तु स्वामित्वं तेनेदं चैत्रस्येत्यादौ नञा स्वामित्वस्य निरूपकतासम्बन्धेनाभावो बोधनीय-

त्त्वस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेनाभावाप्रसिद्ध्या बोधासम्भवो निरस्तः। स्वत्वस्य षष्ठ्यर्थत्वेनाश्रयतासम्बन्धेन तस्याभावबोधसम्भवात्।

एवं जन्यत्वं ज्ञाप्यत्वं अवधिमत्त्वं च पञ्चम्यर्थो न जनकत्वं ज्ञापकत्वमवधित्वं च।

एवं सप्तम्यर्थोऽप्याधेयत्वं न त्वाधारत्वमित्यादि द्रष्टव्यम्।

ननु नञः शक्तिवत् प्रजयतीत्यादौ प्रकर्षजयबोधादुपसर्गेऽपि शक्तिरनिवार्येति चेन्न। उपसर्गस्य नामत्वेन धात्वर्थे तदन्वयासम्भवाद्धातोरेव लक्षणाङ्गीकारात्। न च धातोः प्रकर्षे लक्षणायां जयस्य शक्यत्वेन धात्वर्थे प्रकृष्टजयबोधे युगपद्वृत्तिद्वयविरोधः प्रकृष्टजये लक्षणायां तु तस्य शक्यत्वेन शक्यसम्बन्धरूपलक्षणासम्भव इति वाच्यम्। अभेदोऽपि स्वस्मिन् स्वसम्बन्धस्य सत्त्वाच्छक्यतावच्छेदकान्यरूपेण तद्बोधे लक्षणाङ्गीकारात्। यथा द्रव्यपदस्य घटत्वेन बोधे लक्षणेति दिक्।

ननु चेष्टाप्रमाणं पृथक् स्वीकरणीयं तया संख्यादिरूपार्थान्वयबोधस्य सर्वसिद्धत्वात्। कियन्तो घटा इति पृष्टे दशाङ्गुलीप्रदर्शने दशत्वस्य घटे ज्ञानात्। एवं चेष्टाविशेषेण द्रव्यविशेषज्ञानात् मानान्तरस्य तदानीमभावात् सिद्धं प्रमाणान्तरमिति चेन्न। तादृशचेष्टया तदर्थबोधकशब्दानुमानादेवार्थबोधसम्भवान्मानान्तरकल्पने गौरवापत्तेः।

एवं दिवाभुञ्जानत्वे सति पीनत्वादित्यादिहेतुना रात्रिभोजनानुमानसम्भवेन नार्थापत्तिरपि मानान्तरम्। न च सम्भवोऽपि प्रमाणान्तरं स्वीकार्यं शतं घटाः सन्ति इति

ज्ञानाद्दशत्वज्ञानं जायते नैतदनुमानात्सम्भवति शत-संख्याया दशत्वसङ्ख्याव्यभिचरितत्वादिति वाच्यम् । पर्याप्तिरूपसम्बन्धेन दशत्वसङ्ख्याव्यभिचारितत्वेऽपि समवायेनाव्यभिचरितत्वात् । यद्वा अत्र शतं घटाः स-न्तीत्यवगतेऽयं देशो दशघटवान् शतघटवत्त्वादित्यादिप्र-कारेणानुमानसम्भवात् ।

ऐतिह्यमप्यविदितकर्तृकः शब्दः प्रमाणं चेच्छब्द-प्रमाणमेव नो चेदप्रमाणमेवेति सिद्धं चत्वार्येव प्रमाणा-नीति ।

ननु प्रमात्वसिद्धौ सर्वमिदं स्यात् । न च तत्प्रत्य-क्षेण शक्यग्रहम् । ज्ञानस्यातीन्द्रियत्वात् । अन्यथा ज्ञानत-ज्ज्ञानादिधारा स्यान्न तु विषयान्तरसंचार इति । स्वप्र-काशमेव ज्ञानं सर्वं घटमहं जानामीत्याकारकं मितिमातृ-मेयविषयकमित्याहुः । तन्न ।

चाक्षुषज्ञाने रूपवत एव द्रव्यस्य योग्यत्वादुत्पद्यमा-नज्ञानस्य पूर्वमसिद्धत्वादसन्निकृष्टत्वाच्च । ज्ञाततायाः नि-रस्यत्वात्तया ज्ञानानुमानमिति भट्टमतं निरस्तप्रायम्, ज्ञा-नरूपसाध्याप्रसिद्ध्यानुमानासम्भवाच्च । तस्मान्न स्वप्रका-शेन ज्ञाततालिङ्गकानुमित्या वा प्रमात्वग्रहः सम्भवति । किं तु मनसैवेति मुरारिमिश्राः ।

तथा हि ज्ञानं मानसमित्युभयसम्मतं तथा च घट-ज्ञानानन्तरं मनः संयुक्तसमवायेन तज्ज्ञानं जायते तत्र घटत्वविशिष्टस्य पूर्वमुपस्थितत्वेन भानं निर्विवादं घटत्व-वतो ज्ञाने सम्बन्धो घटत्ववद्विशेष्यता सा चानुपस्थिता साचानुसम्बन्धविधया भासते । सम्बन्धस्यानुपस्थितस्य भानमुभयसिद्धम् । अभावत्ववत् प्रकारत्वस्यानुपस्थितस्य भानं तु नैयायिकानामिष्टमेवेति ।

जानां भाव्याकाङ्क्षाया इतरत्र च कथम्भावाकाङ्क्षायाः सत्त्वात् । अन्यतराकाङ्क्षातश्चोभयाकाङ्क्षा बलीयसीति वक्ष्यते । ततश्च दर्शपूर्णमासार्थत्वमेव युक्तं न स्वतन्त्रफलार्थत्वमिति । तदुक्तम्* द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति । (४।३।१)

(८९) अत्र द्रव्ये फलश्रुतिर्यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति एवमाद्या । संस्कारे फलश्रुतिर्यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इत्येवमाद्या । कर्मणि फलश्रुतिर्वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानुयाजा इज्यन्ते इत्याद्या । कर्मपदं (अ)चारादुपकारकर्मपरं द्रष्टव्यम्, संस्कारकर्मणः पृथक् सङ्कीर्तनादित्यास्तां तावत् ।

(९०) तदिदं प्रकरणं क्रियाया एव विनियोजकम्, न द्रव्यगुणयोः । तयोस्तु क्रियायोगाद्विनियोजकम् । कुत इति चेत् शृणु ।

(९१) यजेत स्वर्गकाम इत्यत्राख्यातांशेनार्थीभावना विधीयते-भावयेदिति । सा चांशत्रयमपेक्षते—किं भावयेत्केन भावयेत्कथं भावयेदिति । तत्र भाव्याकाङ्क्षायां षष्ठाद्यन्यायेन स्वर्गो भाव्यतया ऽन्वेति—स्वर्गं भावयेदिति । करणाकाङ्क्षायां समानपदोपात्तो यागो भावार्थाधिकरणन्यायेन (२।१।१) करणतया ऽन्वेति-यागेन स्वर्गं भावयेदिति । ततः कथमिति कथम्भावाकाङ्क्षायां यत्सन्निधौ पठितमश्रूयमाणफलकं च

(अ) तत्त्वं च यागाङ्गद्रव्याद्यनुद्देशेन विहितत्वम् ।

क्रियाजातं तदेवोपकार्याकाङ्क्षयेतिकर्तव्यतात्वेनान्वयमनुभवितुं योग्यं क्रियाया एव लोके कथम्भावाकाङ्क्षायामन्वयदर्शनात्। न हि कुठारेण छिन्द्यात्कथमित्याकाङ्क्षायां हस्तइति केवलमुच्चार्यमाणोऽपि हस्तोऽन्वयं प्राप्नोति किं तर्हि हस्तेनोद्यम्य निपात्येति उच्चार्यमाणे उद्यमननिपातने एव। हस्तोऽपि तद्द्वारेणैवान्वयं प्राप्नोतीति सार्वजनीनमेतत्।

(९२) किं च कथम्भावाकाङ्क्षा नाम करणगतप्रकाराकाङ्क्षा [क]थमः प्रकारवाचित्वात्। सामान्यस्य भेदको विशेषः प्रकारः। सामान्यं च क्रियारूपमेवाख्यातेनोच्यते। यजेत स्वर्गकाम इत्यस्य ह्ययमर्थः—यागेन तथा कर्त्तव्यं यथा स्वर्गो भवतीति। क्रियासामान्यस्य च विशेषः क्रियैव भवति। न हि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति। एवं च करणगतक्रियाविशेषाकाङ्क्षापरनामधेयकथम्भावाकाङ्क्षायां क्रियैवान्वेतीति युक्तम्। स च करणगतः क्रियाविशेषोऽन्वाधानादिब्राह्मणतर्पणान्त क्रियारूप एवेति युक्तं तस्य प्रकरणेन ग्रहणम्। तस्य चकरणगतत्वं तदुपकारकत्वमेव, तेन विना यागेनापूर्वाजननात्। न ह्युद्यमननिपातनव्यतिरेकेण कुठारेण द्वैधीभावो जन्यते। तत्सिद्धं कथम्भावाकाङ्क्षायां क्रियैवान्वेतीति युक्तम्।

(९३) अत एव द्रव्यदेवतयोर्यागसंपादनद्वाराऽन्व-

---

(क) 'कथम्' इत्यत्र 'थमु'प्रत्ययस्य।

यः साम्प्रदायिकैरुक्तः। विकृतौ च कथम्भावाकाङ्क्षायामुपकारसम्पादनमतिदिश्यत इत्युक्तम्। यदि च कथम्भावाकाङ्क्षायां सिद्धस्वस्त्वन्वययोग्यं स्यात् तदा सम्पादनपर्यन्तं धावनं ग्रन्थकृतामनर्थकं स्यात्। अतश्च क्रियाया एव इतिकर्त्तव्यतात्वम्, कथम्भावाकाङ्क्षागृहीतस्येतिकर्त्तव्यतात्वात्, इतिशब्दस्य च प्रकारवाचित्वात्। 'कर्तव्यस्य' 'इति' प्रकार 'इतिकर्तव्यता'। प्रकारश्च सामान्यस्य भेदको विशेष इत्युक्तम्। कर्त्तव्यस्य च विशेषः कर्त्तव्य एव भवतीति न सिद्धस्य वस्तुन इतिकर्त्तव्यतात्वम्, किन्तु क्रियाया एव। सिद्धस्य तु द्रव्यादेः केवलमङ्गत्वम्। तदपि श्रुत्यादिना न तु प्रकरणात्, यथाहुः।

नावान्तरक्रियायोगादृते वाक्योपकल्पितात्।
गुणद्रव्ये कथम्भावैर्गृह्णन्ति प्रकृताः क्रिया इति।

(तन्त्रवार्तिक २९३)

अत एव बर्हिर्देवसदनं दामीत्यादिमन्त्राणां लिङ्गादङ्गत्वम्, न तु प्रकरणादित्युक्तम् अर्थवादाधिकरणपूर्वपक्षसमाप्तौ राणके। क्वचिद्द्रव्यस्येतिकर्त्तव्यतात्वाभिधानमङ्गत्वाभिप्रायं द्रष्टव्यम् बहुग्रन्थस्वरसादुक्तयुक्तेश्चेति। तत्सिद्धं प्रकरणं क्रियाया विनियोजकमिति।

---

(९४) तच्च प्रकरणं द्विविधम् । महाप्रकरणमवान्तरप्रकरणं चेति । तत्र [अ]फलभावनायाः प्रकरणं महाप्रकरणम् । तच्च प्रयाजादीनां ग्राहकम् । तच्च प्रकृतावेव यत्र समग्राङ्गोपदेशः सा प्रकृतिः यथा दर्शपूर्णमासादि । तत्र चोभयाकाङ्क्षारूपं प्रकरणं सम्भवति आकाङ्क्षानुपरमात् । विकृतौ तु न प्रकरणं सम्भवति । यत्र न समग्राङ्गोपदेशः सा प्रकृतिः, यथा सौर्यादिः । तत्र च यान्यपूर्वाण्यङ्गानि विद्यन्ते उपहोमादीनि[क] तेषां न प्रकरणं विनियोजकम् । तत्र यद्यपि तेषां किं भावयेदित्यस्त्याकाङ्क्षा तथापि प्रधानस्य न कथम्भावाकाङ्क्षाऽस्ति प्राकृतैरेवाङ्गैर्निराकाङ्क्षत्वात् । न च "प्राकृतानामङ्गानामत्रापठितत्वेनाप्रत्यक्षत्वाद्वैकृतानां तु पठितत्वेन प्रत्यक्षत्वात्तैरेवाकांक्षोपशम" इति वाच्यम् । तेषां पठितत्वेऽपि अक्लृप्तोपकारत्वेन झटित्याकाङ्क्षोपशमनेऽसामर्थ्यात्, प्राकृतानां तु क्लृप्तोपकारत्वेन तच्छमने सामर्थ्यात्[च] । न चात्र तेषामुपस्थापकाभावः उपमितिलक्षणप्रमाणेन तेषामुपस्थितत्वात् । सौर्यवाक्ये हि दृष्टे ओषधद्रव्यत्वेन एकदेवत्यत्वेन सादृश्येन आग्नेयवाक्यमुपमीयते [ट]गवू-

---

(अ) फलभावना प्रधानभावना ।

(क) उपहोमा अम्बायै स्वाहा दुलायै स्वाहेत्यादयः ।

(च) क्लृप्ताक्लृप्तयोः क्लृप्तस्यान्तरङ्गत्वादिति भावः ।

(ट) दृष्टगौर्नागरिकः गोसदृशो गवय इति श्रुतातिदेशवाक्यो वने गवयमुपलभ्यानेन सदृशी मदीया गौरिति यथोपमिनोति तद्वदित्यर्थः । मीमांसकाः स्वगवि उपस्थितस्य गवयस्य सादृश्यम्, नैयायिकास्तु दृष्टे गवये गोसादृश्यम्, करणत्वेन स्वीकुर्वन्ति ।

यद्दर्शनात् गोः उपमानवत्। तस्मिंश्चोपमिते तेन तदर्थो ज्ञायते। सा च त्र्यंशा भावना। तत्र सौर्यवाक्ये भावनायाः भाव्यकरणयोः सत्त्वादितिकर्त्तव्यताकाङ्क्षायामुपकारपृष्ठभावेनाग्नेयेतिकर्त्तव्यताऽतिदिश्यते,—सौर्य्ययागेन ब्रह्मवर्चसं भावयेदाग्नेयवदिति। तथा च तयैवाकाङ्क्षोपशमान्न विकृतेः प्रकरणमस्ति। अन्यतराकाङ्क्षारूपस्थानादेव चापूर्वाङ्गग्रहणम्। न च "प्राकृताङ्गग्रहणमेव विकृतौ प्रकरणात् किं न स्यादिति" वाच्यम्। तेषामपि प्रकृत्युपकारकतयाऽऽकांक्षोपशमात्।

(९५) "ननु प्राकृतानामङ्गानामाकाङ्क्षाभावेन तेषां विकृतौ सम्बन्धः केवलं स्थानात् स्यात्, अपूर्वाणां त्वाकाङ्क्षासत्त्वाद्विकृतेरप्याकाङ्क्षावत्त्वात्तेषां तत्सम्बन्धः प्रकरणात्स्यात्, प्रकरणं च स्थानात् झटिति विनियोजकमित्यपूर्वाणामेव प्रथमं सम्बन्धः स्यात्, न प्राकृतानामिति"।

(९६) उच्यते। सत्यं प्रकरणं झटिति विनियोजकम्। तथापि (त)प्रमाणबलाबलात्प्रमेयबलाबलस्य ज्यायस्त्वात् उक्तविधयोपस्थितत्वात् प्राकृतानामेव सम्बन्धो युक्तः, क्लृप्तोपकारत्वात्, न वैकृतानां कल्प्योपकारत्वात्। विकृतेश्चोपकारकपदार्थाकाङ्क्षा न प-

(त) प्रमेयस्य सिद्धत्वेन तदुत्तरभावि प्रमाणसिद्ध्यपेक्षया तस्यान्तरङ्गत्वादिति भावः। यद्यपि प्राकृतानां विनियोजकं 'स्थानम्' वैकृतानां विनियोजकात् 'प्रकरणात्' लघीयः, तथाऽपि प्राकृतरूपप्रमेयस्य वैकृतरूपप्रमेयाद् बलीयस्त्वात् प्राकृतानामेव सम्बन्धः प्रथमङ्गृह्यते इति भावः।

दार्थमात्राणामिति युक्तः(प) प्रथमं प्राकृताङ्गसम्बन्धः। ततश्च न विकृतौ प्रकरणं विनियोजकम्। यत्तु विकृतौ प्राकृताङ्गानुवादेन विधीयते–यथौदुम्बरो यूपो भवतीति यूपानुवादेन औदुम्बरत्वम्–तत्प्रकरणाद् गृह्यते।

(९७) "ननु न तत्प्रकरणाद्गृह्यते अक्रियात्वात्। क्रियाया एव प्रकरणग्राह्यत्वादिति" चेत्–सत्यम्। तथापि तु तावद्विधीयमानस्यौदुम्बरत्वस्यास्त्येवाकाङ्क्षा-किं भावयेदिति। न च "यूपानुवादेन तस्य विधीयमानत्वाद् यूपस्य चादृष्टरूपत्वात्तेनैवौदुम्बरत्वस्य नैराकाङ्क्ष्यम् आहवनीयेनेवाधानस्येति" वाच्यम्। यूपस्य केवलादृष्टरूपत्वाभावात्। तस्य हि तद्रूपत्वे खदिरत्वादिकं केवलादृष्टार्थं स्यात्। न च तत्सम्भवति। तथा सति खादिराभावे प्रतिनिधित्वेन कदरोपादानं न स्यात् अदृष्टार्थस्य प्रतिनिध्यभावात्, न हि खदिरजन्यमदृष्टं कदरेण क्रियत इत्यत्र प्रमाणमस्ति। अत एव नादृष्टार्थानां प्रतिनिधिः। तदुक्तम् *न देवताग्निशब्दक्रियमन्यार्थत्वादिति। अन्यार्थत्वादिति अदृष्टार्थत्वात्। प्रतिनिधित्वेन चोपादानं कदरादेरुक्तं ग्रन्थेषु। तस्मान्न यूपस्य केवलादृष्टरूपत्वम्, अपि तु दृष्टादृष्टसंस्कारगुणो यूप इति साम्प्रदायिकाः। एवं चौदुम्बरत्वस्य न यूपमात्रेण नैराका-

(प) येन वैकृतानामेव प्रथमं सम्बन्धः स्यादिति शेषः।

* कात्या १ अ. ६ कण्डिका।

ङ्क्ष्यम् दृष्टसंस्कारस्य(ट) प्रकारान्तरेणापि सम्भवात् अतश्चास्ति औदुम्बरत्वस्याकाङ्क्षा । विकृतेरप्यस्ति(च) कथम्भावाकाङ्क्षा। सा च तदा शाम्यति यदोपकारास्तत्पृष्ठभावेन च पदार्था अन्वीयन्ते। न तूपकारमात्रान्वयेन शाम्यति। अतश्च यथेन्द्रियभावनायाः करणाकाङ्क्षा दध्नः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्वयं यावदनुवर्तते न तु दध्यन्वयमात्रेण निवर्त्तते, आश्रयत्वेन च गृह्यमाणो होमः करणाकाङ्क्षयैव गृह्यत इत्युच्यते, न त्वाश्रयाकाङ्क्षानाम् चतुर्थ्यस्ति,—एवं विकृतेः कथम्भावाकाङ्क्षा नोपकारान्वयमात्रेण निवर्तते, उपकारपृष्ठभावेन यावत्पदार्थान्वयमनुवर्तते । अतश्चोपकारपृष्ठभावेन गृह्यमाणाः पदार्थाः कथम्भावाकाङ्क्षयैव गृह्यन्ते । तत्र प्राकृताः पदार्थाः कथम्भावाकाङ्क्षया गृह्यमाणा अपि न प्रकरणग्राह्याः (त)प्रकृत्युपकारकतया तेषामाकाङ्क्षाभावात् । औदुम्बरत्वादयस्तु अन्यानुपकारकतया साकाङ्क्षाः पशुनियोजनयूपपृष्ठभावेन यावत्खादिरत्वमायाति तावद्विधीयन्ते इति युक्तम् तेषां प्रकरणाद् ग्रहणमुभयाकाङ्क्षासत्त्वात् । यदि हि यूपपृष्ठभावेन खादिरत्वं विहितं स्यात् ततो विकृतेराकाङ्क्षाभावात्

(ट) काष्ठान्तरनिर्मितेन यूपेनेति भावः ।

(च) अ । उभयाकाङ्क्षायाः सत्वात् प्रकरणस्यावतारः

(त) अपि तूपमानेनेतिशेषः ।

औदुम्बरत्वं न प्रकरणग्राह्यं स्यात् । न चैतदस्ति चोदकस्य खादिरत्वाविषयत्वात् ।

(९८) "ननु यदि यावत्खादिरत्वमायाति तावदेवौदुम्बरत्वं विधीयते तदा तेन खादिरत्वबाधोऽप्राप्तबाधः स्यात् तार्तीयबाधवत् । तथा हि बाधो द्विविधः अप्राप्तबाधः प्राप्तबाधश्चेति । तत्र तार्तीयो बाधोऽप्राप्तबाधः । तत्र हि यावद्दुर्बलेन प्रमाणेन विनियोगः कर्तुमारभ्यते तावदेव बलवत् प्रबलप्रमाणेन विनियोगः क्रियते इति तद्बोधितेनेतरबाधोऽप्राप्तबाधः, दुर्बलप्रमाणस्याप्रवृत्तत्वात् । प्राकृतस्य त्वङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानादर्थलोपात्प्रतिषेधाद्वा यो बाधः स प्राप्तबाधः यथाप्राकृतानां कुशानां प्रतिकूलशराम्नानात्, यथा वाऽवघातस्य (क)कृष्णलेषु वैतुष्यरूपप्रयोजनलोपात्,यथा वा पित्र्येष्टौ होतृवरणस्य न होतारं वृणीत इति प्रतिषेधात् । औदुम्बरत्वेन च खादिरत्वबाधः प्राप्तबाध एव वक्तव्यः, शरकुशन्यायेन चोदकस्य च खादिरत्वाविषयत्वे (ख)प्राप्त्यभावात् तदनुपपत्तिः स्यादिति" ।

(९९) उच्यते । तार्तीयप्रमाणविनियुक्तेनेतरस्य बाधनं तावदप्राप्तबाधनम् । प्रकरणं च तार्तीयम् । तेन तद्विनियुक्तौदुम्बरत्वेनेतरस्य बाधनमप्राप्तबाध एव । न हि वैकृतेन प्राकृतबाधः प्राप्तबाध एवेति कुलधर्मः

(क) सुवर्णशतकृष्णलेषु ।
(ख) तस्याऽदृष्टविषयत्वात् ।

वस्तुतस्तु प्राप्तबाध एवायम्। न च "खादिरत्वस्य चोदकाविषयत्वेन प्राप्त्यभावात् कथं तद्बाधः प्राप्तबाधः, तद्विषयत्वे वा तेनैव निराकाङ्क्षत्वान्नौदुम्बरत्वस्य प्रकरणं विनियोजकं स्यादिति" वाच्यम्। न हि प्राप्तबाधस्थले चोदकेन पदार्थाः प्राप्यन्ते। तथा सति शास्त्रप्राप्तत्वेन बाधो न स्यात्। किं तर्हि तानेव पदार्थान्वस्तुतः प्रापयति ये विकृतौ न वा बाध्यन्ते ते च पदार्थाः (अ)प्रकृतिवच्छब्देन प्राप्यन्ते इति भवति पुरुषस्य भ्रान्तिः—यथा प्रकृतौ कृतं तथा विकृतौ कर्त्तव्यमिति सर्वे पदार्थाः प्राकृताः कर्त्तव्या इति। अतश्च भ्रान्तिप्राप्ताः खादिरत्वादयः शास्त्रप्रतिपन्नैरौदुम्बरत्वादिभिर्बाध्यन्ते इति भवति तद्बाधः प्राप्तबाधः। न च भ्रान्तिप्रतिपन्नेन वैधी आकाङ्क्षा निवर्तयितुं शक्यते(क)। तस्मादुक्तमुक्तमुभयाकाङ्क्षारूपप्रकरणसम्भवाद्विकृतौ प्राकृताङ्गानुवादेन विधीयमानानामौदुम्बरत्वादीनां प्रकरणं विनियोजकमिति।

(१००) एवं पृषदाज्येनानुयाजान्यजतीति प्राकृतानुयाजानुवादेन विधीयमानं पृषदाज्यमपि प्रकरणाद्विकृत्यङ्गमिति केचिदाचार्याः। अस्मत्तातचरणास्त्वेवमाहुः। पृषदाज्यं हि अनुयाजानुवादेन विधीयते। तत्स्वरूपे चानर्थक्यप्राप्तौ तेन विकृत्यपूर्वं लक्षयितुं युक्तं विप्रकर्षात्, किन्तु दीक्षणीयावाङ्गियमन्यायेन

(अ) प्रकृतिवद्विकृतेरित्यत्र।
(क) येनोभयाकाङ्क्षाभावात् न प्रकरणं विनियोजकं स्यादिति भावः।

स्वापूर्वमेव लक्षयितुं युक्तं सन्निकर्षात्। अत एवोत्पवनादीनां प्रोक्षणाद्यपूर्वप्रयुक्तत्वमुक्तम् नवमे। अतश्च विधीयमानस्य पृषदाज्यस्य वाक्यप्रतिपन्नेनानुयाजापूर्वेणैव नैराकाङ्क्ष्यात् न प्रकरणाद्विकृत्यपूर्वार्थत्वमिति। वयन्त्वङ्गीकृत्यापि विकृत्यर्थत्वं ब्रूमः। भवतु वा विकृत्यर्थत्वं पृषदाज्यस्य। तथापि न प्रकरणं विनियोजकं भवति। यूपपृष्ठभावेन हि यावत्खादिरत्वमायाति तावदौदुम्बरत्वविधानादुभयाकाङ्क्षासम्भवाद्युक्तः प्रकरणविनियोगः। एवं यावदनुयाजपृष्ठभावेन आज्यमायाति तावदेव यदि पृषदाज्यं विधीयते तदोभयाकाङ्क्षासम्भवात्प्रकरणविनियोगो भवेत्। न त्वेतदस्ति। न हि पृषदाज्यं नाम द्रव्यान्तरं किंचिदस्ति यदाज्यस्थानापन्नं विधीयते, औदुम्बरत्वमिव खादिरत्वस्थानापन्नम्, पृषच्छब्दस्य पृषन्मणिरित्यादौ चित्रतावाचित्वेन दृष्टत्वात्, पृषदाज्यशब्दस्य चित्राज्यवाचित्वात्। अत एव निगमेषु आज्यपानित्येतद्वक्तव्यं न तु पृषदाज्यपानित्युक्तम्। न च "यावत्प्राकृतमाज्यमायाति तावदेव चित्राज्यविधानात् प्रकरणविनियोगः सम्भवति" इति वाच्यम्। न हि पृषदाज्यशब्देन चित्रतागुणविशिष्टमाज्यं विधीयते। विशिष्टविधाने गौरवापत्तेः, किं तु प्राकृताज्यानुवादेन चित्रता गुणमात्रं विधीयते, लोहितोष्णीषा ऋत्विजः प्रचरन्तीतिवत्(च)। तदुक्तं दशम-

(च) अत्र हि ऋत्विगनुवादेन लोहितोष्णीषत्वस्य विधानात् प्राकृताङ्गानुवादेन गुणमात्रं विधीयते यथा तद्वदित्यर्थः।

चतुर्थचरणांते-न वा गुणशास्त्रत्वादिति। प्राकृतस्यैवाज्यस्य चित्रता गुणमात्रविधानमिति च शास्त्रदीपिका*। एवं च विकृतेः प्राकृतेनाज्येन क्लृप्तोपकारैश्चानुयाजैर्नैराकांक्ष्ये पश्चाद्विधीयमानस्य चित्रतागुणस्योपहोमाद्यपूर्वाङ्गात् न प्रकरणं विनियोजकं सम्भवति । यदि हि प्राकृतस्य कस्य चिद्गुणस्य स्थाने चित्रता गुणो विधीयेत तदा स गुणो यावदायाति तावद्विकृतेर्नैराकांक्ष्याभावात् चित्रतागुणस्य च तावदेव विधानादुभयाकांक्षासम्भवात् प्रकरणविनियोगो भवेत् । न च तादृशः प्राकृतो गुणोऽस्ति, आज्यस्यानुयाजानां च चित्रतागुणात्प्रागेव विधानात्, तस्य तत्स्थानापन्नत्वाभावात् । न च "आज्यपृष्ठभावेन यावत्प्राकृते निर्गुणत्वमायाति तावदेवास्य विधानात्प्रकरणसम्भव" इति वाच्यम् । निर्गुणत्वस्याविहितत्वेन पाणिकण्डूयनवदनङ्गत्वाद् विकृतेस्तदाकांक्षाभावात् । तथा हि ज्योतिष्टोमे दक्षिणादानसमये विहितकृष्णाविषाणत्यागस्य द्विरात्रादिषु चोदकप्राप्तस्य प्रथमेऽह्नि अननुष्ठानम् । उत्तरेऽह्नि दक्षिणादानपूर्वकालीनैः पदार्थैः कृष्णाविषाणकण्डूयनस्य शास्त्रविहितत्वेनापेक्षितत्वात् । ज्योतिष्टोमे च दक्षिणादानोत्तरकालं पाणिकण्डूयनं दृष्टमपि द्विरात्रादिषु प्रथमेऽह्नि अनुष्ठीयमानैर्दक्षिणादानोत्तरकालीनैः पदार्थैर्नापेक्ष्यते तस्य प्रकृतावर्थसिद्धत्वेनाशास्त्रीयत्वादिति । एवं निर्गुणत्वस्याविहित-

त्वेन विकृतेस्तदपेक्षा नास्तीति । तस्मादुभयाकांक्षायां असम्भवात् पृषदाज्यस्य न प्रकरणविनियोगः सम्भवतीत्यलमतिविस्तरेण[अ] ।

(१०१) तत्सिद्धं महाप्रकरणं प्रकृतावेव विनियोजकम् । विकृतौ तु यत्प्राकृतदृष्टार्थाङ्गानुवादेन विधीयते तस्य विनियोजकं न तु केवलं विधीयमानस्यापूर्वाङ्गस्येति । यत्तु विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरन्तराले ऽपूर्वमप्यङ्गं केवलं पठ्यते तदपि प्रकरणेन विनियुज्यते । यद्यपि विकृतेः कथम्भावाकांक्षा प्राकृतैरेवाङ्गैः शाम्यति तथापि यत्र प्राकृताङ्गानुवादेन धर्मविधानं तत्र तद्विधानं यावद्भवति तावत्कथम्भावाकांक्षा न निवर्त्तते । अतो विकृतेराकांक्षावत्त्वादन्तराले विहितस्यापूर्वाङ्गस्य भाव्याकाङ्क्षासत्त्वाद् युक्तं तस्य प्रकरणाद्विकृत्यर्थत्वम् । यथाऽऽमनहोमेषु ते हि प्राकृताङ्गानुवादेन विधीयमानयोर्धर्मयोरन्तराले विधीयन्त इत्युक्तं तन्त्ररत्नादावित्यास्तां तावत् ।

(१०२) फलभावनाया अन्तराले यदङ्गभावनायाः प्रकरणं तदवान्तरप्रकरणम् । तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकम् । तच्च सन्दंशेन ज्ञायते-तदभावेऽविशेषात् सर्वेषां फलभावनाकथम्भावेन ग्रहणात् । सन्दंशो नाम एकाङ्गानुवादेन विधीयमानयो-

(अ) एवं हि सति सर्वेषामेव प्राकृताङ्गानां वैकृतोपहोमादिनिरूपितक्रमसापेक्षतया प्राकृतोपकारसाधनत्वादुक्तरीत्योपहोमादीनामपि प्रकरणविनियोज्यत्वं स्यादित्यलमित्यस्याशयः ।

रङ्गयोरन्तराले विहितत्वम्, यथाभिक्रमणम् । तद्धि समानयते जुह्वामुपभृत इत्यादिना प्रयाजानुवादेन किञ्चिदङ्गं विधाय विधीयते। पश्चादपि प्रयाजानुवादेन यो वै प्रयाजानां मिथुनं वेदेत्यादिना किञ्चिदङ्गं विधीयते। अतः प्रयाजाङ्गमध्ये पठितमभिक्रमणं तदङ्गं भवति, तत्कथम्भावाकांक्षाया अशान्तेः । यथाहुः

परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः ।
ज्ञाते पुनश्च तैरेव सन्दंशेन तदिष्यते इति ।

(तं. वा. ७५८)

न चाङ्गभावनायाः कथम्भावाकांक्षाभावात् कथ प्रयाजभावनाकथम्भावेनाभिक्रमणं गृह्यते इति वाच्यम् । भावनासाम्येन सर्वत्र कथम्भावाकांक्षायाः सत्त्वात्। प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदित्युक्ते यो नाम न जानाति प्रयाजैरपूर्वं कर्तुं तस्यास्त्येव कथम्भावाकांक्षा-कथमेभिरपूर्वं कर्त्तव्यमिति। सा च सन्दंशपतितैर्वाचनिकैः स्मार्त्तैश्चाचमनादिभिः शाम्यति। तदभाच स्वरूपनिष्पादनेन दर्विहोमन्यायेन निवर्तते। दर्विहोमेषु हि स्वरूपनिष्पादनातिरिक्तस्तथाव्यापारो न श्रूयते नाप्यतिदेशेन तत्प्राप्तिः । यागीयानां धर्माणां तावन्नातिदेशो यागत्वेन होमत्वेन वैलक्षण्यात्। नापि होमीयानां, कस्य होमस्य धर्मः कस्मिन् होमे प्रवर्तत इति विशेषनिर्णये प्रमाणाभावात् । अतो धर्मप्राप्त्यभावाद्दर्विहोमैरिष्टं भावयेत्कथमित्युत्पन्नाप्याकांक्षा स्वरूपनिष्पादनेनैव शाम्यति। एवं येष्वङ्गेषु सन्दंशा-

द्यभावस्तत्रोत्पन्नाप्याकांक्षा तेनैव निवर्तते, न तु सर्वथा तदभावः। तस्माद्युक्तमुक्तमभिक्रमणं प्रयाजाङ्गमिति।

(१०३) तच्चेदमवान्तरप्रकरणं महाप्रकरणाद्बलीयः सन्दंशपतितानां धर्माणां कैमर्थ्याकाङ्क्षायां प्रधानापूर्वात्प्रयाजाद्यपूर्वस्य झटित्युपस्थितेरिति। प्रकृतमनुसरामः। तत्सिद्धमुभयविधस्य प्रकरणस्य विनियोजकत्वम्।

---

(१०४) तदिदं स्थानादिप्रमाणाद्बलवत्। यत्र हि स्थानादङ्गत्वं तत्रान्यतरस्य प्रकारान्तरेण निराकाङ्क्षत्वम्। न च साकाङ्क्षं निराकाङ्क्षेण सम्बद्धुं योग्य विनाकाङ्क्षोत्थापनेन। अतश्चान्यतराकाङ्क्षया यावदुभयाकाङ्क्षारूपप्रकरणकल्पनद्वारा वाक्यादिकं कल्पयितुमारभ्यते झटितितावत्प्रकरणेन वाक्यादिकं कल्पयित्वा विनियोगः क्रियत इति स्थानात्प्रकरणस्य बलीयस्त्वम्। अत एव विदेवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अपि नाभिषेचनीयस्याङ्गम्। तेषां तदङ्गत्वं च स्थानाद्भवेत्, न तु प्रकरणादभिषेचनीयस्याव्यक्तचोदनाचोदितत्वेन ज्योतिष्टोमविकारत्वात् प्राकृतैरेव धर्मैर्निराकाङ्क्षत्वात्, किन्तु प्रकरणाद्राजसूयाङ्गम्।

(१०५) "ननु राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजसूयशब्दस्तावन्नामधेयत्वादाख्यातपरतन्त्रो

(क)यत्राख्यातं तत्रैव प्रवर्त्तते । न च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयमपि नाख्यातपरतन्त्रम् । तत्र हि यजेतेत्याख्यातमविशेषात्सर्वानेव प्रकृतानाग्नेयादीन् प्रयाजादींश्चाभिधातुं समर्थं दर्शपूर्णमासपदं त्वाग्नेयादीनेव वदति न सर्वान् । अतश्च न तदाख्यातपरतन्त्रम् । तथा राजसूयपदमपि किं न स्यादिति' वाच्यम् । प्रसिद्धेन हि पदेनाप्रसिद्धं निर्णीयते(च) । यथाहुः ।

पदमज्ञातसन्दिग्धं प्रसिद्धैरपृथक् श्रुति
निर्णीयते निरूढं तु न स्वार्थादपनीयते(त) । इति

(तं. वा. २८६)

दर्शपूर्णमासपदं च कालनिमित्तम् तद्योगश्चाग्नेयादिषूत्पत्ति(प)वाक्यैरवगतः । अतस्तद्वाचित्वेन दर्शपूर्णमासपदं प्रसिद्धम् । न च 'आग्नेयादीनां बहुत्वाद्द्विवचनान्तत्वमस्यानुपपन्नमिति' वाच्यम् । विद्वद्वाक्यद्वयसिद्धसमुदायद्वयाभिप्रायेण तदुपपत्तेः । एवं च दर्शपूर्णमासपदस्याग्नेयादिवाचित्वे निर्णीते यजेतेत्याख्यातमपि तानेव वदति । न हि तदुक्तौ स्वार्थत्यागो भवति । राजसूयपदं त्वनिर्णीतार्थम्,

---

(क) भावनायाः प्राधान्येन नामधेयरूपस्य राजसूयशब्दस्य तदनुवर्तित्वात् ।

(च) नत्वप्रसिद्धेन प्रसिद्धमिति निर्णीयत इत्यस्यापि शेषः । तथा च दर्शपूर्णमासादौ नाम्न एव प्राधान्यं, न तु प्रकृते तदस्तीत्यभिप्रायः ।

(त) न पृथग्विशेषश्रवणं यस्य तादृशं अज्ञातं सन्दिग्धं च पदं प्रसिद्धैः पदैर्निर्णीयते, निरूढं नाम अनादिसङ्केतितं तु न तथा, तस्य ततो बलवत्त्वादिति वार्तिकार्थः -

(प) यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीत्यादिवाक्यैः । अथवा य एवं विद्वानमावास्यां पौर्णमास्यां वा यजत इत्यनेनेति भावः ।

अतस्तदाख्यातपरतन्त्रमेव । [य]तच्चाविशेषात्सर्वषु इष्टिपशुसोमेषु विद्यते तत्परतन्त्रत्वाद्राजसूयपदमपि तानेव वदति । न च 'राजसूयशब्दस्य राज्ञा सूयते यत्रेति व्युत्पत्त्या सोमाभिषवनिमित्तत्वात्तस्य च सोममभिषुणोतीति वाक्येन सोमयागेऽवगतत्वा[श]त्तद्वाचित्वमेव नेष्टिपशुवाचित्वमिति' वाच्यम् । न ह्यभिषेचनीयादिसोमयागेष्वभिषवः प्रत्यक्षेण वाक्येन चोदितोऽस्ति तद्वाक्यस्य ज्योतिष्टोमेऽसत्त्वात् । 'अतिदेशात्तत्सम्बन्धोऽवगत' इति चेन्न, । अतिदेशस्य फलसम्बन्धोत्तरकालीनत्वेन राजसूयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यार्थावगत्युत्तरकालीनत्वात् । अनेन हि वाक्येन फलसम्बन्धे बोधिते पश्चात्कथम्भावाकाङ्क्षायामतिदेशकल्पनात् । अतस्ततः प्रागेव एतद्वाक्यार्थो वर्णनीयः । तदा चाभिषवस्यानवगतत्वाद्[ष]राजसूयपदमप्रसिद्धार्थमेव । अत एव राजसूयपदमव्युत्पन्नम[म]श्वकर्णशब्दवदित्युक्तं साम्प्रदायिकैः ।

(१०६) "एवं चाप्रसिद्धार्थत्वेनाख्यातपरतन्त्रत्वाद्राजसूयपदेनेष्टिपशुसोमयागा उच्यन्ते । ते च तैस्तैः

---

(य) आख्यातत्वं चेत्यर्थः ।

(श) सोमवाचित्वमेव ।

(ष) फलसम्बन्धावगतेः प्राक् कथम्भावाकाङ्क्षा नोत्तिष्ठति । तस्याश्चानुत्थितायामतिदेशो न सम्भवति । ततश्च राजसूयस्य फलावगतेः प्राक् नज्योतिष्टोमादतिदेशेनाभिषवसम्बन्धोऽवगतः ॥

(म) अश्वकर्णशब्दो यथा ओषधिवाचक एव, न त्वश्वस्य कर्णाविव कर्णौ यस्येति व्युत्पन्नस्तथा राजसूयपदमपीति भावः ।

## Commentary.

*Fire is &c.*—To be explained as before. Like the generic character of 'Fire', the eleven qualities, colour &c. also, are its distinctive features. The mention of these in the *Sūtras* may be shown as before, in the case of Earth and Water. For instance, we have the *sūtra*—'*Fire also is endowed with Colour and Touch.*' As for *Number* and the rest, the same *Sūtra* points out these as belonging to Fire and Earth &c.

The colour of Fire is *white* and *brilliant.* The *white* colour belongs to Earth and Water also; but in these latter it is not *brilliant*; that is to say, a colour bright enough to be self-luminous belongs to Fire alone; hence it serves as the distinctive feature of this latter. The red or yellow colour that is sometimes seen in Fire must be regarded as being due to certain extraneous conditions; as it is only the white colour that is seen in all cases of Fire; as we find in the case of the light of a lamp, and that emitted by the Sun and the Moon.

Its Touch is *hot* only. The Touch of Earth, Water and Air is 'neither—hot—nor—cold,' 'cold' and 'neither—hot—nor—cold' respectively; while that of Fire is 'hot' only, which serves as its distinguishing feature.

**Page 40.]** Like Earth and Water, Fire also is twofold, in the shape of the Atom and its Products. The Product is threefold—in the form of Body, Sense-organ and Object. The Fiery body is such as is not born from the womb, and is known to exist in the Regions of the Sun only.

*Objection*: "Fire being of a burning nature, any body made of it would be like a mass of fire, and as such, incapable of any business operations; and hence it could not be the substratum of any experiences."

In reply to this we have the statement that it is by reason of the admixture of Earth-molecules that the molecules of Fire bring about the Fiery Body; and the body could not be a mass of Fire pure and simple.

The Sense-organ that helps to make colour perceptible to all living beings is made up of Fire molecules. In support of the theory that colour is rendered perceptible only by this particular product of Fire, and not by any other products of Fire,—we have the following reasons: This sense-organ is made up of such Fire-molecules as are not affected by the particles of any other substance; *i. e.* in this organ of vision, the Fire-molecules do not have their potency weakened by the admixture of any heterogeneous molecules of Earth or Water; and hence having an origin peculiar to itself, it is this organ alone that is capable of manifesting colour; and that nothing else is produced in the same manner, being a well recognised fact, must be attributed to an unseen (superphysical) force; and its proof lies in the fact of the character of the products themselves. Then, the fact of the sense of vision being fiery in its nature must be inferred from the fact of its manifesting colour alone from among other qualities,—like the lamp. This organ of vision is without any manifested colour or touch; and it is for this reason that it does not burn its physical substrate, and is itself not seen (for want of a perceptible colour).

The Object of Fire is fourfold—the *Earthly &c.* The particle '*tatra*' means 'from among these.'

The *Earthly* is that which is produced from such Earthly things as the fuel of wood,—fire not being produced without some such substratum. 'Wood' includes *grasses* &c. also, in as much as these also are found to be productive of fire. This Earthly Fire has the nature of *flaming upwards*; it is capable of accomplishing the actions of *cooking, sweating, softening* &c. The action of '*cooking*' consists in bringing about properties (*or* conditions) not present in the thing before; and '*sweating*' or '*softening*' consists in the destroying of the hardness of things. '*Etc.*' includes such other actions as 'producing cracks.' This points out the useful actions accomplished by Fire.

The *Heavenly* Fire is that which is produced from watery

fuel; and exists in the form of the Sun, the lightning, the meteor and the like.

The *Stomachic* or Organic Fire serves the purpose of *digesting* the food that is eaten; that is to say, it tends to change the food into the condition of certain juices, excreta and other substances.

The *Mineral Fire* is found in the form of Gold &c. The fact of Gold &c. being fiery in their nature is proved by scriptures. The argument in favour of this view has already been shown. **(Com. Page 26.)**

*Question*: "Gold &c. being fiery, (and as such having a hot touch and being devoid of Odour and Taste), how is it that they are found to have odours and tastes, and to have a touch that is neither hot nor cold?"

*Answer*: By reason of the unseen agency of the destiny of the experiencing persons, Gold &c. are produced in the solidifiable form, endowed with a touch that is neither hot nor cold—by reason of the admixture of particles of Earth; and the taste &c. that are perceived belong to these Earth-particles.

**Page 41.]** *Objection*: "We cannot admit of the declaration that Gold has no manifested touch &c., as there are no Substances apart from the colour, touch &c. that are perceived (*i. e.* the qualities are the only real entities, and there is no such thing as a substance independent of the qualities perceived). Consequently, in the case of the Gold we cannot admit of the existence of any unseen and untouched particles of Fire, or any other thing, except that of the yellow colour and the particular Touch &c.; and as such Gold cannot be regarded as Fiery in its nature."

*Reply*: It is not so; because in ordinary experience, we find the same colour (of whiteness) and other qualities existing in various substrata, in the shape of the 'pillar,' the 'jar' and the like; and if there were no Substance apart from the qualities, what would constitute these various substrata of the same qualities? That is to say, we have the notions—'this is a pillar', 'this is a jar'—that pertain to the different *shape* of each of the things

cognised, without any (necessary) idea of their colour &c.,—the character of *being coloured* &c. belonging equally to all objects.

*Objection*: "The different cognitions that we have with regard to each object is due to the difference in the previous ideas or impressions that we may have in our mind, with regard to the material masses observed (and hence the cognitions must be admitted, in all cases, to be of the same colour, and the notion of the difference in substrata must be regarded as being due to the previous impressions in the mind of the observer.)"

*Reply*: In that case the different cognitions that we have of the various colours &c. may also be attributed to the differences in the previous ideas that we may have; and as such we might deny the existence of the different colours &c. (admitting the existence of only one colour, explaining the variety of colour—perception as being due to existing impressions in the observer's mind.) [And this would lead us to Idealism pure and simple.]

*Objection*: "If no such thing, as the Blue colour *f.i.*, had a real existence in the external world, then the ideas or impressions of these would depend, for their appearance, solely upon their own *series* (*santāna*, which is endless); and as such it would not be possible for these impressions to appear at certain times only and not at all times; and hence if the differentiation of *Blue* &c. depended upon these impressions only, then it would not be possible for these colours to be perceived at certain times (*i. e.* the impressions having a continuous existence, the perception of Blue would also be continuous); and in as much as we do not find this to be the case in ordinary experience, the differences of Blue &c. cannot be regarded as due to those Impressions; and it is for this reason that we postulate a variety of colours."

*Reply*: In the case of the different cognitions with regard to the pillar &c. also, if they did not depend upon some object having an existence in the external world,—there would be no possiblity of their appearing at certain times only; and

hence with regard to each object we should assume a particular material form *apart from the qualities of colour &c.*, which would be the instigating cause of the impressions in connection with each objective mass perceived. It is thus alone that we could explain the fact of a *single* object being perceived by means of the two actions of *seeing* and *touching* (both these actions applying to the said *shape*). This would be impossible if an object consisted solely of *colour* and its other properties; as each of these would be perceptible by a distinct sense-organ (and we would in such cases have the idea of two 'objects', as there would be nothing in the shape of a material object that could be amenable to a combined perception by two or more sense-operations). Then again, as a matter of fact, Colour and the other similar qualities belonging to the atoms, would be supersensuous; and as for you there is no *objective mass* (independent of the atoms with the said colour &c), what could be the object of the said *seeing* and *touching*?

*Objection*: "Though each atom by itself is supersensuous, yet, when there is a certain operation of the mind in connection with the sense-organs, the atoms are rendered *capable* (of accomplishing certain purposes); and then they become amenable to sense-perception."

*Reply*: This could not be; because the *becoming capable* cannot set aside the inherent subtile (imperceptible) character of the atoms; and if the mere *becoming capable* could make a thing perceptible by the senses, then the *operation of the mind* and the *sense-organs* themselves would also become perceptible (as these also are made capable of serving some useful purpose, and it is a universally admitted fact that the *sense-organs* themselves are imperceptible, being extremely subtile in their character, and only nominally material).

*Objection*: "Though atoms individually are subtile and imperceptible, yet when they aggregate together, then they acquire a certain degree of grossness, like a mass of hair (each

singly being invisible); and as they become visible, they appear as one only."

*Reply*: Does the gross form become actually produced in these many atoms, at the time you speak of? or, is it as in the case of hair, the grossness being only imposed upon the aggregate, and not existing in reality? If it is *produced* in the atoms themselves, then that aggregate gross form would be what is regarded as the composite '*substance*' (apart from the qualities that may belong to them.) While if it be not really existent in them, but be perceived only as imposed upon them, then such a perception could only be a misconception. But then, every misconception must have a counterpart reality somewhere in existence; consequently it would be necessary for you to admit of the *real* existence of even a single gross *objective mass* somewhere. This reality of grossness could not belong to an Idea; as we do not find any such idea appearing as that 'I am gross;' and secondly because in that case there would be no gross object that could be perceived in common by more than one person (the idea of each person belonging to him and him alone).

For these reasons, it must be admitted that there is a *single* gross substance (and it is not a mere collection of qualities): because the object is always perceived as having the same gross form (while its qualities are adventitious and variable); and because it is found to operate towards the accomplishment of definite useful purposes (which could not be done by mere qualities). And thus the existence of the material Substance (independently of the qualities of colour &c.) is established.

*Objection*: "It is only when a cognition is not subsequently followed by a notion to the contrary, that it is accepted as true, and the object cognised regarded as having a real existence; in the case of the composite Substance, however, we find its cognition followed by a contrary notion:—*viz.* 'when the hand is shaken, the body related to it does not shake, and when the leg is shaken the body is not found to shake; and (if the

Body were a composite whole made up of the hand &c.) then one and the same *body* would have two contradictory conditions (of shaking and not shaking) (and so the notion of the composite apart from the constituent atoms and qualities must be regarded as a misconception)."

*Reply*: This is not right; as there is no such hard and fast rule as that when the hand shakes the body must also shake; as a matter of fact, we find that when there is cause for the shaking of the hand only, it is the hand alone that shakes, and not the body, for the simple reason that there is no cause for the shaking of this latter; and when there is a cause for the shaking of the body also, then this also shakes; where is there a contradiction in this?

**Page 42.]** *Objection* "If the body does not move when the hand moves, then there would be an *absence of inherent inseparable* relationship between them."

*Reply*: Not so; because, what is meant by the absence of such relationship is that the two have an existence apart from each other; and not that while the one moves the other does not move; for we find that while the Substance moves the qualities inhering therein do not move (though the relationship between the Substance and its qualities is universally recognised to be inseparable). And as for having an existence apart from each other, this can never be the case with the whole and the part, even though these be totally different from each other. Consequently in the case in question there could be no absence of inseparable relationship.

Another contrary notion that is put forward by the opponent is this:—"In any object, if a part of it happens to be covered up, (and we touch the object), there is no touching of the object wherein the covered up part inheres, while there is a touching of that wherein inheres the uncovered part; and thus (if the object wherein the two parts inhere were a single composite whole) then we would have a touching and not touching of the same object and at the same time."

There is not much weight in this objection either; because, the covering of the part does not make the whole covered up; and the reason for this is that the single whole inheres in its many parts; and as such even when a number of its parts are covered up, if it happens to be touched in the uncovered parts, it also becomes touched through them; specially as it is the same in all its parts.

As for the non-recognition of the gross form of the object, as also the non-perception of the larger number of its component particles,—that is due to the absence of the perception of the aggregations of the several component particles, which perception is the basis of the recognition of the varying degrees of dimension. That is to say, in a case where a larger number of component particles are covered up, and only a smaller number of them visible, there is no perception of the component whole; as for instance, when a man is immersed in water, with his head above the water, we, seeing the head only, are not said to see the *body*. Then again, when one part of an object is red, the object is red in that part only, while over the rest of it it is *not-red*; and thus we find that there is nothing absurd in a single object being both *red* and *not-red*. And the reason is simple: *redness* consists only in a conjunction with reddening materials, while *non-redness* consists in the absence of such material; and it is quite possible for both of these to belong to the same object (in its parts); as conjunction is not an all-pervading quality (but exists only in parts of objects).

*Objection*; "There is yet another objection to the idea of the complete whole: The whole could exist in each of the parts, either in its complete form or partially only; for certainly, there is no third way. As a matter of fact however, it could not exist in them only partially; as it has no parts of it apart from the component parts themselves. Then, if it existed in each of them in its complete form, then it could not exist in any but a single component particle; as the whole of it being taken up by the con-

junction of that single particle, there would be no room for the other particles, specially as the whole has no other form save that which would be existing in that single particle."

In this connection, we should think over the following points: You declare that a thing can exist either wholly or partially :—well, do you make this declaration as accepted by yourself, or as admitted by your opponent ? As for yourself, you the Bauddha donot admit of the existence (or inherence) of a thing in any other thing. While as for your opponent, he does admit of the said total and partial existence; because *totality* and *partiality* are not, according to him, the methods of existence; nor are these the basis of the said existence. As a matter of fact, that which exists, does so either by itself, or in the relationship of the container and the contained, with something else; and certainly there can be no absurdity in a single thing having more than one connection; as for instance, we actually find, in the case of an object of variegated colour, the connection or relationship of yellow and the other colours in objects possessed of the blue colour also; nor in this case does the object differ with each distinct colour; and if you did not consider it possible for a single object to have various colours, then it would not be possible for you to have any cognition of the variegated colour. Nor can the fact of the cognition or idea of the object being one only be urged as a ground for the singleness of its colour only; as this would be in direct contradiction to the well-known perception of the variegated colour. And just as in the case of a composite whole, made up of a number of component particles, there is room for other particles, even though the object is connected with one particle, as is perceived by the senses,—so, in the same manner, we also perceive the connection of many particles in a single object of the gross form. As for the declaration that we see the connection of many things in a single object, and not the connection of one with many things,—that is a mere point of difference between the nature of the two; as the factor of the connection of many things (one

way or the other) is common to both cases. Thus then, we have refuted both of the following statements: (1) that "that which is one can exist in a single point of place, as for instance a single colour, and a single composite whole", and (2) that "that which exists over a number of points in space must be many and diverse,—*e.g.* the palm fruits contained in a number of vessels, and the composite whole existing over a number of component parts.

Then again, the premiss brought forward by you is incapable of being established either for yourself or for your opponent. As for yourself, you hold that a single Idea, by its very appearance, exists in a number of things, such as the object, the sense-organ, and the operation of the mind. And as for your opponent, he too believes in the fact of a single thread being in conjunction with a number of beads (strung on to it). And in the same manner, the composite whole can very well exist by inherence in a number of component parts,—without, thereby, becoming diverse.

Thus then, the very basis of your objection having fallen off on all sides, the objection itself falls to the ground unsupported; as if there were no composite whole, and the whole world consisted of atoms alone, then there could be no chance of the cognitions of the subject, the common character and the instance (of your inferential argument); and hence the argument would have no existence. Consequently any such argument cannot set aside the existence of the composite whole, which is perceived directly by the senses.

*Objection*: "This sense-perception may be a misconception, in as much as it is found to be subsequently set aside by a contrary notion."

*Reply*: If it were so, then you would fall into the vicious circle of mutual interdependence—the falsity of sense-perception being proved by the presence of the contrary notion; and the correctness of this contrary notion being dependent upon the

falsity of the sense-perception. As a matter of fact, the ordinary rule (of being set aside by contrary notions ) does not apply to the case of sense-perception, which is independent of all other considerations. Nor is it proper to declare, as false or mistaken a cognition (of sense-perception) which is found to be compatible with the useful functioning of things, which is universally accepted as true, and which is manifest to all people; as in that case, such ordinary sense-cognitions as those of the blue colour would also become false. In this way is our theory freed from the danger of being set aside by any contrary notions.

Though the existence of atoms is only inferred from the grosser products, yet certain usages of the world must be based upon them.

*Objection* : " [ The process of the appearance of gross products has been described by you as beginning with the aggregate of *three* diads—which would consist, of six atoms.] This simultaneous conjunction of the atom with six atoms would make the atom consist of six parts, ( each part being connected with each of the other atoms, and this would do away with the *atomic* character itself."

*Reply* : What do you mean by this 'simultaneous conjunction'? Does it mean that one atom is produced simultaneously, along with six other atoms? or does it mean that the one atom becomes simultaneously connected with the six atoms? As for simultaneous production, if there be such a production of even an impossible thing, through the simultaneous operation of the productive cause,—what absurdity would there be in this? As for simultaneous conjunction, that too is not incompatible. (1) As the conjunction of substances does not refer to its parts, as even an impartite substance, like *Ākāça* has conjunction; and (2) if there were parts also, then the conjunction existing in the final atom only, no conjunction would be perceptible. The conjunction of substances is actually found to lie in the forms of the substances themselves. Such being the case, as in the

case of the partite substance, so in that of the impartite atom also, when there would a simultaneous conjunction of a single atom with several others, whenever there would be sufficient cause for this; and there would be nothing objectionable in that.

NOTE.—Ever since Vaiçēshika philosophy became known to the western world, it has continued to be laughed at for holding that Gold, and all other metals, are in their very essence, of the nature of Fire. No attempt has yet been made to refute the argument that they put forward in support of this view. Melted gold continues in the molten condition, even on the application of extreme heat; it does not become entirely dissipated, as all other non-fiery things are, by the contact of fire. Even at the present day, in an age of electric arc-lights and furnaces it is not very easy to determine whether the application of any degree of it will entirely dissipate the gold; and it is no wonder that it was regarded as non-dissipating by the philosophers of old. And when once this fact is admitted there can be no escape from the conclusion that gold is fiery in its essence.

## SECTION (4)

### OF AIR.

**Page 44.]** *Text (39) Air is that which belongs to the class 'Air.' It has the following qualities: Touch, Number, Dimension, Isolation, Conjunction, Disjunction, Proximity, Distance and Faculty.*

*The touch of Air is neither warm nor cool, and is not due to 'baking.' This is indicated by the sūtrā which lays down Touch as the quality of Air.*

*The existence of the seven qualities, beginning with number, in the colourless Air is indicated by the declaration in the sūtrā that 'of colourless substances the number and other qualities are not visible'—The existence of faculty in Air is indicated by the mention (in the sūtrā) of the shaking of grasses (being due to the contact of Air.)* III-i-4; IV-i-12; V-i-14.)

*Air also is of two kinds; in the shape of atoms and their products. The Products are fourfold,*

*in the shape of the Body, the Sense-organ, the Object and Breath.* (IV-i-1 to 5; II-i-11 to 13; IV-ii-1; VII-i-20, 21.)

*The Airy Body is not born from the womb, and is known to exist in the region of the Maruts; it is made capable of experiencing sensations by reason of the admixture of Earth-particles.* (VIII-ii-6.)

*The Airy Sense-organ pervading all over the body, is that of Touch, which enables all living beings to feel touch. Is is made up of Air-molecules exclusively, and is free from the molecules of all other substances.* II-i-9, 10, 16.)

*The Airy Object is that which is actually perceived as Air, the substratum of all Touch; its existence is indicated by Touch, Sound, Steadiness and Shaking. It moves horizontally, and is capable of moving and holding the clouds and other things.*

*Though Air is not visible, yet its numerousness is inferred from the collapse of winds,—this collapse being due to the collision of two contrary winds blowing with equal velocity; this collision is inferred from the upward motion of Air,—which upward motion again is inferred from the fact of tufts of grass and other things being seen to rise in the Air ( whenever there is such a collision).* (IV-i-17; II-i-14, 5.)

*Breath is the Air in the body; it serves the purpose of moving about the various fluids, secretions and other materials in the body. This Air in the body comes to be known as* 'Prāṇa' 'Apána', 'Samāna', 'Udāna' *and* 'Vyāna', *on account of its various functions (of moving up, down &c.)*

## Commentary.

Having dealt with the three visible Substances—Earth, Water and Fire—the author now deals with Air, specially as he has been treating of such Substances as are both eternal and non-eternal. &c. &c. &c.

**Page 45.]** The Touch of Earth is due to the baking of the atom; and in the products it is due to the touch produced in the atom. The touch of Air on the other hand is not due to any baking; and it is this that constitutes the difference between the touch of the two Substances; and the fact of the Touch of Air being neither warm nor cool differentiates that Touch from the Touch of Water and Fire.

The existence of Touch in Air is pointed out by the *sūtrā*—'Air has Touch,' in the second *Adhyāya.* Then again, we have a *sūtrā* pointing out that the substances devoid of colour have their number &c. invisible; and this indicates the existence in Air of the seven qualities beginning with 'Number.' For if such existence were not meant to be indciated, then the mere mention of such invisible qualities would be useless. Then we have the *sūtrā* that the shaking of grass is due to the contact of Air,—which shows that there is Faculty, (*i. e.* of velocity or speed) in Air; for the conjunction of a Substance without speed is never found to give rise to any action.

'*That Air*'—the word 'That' (*sa*) points to something spoken of before and subsequently recalled to the mind—after which it comes to be referred to by 'this,' '*ayam*'. The particle '*ca*' indicates that it is not Earth, Water and Fire only that are of two kinds, but Air also.

The Airy Product is found in the shape of the Body, the Sense-organ, the Object and the Breath. Of these, the author

जाति ? points out the Body in its generic form:—The Airy body is such as is never born of the womb, and it is not like the Earth-body, which is both womb-born and non-womb-born. The region where these Airy bodies are found is that of the Maruts. The Airy body becomes capable of experiences, by reason of the admix-

ture of Earth-particles which, coming into contact with the Air molecules, tends to solidify them into a conglomerate whole.

The Sense-organ is that which leads to the experiencing of Touch by all living beings; and this organ is made of Air-molecules, independently of all contact with Earth-particles; and thus being produced in a manner peculiar to itself, different from that of the rest of the Body, it becomes an organ of perception. The existence of this organ is known from the feeling of Touch that we have. And the fact of its being Airy is proved by the fact of its manifesting Touch alone from among the qualities of colour &c.—*e. g.* we find in the case of the Air that renders perceptible coolness of the water on our body. This organ exists all over the body, as is shown by the fact of touch being felt all over the body. The organ is called '*Tvak*' ('skin') as it is found to exist in the *skin*, the name of the container being applied to the contained.

To this name some people object as follows: " The Bodily position of all sense-organs is found to be pervaded over by skin; for as a matter of fact we find that where there is skin there alone are colour &c. perceived, and not otherwise; and hence the name of 'skin' should apply to all the organs, and not to the organ of Touch alone."

This is not right; as in that case no blindness &c. would be possible; and then, if you were to admit of a diversity of potencies as due to the particular substratum of each, apart from the common element of the skin, the blindness being held to be a cessation of that potency, then that would amount to an admission of a diversity of the *sense-organs* themselves.

The Airy object is that which is the substratum of the feeling of Touch perceived by us. The existence of the object is proved by Sense-perception.

**Page 46.]** As an example of this sense-perception some people point to the direct cognition that we have through the tactile organ, of the *blowing of Air*. But that is not right, as in all direct perception that we have through the Tactile organ, it is

only Touch that is felt, and nothing else. As for the cognition of the *blowing of Air*, it is got at by means of Inference, which through the force of habit, appears even in the absence of any remembrance of Invariable Concomitance and other factors necessary in the Inferential process; just we perceive apparently by the eye (though really infer) the shaking of trees &c. In the perception of the difference in the feeling of coolness and warmth, the recognition of Air that we have proceeds from an Inferential process which leads to a recognition of the Substance (Air) that brings up the Substratum of the Touch in question; and as for the Tactile organ, that cannot give us any idea except that of the feelings of coolness and warmth. The Inferential reasoning—that 'Air' is *perceptible* by Touch, because it is the substratum of the Touch that is perceived, like the jar'—is set aside by the actual non-perception of the Air; just like the Inference that 'the hare has horns because it is an animal.' As a matter of fact, we find, in the case of such substances as the jar and the like, that all cases of the tactile perceptibility of substances are cases also of visual perceptibility; and we also find that Air is not visible to the eye; consequently from this we could safely infer the absence of tactile perceptibility in it.

The non-perceptibility of Air having been thus established, the Author now proceeds to adduce an inferential argument to prove its existence—*Its existence is indicated by &c.*, When we feel a touch without perceiving any colour, or taste &c., we at once conclude that it must have some substratum of its own, because it is a touch, like any other touch; nor could it have the Earth for its substratum, because it is not accompained by colour, (while Earth is never without colour). It might be urged that even in the case of ~~touch~~ air, there exists some colour, though it is not manifested. But that would not be right; because the perceived touch *of the Earth* is invariably found to be accompanied by the *perceived* colour of that Earth. In the case in question however, there is no perception of Colour; consequently the Touch cannot be regarded as belonging to the Earth. Nor could Water and Fire be regarded as the necessary substratum;

दनुमानम्। कर्म्माशयपूर्वकत्वे वा तज्ज्ञानमन्यतः स्यात्। नन्वत एव हेत्वभावे कार्य्याऽभावात् तदनुमानम्? अन्यथा दूषणमपि न स्यात्। वक्तव्यो वा विशेषो यतो दूषणं न साधनमिति। उच्यते। प्रत्यक्षेण विलक्षणा[1] ह्यप्रत्ययपूर्वाः सन्निवेशा अतद्धेतवः स्युः। न चैवं बुद्धिरनु-

इति। कर्माशयहेतवश्च शरीरादयस्तदभावे न भवितुमीशते इत्यर्थः। उपपत्तौ वा हेत्वभावे कार्योत्पादस्य भवत्पक्षे ऽपि न संनिवेशात् तस्य बुद्धिमतो ऽनुमानं, कारणमन्तरेणापि कार्योत्पत्तेः। यस्तु कश्चिद्वैयात्यादीश्वरे ऽपि कर्माऽऽशयपरामर्शमभ्युपगच्छेत् तं प्रत्याह—कर्माशयपूर्वकत्वे वा तज्ज्ञानमन्यतः स्यात् येन कर्म्माशयेनाऽस्य शरीरादयो जनयितव्याः स तावदविज्ञातो ऽनधिष्ठितश्च चक्षुराद्युपजननाय न पर्याप्त इति ज्ञातव्यः। न च तज्जन्येन शरीरादिना, इतरेतराऽऽश्रयप्रसङ्गात्। न च प्राग्भवीयेन शरीरान्तरादिना। जन्मसमये तस्याऽतिवृत्तत्वात्। न चेश्वरान्तरमभ्युपेयते परैः। तदुपगमे वा तत्रापि दुर्वारः प्रसङ्गः। चोदयति—नन्वत एव हेत्वभावे कार्याऽभावादेव तस्य बुद्धिमतस्तनुभुवनादिहेतोरनुमानम्। अन्यथा यदि हेत्वभावे ऽपि भवेत्कार्यं ततो दूषणमपि 'हेत्वभावप्रतिक्षिप्तं न कार्यमनुमीयते' इत्येतत् न स्यात्। वक्तव्यो वा विशेषस्तादृशः, यतो दूषणं न तु साधनमिति। उभावपि हि साधनदूषणवादिनौ कारणाऽभावे न कार्यमिति वक्तुं प्रवृत्तौ। तत् कथमनेनैकः पर्यनुयुज्यते? वदन्ति हि वृद्धाः 'यश्चोभयोः पक्षयोर्दोषो न तत्रैकश्चोद्यो भवती'ति।

स्वपक्षे विशेषमादर्शयन् परिहरति—उच्यते। प्रत्यक्षविलक्षणा ह्यप्रत्ययपूर्वकाः क्षित्यादिसंनिवेशाः अतद्धेतवो ऽप्रत्ययवद्धेतवः स्युः। अथ यथा प्रासादादीनां संनिवेशाः प्रत्यक्षेण विलक्षणाः क्षित्यादि-

१ प्रत्यक्षविलक्षणाः १· पु· पा·।

मेया, दृष्टसालक्षण्येनाऽनुमानात् । अपि च तुल्यत्वेऽपि प्रतिबन्धमात्राद् दूषणं साधनमपि, साधनं तु निरस्तप्रतिपक्षं साध्यसिद्धाविति । न च बुद्धिमात्रं सन्निवेशहेतु-

सन्निवेशेभ्य उपलभ्यन्ते तथा बुद्धिरलौकिकेभ्यो विलक्षणा अनुमानादुपलभ्यतइत्यत आह—न चैवं बुद्धिरनुमेया । कुतः ? दृष्टसालक्षण्येनाऽनुमानात् । एतदुक्तं भवति । प्रत्यक्षमिन्द्रियजन्मनि दर्शननिरपेक्षमुपजायमानमदृष्टचरमपि त्रैलोक्यविलक्षणमप्यर्थं स्वलक्षणं गोचरयितुं पारयत्येव । अनुमानं व्युत्पत्त्यपेक्षितया व्युत्पत्तेश्च पूर्वदर्शनाऽधीनतया दृष्टसलक्षणमेव गोचरयेन्न तु विलक्षणम् । अदृष्टलिङ्गसम्बन्धं हि तत् । तदिह बुद्धिरनुमीयमाना यथादर्शनमनुमीयेत । सा चाऽनित्या शरीरात्ममनःसंयोगहेतुः । असर्वविषयोपलब्धा ऽस्मदादाविति तद्विधैवाऽनुमातव्या । तथा च नित्यत्वसर्वविषयत्वादिव्याहतिरिति । न चैव दहनाद्यनुमानेषु प्रसङ्गः । न खलु तत्र महानसादिदृष्टदहनविलक्षणः पर्वतनितम्बवर्ती दहनेऽनुमीयते । न च देशभेदस्तद्वैलक्षण्याय पर्याप्तः, अन्यत्वात् । कथं तर्हि रूपाद्युपलब्धेरिन्द्रियाऽनुमानम् ? न हि तत्र दण्डादिकरणसालक्षण्यं, रूपादिपरिच्छित्तिकरणानामिन्द्रियाणामनुमानाऽगोचरत्वात् । रूपादिपरिच्छित्त्यन्यथानुपपत्तिप्रभवा खल्वियमर्थापत्तिरिन्द्रियगोचरा, सा च संबन्धदर्शननिरपेक्षतया न दृष्टसालक्षण्यमपेक्षते । न चैवं बुद्धिमत्पूर्वकत्वेऽप्यर्थापत्तिरन्यथाऽनुपपद्यमानस्य कस्यचिदप्यदर्शनात् । तनुभुवनादेश्चाऽदृष्टवत्क्षेत्रज्ञपरमाणुसंयोगादुत्पत्तेरित्यसकृदावेदितम् । तदेवमस्ति साधनदूषणस्य विशेषः ।

अपि चाऽविशेषेऽपि न वैतण्डिकः शक्यो निराकर्त्तुं यः स्वपक्षस्थापनाहीनं परपक्षमाहन्तीत्याह—अपि च तुल्यत्वे प्रतिबन्धमात्राद् दूषणं साधनमपि सप्रतिपक्षमपि । साधनं तु निरस्तप्रतिपक्षं साध्यसिद्धौ साधनतायामवतिष्ठते न तु सप्रतिपक्षं प्रतिबन्धमात्रादिति ।

विन्यासप्रयोजनविचारनिर्णयात्मिका प्रेक्षा । न च सा तत्र सम्भवति, स्वार्थपरार्थाऽभावादिति । ननु मा भूत्सर्वज्ञो नियोक्ता, धर्म्मज्ञस्त्विष्यताम् । न हि रूपतश्चक्षुरादीनां विषयनियमो निरूप्यतइत्युक्तम् । कालतस्तु नियमे यदा वर्त्तमानत्वं तदा ऽतिशयवच्चक्षुरादिविषयभावो न[1] विरुद्धः । आत्यन्तिके चा[2]ऽवर्त्तमानत्वे ऽत्यन्ताऽस-

तदेवं पूर्वार्द्धं कारिकाया व्याख्याय पश्चार्धं व्याचष्टे—न च बुद्धिमात्रं सन्निवेशहेतुः, अपि तु विन्यासप्रयोजनयोर्यौ विचारनिर्णयौ तदात्मिका प्रेक्षाबुद्धिविशेष इति यावत् । प्रेक्षैव तर्हि भवतु भगवतीश्वरे, इत्यत आह--न च सा च सम्भवति, स्वार्थपरार्थाऽभावात् दर्शितश्च तदभावः पुरस्तात् ।

सम्प्रत्यन्यथा प्रत्यवतिष्ठते परः—ननु मा भूत्सर्वज्ञो नियोक्ता प्रत्यक्षेण, धर्मज्ञस्त्विष्यतां, यथाह

हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥
कीटसङ्ख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ।
दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यति ॥
प्रमाणं दूरदर्शी चेद् वयं गृध्रानुपास्महे ॥ इत्यादि ।

नन्वयं धर्मो रूपविशेषाऽभावात् कथं प्रत्ययपूर्वे ? इत्यत आह—न हि रूपवतश्चक्षुरादीनां विषयनियमो निरूप्यतइत्युक्तम् । नन्वेतदप्युक्तं वर्तमानकालविषयमेव चक्षुरादीति । न च धर्मो वर्तमान इत्यत आह—कालतस्तु नियमे यदा धर्म्मस्य वर्त्तमानत्वं तदा ऽतिशयवच्चक्षुरादिविषयभावो न विरुद्धः । यद्युच्येत न कदाचिदप्ययं वर्तमान इति, तत्राह—आत्यन्तिके चाऽवर्त्तमानत्वे अत्य-

१ नेति नास्ति मू॰ पु॰ पा॰ । २ वा-१ पु॰पा॰

त्त्वं खपुष्पादिवदित्युक्तम् । तत्र कुर्वित्यर्थो[1] धर्म्मः, यागादेर्विषयस्य धर्म्मत्वेनोपगमात्[2] । उत्पाद्यत्वात्तस्याऽप्रत्यक्षत्वमिति चेत् । उत्पन्नस्याऽस्तु । ननूत्पन्नमपि स्वरूपेण धर्मः, श्रेयःसाधनत्वेन तु तच्चाऽतीन्द्रियम् । किं पुनरिदं श्रेयःसाधनत्वं ? यदि तावच्छक्तिः सा चाऽतीन्द्रियेति । उक्तमत्र नेन्द्रियाणां परिमाणतो वा[3] विषयनियमः सुनिरूपितः । अथ तदा ऽसत्त्वात् । कालान्तरभावित्वात् श्रेयसः । न्ताऽसत्वं खपुष्पादिवत् इत्युक्तम् ।

ननु कुर्वीति नियोगो धर्मः, न चैष वर्तमानः । करोषीत्यविशेषप्रसङ्गात् । वर्तमानाऽवस्थस्तु न नियोग इति न धर्म इत्यत आह—तत्र कुर्वित्यर्थो धर्म्मः । कस्मात् ? यागादेर्नियोगविषयस्य धर्म्मत्वोपगमात्तत्रैव धर्म्मत्वप्रसिद्धेः । शङ्कते—उत्पाद्यत्वादवर्तमानत्वात्तस्याप्यप्रत्यक्षत्वमिति चेत् । निराकरोति—उत्पन्नस्यास्तु । पुनः शङ्कते—उत्पन्नमपि यागादि न स्वरूपेण धर्म्मः, श्रेयःसाधनत्वेन तु तच्चातीन्द्रियम् । तदेतद् दूषयितुं विकल्पयति—किं पुनरिदं श्रेयःसाधनत्वं ? यदि तावच्छक्तिः सा चाऽतीन्द्रियेति । दूषयति—उक्तमत्र नेन्द्रियाणां परिमाणतो वा विषयनियमस्तु निरूपित इति । अथ साधनस्य श्रेयसा संबन्धः श्रेयःसाधनत्वं, कृत्तद्धितसमासेषु संबन्धाऽभिधानं त्वतल्भ्यामिति वार्तिककारवचनात् । संबन्धश्च संबन्धिद्वयाऽधीननिरूपणो नाऽन्यतरेण संबन्धिना शक्यो निरूपयितुमित्यसति श्रेयसि कालान्तरभाविनि कथं तत्संबन्धो यागादीनामप्रत्यक्षमीक्ष्यतेति शङ्कते—अथ तदा यागादिसमये ऽसत्त्वात् । कुतो ऽसत्त्व ? मित्यत आह—कालान्तरभावित्वादामुष्मिकस्य स्वर्गादेः श्रेयसः । उत्तरम्—भवतु कालान्तरभावि श्रेय,स्तत्साधनत्वं त्वतिशयो यागादिसमवेतो यः स तत्कालो यो यागादिकालः । न खलु भिन्न-

१ कुर्वीतेत्यर्थः मू· पु· पा· ।
२ तदुत्पाद्यत्वात् १ पु· पा· ।
३ परिमाणतो वा स्वरूपतो वा· मू· पु· पा· ।

भवतु, अन्यथा धर्मत्वहानेः । श्रेयःसाधनं तु वर्त्तमानमिति नाऽक्षाणामविषयः । ननु प्रागनुष्ठानाद्धर्मज्ञानमिष्यतेऽनुष्ठातृभिः । तथा च भविष्यद्वा[1] ऽक्षाणामविषयः । नैवाऽधिष्ठातृणां[2] प्रत्यक्षं धर्मं ब्रूमः, अपि तूपदेष्टुमतिशयवतः । स चाऽतिशयः स्वाभाविको महत्त्वमिव व्योम्न उपदेशान्तरजः क्रियानिबन्धनो वेत्यदोषः ।

कालयोराधाराऽऽधेयभावः सम्भवति । तत्सम्भवे तत्त्वमेव कुत? इत्यत आह—अन्यथा ऽसमवायादतिशयस्य यागादीनामश्रेयःसाधनत्वाद्धर्म्मत्वहानेः । तस्माद्यदा तदा भवतु, श्रेयःसाधनत्वं तु वर्तमानमिति नाऽक्षाणामविषयो धर्म्मः श्रेयःसाधनरूपः ।

एतदुक्तं भवति । भवतु नाम श्रेयःसाधनत्वशब्दः संबन्धवचनो न पुनर्द्धर्म्मशब्दोऽपि श्रेयः साधन एव । तस्य लौकिकपरीक्षकैरविवादं प्रयोगात् । अतिशयवच्च यागाद्येव तत्साधनमिति तदेव धर्म्मपदास्पदम् । ते च तद्भाजो वर्तमाना इति तेषां तद्वतां प्रत्यक्षतेति ।

चोदयति—ननु प्रागनुष्ठानात् धर्म्मज्ञानमिष्यतेऽनुष्ठातृभिस्तज्ज्ञानस्याऽनुष्ठानाऽङ्गत्वात् । तथा च भविष्यद्वाऽक्षाणामविषयः । परिहरति—नैवाऽनुष्ठातॄणामस्मदादीनां प्रत्यक्षं धर्म्मं ब्रूमः, किं तूपदेष्टुमतिशयवतः । यः खलु परेणाऽनुष्ठीयमानं यागादि प्रत्यक्षेण श्रेयःसाधनं पश्यति । कुतः पुनरस्याऽयमतिशय ? इत्यत आह—स चाऽस्यातिशयः स्वाभाविको महत्त्वमिव व्योम्न उपदेशान्तरजः क्रियानिबन्धनो वा कस्य चिदाप्तोपदेशादष्टाङ्गयोगमवगम्य तदनुष्ठानात्तत्परिपाके सति तां तां योगभूमिमधिरूढस्य संप्रज्ञातसमाधिप्रभावादेवाऽयमतिशयो जायते । तस्याऽचिन्तनीयसामर्थ्यत्वात् ।

१ भविष्यत्वात् मू॰ पु॰ । २ अधिकर्तॄणां मू॰ पु॰ पा॰ ।

उच्यते—

अतुल्यकालं सामर्थ्यं कर्म्मणः क्षणभङ्गिनः ।
चिरकालफलायाऽऽहुर्न तदध्यक्षमीक्षते ॥

प्रलीयमानकर्म्मलब्धोपजनः । पूर्वाऽपराङ्गोपपादिताऽवस्थान्तरो देशकालाद्यासादितपरिणतिभेद आनन्तर्यमपि कर्म्मणो ऽतिवर्तमानः को ऽप्यतिशयः कर्त्तरि कर्म्मणश्चिरभाविनः फलस्य साधनं कथ्यते । तदसौ न यथाह को हि योगप्रभावादृते अगस्त्य इव समुद्रं पिबतु, स इव दण्डकाऽरण्यं सृजतीति । सो ऽयमुभयविधो ऽतिशय उपायप्रत्यय उपेयप्रत्ययश्चेत्याख्यायते योगाचार्यैरिति । तस्माददोषः ।

तदेवं प्रत्यवस्थितं परं निराकरोति—उच्यते ।

अतुल्यकालं सामर्थ्यं कर्म्मणः क्षणभङ्गिनः ।।
चिरकालफलायाहु[1]र्न तदध्यक्षमीक्षते[2] ।

तदेतद् व्याचष्टे—आशुतरविनाशित्वात् कर्मणः प्रलीयमानकर्म्मलब्धोपजनः । कर्माऽऽनन्तर्यमपि तस्य नास्ति, किमङ्ग पुनस्तत्कालतेत्याह[3]—पूर्वपराङ्गाऽग्न्यन्वाधानब्राह्मणतर्पणादिना पूर्वोपपादिताऽवस्थान्तरः । एतावता ऽप्यसौ नाऽतिशयः, अपि तु देशकालाद्यवस्थाद्यपेक्षाऽऽसादितपरिणतिभेदः । सो ऽयमुक्तकारणक्रम आनन्तर्यकर्मणो ऽतिवर्त्तमानः किं पुनः समानकालतां कोपि कर्म्मणो ऽतिशयः[4] । ननु निराधारस्य कार्यस्याऽनुपपत्तेरुत्पत्तिधर्म्मा किमाधारो ऽयमतिशय ? इत्यत आह—कर्तरि नित्यात्मनि । तत् किं[5] कर्तृस्थः कर्त्तुरेव न किं तु कर्म्मणः । ननु कर्मैव फलाय चोदितं तत्साधयतु किमन्तर्गर्भिणा ऽपूर्वेणे? त्यत आह—चिरभाविनः फलस्य साधनं कथ्यते वृद्धैः । न हि चिरविनष्टं कर्माऽनुपजनिताऽतिशयभेदं चिरभाविने फलाय कल्पते इत्यर्थः । भवत्वेवं प्रकृते किमा-

१ फलायातम् । २ पु पा. । २ इष्यते । १ पु· पा· । ३ तत्काल इत्याह २ पु· पा· । ४ विरामः २ पु· पा । ५ आत्मनि किम् । २ पु· पा· ।

कर्म्मकाले वर्तमानः। स्वकाले वर्तमानो ऽपि कर्म्मणो ऽति-वृत्तत्वान्न कर्मसम्बन्धितया ऽध्यक्षमीक्षते। तदुक्तं "फल-साधनरूपेण तदानीं येन नास्त्यसा"विति। कर्म्मकाले तस्य भावित्वं तत्काले च कर्म्मणो ऽभावः। कथं तर्हि कर्म्मणः साधनत्वं तदन्यसमवायि? तदाहितत्वात्। न हि स्वस-मवाय्येव साधनं भवतीति कश्चिन्नियमः। कार्य्याऽनुमेयं तद्यत्र कार्य्यायाऽलं तत्रैव युक्तं तदाहितत्वात्तस्य शक्तिः।

यात? मित्यत आह—तदसौ न कर्म्मकाले वर्त्तमानः। अथ सर्व-देव किमवर्त्तमानः? तथा च गगनकमलिनीकल्पः प्रसज्येतेत्यत आह—स्वकाले वर्त्तमानो ऽपि। अथ मा भूदसौ कर्मकाले, तत्काले तु कर्म्म कस्मात्? इत्यत आह—आशुतरविनाशितया तत्काले कर्मणो ऽतिवृत्तत्वात्। तस्मात्कर्मतदतिशययोरसमानकालतया ऽतिशयवतो ऽत्यन्ताऽवर्त्तमानतया वर्तमानविषयनियतं प्रत्यक्षं न तद्गोचरयितुमर्हतीत्याह—न कर्मसंबन्धितया ऽध्यक्षमीक्षते। तदुक्तं 'फलसाधनरूपेण तदानीं येन नास्त्यसा'विति। तदेव स्फुटयति-कर्म्मकाले तस्याऽतिशयस्य उक्तकालक्रमस्य भावित्वं तत्काले च कर्मणो ऽभावः।

चोदयति--कथं तर्हि कर्म्मणः साधनत्वं तदपूर्वमन्यसम-वायि? परिहरति—तदाहितत्वात्। न हि स्वसमवाय्येव साधन-मिति कश्चिन्नियमः। ननु तथाप्यात्मसमवायित्वादात्मन एव कस्मान्न भवती? त्याह—कार्याऽनुमेयं तदपूर्वं यत्र च कार्यायाऽलं तत्रैव युक्तम्। अयमर्थः। यदि हि तद्रूपमन्यनिरपेक्षमेव गम्यते ततो यत्प्रत्यासन्नमवगम्यते तस्य स्यात् यथा घटस्य शौक्ल्यं, न त्वेतत्तथा, ऽपितु कर्म्मणः करणत्वेन फलाय चोदिते तदुपपत्त्यैतत्कल्प्यमानं प्रतिपत्तिदशायां कर्म्मसंबद्धमेवाऽवगतम्। न ह्यन्यसंबद्धमेतत्फल-

न चौपपचारिकः कर्म्मणः साधनभावः। काष्ठादिषु तथैव सिद्धेः। ननु न तदस्तीति मन्यन्ते। प्रमाणाऽभावात्। न च श्रुताऽर्थापत्तिः प्रमाणम्। फलसम्बन्धे चोदनाप्रामाण्यवि-

संबन्धमुपपादयन्ति कर्म्मणः। तथाप्रतीयमानमपि चेत्कर्म्मोऽपहा-याऽन्येन संबध्येत स्वरूपादेव हीयेतेति कर्म्मण्येव तत्। ननु प्रथमं प्रतीयतां नाम कर्म्मसंम्बन्धः, वास्तवस्तस्य तेन संबन्धो वक्तव्यः। इतरथा तत्प्रतीतेर्मिथ्यात्वप्रसङ्गादित्यत आह-तेन कर्म्मणा ऽऽहितत्वात्तस्य कर्म्मणः शक्तिः।

अपरः कल्पः-कस्मादन्यसमवायि तदपूर्वं न तु कर्म्मसम-वायि कल्प्यते? इत्यत आह-कार्याऽनुमेयं तत्तच्च कार्यायाऽलं तथैव युक्तं, न खलु तदाशुतरविनाशि कर्म्माधारं तद्विनाशे विनष्टमामुष्मि-काय फलाय कल्पते। तस्मान्नित्यात्मसमवायीत्यर्थः। यद्यात्मसम-वायि तत्तस्यैव शक्तिः न कर्म्मण इत्यत आह-तदाहितत्वात्तस्यैव शक्तिः। न चेत्थमौपचारिकः कर्म्मणः साधनभावः, काष्ठादिषु तथैव सिद्धेः। न खलु काष्ठादीनामपि साक्षाद्भक्तिसाधनता, किं त्वौष्ण्या-ऽपेक्षस्य वन्हिसंयोगप्रचयभेदस्य। अथ च काष्ठैः पचन्तीति मुख्यैव साधनता काष्ठानामग्नितन्दुलसमवाय्यपि वन्हिसंयोगस्तत्पूर्वं इति तथा यागादीनामपि। कृतोपपादनं चैतद् नियोगपरीक्षायाम्।

ननु न तदपूर्वमस्तीति मन्यन्ते देवानां प्रियाः। कुतः? प्रमाणाऽभावात्। न च श्रुताऽर्थापत्तिरेवाऽत्र प्रमाणमिति कथं प्रमाणा-ऽभाव? इत्यत आह-न च श्रुताऽर्थापत्तिः प्रमाणम्। कस्मात्? कर्म्मणः फलसंबन्धे चोदनाप्रामाण्यविघातात्। असिद्धो हि स तदा ऽपूर्वकल्पनायाः प्राक्कर्म्मफलसंम्बन्धश्चोदनातो ऽर्थापत्तितो ऽपूर्वक-

घातात् । असिद्धो हि स तदा चोदनातो ऽर्थापत्तितः सिद्धिं समासादयतीत्यर्थापत्तिकारणः स्यात् । अन्यथा कर्मफलसम्बन्धसिद्धेरर्थापत्तिप्रसङ्गः । सिद्धे तस्मिन्किमन्यदपेक्ष्य तदुपकल्प्यते ? न हि निरपेक्षा । अपेक्षायामपि यागफलसम्बन्धप्रतीतावर्थान्तरं चेदपेक्षेत कथं तदप्रतिपत्तौ तत्प्रतिपत्तिः ? नाऽप्रतिपन्नपदार्थो[1] वाक्यार्थो यतः प्रमाणान्तरं चेत् अपेक्षते अनपेक्षत्वं व्याहन्येत । अपि च । श्रुतं वाक्यमनुपपन्नं साऽपेक्षत्वात् 'विश्वजिता यजेते'तिवत् अध्याहार्य्यनिर्देशात् । अर्थो वा ऽनुपपन्नः । पूर्वत्र वाक्यशेषल्पनायां सत्यां सिद्धिमासादयतीति तद्भावभावादर्थापत्तिकारणो ऽर्थापत्तिप्रमाणकः स्यात् । अन्यथा ऽनपेक्षाच्छब्दात् कर्मफलसंबन्धसिद्धेरेव हेतोरर्थापत्तिप्रसङ्गः । उत्तरम्–सिद्धे सति कर्मफलसंबन्धे तत्प्रतीत्या किमन्यदपूर्वं विना ऽनुपपद्यमानमपेक्ष्य तदपूर्वमुपकल्प्यते? न ह्यन्यथाऽनुपपद्यमाने निरपेक्षा प्रतीतिः कल्पनायै प्रभवति । यदुच्येत यागफलसम्बन्धप्रतीतिरेव नोपपद्यते किमन्येनाऽनुपपद्यमानेनेति ? तत्राह–अपेक्षायामपि यागफलसंबन्धप्रतीतौ अर्थान्तरं चेत्स्वोत्पत्तावपेक्षेत, तदनुपपन्नम्, कथं हि तस्याऽर्थान्तरस्याऽप्रतिपत्तौ तत्कर्मफलसंबन्धसिद्धेः प्रतीतिः । नाऽप्रतिपन्नपदार्थो वाक्यार्थो यतः प्रमाणान्तरं चेदपेक्षते न त्वर्थान्तरं तत्राह–अनपेक्षत्वं व्याहन्येत । अपि चाऽनुपपत्तिरपि किं वाक्यस्याऽथ तदर्थस्ये?ति विकल्पयति–अपि च श्रुतं वाक्यमनुपपन्नं साऽपेक्षत्वात् ।

कुतः साऽपेक्षत्वम् ? इत्यत आह–विश्वजिता यजेतेतिवदध्याहार्यनिक्षेपात् स्वर्गकामपदस्य वाक्यैकदेशस्याऽध्याहार्यत्वं तत्समुदाये वा वाक्ये उपचरितमध्याहारो वा ऽस्यास्तीति अध्याहारि स्वर्गकामदं, तस्याऽनिर्देशात्साऽपेक्षत्वमिति द्वितीयपक्षमाह–अर्थो वा ऽनुपपन्नः । एवं विकल्प्य दूषयति–पूर्वत्र वाक्यशेषपरिकल्पना स्यात् ।

१ पदार्थकः मू० पु० पा० ।

कल्पना। न 'चाऽनुपपत्तिः। स्वर्गकामो यजेते'ति परिसमाप्तेर्वाक्यशेषाऽनुपपत्तेश्चाऽपूर्वं कृत्वेति प्राग्यागादपूर्वोत्पत्तिप्रसङ्गः। यागेनाऽपूर्वं कृत्वेति द्विरुच्चारणं यजेः, पूर्वश्च दोषः। उत्तरत्रापि श्रुततया चेदनुपपन्नः, पूर्व एव विकल्पः। स्वभावान्तरेणाऽनुपपत्तौ श्रुतसिद्ध्यर्थमपूर्वकल्पनेत्यसमीचीनम् ॥

न हि वाक्यमपरिपूर्णमतज्जातीयेनाऽर्थेन पूरयितुं शक्यमपि तु शब्दे, नैवेति लौकिकी स्थितिः। तदेतद्वाक्यं नोपपद्यतइत्यङ्गीकृत्योक्तम् परमार्थतस्तु—न चाऽनुपपत्तिः। कुतः? दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति पदैः स्वार्थाऽभिधानद्वारेण वाक्यार्थप्रतीतेः परिसमाप्तेः। यश्च वृद्धैर्वाक्यशेषः परिकल्प्यते ऽपूर्वं कृत्वेति सो ऽप्यनुपपन्न इत्याह—वाक्यशेषाऽनुपपत्तेश्चाऽपूर्वं कृत्वेत्यपूर्वकत्वात्। स्वर्गकामो यजेतेति हि वाक्यादयमर्थः प्रतीयते येन केन चिदपूर्वं कृत्वा यजेत स्वर्गकाम इति। तथा सति प्राग्यागादपूर्वोत्पत्तिप्रसङ्गः। यदि पुनरपूर्वकरणे ऽपि यागेनेति सम्बध्येत ततः फले ऽपि तत्संबन्धनीयमिति द्विरुच्चारणं यजेः पूर्वश्च दोषः। न तावद्येनैव यागेनाऽपूर्वं क्रियते तेनैव पश्चात्फलमपि, कर्मणो विरम्य व्यापाराऽनुपपत्तेः। अर्थाद्यागान्तरेण। तथा च प्राग्यागात्फलसाधनादपूर्वोत्पत्तिप्रसङ्ग इति पूर्वोक्तदोषः। उत्तरत्रापि च श्रुततया चेदनुपपन्नो वाक्यार्थः पूर्व एव विकल्पः। तेन सह तुल्यदोषत्वात्। तेनापि च शाब्दतयैवार्थान्तरं कल्पनीयं यतः। यदि तु तत्त्वं परित्यज्य स्वभावान्तरेणाऽनुपपत्तिरास्थीयेत तत्राह—स्वभावान्तरेणाऽनुपपत्तौ श्रुतसिद्ध्यर्थमपूर्वस्य कल्पनेति वृद्धवचनमसमीचीनं स्यात्। सो ऽयं देवानांप्रियैः प्रणीतो दूषणगणो देवचूडामणिभिरेव परिहरणीय इत्याचार्येणापि नोदधारि, तत्र के वयं ते तव ममेति तचोपचीणमतिविभवा इति।

अपि च पौरुषेयत्वे सति वेदानां सर्वज्ञप्रणीततया तदनुवि धायिनां तेभ्यः प्रतिपत्तिर्भवेदपि, न पुनरस्ति पौरुषेयता । ननु वाक्यमात्रं पुरुषाऽधीनवचनम् । तथा हि । दुर्भगत्वेन वर्णाऽनुपूर्व्यभेदसंबन्धेन विशिष्टेन वा विषयाऽऽनयनादिकार्येण समानात्मानः पौरुषेया अपि पदक्रमास्तेषु तेषु बौद्धाद्यागमेष्वपि प्रतिपन्नपौरुषेयत्वेषु दृश्यन्ते । यच्च यस्मादभिन्नस्वभावं न तत्ततो भिन्नहेतुकं यथैकस्मात्कलमाऽङ्कुरादभिन्नस्वभावं कलमाङ्कुरान्तरं तत्समानहेतुकं, तथा लौकिकीभ्यः पदानुपूर्वीभ्यो भिद्यमानस्वभावा वैदिकाः पदसंनिवेशा इति स्वभावहेतुः । भिन्नकारणत्वाद्धि स्वविरुद्धभिन्नस्वभावत्वव्याप्तात्स्वभावविरुद्धोपलब्ध्यान्निःस्वभावत्वं व्यावर्तमानं कारणाऽभेदेन व्याप्यतइति प्रतिबन्धसिद्धिः ।

अत्रोच्यते । किं वेदवाक्यानां पुरुषप्रणीतत्वमात्रं साध्यते आहो स्वित् स्वतन्त्रपुरुषप्रणीतत्व? मिति । पूर्वस्मिन् सिद्धसाधनम् । न खलु वयमपि नित्यत्वे ऽपि वर्णानामानुपूर्वीविशेषोपहितसीमपदमभेदवाक्यानामपौरुषेयतया ऽऽचक्ष्महे । तथा हि । वर्णानां नित्यतया विभुतया च देशतः कालतो वा संभवत्यानुपूर्व्यामत्यभिव्यक्त्याश्रयं तद्वक्तव्यम् । सा च पुरुषप्रयत्नयोनिरिति कथं तद्भेदोपहितमार्यादानां गवादिपदानां वेदवाक्यानां च पौरुषेयते? ति । अथ स्वतन्त्रपुरुषप्रणीतत्वं मानिषादादिवाक्यवत् । प्राचेतसः खल्वत्रभवानादिकविः स्वतन्त्रः, तद्वद्वेदवाक्येष्वपि कश्चिदीश्वरादिरिति साम्प्रतम् । अनैकान्तिकत्वात् । स्वतन्त्रप्राचेतसपुरुषप्रणीतत्वाऽभावात् ।

स्यादेतत् । न स्वतन्त्रपुरुषप्रणीतत्वं वेदवाक्यानां साधयामः, अपि तु स्वतन्त्रपुरुषपूर्वकत्वम् । अस्ति चाऽस्मदादिपुरुषप्रणीतेष्वपि मानिषादादिपदसंनिवेशेषु पारम्पर्येण पुराणस्य कवेः स्वातन्त्र्यमिति नानैकान्त इति । तदनुपपन्नम् । पुरुषप्रणीततामात्रेण कारणाऽभेदेन लौकिकात्पदसंनिवेशाद्वैदिकानामभेदोपपत्तावप्रतीतस्य वेदेषु

पुरुषस्वातन्त्र्यस्याऽप्रयोजनकस्य कल्पनाऽनुपपत्तेः । तत्समानसन्निवेशत्वस्य पुरुषपारतन्त्र्येणाऽऽत्यन्तिके नास्ति कश्चिद्विरोधः । येन तद्विपक्षादात्यन्तिकपारतन्त्र्याद्व्यावर्तमानं पुरुषस्वातन्त्र्याऽप्रयोजनकस्य कल्पनाऽनुपपत्तेः । तत्समानसन्निवेशे च पुरुषपारतन्त्र्येणाऽऽत्यन्तिके नास्ति कश्चिद्विरोधः । येन तद्विपक्षादात्यन्तिकपारतन्त्र्याद्व्यावर्तमानं पुरुषं स्वातन्त्र्येण व्याप्येत । तेन यथा समानमैत्रीजन्मस्वपि मैत्रीतनयेष्वन्नपानविशेषोपयोगनिमित्ता श्यामता केषांचिदेव न सर्वेषामिति तत्तनयतया न श्यामताऽनुमानमेवं विलक्षणप्रयत्नस्थानाऽभिघातादिजन्मवाक्यनिष्पत्तेस्तद्भेदाऽभेदाऽनुविधायिभेदाऽभेदौ युज्यते न पुनः पुरुषपारतन्त्र्ये तन्त्रीकर्तुमुत्सहते । सोऽयं सन्दिग्धव्यतिरेकतया ऽनैकान्तिको हेत्वाभासः ।

यस्तु दर्शनकथन्तासंबोधरहितो यथादर्शनपूजकः प्रमाणयेत् दृष्टानि हि भारतादिवाक्यानि स्वतन्त्रपुरुषप्रणीतानीति वेदवाक्यान्यपि वाक्यत्वात्तथाविधानीति, स कर्तव्यः, विवादाध्यासितं वेदाऽध्ययनमध्ययनान्तरपूर्वकं वेदाऽध्ययनत्वादस्मदादिवेदाध्ययनवत् । नैवं भारतादिषु अस्याऽनुमानम् । तत्र दृढतरेण कृष्णद्वैपायनादिस्मरणेनाऽनुमानस्य बाधेन विधेयत्वादनुत्पादात् । वेदे तु कर्तृस्मृतिदृढिमाऽसम्भवात्काठकादिसमाख्यातस्य प्रवचनमिति वचनोपपत्तेरबाधितविषयस्याऽनुमानस्याऽप्रत्यूहमुत्पत्तेः । न च भवदनुमानमस्य विषयबाधे प्रभवति । तस्य सामान्यतोदृष्टसंबन्धात्सामान्यशास्त्रस्येव विशेषशास्त्राद् दुर्बलत्वात् । तथाह ।

प्रसिद्धाऽवयवं यत्स्याद्विशेषे वा प्रतिष्ठितम् ।
तत्साध्याङ्गकसामान्यदृष्टात्तु बलवत्तरम् ॥ इति ।

स्यादेतत् । शब्दानामर्थप्रत्यायनस्य पुरुषसङ्केताऽधीनजन्मत्वात्तत्सम्बन्धा केनचिल्लौकिकसंव्यवहारार्थं शब्दानामर्थैः सम्ब-

१ संबन्धांद्वेदः—२ पु· पा· ।

न्थान् कृत्वा[1] वेदः प्रणीतः । न चाऽर्थप्रत्यायनं प्रति शब्दानां स्वाभाविकी शक्तिः सङ्केतेन व्यज्यतइति साम्प्रतम् । यदि हि सत्यपि सङ्केते कश्चिद् ध्वनिः कं चनाऽर्थं नाऽवभासयेत् ततः कस्य चित् सङ्केताऽभिव्यक्तसामर्थ्यस्य स्वाभाविकमुपपद्येत वाचकत्वं, न त्वेतदस्ति । सङ्केतमन्तरेण ध्वनेरर्थरूपस्याऽप्रतिपादकत्वात् । सति तु सङ्केते सर्वस्मादपि सर्वार्थप्रत्ययोत्पत्तिदर्शनात् । तदयुक्तम् । अन्तरेणापि सङ्केतमनादिवृद्धव्यवहारदर्शनादभिव्यक्तसामर्थ्येभ्यः शब्देभ्यो ऽर्थप्रतिपत्तेरुपपत्तेः । सम्बन्धकल्पनायामर्थापत्तिपरिक्षयात् । न च व्यवहारदर्शनमेव सङ्केत इति साम्प्रतम् । न खल्वेतदनेन शब्देनाऽयमर्थः प्रत्येतव्य इत्येवमाकारम्, अपि तु शब्दोच्चारणसमनन्तरप्रवृत्तिनिवृत्तिहर्षाद्याभासम् । तच्च स्वप्रवृत्त्यादिनिबन्धनाऽर्थभेदविषयप्रख्याऽनुमान[2]द्वारेण शब्दस्य तत्र कारणतायां प्रमाणम् । न च व्युत्पद्यमानास्तदा सङ्केतं सङ्केतस्य कर्त्तारं वा प्रतियन्ति । न चेह सङ्केतं तस्य च कर्त्तारमन्तरेण कस्य चित्परिदृश्यमानस्याऽनुपपत्तिः । ततो नूनं स्वभावतः शब्द एवाऽर्थभेदप्रत्ययस्य हेतुरित्यध्यवस्यति । न च गवादिशब्दानामश्वादौ देवदत्तादिशब्दानां च तत्र तत्र सङ्केताऽधीनतया प्रवृत्तेर्गोत्वादावपि गवादिशब्दाः सङ्केताऽऽयत्तप्रवृत्तय इति शक्याऽनुमानम् । अनादिवृद्धव्यवहारपरम्पराऽभिव्यक्तस्वाभाविकाऽर्थप्रत्ययहेतुभावानां स्वार्थवृत्तेः सङ्केताऽभावेन सह सम्भवादविरोधात् । यथादर्शनपूजकं प्रति तु शक्यमेवं प्रत्यवस्थातुम् । विवादाऽध्यासिताः पुमांसो गवादिपदेभ्यो गोत्वादिषु सङ्केताऽनायत्तप्रतिपत्तयो गवादिपदेभ्यो गोत्वादिप्रतिपत्तिमत्त्वादस्मदादिवदिति । विपञ्चितं चैतद्वृद्धैरिति दिङ्मात्रमत्र सूचितं, वक्तव्यं च किञ्चिदुक्तन्याऽभिधानं सूरिभित्युपरम्यते ॥

इति पूर्वकणिका समाप्ता ।

---

१ प्रस्यानुमान । २ पु॰ पा॰ ।

पुरुषस्वातन्त्र्यस्याऽप्रयोजनकस्य कल्पनाऽनुपपत्तेः । तत्समानसन्निवेशत्वस्य पुरुषपारतन्त्र्येणाऽऽत्यन्तिके नास्ति कश्चिद्विरोधः । येन तद्विपक्षादात्यन्तिकपारतन्त्र्याद्व्यावर्त्तमानं पुरुषस्वातन्त्र्याऽप्रयोजनकस्य कल्पनाऽनुपपत्तेः । तत्समानसन्निवेशे च पुरुषपारतन्त्र्येणाऽऽत्यन्तिके नास्ति कश्चिद्विरोधः । येन तद्विपक्षादात्यन्तिकपारतन्त्र्याद्व्यावर्तमानं पुरुषं स्वातन्त्र्येण व्याप्येत । तेन यथा समानमैत्रीजन्मस्वपि मैत्रीतनयेष्वन्नपानविशेषोपयोगनिमित्ता श्यामता केषांचिदेव न सर्वेषामिति तत्तनयतया न श्यामताऽनुमानमेवं विलक्षणप्रयत्नस्थानाऽभिघातादिजन्मवाक्यनिष्पत्तेस्तद्भेदाऽभेदाऽनुविधायिभेदाऽभेदो युज्यते न पुनः पुरुषपारतन्त्र्ये तन्त्रीकर्तुमुत्सहते । सो ऽयं सन्दिग्धव्यतिरेकतया ऽनैकान्तिको हेत्वाभासः ।

यस्तु दर्शनकथन्तासंबोधरहितो यथादर्शनपूजकः प्रमाणयेत् दृष्टानि हि भारतादिवाक्यानि स्वतन्त्रपुरुषप्रणीतानीति वेदवाक्यान्यपि वाक्यत्वात्तथाविधानीति, स वक्तव्यः, विवादाध्यासितं वेदाऽध्ययनमध्ययनान्तरपूर्वकं वेदाऽध्ययनत्वादस्मदादिवेदाध्ययनवत् । नैवं भारतादिषु अस्याऽनुमानम् । तच्च दृढतरेण कृष्णद्वैपायनादिस्मरणेनाऽनुमानस्य बाधेन विधेयत्वादनुत्पादात् । वेदे तु कर्तृस्मृतिदृढिमाऽसम्भवात्काठकादिसमाख्यातस्य प्रवचनमिति वचनोपपत्तेरबाधितविषयस्याऽनुमानस्याऽप्रत्यूहमुत्पत्तेः । न च भवदनुमानमस्य विषयबाधे प्रभवति । तस्य सामान्यतोदृष्टसंबन्धात्सामान्यशास्त्रस्येव विशेषशास्त्राद् दुर्बलत्वात् । तथाह ।

प्रसिद्धाऽवयवं यत्स्याद्विशेषे वा प्रतिष्ठितम् ।
तत्साध्याङ्गकसामान्यदृष्टात्तु बलवत्तरम् ॥ इति ।

स्यादेतत् । शब्दानामर्थप्रत्यायनस्य पुरुषसङ्केताऽधीनजन्मत्वात्तत्सम्बन्धा केनचिल्लौकिकसंव्यवहारार्थे शब्दानामर्थैः सम्ब-

१ संबन्धांद्वैदः—२ पु· पा· ।

न्थान् कृत्वा[1] वेदः प्रणीतः । न चाऽर्थप्रत्यायनं प्रति शब्दानां स्वाभाविकी शक्तिः सङ्केतेन व्यज्यतइति साम्प्रतम् । यदि हि सत्यपि सङ्केते कश्चिद् ध्वनिः कं चनाऽर्थं नाऽवभासयेत् ततः कस्य चित् सङ्केताऽभिव्यक्तसामर्थ्यस्य स्वाभाविकमुपपद्येत वाचकत्वं, न त्वेतदस्ति । सङ्केतमन्तरेण ध्वनेरर्थरूपस्याऽप्रतिपादकत्वात् । सति तु सङ्केते सर्वस्मादपि सर्वार्थप्रत्ययोत्पत्तिदर्शनात् । तदयुक्तम् । अन्तरेणापि सङ्केतमनादिवृद्धव्यवहारदर्शनादभिव्यक्तसामर्थ्येभ्यः शब्देभ्यो ऽर्थप्रतिपत्तेरुपपत्तेः । सम्बन्धकल्पनायामर्थापत्तिपरिक्षयात् । न च व्यवहारदर्शनमेव सङ्केत इति साम्प्रतम् । न खल्वेतदनेन शब्देनाऽयमर्थः प्रत्येतव्य इत्येवमाकारम्, अपि तु शब्दोच्चारणसमनन्तरप्रवृत्तिनिवृत्तिहर्षाद्याभासम् । तच्च स्वप्रवृत्त्यादिनिबन्धनाऽर्थभेदविषयप्रख्यानुमान[2]द्वारेण शब्दस्य तत्र कारणतायां प्रमाणम् । न च व्युत्पद्यमानास्तदा सङ्केतं सङ्केतस्य कर्त्तारं वा प्रतियन्ति । न चेह सङ्केतं तस्य च कर्त्तारमन्तरेण कस्य चित्परिदृश्यमानस्याऽनुपपत्तिः । ततो नूनं स्वभावतः शब्द एवाऽर्थभेदप्रत्ययस्य हेतुरित्यध्यवस्यति । न च गवादिशब्दानामश्वादौ देवदत्तादिशब्दानां च तत्र तत्र सङ्केताऽधीनतया प्रवृत्तेर्गोत्वादावपि गवादिशब्दाः सङ्केताऽऽयत्तवृत्तय इति शक्याऽनुमानम् । अनादिवृद्धव्यवहारपरम्पराऽभिव्यक्तस्वाभाविकाऽर्थप्रत्ययहेतुभावानां स्वार्थवृत्तेः सङ्केताभावेन सह सम्भवादविरोधात् । यथादर्शनपूजकं प्रति तु शक्यमेवं प्रत्यवस्थातुम् । विवादाऽध्यासिताः पुमांसो गवादिपदेभ्यो गोत्वादिषु सङ्केताऽनायत्तप्रतिपत्तयो गवादिपदेभ्यो गोत्वादिप्रतिपत्तिमत्त्वादस्मदादिवदिति । विपञ्चितं चैतद्वृद्धैरिति दिङ्मात्रमत्र सूचितं, वक्तव्यं च किञ्चिदुद्धन्याऽभिधानं सूरिभित्युपरम्यते ॥

इति पूर्वकणिका समाप्ता ।

---

१ प्रख्यानुमान । २ पु॰ पा॰ ।

उच्यते—

उपदेशो नियोज्यार्थकर्म्माप्रस्थितचोदना ।
प्रथितो गुरुवैद्यादौ नित्ये पि न न कल्पते ॥

यद्यप्याज्ञाऽभ्यर्थना वेदे ऽनुपपन्नाः, उपदेशस्तु युज्यते । सो ऽपि तद्वदेव प्रेरणात्मकश्चतुर्थो लोके प्रज्ञायते । तथा हि-आज्ञाऽभ्यर्थने हि नियोक्त्रर्थमनाहतनियोज्यफलं कर्म्म गोचरयतः । नियोज्यार्थं तूपदेशः । अनुज्ञा तु यद्यप्येवं

सिद्धान्तमुपक्रमते—उच्यते ।

उपदेशो नियोज्याऽर्थकर्माऽप्रस्थितचोदना ।
प्रथितो गुरुवैद्यादौ नित्येपि न न कल्पते ॥

तत्र यत्तावदुक्तम् 'अपौरुषेये प्रैषादिर्नृधर्मो नाऽवकल्पत इति । तेन यद्याज्ञाऽभ्यर्थनाऽनुज्ञाः प्रतिषिध्यन्ते तदनुजानीमहे एव, देशप्रतिषेधं तु न मृष्यामह इत्याह—यद्यप्याज्ञाऽभ्यर्थनानुज्ञा वेदे ऽनुपपन्नास्तस्याऽपौरुषेयत्वेन चेतनस्य नियोक्तुरभावात् । उपदेस्तु युज्यते । तस्याऽपौरुषेये ऽपि सम्भवात् । न ह्यसौ नियोक्तृकार्थकर्म्मेति वक्ष्यति, येन चेतनकर्तृकः स्यात् । न चासौ न लौकिको ऽप्रेरणात्मको वा, येनाऽविधिः स्यादित्याह—सो ऽपि तद्वदेवाऽऽज्ञावदेव प्रेरणात्मकश्चतुर्थो लोके प्रज्ञायते । ननु च यदि प्रेरणात्मकः कथमाज्ञादिभ्यो भिद्यते? भिद्यते चेत्कथं प्रेरणात्मक? इत्यत आह—तथा हि । आज्ञाऽभ्यर्थने हि नियोक्त्रर्थमनाहतनियोज्यफलं कर्म गोचरयतः, नियोज्यार्थे तु कर्मोपदेशो गोचरयति । तदनेनैवोपदेशो नियोज्याऽर्थकर्मेति कारिकार्थो विवृतः ।

एतदुक्तं भवति । आज्ञाऽभ्यर्थनोपदेशाः कर्मणि प्रवृत्तिजननेन तद्गोचरयन्तो भवन्ति प्रेरणात्मतया समानास्तेषामाज्ञाऽभ्यर्थनाभ्यां गोचरीक्रियमाणं कर्माऽनादृतनियोज्यप्रयोजनमाज्ञापयितुर-

क चित्तथापि प्रवृत्तपुरुषविषयत्वान्नोपदेशः। नियोज्यार्थकर्म्मगोचरमप्रवृत्तप्रवर्तनमुपदेशमाचक्षीते धीराः। न हि गामभ्याज माणवकमध्यापय कुरु यथाऽभिमतमित्युपदेशप्रतीतिः। नापि भैक्ष्यं चेत्, ज्वरितः पथ्यमश्नीयादिति प्रतीतिः। भूयसा चैष पौरुषेयेषु कामार्थशास्त्रादिष्वाज्ञादिभिरनारूषितो लोके प्रज्ञायते। गोपालादिवचःसु च भ्यर्थ्यमानस्य वा प्रयोजनायाऽवकल्पते। उपदेशगोचरस्तु कर्माऽनादृतोपदेशकप्रयोजनमुपदेश्यार्थमेवेत्ययमाज्ञाऽभ्यर्थनाभ्यामुपदेशस्य भेदः प्रेरणात्मकत्वं चेति नियोज्यार्थं कर्म यस्योपदेशस्य न तु नियोक्तर्थं स तथोक्त इत्यक्षरयोजना।

ननु यदि नियोज्यार्थकर्मोपदेशः हन्ताऽनुज्ञा ऽप्युपदेशः प्रसज्येत। सा ऽपि हि क चिन्नियोज्याऽर्थकर्मेत्यत आह—अनुज्ञा तु यद्यप्येवं क चित्तथापि प्रवृत्तपुरुषविषयत्वान्नोपदेशः। नियोक्तर्थकर्मापि अनुज्ञा भवत्येव। तथा हि। भृत्यस्य प्रभवे हितं चिकीर्षोरप्यस्ति हितकामितया सहसा कुर्वतः प्रभोरभ्यनुज्ञेति क चिद्ग्रहणम्। अनेनाऽप्रस्थितचोदनेति विवृतम्। अप्रस्थितस्याऽप्रवृत्तस्य पुंसः प्रस्थापना चोदनेत्यक्षरयोजना। लोकप्रसिद्धो ऽयमीदृश उपदेश इति कुत ? इत्यत आह—नियोज्याऽर्थकर्मगोचरमप्रवृत्तप्रवर्त्तनमुपदेशमाचक्षते धीराः। न चाऽऽख्यानमात्रमवगतिरप्याज्ञादिविलक्षणोपदेशालम्बना ऽस्तीत्याह—न हि गामानयेत्याज्ञायां माणवकमध्यापयेत्यभ्यर्थनायां कुरु यथेहितमित्यनुज्ञायामुपदेशप्रतीतिः। नापि भैक्ष्यं चरेज्ज्वरितः पथ्यमश्नीयादित्याज्ञादिप्रतीतिः। न चाऽस्योपदेशस्य क चित्कथं चिदवगति,र्भूयसा प्रकारेण सर्वथाऽवगतेरित्याह—भूयसा चैव पौरुषेयेषु कामाऽर्थशास्त्रादिष्वाज्ञादिभिरनारूषितो लोके प्रज्ञायते। शास्त्रकारा हि नैसर्गिकवैनयिकबुद्ध्यतिशयसंपन्ना लौकिकाः न केवलं शास्त्रेषु निकृष्टबुद्धिवचनेष्वपीति

मार्गाऽऽख्यानपरेषु अनेन पथा गच्छेति। न हि हीनस्याज्ञानात्माख्ये कर्मण्यभ्यर्थनानुज्ञानम प्रवृत्तस्य। अत एव चोपदेशः। इत्याज्ञादिभ्यो भेदेन तस्य प्रतीतत्वात्तस्य ज्ञानमुपदेश इति ततो भिन्न उपदेशशब्देन दर्शितः। भवतु ततो भिन्नः, कः पुनरसौ? ननूक्तमुपदेश इति विशिष्टस्य शब्दस्योच्चारणम्। यद्येवमव्युत्पन्नस्यापि प्रवृत्तिप्रसङ्गः। उच्यते।

विशिष्टः पुरुषार्थस्य शुद्धस्योपायमाह यः।
पुरुषार्थो यदा येन यो नरेणाऽभिकाङ्क्ष्यते॥

प्रसिद्धतरत्वमाह—गोपालादिवचस्सु च मार्गाऽऽख्यानपरेष्वनेन पथा गच्छेति। अथैतदाज्ञादीनामन्यतमत्कस्मान्न भवति? इत्यत आह—न हि हीनस्याऽज्ञानात्मार्थे कर्मण्यभ्यर्थनाऽनुज्ञानमप्रवृत्तस्य। यत एव तद् गोपालवचोऽत एव प्रसक्तानामाज्ञादीनां प्रतिषेधादन्यचोपाख्यानादाज्ञप्रसङ्गाच्छिद्यमाने संप्रत्यय इत्याह—अत एवोपदेशस्तत एव चाऽयमपि रूपेयेऽपि सम्भवतीति सूचकत्वेन दर्शित इत्याह—इति तस्मादाज्ञादिभ्यो भेदेन लब्धप्रतीतित्वात्तस्य ज्ञानमुपदेश इति तत आज्ञादिभ्यो भिन्न उपदेशो दर्शितः। भवतु ततो भिन्नः, कः पुनरसौ? समानाऽसमानजातीयव्यवच्छेदकमस्य वाच्यमित्यर्थः।

ननु चोक्तं भाष्यकृता उपदेश इति विशिष्टस्योच्चारणं विशिष्टस्येति वदता शब्दस्य रूपगतो विशेष उक्तः। स च प्रत्यक्षशब्दवर्तितया प्रत्यक्ष इति प्रथमश्राविणोऽपि प्रवृत्तिप्रसङ्ग इत्याह—यद्येवमव्युत्पन्नस्यापि प्रवृत्तिप्रसङ्गः। न प्रत्यक्षव्युत्पत्तिमपेक्षत इत्यर्थः। उच्यते।

विशिष्टः[1] पुरुषार्थस्य शुद्धस्योपायमाह यः।
पुरुषार्थो यदा येन यो नरेणाऽभिकाङ्क्ष्यते॥

१ विशिष्टम्। २ पु॰ पा॰।

र्थिकासत्त्वांशमादाय, न हि स्वप्नगन्धर्वनगरादयोऽप्यत्यन्तासन्तः तत्रापि साक्षिभास्यमानस्वपदार्थाभ्युपगमात् सुखादिवृत्तिवत्, स्वप्नादिसादृश्यनिषेधश्च केवलमानसत्त्वनिषेधकः । यत्तु अर्थक्रियाकारित्वमेव सत्त्वं तच्च प्रकृतितद्विकारयोर्नास्ति, साम्यावस्थायां तेन कस्यापि पुरुषार्थस्याकरणाद्, एवं सूक्ष्मरूपेण विद्यमानस्यापि कार्यस्य तदाऽर्थक्रियाकरणादित्याहुस्तन्नेश्वरान्यपुरुषस्याप्येवमसत्त्वेन तद्व्यावृत्त्यसम्भवाद् जीवानां विषयप्रकाशनव्यापारोपरमरूपलयस्य स्वापापरपर्यायस्यासत्तारूपस्य श्रुत्यादिसिद्धत्वात् । किञ्च निःसदसत्कार्यकत्वाच्च प्रधानस्यापि तत्त्वम् । तथा हि । प्रधानकार्यस्यापि न पारमार्थिकसत्त्वं परिणामित्वेन स्वधर्मैः प्रतिक्षणं विनाशात् । आद्यन्तयोर्व्यक्तावस्थयाऽप्यसत्त्वाच्च "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति श्रुत्या तेषां नित्यतारूपसत्यत्वस्य निराकरणाच्च, विकाराणामाद्यन्तयोर्नाममात्रशेषत्वेनास्थिरतया तदपेक्षया स्थिरत्वरूपं सत्यत्वं कारणस्य विवक्षितं, न तु विकाराणामत्यन्ततुच्छतया, मृद्विकारस्य लोकेऽत्यन्ततुच्छत्वासिद्ध्या ब्रह्मकार्यदृष्टान्तत्वानुपपत्तेः । एवं तत्कार्यं नात्यन्तासदतीतानागतादिरूपैः सदा सत्त्वात् । "तद्वेदन्तर्ह्यव्याकृतमासी"दित्यादिश्रुतेः । न चैवं सविकारस्य प्रधानस्य सदसत्त्वप्रतिषेधे तस्य सदसत्त्वबोधकसदसद्बाधाबाधाभ्यामिति साङ्ख्यसूत्रविरोध इति वाच्यम् । तस्य व्यक्ताव्यक्तत्वरूपव्यावहारिकसत्ताऽसत्तापरत्वात्, साङ्ख्यसूत्रोक्तबाधाबाधौ च रूपभेदेनस्त एवाङ्कुररूपेण सत्त्वकाल एव वृक्षरूपेणाभावप्रतीतेर्यावद्व्यवहारं सत्त्वादेते व्यावहारिके मनोमात्रपरिणामानां शुक्तिरजतस्वप्नादिपदार्थानां प्रातिभासिकी सत्तेति बोध्यम् । यत्तु परमात्मचैतन्यस्यैव सत्त्वं न तु जीवचैतन्यानामपीति नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता बोद्धेत्यादिश्रुतिसिद्धं, तत्तु लयशून्यत्वरूपामतिपारमार्थिकसत्तामभिप्रेत्येति बोध्यम् । "प्रकृतिः पुरुषश्चोभौ लीयेते परमात्मनीति" स्मृतेः, परमात्मनश्च सदा जाग्रत्स्वरूपतया लयशून्य-

त्वमेवेति दिक् । एवं तेषां गुणानां प्रधानरूपाणां लिङ्गमात्रं महत्तत्त्वं परिणामसाम्यावस्थोपलक्षिता गुणा एव प्रधानमिति दिक् । तत्र लिङ्गावस्थारूपपर्वणा इतरपर्वत्रयाद् गुणेभ्यश्च वैधर्म्यमुच्यते, सुखदुःखाभावरूपपुरुषार्थसमूहरूपपुरुषार्थतायाः कारणत्वाभिमतायाः अलिङ्गावस्थायां सृष्टेः प्रागुत्पत्तेस्तस्यां सा न कारणमिति सा नित्या दुःखनिवृत्तिव्यावर्तनाय कारणत्वाभिमताया इति। प्रलयकालिकदुःखनिवृत्तेः कर्मक्षयादेवोपपत्त्या प्रलयाप्रयोजनत्वेन तस्या दुःखनिवृत्तेः प्रलयकारणत्वाभावात् । व्यक्तावस्थायां गुणेभ्यः शब्दाद्युपभोगरूपपुरुषार्थोत्पत्त्यनागतावस्थः स तस्याः कारणं साम्यावस्थायां तु तज्जन्यशब्दाद्युपभोगसत्त्वपुरुषान्यताख्यातिमात्ररूपस्य कस्यापि पुरुषार्थस्याभावान्नास्याः पुरुषार्थः कारणमिति तत्त्वं, सत्त्वे तु साम्यावस्थात्वमेव भज्येत पुरुषार्थाकारणकत्वेन स्वाभाविकतया सा नित्येत्याख्यायते, स्वाभाविकत्वेऽपि धर्मादिभिः प्रतिबन्धान्न सर्गकाले साम्यरूपः परिणाम इति बोध्यम्। नित्यत्वं चैतदस्या व्यक्तावस्थापेक्षया बहुकालस्थायित्वरूपं व्यावहारिकं व्यक्तावस्थाया आद्यन्तयोस्तस्याः सत्त्वात् । किं च सर्गकालेऽपि साऽस्त्येव, तथा हि पूर्वपूर्वतत्त्वानामंशत एवोत्तरोत्तरत्त्वरूपः परिणामः, समुद्रस्यांशतः फेनादिरूपतावत् न तु दध्ना दुग्धस्येव सर्वांशेन परिणामः, उत्पन्नकार्यस्य कारणेन पुनरापूरणार्थङ्कारणानां स्वकार्यावरकतयाऽवस्थानात् । तस्मात्सर्गकालेऽपि बहिरलिङ्गावस्था स्थ्येव । यत्तु ब्रह्माण्डस्य प्रकृत्या सहाष्टावरणत्वश्रवणं तत्तु स्थूलसूक्ष्मभूतयोरेकत्वविवक्षयाः, वस्तुतस्त्रयोदशावरणानि, अत एव श्रीभागवतद्वितीयस्कन्धे पञ्चभूतेभ्यो बहिस्तन्मात्रावरणेऽपि गतिरुक्ता, इन्द्रियाणि चाकारणत्वान्नावरणानि तेषामुत्पत्तिरपि तन्मात्रसमानदेशा यथा तिलसमानदेशा सूक्ष्मतैलोत्पत्तिरिति दिक् । इतरपर्वत्रयं तु अनित्यं तेषामनागतावस्थपुरुषार्थसमूहकार्यत्वात् पुरुषार्थश्च तेषां निमित्तकारणमेव नोपादानं

गुणानामपि पर्वभ्यो वैधर्म्यमुच्यते यतस्ते सर्वविकारेष्वनुगता अत उत्पत्तिविनाशशून्यत्वेनानुपचरितनित्याः, अलिङ्गावस्थाऽपि नैवंविधनित्या । "न चैवं तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे"तिस्मृतौ प्रकृतेरुत्पत्तिवचनमसङ्गतं स्यादिति वाच्यम् । तेऽपि गुणान्वयिनीभिर्गुणधर्मभूताभिः कार्यव्यक्तिभिरेव अतीतानागतव्ययोपचयाद्यवस्थावतीभिर्हेतुभिर्जन्मविनाशधर्मका इव प्रतीयन्ते न तु तेषां ते वास्तवे इत्यदोषः । अत एव—

"प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययावि"ति,

तत्पूर्वश्लोकः सङ्गच्छते । यथा धनक्षयाद् देवदत्तस्य क्षीणत्वादिव्यवहारो न स्वरूपनाशेन तद्वद् अत्यन्तभिन्नगवादीनामुपचयापचयौ चेद् देवदत्तोपचयापचयहेतू तत्र कैव कथा गुणेभ्यो भिन्नाभिन्नानां व्यक्तीनामुपजनापाययोरिति बोध्यम् । एवमेव "भूयश्चान्ते विश्वमायानिवृत्तिः" "प्रकृतिः पुरुषश्चोभौ लीयेते परमात्मनी"त्याद्यपि व्याख्येयम् । व्यापारोपरमाख्यलयस्यैव पुरुषसाहचर्येण तत्रावधारणाच्च ।

विियोजयत्यथान्योन्यं प्रधानपुरुषावुभौ ।
प्रधानपुंसोरनयोरेष संहार ईरित, इति

कौर्माच्च । अत एव प्रकृतिनित्यश्रुतिविरोधोऽपि न । एवं प्रकृतिपुरुषयोः श्रूयमाणोत्पत्तिरप्यन्योन्यसंयोगेनाभिव्यक्तिरेव बोध्येति दिक् । तत्र लिङ्गमात्रं महान् अलिङ्गस्य प्रत्यासन्नमव्यवहितकार्यं यतस्तत् तत्रालिङ्गे संसृष्टमनागतावस्थयाऽविभक्तं ततो विविच्यते विभक्तं जायते महदाद्युत्पत्तिक्रमस्य कदाऽप्यनतिक्रमाद् । असदुत्पत्तिस्तु न सर्वस्य सर्वत्रोत्पत्त्यापत्तेः प्रागभावस्यासिद्धेः । किं चाभावस्योपादानकारणत्ववद् निमित्तत्वमपि न क्वापि दृष्टम्, अन्यथा तस्यैवोपादानत्वापत्तौ शून्यवादापत्तिः । तथा षडविशेषा

लिङ्गमात्रे संसृष्टास्तत्तो विविच्यन्ते परिणामक्रमनियमात्। गोपालता-पनीये "एकमेवाद्वितीयं ब्रह्मासीत्, तस्मादव्यक्तमव्यक्तमेवाक्षरं, तस्मादक्षरान्महत्, महतो वै अहङ्कार, स्तस्मादेवाहङ्कारात्पञ्च तन्मात्राणि, तेभ्यो भूतानी"त्युक्तेः। तथा तेष्वविशेषेषु भूतेन्द्रियाणि संसृष्टानि विविच्यन्ते तदुक्तमस्यैव सूत्रस्यादौ। न च ब्रह्माण्डस्थावरजङ्गमादिरूपैः पर्वणामानन्त्यात्कथं चतुर्विधत्वम्, एभ्यो विशेषेभ्यः परस्य तत्त्वान्तरपरिणामस्याभावाद्, ब्रह्माण्डादेः सर्वस्य विशेषपर्वत्वेनैव ग्रहात्, तत्त्वान्तरत्वं चोक्ततत्त्वावृत्तिद्रव्यविभाजकोपाधिमत्त्वम्। न च तत्त्वभेदात्कथमन्तःकरणस्यैकत्वं तत्र तत्रोच्यत इति वाच्यम्। यथा पञ्चतत्त्वात्मिका विशेषाख्या पृथिवी एकैव प्रागुत्पद्यते ततस्तस्याः खननमन्थनादिना जलतेजसी अभिव्यक्ते भवतः, तथा तत्त्वत्रयात्मक एवादौ महान् जायते पश्चाच्च तस्याहङ्कारादिवृत्तिभेद इत्यङ्गीकारात्। तत्र प्रकृतिमहान्तौ मैत्रेयोपनिषदि श्रूयेते "यथा तमो वा इदमेकमास तत्परं स्यात् तत्परेणेरितं विषमत्वं प्रयाति एतद्वै रजसो रूपं तद्रजः खल्वीरितं विषमत्वं प्रयाति एतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवेरितं रसः संप्रास्रवत् पश्चात्तन्मात्राः प्रतिपुरुषं क्षेत्रज्ञः सङ्कल्पाध्यवसायलिङ्गः प्रजापतिस्तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरि"ति। गर्भोपनिषदि अष्टौ प्रकृतयः षोडशविकारः शरीरमिति। अद्वैतश्रुतिस्तु न तासां बाधिका व्यवहारपरमार्थभेदेन विषयभेदात्। व्यावहारिकाद्वैतश्रुतयोऽप्यविभागलक्षणाभेदपराः नदीसमुद्रादिदृष्टान्तैस्तथाऽवगमात्। महत्तत्त्वोपाधिकहिरण्यगर्भरूपचेतने, अहङ्कारोपाधिकप्रजापतिरूपे चेतने, च शक्तिशक्तिमदभेदेन महदादिशब्दप्रयोगः ज्ञानैश्वर्यादिरूपमहत्तत्त्वस्याभिमानरूपाहङ्कारस्य च जडान्तःकरणस्य धर्मत्वात् गुणाश्चासङ्ख्यव्यक्तिकाः, एकत्वं तु जात्या, गुणत्रयं च सुखादिधर्मकत्वात्तदात्मकमप्युच्यते गुणत्रयस्य. पुरुषाणां सर्वार्थसाधकत्वाद् राजामात्यवत्प्रधानत्वं, जगदुपादानत्वात्प्रकृतित्वं,

जगन्मोहकत्वाच्च मायात्वम्, एतदेव वैशेषिकादिभिः स्वस्वपरिभाषया परमाणवज्ञानादिशब्दैरुच्यते "तामाहुः प्रकृतिं केचिन्मायामेके परेत्वणूनिति" वा शिष्टोक्तेः । तत्र विशेषरूपेभ्यः पञ्चभूतेभ्यः स्थूलशरीरं सूक्ष्मशेषेभ्यः, तत्राहङ्कारस्य बुद्धौ प्रवेशात् "सप्तदशैकं लिङ्गमि"ति साङ्ख्ये उक्तम् स्थूलसूक्ष्मशरीरसमष्टिर्हिरण्यगर्भः तत एवाखिलपुंसां शरीरद्वयोत्पत्तिः "तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह क्षेत्रज्ञाः समजायन्ते"ति मनुस्मृतेः । अत एव तस्य वनवृक्षवन्न समष्टित्वं, किन्तु पितापुत्रवद्वनवृक्षयोरेवं कार्यकारणभावाभावादिति दिक् । विशेषाणां तु धर्मलक्षणावस्थापरिणामा उत्तरपादे वक्ष्यन्ते सूत्रेण ।

अथ द्रष्टुः स्वरूपमाह ।

**द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥**

दृशिमात्रः विशेषणापरामृष्टदृक्शक्तिरित्यर्थः । विशेषणानि पूर्वसूत्रोक्तप्रकाशादिगुणाः, तेष्वेव वैशेषिकाद्युक्तविशेषगुणान्तर्भावस्तैः कालत्रयेऽप्यसंबद्धः । एवं च संयोगसङ्ख्यापरिमाणादिसत्त्वेऽप्यक्षतिः प्रलये मोक्षादौ दर्शनाख्यफलोपधानाभावात् शक्तिरित्युक्तम् । एवं च प्रकाशस्वरूपं द्रव्यं दृशिरिति सिद्धम् । अग्नेरौष्ण्यादिकं च भेदाभेदापन्नम् औष्ण्याग्रहणेऽपि चक्षुषाऽग्निग्रहणात् । पुरुषस्तु ज्ञानग्रहणं विना न गृह्यत इति बोध्यम् । द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः । बुद्धेः संवेदनमर्थाकृतिः तस्याः प्रतिसंवेदनं प्रतिबिम्बस्तद्वान् बुद्धेः साक्षीति फलितम् । एवं च प्रतिबिम्बरूपारोपितक्रियया कल्पितं दर्शनकर्तृत्वं द्रष्टृत्वमस्य, तस्य ज्ञानस्वरूपत्वं च ।

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथं च न ।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः ॥

इत्यादिवाक्यशतानुग्रहेण लाघवतर्कसहकारेण चात्मत्वादिरूपव्यतिरेक्यादिलिङ्गैरनुमेयम् । ज्ञानाश्रयत्वे तु धर्मधर्मिणोरुभयोः

कल्पने गौरवम्। अहं जानामीति प्रत्ययस्त्वहङ्कार इति भ्रमशतान्तःपातितया ऽप्रामाण्यज्ञानशङ्काऽऽस्कन्दिततत्वेन दुर्बल इति बोध्यम्। शुद्धः परिणामित्वाचेतनत्वपदार्थत्वादिधर्मवत्त्या बुद्धेर्न परमार्थतः सरूपः तेन तद्राहित्यमेवास्य शुद्धत्वम्। प्रत्ययानुपश्यः प्रत्ययं बौद्धमनुपश्यति तेन प्रत्ययसमानाकारताऽऽपन्न इवेत्यते। न तस्या अत्यन्तं विरूपः, अनेन द्रष्टरि बुद्धिवृत्तिसाक्षित्वरूपं प्रमाणमप्युक्तम्। एतेनैक्यमेव बुद्धिचैतन्ययोरिति, अत्यन्तवैरूप्ये तच्छायापत्तिरपि कथमिति च परास्तम्। ज्ञानाविषयत्वाद् बुद्धिः परिणामिनी यतो बुद्धेर्विषयो गवादिर्धर्मधर्मिरूपोऽशेषः कदा चिद्वृत्तिव्याप्यत्वरूपज्ञानत्ववान्कदा चिदज्ञातश्चेति परिणामित्व एव कदा चिच्छब्दाद्याकारत्वतदभावावुपपद्येते इति तस्याः परिणामित्वमनुमीयते। ननु बुद्धावपि विषयप्रतिबिम्बनमेव विषयाकारताऽस्तु तत्कादाचित्कत्वेनैव ज्ञाताज्ञातविषयत्वमुपपन्नमित्ति चेन्न। स्वप्नध्यानादौ शाब्दबोधादौ च विषयासांनिध्येन तत्प्रतिबिम्बासम्भवात् शास्त्रेषु बुद्धौ प्रतिबिम्बवचनं तत्समानाकारपरिणाममात्रेणेति बोध्यम्। पुरुषस्य तु सदाज्ञातबुद्धिवृत्तिरूपविषयकत्वमपरिणामित्वमनुमापयति। यदि पुरुषः परिणामी स्यात् तदा जाड्यवशात्कदा चित्तद्रूपेणापरिणामे पुरुषविषयो बुद्धिवृत्तिरज्ञाताऽपि तिष्ठेत् ततश्च वर्त्तमानाया अपि घटादिवृत्तेरज्ञातो घटं जानामि न वेत्यादि संदेहः स्यात्, तथा योग्यानुपलब्ध्या घटादिज्ञानाभावनिश्चयश्च न स्याद् अज्ञातवृत्तिसत्तासम्भवात्। एवं च ज्ञानरूपेण परिणामसिद्धौ तत्कार्येच्छाकृतिसुखदुःखादृष्टसंस्कारादीनामपि न तद्धर्मत्वं, किं तु बुद्धिधर्मत्वमेव सामानाधिकरण्यप्रत्यासत्त्या कार्य्यकारणभावे लाघवात्। न च प्रलये बुद्धिवृत्तेस्तस्याप्यदर्शनमस्त्येव तदा तस्या एवाभावात् न हि पुरुषविषया बुद्धिवृत्तिः शब्दादिवद्भवन्ती पुरुषेण गृहीताऽगृहीता च भवति, एवं च प्रलये कैवल्ये च वृत्त्याख्यविषयाभावादेवादर्शनमुपपन्नम्।

एवं परार्थत्वापरार्थत्वरूपमपि तयोर्वैषम्यं, तथा हि बुद्धिः स्वभिन्नस्य भोगसाधनत्वरूपपरार्थत्ववती, सहकारिसापेक्षव्यापारकत्वरूपसंहत्यकारित्वात्, शय्याऽऽसनशरीरादिवत्। पुरुषश्च स्वस्य भोगसाधनत्वरूपस्वार्थत्ववान्, उक्तहेत्वभावात्, यन्नैवं तन्नैवं, स एव दृष्टान्तः। बुद्धिरिन्द्रियादिसहकार्यपेक्षा, शय्याऽऽदिकमपि शयनादिकार्यं भूम्यादिसापेक्षं, पुरुषस्य सुखादिप्रकाशनं व्यापार एव न स्वरूपत्वेन नित्यत्वाद्। नापि सुखादिसत्त्वे पुरुषस्तत्प्रकाशनार्थे सहकार्यपेक्षः। यत्तु स्वार्थ इति साध्यस्य न परार्थ इति तन्न, भृत्यचेतनस्य स्वामिचेतनार्थत्वदर्शनात्। किञ्च बुद्धिः सुखदुःखमोहात्मकतया त्रिगुणसर्वार्थाध्यवसायकरत्वात्तदाकारतया त्रिगुणमयी तन्मयत्वाच्च पृथिव्यादिवदचेतना पुरुषस्तु मुख्यद्रष्टृबुद्धिसान्निध्येन बुद्धिवृत्तिप्रतिबिम्बमाधत्ते। गौणो द्रष्टा न तु तदाकारपरिणामेन बुद्धिवदत एव गुणानामुपद्रष्टेत्युच्यते ऽतस्त्रिगुणत्वाभावाच्चेतनः। एवं वैधर्म्यचयान्न बुद्धेः सरूपः पुरुषोऽतः शुद्ध इति सिद्धं, बुद्धिवैधर्म्ये च सिद्धे इतरपदार्थापेक्षया वैधर्म्यमर्थत एव सिद्धं, नापि तस्या अत्यन्तविरूपः यतो बोद्धं बुद्धिवृत्तिरूपं प्रत्ययमनु पश्चात्पश्यति बुद्धिद्वारा विषयान्पश्यति तथा पश्यंश्चातदात्माऽपि परमार्थतो बुद्ध्यसरूपोऽपि तत्सरूप इव प्रकाशते, स्फटिक इव जपासरूपः अर्थाकारत्वस्य वाऽर्थग्रहणरूपतया बुद्धिस्थले सिद्धत्वात् प्रतिबिम्बरूपमिथ्यासारूप्येण न पारमार्थिकासारूप्यविरोधः। तदुक्तं पञ्चशिखाचार्यैः "अपरिणामिनी हि भोक्तृशक्तिश्चितिर्विकारहेतुसंयोगरूपोपरागापरपर्यायप्रतिसंक्रमरहिता च परिणामिनि स्वविषये बुद्धिरूपेऽर्थप्रतिबिम्बरूपेण संक्रान्तिवत्तद्वृत्तिविषयाद्याकारामनुपतति चेतनामिव करोति यथा निर्मले जलेऽसंक्रान्तोऽपि सूर्यः संक्रान्तप्रतिबिम्बतया संक्रान्त इव, यथा च सूर्यो जले ऽनुपतन् जलं स्वमिव करोति एवं प्राप्तचैतन्योपरागाया बुद्धिवृत्तेरनुकारमात्रतया तत्प्रतिबिम्बोद्ग्राहि-

कल्पने गौरवम्। अहं जानामीति प्रत्ययस्त्वहङ्कार इति भ्रमशतान्तःपातितयाऽप्रामाण्यज्ञानशङ्काऽऽस्कन्दितत्वेन दुर्बल इति बोध्यम्। शुद्धः परिणामित्वाचेतनत्वपदार्थत्वादिधर्मवत्या बुद्धेर्न परमार्थतः सरूपः तेन तद्राहित्यमेवास्य शुद्धत्वम्। प्रत्ययानुपश्यः प्रत्ययं बौद्धमनुपश्यति तेन प्रत्ययसमानाकारताऽऽपन्न इवेत्यतो न तस्या अत्यन्तं विरूपः, अनेन द्रष्टरि बुद्धिवृत्तिसाक्षित्वरूपं प्रमाणमप्युक्तम्। एतेनैक्यमेव बुद्धिचैतन्ययोरिति, अत्यन्तवैरूप्ये तच्छायापत्तिरपि कथमिति च परास्तम्। ज्ञानाविषयत्वाद् बुद्धिः परिणामिनी यतो बुद्धेर्विषयो गवादिर्धर्मधर्मिरूपोऽशेषः कदा चिद्वृत्तिव्याप्यत्वरूपज्ञानत्ववान्कदा चिदज्ञातश्चेति परिणामित्व एव कदा चिच्छब्दाद्याकारत्वतदभावावुपपद्येते इति तस्याः परिणामित्वमनुमीयते। ननु बुद्धावपि विषयप्रतिबिम्बनमेव विषयाकारताऽस्तु तत्कादाचित्कत्वेनैव ज्ञाताज्ञातविषयत्वमुपपन्नमिति चेन्न। स्वप्नध्यानादौ शाब्दबोधादौ च विषयासांनिध्येन तत्प्रतिबिम्बासम्भवात् शास्त्रेषु बुद्धौ प्रतिबिम्बवचनं तत्समानाकारपरिणाममात्रेणेति बोध्यम्। पुरुषस्य तु सदाज्ञातबुद्धिवृत्तिरूपविषयकत्वमपरिणामित्वमनुमापयति। यदि पुरुषः परिणामी स्यात् तदा जाड्यवशात्कदा चित्तद्रूपेणापरिणामे पुरुषविषयो बुद्धिवृत्तिरज्ञाताऽपि तिष्ठेत् ततश्च वर्त्तमानाया अपि घटादिवृत्तेरज्ञातो घटं जानामि न वेत्यादि संदेहः स्यात्, तथा योग्यानुपलब्ध्या घटादिज्ञानाभावनिश्चयश्च न स्याद् अज्ञातवृत्तिसत्तासम्भवात्। एवं च ज्ञानरूपेण परिणामसिद्धौ तत्कार्येच्छाकृतिसुखदुःखादृष्टसंस्कारादीनामपि न तद्धर्मत्वं, किं तु बुद्धिधर्मत्वमेव सामानाधिकरण्यप्रत्यासत्त्या कार्य्यकारणभावे लाघवात्। न च प्रलये बुद्धिवृत्तेस्तस्याप्यदर्शनमस्त्येव तदा तस्या एवाभावात् न हि पुरुषविषयो बुद्धिवृत्तिः शब्दादिवद्भवन्ती पुरुषेण गृहीताऽगृहीता च भवति, एवं च प्रलये कैवल्ये च वृत्त्याख्यविषयाभावादेवादर्शनमुपपन्नम्।

एवं परार्थत्वापरार्थत्वरूपमपि तयोर्वैषम्यं, तथा हि बुद्धिः स्वभिन्नस्य भोगसाधनत्वरूपपरार्थत्ववती, सहकारिसापेक्षव्यापारकत्वरूपसंहत्यकारित्वात्, शय्याऽऽसनशरीरादिवत्। पुरुषश्च स्वस्य भोगसाधनत्वरूपस्वार्थत्ववान्, उक्तहेत्वभावात्, यन्नैवं तन्नैवं, स एव दृष्टान्तः। बुद्धिरिन्द्रियादिसहकार्यपेक्षा, शय्याऽऽदिकमपि शयनादिकार्ये भूम्यादिसापेक्षं, पुरुषस्य सुखादिप्रकाशनं व्यापार एव न स्वरूपत्वेन नित्यत्वात्। नापि सुखादिसत्त्वे पुरुषस्तत्प्रकाशनार्थे सहकार्यपेक्षः। यत्तु स्वार्थे इति साध्यस्य न परार्थे इति तन्न, भृत्यचेतनस्य स्वामिचेतनार्थत्वदर्शनात्। किञ्च बुद्धिः सुखदुःखमोहात्मकतया त्रिगुणसर्वार्थाध्यवसायकरत्वात्तदाकारतया त्रिगुणमयी तन्मयत्वाच्च पृथिव्यादिवदचेतना पुरुषस्तु मुख्यद्रष्टृबुद्धिसान्निध्येन बुद्धिवृत्तिप्रतिबिम्बमाचतो गौणो द्रष्टा न तु तदाकारपरिणामेन बुद्धिवदत एव गुणानामुपद्रष्टेत्युच्यते ऽतस्त्रिगुणत्वाभावाच्चेतनः। एवं वैधर्म्यचयान्न बुद्धेः सरूपः पुरुषोऽतः शुद्ध इति सिद्धं, बुद्धिवैधर्म्ये च सिद्धे इतरपदार्थापेक्षया वैधर्म्यमर्थत एव सिद्धं, नापि तस्या अत्यन्तविरूपः यतो बोद्धं बुद्धिवृत्तिरूपं प्रत्ययमनु पश्चात्पश्यति बुद्धिद्वारा विषयान्पश्यति तथा पश्यंश्चातदात्माऽपि परमार्थतो बुद्ध्यसरूपोऽपि तत्सरूप इव प्रकाशते, स्फटिक इव जपासरूपः अर्थाकारत्वस्य वाऽर्थग्रहणरूपतया बुद्धिस्थले सिद्धत्वात् प्रतिबिम्बरूपमिथ्यासारूप्येण न पारमार्थिकासारूप्यविरोधः। तदुक्तं पञ्चशिखाचार्यैः "अपरिणामिनी हि भोक्तृशक्तिश्चितिर्विकारहेतुसंयोगरूपोपरागापरपर्यायप्रतिसंक्रमरहिता च परिणामिनि स्वविषये बुद्धिरूपेऽर्थप्रतिबिम्बरूपेण संक्रान्तिवत्तद्वृत्तिविषयाद्याकारामनुपतति चेतनामिव करोति यथा निर्मले जले ऽसंक्रान्तोऽपि सूर्यः संक्रान्तप्रतिबिम्बतया संक्रान्त इव, यथा च सूर्यो जले ऽनुपतन् जलं स्वमिव करोति एवं प्राप्तचैतन्योपरागाया बुद्धिवृत्तेरनुकारमात्रतया तत्प्रतिबिम्बोद्ग्राहि-

तया भोक्तृशक्तेर्ज्ञानरूपा वृत्तिर्बुद्धिवृत्त्यविशिष्टेत्याख्यायत इति । एवं च परस्परप्रतिबिम्बाद् द्वयोरपि चेतनत्वसुखादिपरिणामकत्वं सारूप्यं प्रत्ययानुपश्यत्वं सिद्धम्,। अनेन सूत्रेण जीवेश्वरसाधारण्येन चिन्मात्रत्वमुक्तं जानामीति प्रत्ययोऽपि संयोगसम्बन्धेनोपपद्यते बुद्धौ ज्ञानाख्यद्रव्य-संयोगसत्त्वाद् अहमितिप्रत्यये ज्ञानाद्यविद्यावासनावशाद् अवश्यं बुद्धेरपि भानमस्ति तथाहं जानामीति प्रत्ययेऽहमंशे भ्रमो ज्ञान-वत्त्वांशे प्रमा, विदुषां तु तथा प्रत्ययोऽसिद्ध एव । ईश्वरे सर्वज्ञत्वव्यवहारस्तु लोकदृष्ट्या सत्त्वीयसत्रवृत्तिसंयोगेन वेति दिक् ।

अथ द्रष्टरि प्रमाणमाह ।

**तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥**

तस्य पुरुषस्यार्थौ भोगापवर्गौ तावेवार्थः प्रयोजनं यस्य स तदर्थः, दृश्यस्यात्मा स्वरूपं तस्य भोगापवर्गफलकमेव न स्वार्थ-मित्यर्थः । एवञ्च गुणाः परार्थाः, संहत्यकारित्वात्,शय्यादिवदि,त्यनु-मानेन तत्सिद्धिरित्युक्तं, तथा हि दृशिरूपस्य पुरुषस्य क्रियेव क्रिया दर्शनं तद्विषयतां प्राप्तं वस्तु दृश्यं भवति दर्शनमेव सर्ववस्तूनां प्रयोजनमिति सर्वसंमतम्, अतः पुरुषार्थमेव दृश्यस्य गुणादेरात्मा स्वरूपं भवति तिष्ठति, न हि परप्रयोजनकं वस्तु परप्रयोजनं विना क्षणमपि तिष्ठतीति पुरुषार्थस्य तत्स्थितिहेतुत्वमिति बोध्यम् । ननु यदि दृश्यस्वरूपं परस्य पुरुषस्य रूपेण दर्शनेन निमि-त्तेन लब्धात्मकं लब्धसत्ताकं तर्हि भोगापवर्गरूपपुरुषार्थसमूहे कृते सति पुरुषेण न दृश्यत इति स्वरूपत्यागादत्यन्तोच्छेदो गुणानां स्यात् प्रयोजनकारिप्रयोजनसमाप्त्या नाश्यत इति धर्माधर्मादिषु दृष्टम् ।

एवञ्च प्रकृतिनित्यत्वसृष्ट्यादिप्रवाहानुच्छेदादिसिद्धान्तहानिरत आह ।

**कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥**

कृतार्थं बुद्ध्या समर्पितार्थमेकं कं चिन्मुक्तपुरुषं प्रति दृश्यं गुणादिकं प्रयोजनाकारणाद्राज्यो राज्यवन्नष्टमपि सामान्यतो न नष्टं तस्मिन् कृतार्थेऽन्यस्मिन्नकृतार्थे च साधारणत्वादित्यर्थः । कुशलं मुक्तं पुरुषं प्रति नाशं प्राप्तमप्यकुशलानमुक्तपुरुषान्प्रति न कृतार्थमिति तेषां दृशिरूपक्रियां प्रति विषयतामापन्नं परस्य पुरुषस्य रूपेण दर्शनेन लभते एवात्मसत्त्वमित्येवं दृग्दर्शनशक्त्योः पुरुषबुद्ध्योर्नित्यत्वात् शास्त्रेषूक्तस्तयोरनादिः संयोगोऽप्युपपन्नः विनाशित्वे हि गुणानामनादित्वं न घटेत, ततश्च तत्कार्यबुद्धेस्ततश्च बुद्धिपुरुषसंयोगस्येति द्रष्टव्यम् । तदुक्तं पञ्चशिखाचार्य्यैः "धर्मिणां गुणानामनादिसंयोगाद्धर्ममात्राणाम् बुद्ध्यादीनामपि पुरुषेणानादिः संयोग" इति । स च यद्यप्येकस्य महतो मुक्तपुरुषीयस्य संयोगो व्यतीतस्तथाऽपि महदन्तरस्य पुरुषान्तरेणास्तीति नित्योऽप्युच्यते । श्रुतिरपि—

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनाम् भुक्तभोगामजोऽन्यः—

इति श्रुतिसिद्धं प्रकृतिनित्यत्वमेकत्वं पुरुषबहुत्वं चानेन सूत्रेणोक्तम् ।

यथाघटीकुम्भकमण्डलुस्थमाकाशमेकं बहुधा हि भिन्नम् ।
तथा सुबाहुः स च काशिपोऽहमन्ये च देहेषु शरीरभेदैरि-

त्यादिकं तु वै धर्म्यलक्षणभेदपरसर्वात्मनामवैधर्म्यज्ञानेनैवापरिणामितयोपाध्यभिमाननिवृत्त्या मोक्षसिद्धेः । कानि चित्तु अविभागलक्षणाभेदपराणि, तेनैकस्यैव परमात्मनो मुख्यता सिद्ध्यति जीवात्मपरमात्मनोरखण्डैक्ये बन्धमोक्षानुपपत्तिः । किञ्च । सर्वात्मनामैक्यज्ञानेनाभिमाननिवृत्तेः सम्भवः, एकस्मिन्नेवाकाशेऽवच्छेदकभेदेन शब्दतदभाववद् एकस्यैवात्मन्यवच्छेदकभेदेन संसारासंसारयोः सम्भवाद् विवेकज्ञानापेक्षणे च तत एवाभिमाननिवृत्तेरैक्यज्ञानस्य न दृष्ट-

द्वारा मोक्षहेतुत्वं स्यात् जडवर्गेष्वविभागलक्षणाभेदेनोपासनाया अवश्यकल्प्यत्वेन चेतनवर्गेष्वपि तथैवौचित्याच्चेति दिक् ।

अथ तयोः संयोगस्वरूपमाह ।

**स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥**

स्वशक्तिर्दृश्यं भोग्यतायोग्यत्वात्, स्वामिशक्तिर्द्रष्टा भोक्तृतायोग्यत्वात्, तयोः स्वरूपस्योपलब्धौ हेतुर्यः संयोगविशेषः स एव द्रष्टृदृश्यसंयोगोऽत्र हेयहेतुरुक्त इत्यर्थः । विभुनित्ययोर्द्रष्टृदृश्ययोः संयोगसामान्यस्य प्रलयमोक्षादिसाधारणसार्वकालिकत्वेन हेयाहेतुत्वादिति भावः । स च संयोगविशेषो बुद्धिद्वारकः सर्वदृश्यानां बुद्धिसत्त्वोपारूढत्वाद् "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहु"रिति स्मृतेः । न च भोग्यवृत्तिवासनावत्स्वरूपः स्वस्वामिभाव एव तयोः संबन्धोऽस्तु प्रवाहरूपेण च वासनानामनादित्वं स एव संयोगोऽस्त्विति वाच्यम् । तस्य संयोगस्य वक्ष्यमाणाविद्यावासनाजन्यत्वानुपपत्तेः प्रतिसर्गं प्रकृतिपुरुषयोः श्रूयमाणयोः संयोगविभागयोरनुपपत्तेश्च संयोगसत्त्वेऽपि यथा न परिणामित्वं तथोक्तं प्राक् । तदुक्तं भाष्ये "पुरुषः स्वामी स्वेन दृश्येन तद्दर्शनार्थं संयुक्तो भवति, असंयुक्तस्य दर्शनाभावात् तस्मात् संयोगाद् दृश्यस्वरूपस्योपलब्धिः स भोगः या तु द्रष्टुः स्वरूपोपलब्धिः सोऽपवर्गः । सूत्रे स्वरूपपदं च विवेकख्यातिपर्य्यन्तदर्शनसामान्यस्य संयोगजन्यत्वबोधनाय कृतकृत्यं प्रति प्रयोजनाभावादवस्थानाभावेन दर्शनरूपकार्य्यावसानः संयोग इति दर्शनं द्रष्टृस्वरूपदर्शनं नियोगकारणमित्यप्यनेनैव सूत्रेणार्थादुक्तम् । एवं दर्शनमदर्शनस्य विरोधीत्यतोऽस्य द्रष्टुः दर्शनं संयोगहेतुरित्यप्यर्थादुक्तमेव दर्शनादर्शनयोर्विरोधेन विरुद्धसंयोगवियोगकारणस्यौचित्याद् । ननु दर्शनस्याज्ञानस्य संयोगकारणत्वेऽदर्शनाभावेनैव संयोगनिवृत्त्यात्मकमोक्षसिद्धौ मोक्षे दर्शनस्य हेतुत्वोक्तिरसङ्गता स्यादिति चेन्न । अत्र शास्त्रे गौरवेण दर्शनस्य तत्त्वज्ञानस्य

मोक्षकारणत्वाभावाद् निरोधादिव्यवधानेन मोक्षाव्यवहितपूर्ववर्तित्वस्य ज्ञानेऽभावाच्च । किन्तु वक्ष्यमाणादर्शनाभावादेव यो द्रष्टृदृश्यसंयोगरूपबन्धस्याभावः स एव मोक्षः । न चैवं दर्शनं वियोगकारणमिति पूर्वोक्तं विरुध्येत, दर्शनसत्त्वे हि बन्धकारणादर्शननाश इत्येतावन्मात्रेण दर्शनस्य तत्त्वज्ञानस्य कैवल्यकारणत्वोक्तेः । एवञ्च मोक्षस्यानैमित्तिकत्वमुक्तम् । ननु संयोगकारणत्वेनोक्तेऽदर्शनेऽष्टौ पक्षाः गुणानां सत्त्वादीनां कार्य्यारम्भणसामर्थ्यरूपोऽधिकारः ज्ञानाग्न्यदग्धा कार्यविशेषजननशक्तिस्ततोऽपि संसारहेतुसंयोगविशेषस्य जायमानत्वेन बन्धकत्वेन गुणयोगेनादर्शनशब्दोऽत्र गौण इति केचित् । अदर्शनशब्दे दर्शनशब्दः करणसाधनः, एवञ्च दृशिरूपाय स्वामिने दर्शितो विषयो येन तादृशस्य चित्तस्यानुत्पादः स्वस्मिन् दृश्ये शब्दादिवृत्तिरूपे सूक्ष्मरूपेण विद्यमान एव यस्तद्विषयवृत्त्यभाव इति यावद् इत्यन्ये । सत्कार्यवादाभ्युपगमेनानागतावस्थाया भोगापवर्गयोर्गुणेष्ववस्थानमित्यन्ये । अत्रापि पक्षे दर्शनशब्दो गौण एव वक्ष्यमाणसर्वपक्षेष्वप्येवमेव द्वितीये प्रसज्यप्रतिषेधपरोऽन्येषु पर्युदासपर इति मिश्राः । पञ्चपर्वाविद्याप्रलयकाले स्वाश्रयचित्तेन सह गुणेषु निरुद्धा लीना स्वाश्रयचित्तस्योत्पत्तिबीजम् । एवं चाविद्यावासनैवादर्शनमित्यन्ये, ऽयंपक्ष एव सिद्धान्तो भविष्यति प्रधाननिष्ठसाम्यपरिणामहेतोः स्थितिसंस्कारस्य क्षये सति महदादिरूपविसदृशपरिणामहेतोर्गतिसंस्कारस्याभिव्यक्तिरेवादर्शनतयैव प्रकृतिक्षोभद्वारा पुंप्रकृत्योः संयोगजननात् । तदुक्तं प्रधानं स्थित्यर्थमेव वर्तमानं चेद् भवेत् स्थितिमात्रेण चेद्वर्तेतेति यावत् तदा विकाराजनकत्वान्न प्रधानं स्यात् मूलकारणत्वस्यैव प्रधानत्वात् तथा गतिमात्रेणैव चेद्वर्तेत तदा विकाराणां महदादीनामपि नित्यत्वापत्त्या अस्य मूलत्वानापत्तौ न प्रधानत्वं स्यात् प्रधीयतेऽनेन कार्मजातमिति प्रधानम् उभयथा स्थितिगतिभ्यामेव यदाऽस्य वर्तनं तदा प्रधानव्यवहारभाग् भवति नान्यथा नायं विचारः प्रधान एव किन्तु कल्पितेषु विका

रूपेषु कारणान्तरेष्वपि महदादिष्वेव चर्चा विचारः समानः तद्यथा मृदः स्थितिशीलत्वे कदाऽपि घटानुत्पादनेन कारणत्वहानिः गत्येव वृत्तौ मृद्घटयोस्तुल्यतया कार्यकारणव्यवस्थाऽनुपपत्तिरिति । एतेन नास्तिकानां कुर्वद्रूपतावादो निरस्त इत्यन्ये । पुरुषायात्मानं दर्शयितुं या क्षमता तद्रूपा दर्शनशक्तिरेवादर्शनं स च विवेकख्यात्यनुत्पादरूपा संयोगहेतुः तृतीयविकल्पस्यास्य शब्दादिवृत्त्यनुत्पादस्य त्यागात्ततो भेदप्रधानस्यात्मख्यापनार्था प्रवृत्तिरिति श्रुतेरित्यन्ये । सर्वबोध्यबोधे समर्थोऽपि पुरुषः प्रधानप्रवृत्तेः प्राग् न पश्यति इत्येकं पुरुषनिष्ठमदर्शनं सर्वकार्याणामुत्पादने समर्थं स्वरूपयोग्यमपि दृश्यं प्रधानं स्वप्रवृत्तेः प्राक् पुरुषेण न दृश्यते इति दृश्यस्य दर्शनविषयत्वाभावरूपं पुरुषस्य दर्शनकर्तृत्वाभावरूपं चोभयनिष्ठमुभयधर्मो दर्शनमेवादर्शनं, यद्यपि जडानां दृश्यानां स्वरूपभूतमेवादर्शनं तथाऽपि पुरुषस्य प्रत्ययबोधमपेक्ष्य तत्तद्विषयतया दृश्यधर्मोऽपि भवति एवं पुरुषस्य निर्धर्मत्वात्सदा प्रकाशरूपत्वाच्चानात्मभूतमधर्मभूतमप्यदर्शनं दृश्यप्रत्ययमपेक्ष्य दृश्यगोचरप्रत्ययाभावेन पुरुषधर्मत्वेनैव लौकिकबुद्ध्या भासत इत्यन्ये । दर्शनं वासनारूपं ज्ञानमेवादर्शनं तस्यापि दृश्यसंयोगहेतुत्वात् न तु भोगापवर्गरूपमनागतावस्थं दर्शनमित्यन्ये । एते सर्वेऽपि पक्षाः पुरुषसामान्यगुणसामान्ये च पुरुषार्थहेतुसंयोगसामान्यं प्रति कारणतायां ज्ञेयाः । यस्तु प्रत्येकं तच्चेतनस्य स्वस्वबुद्धिसंयोगो हेयहेतुः प्रकृतसूत्रे उक्तस्तस्य कारणं चतुर्थपक्षोक्तमदर्शनमेव

**तस्य हेतुरविद्या ॥ २४ ॥**

तस्य द्रष्टृदृश्यसंयोगस्य बुद्धिपुरुषसंयोगद्वारा हेतुर्विपर्ययज्ञानवासनारूपाऽविद्येत्यर्थः । अयं भावः । अविद्याक्षयोत्तरमपि जीवन्मुक्तस्य भोगार्थविषयरूपेण गुणैः संयोगदर्शनान्नाविद्यासामान्यं पुरुषगुणसंयोगहेतुः किन्तूक्तो गुणाधिकारादिरेव स्वस्वबुद्धिसंयोगस्तु जन्मापरनामानाविद्यां विनेति तत्तत्पुरुषतत्तद्बुद्धिसंयोगे तद्द्वारा द्र-

ष्टृदृश्यसंयोगेऽविद्याहेतुर्ज्ञानोच्छेद्या च न गुणाधिकारादिस्तस्य ज्ञाना-नुच्छेद्यत्वाद् एकस्य पुंसो मुक्तावपि पुरुषान्तरार्थं गुणाधिकारादितादवस्थ्याद् यदेव पुरुषेण शक्योच्छेदं तदेव हेयनिदानमत्र प्रतिपाद्यम्, अन्यथा कालकर्म्मादीनामपि तद्रूपतया प्रतिपाद्यताऽऽपत्तेः । अविद्याऽप्यत्रानात्मन्यात्मबुद्धिमात्रं तस्यैव बुद्धिसंयोगहेतुत्वाद् वक्ष्यमाणविवेकख्यातिनाश्यत्वाच्च तस्याश्च बुद्धिसंयोगजन्यतयोक्तं तद्वासनेति सर्गान्तरीयाविद्यायाः स्वचित्तेन सह निरुद्धायाः प्रधाने या वासना स्थिता तया वासितं प्रधानं तत्पुरुषसंयोगिनीं तादृशीमेव बुद्धिं सृजतीति न दोषोऽनादित्वात् । न च तस्य बुद्धिपुरुषसंयोगहेतुत्वे न मानं, विपर्ययज्ञानवासनाबलात् पुरुषाख्यातिरूपं कार्य्यनिष्ठान्यतास्वकर्त्तव्यचरमावधिं न प्राप्नोति बुद्धिरतः साधिकारतया पुनरावर्त्तते पुरुषेण संयुज्यते पुरुषान्यताख्यातिपर्य्यन्ता सती सा बुद्धिः परवैराग्योत्पादात् कार्य्यसमाप्तिं प्राप्य चरिताधिकारा निष्पादितकार्य्या निवृत्ताविद्या सती संयोगाख्यबन्धकारणाभावात् न पुनः पुरुषेण संयुज्यत इत्यन्वयव्यतिरेकाभ्यां तस्यास्तद्धेतुत्वसिद्धेः । अत्र कश्चिन्नास्तिको ज्ञानोत्तरं तत्रापरवैराग्येऽसंप्रज्ञातयोगान् मुक्तिमुपहसति खण्डकोपाख्यानेन, यथा कश्चिन्नपुंसको मुग्धया भार्य्ययाऽभिहितः "आर्य्यपुत्रापत्यवती मे भगिनी कुतो नाहं" स तामाह "मृतस्तेऽहमपत्यमुत्पादयिष्यामी"ति, तथा विद्यमानं ज्ञानं चित्तनिवृत्तिरूपं मोक्षं न करोति परवैराग्येण निरुद्धं करिष्यतीति प्रत्याशेति । तत्राचार्य्यदेशीय आह । चित्तनिवृत्तिरेव मोक्ष अदर्शनरूपबन्धकारणस्य ज्ञानान्निवृत्ता वदर्शनरूपकारणाभावाद् बुद्धिनिवृत्तेः, नास्माभिर्ज्ञानस्य साक्षान्मोक्षहेतुतोच्यते किन्त्वविद्याख्यादर्शननिवृत्तितत्कार्यनिरोधयोगद्वारा । एवञ्च विनष्टस्यापि ज्ञानस्य बुद्धिपुरुषवियोगरूपमोक्षे व्यापारद्वारा कारणत्वमिति तच्च न त्वदु-

त्तोपहासावसरः। अत्यन्तोपेक्षणीयेऽर्थे संभ्रमेणोत्तरदातृत्वमाचेमा स्याचार्यदेशीयत्वम्, उत्तरं तु साध्वेव।

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते—

इति वायुपुराणोक्तः।

अथ हानव्यूहमाह—

**तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥ २५ ॥**

तस्या अदर्शनरूपाया अविद्याया अभावाद्विनाशाद् बुद्धिपुरुषसंयोगाभावपूर्वको यो द्रष्टृदृश्यसंयोगाभावः संयोगरूपसम्बन्धस्यात्यन्तिक उपरमस्तद्धानं प्रलयकालीनवियोगव्यावृत्तय आत्यन्तिक इति। एतद् दृशेः पुरुषस्य कैवल्यममिश्रीभावः पुनर्बुद्धिगुणैरसंयोगः प्रतिबिम्बरूपेणासम्बन्ध इत्यर्थः। एवं च दुःखकारणनिवृत्तौ दुःखनिवृत्तिरूपे हाने पुरुषः स्वरूपप्रतिष्ठ इति "तदा द्रष्टुः स्वरूपेऽवस्थानमि"त्यनेनोक्तमिति दुःखभोगनिवृत्तिरूपहानं स्वतः पुरुषार्थ इति भावः। सूत्रे संयोगाभावो हानमित्यनेन कार्यकारणयोरभेदोपचाराद् दुःखहानमपि गृहीतम्।

अथ हानोपायमाह।

**विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥**

सत्त्वपुरुषान्यताप्रत्ययो विवेकख्यातिः साक्षात्कारनिष्ठारूपत्वलाभाय तद्विशेषणमविप्लवेति सा चानिवृत्तमिथ्याज्ञाना प्लवते मिथ्याज्ञानसंस्कारवशात् मिथ्याज्ञानेनान्तराऽन्तराऽभिभूयते, यदा तु साक्षात्कारदशायां सूक्ष्ममिथ्याज्ञानमनागतावस्थं दग्धबीजतुल्यतया वन्ध्यप्रसवसामर्थ्यं जायते विधूतक्लेशाख्यधूलेर्बुद्धिसत्त्वस्य परवशीकारसंज्ञारूपे परे वैशारद्ये परमाणुपरममहत्तत्त्वान्तचित्ताप्रतीघात-

रूपे वर्त्तमानस्य यो विवेकप्रत्ययप्रवाहो निर्मलो मिथ्याज्ञानाकलुषितो भवति सा विवेकख्यातिरविप्लवेत्युच्यते । सा परसाक्षात्काररूपिणी हानस्योपायः यतस्तदनन्तरं सूक्ष्मरूपस्य मिथ्याज्ञानस्य दग्धबीजताप्राप्तिस्ततश्च पुनरप्रसव इति । एष विवेकख्यातिरूपश्चित्तनिवृत्तिरूपमोक्षस्य मार्गोऽतो हानोपायः । ज्ञानेन मोक्षे जनयितव्ये ऽसंप्रज्ञातयोगो ऽपि द्वारमिति न तस्य वैयर्थ्याशङ्का ।

विवेकख्यातेरविप्लवाख्यनिष्ठाया लक्षणमाह ।

**तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥**

तस्य प्रत्युदितस्य विवेकलख्यातिरूपहानोपायस्य प्रान्तभूमिस्वरूपिणी प्रज्ञा परामर्शः सप्तधेत्यर्थः । विपर्ययाख्याविद्यातत्कार्यपापादिरूपाशुद्ध्यात्मकावरणरूपमलापगमाच्चित्तस्य विवेकख्यात्यन्यप्रत्ययानुत्पादे सति परवैराग्यजान्निरोधयोगाद् उत्थानदशायां सप्तप्रकारा प्रज्ञा निष्पन्नज्ञानस्य लिङ्गं भवति, तद्यथा मुमुक्षुहेयं वस्तुपरिज्ञातं साक्षात्कृतं नास्या विशिष्टं पुनर्ज्ञेयमस्तीत्याद्या । हेयहेतवोऽविद्याकामकर्मादयो विवेकसाक्षात्कारे मया क्षीणाः कृता न पुनरेतेषां क्षेतव्यमस्तीति द्वितीया । अविद्याविक्षेपादुत्पन्नेन निरोधसमाधिना व्युत्थानकाले दुःखहानरूपो मोक्षो मया साक्षात्कृत ईदृशो मे मोक्षो भवितेति परिचितः, असंप्रज्ञातयोगदृष्टान्तेन कैवल्यमपि दृष्टप्रायं न पुनरस्य परं निश्चेतव्यमस्तीति तृतीया । विवेकख्यातिरूपो हानोपायो मया भावितः निष्पादितफलः कृत इति नातः परं भावनीयमस्तीति चतुर्थी एषा चतुर्विधाऽपि प्रज्ञाऽऽख्यनत्त्वरूपान्निमित्तात्पुंसां कार्याद्विमुक्तिः जीवन्मुक्तिः एषा पुरुषयत्ननिष्पाद्यत्वात्कार्यभूता मुक्तिरित्यप्युच्यते । अथ परममुक्तिरूपा चित्ताद्विमुक्तिस्तु त्रिधा । बुद्धिः

समाप्तभोगापवर्गत्वरूपचरिताधिकारत्ववतीत्याद्या इयं परवैराग्य-रूपा चित्तनाशस्याद्या भूमिका । बुद्धिगुणाः संस्कारसुखदुःखादयो गिरिशिखरकूटात् च्युताः ग्रावाण इवावस्थातुमक्षमाः स्वकारणे साम्यावस्थत्रिगुणप्रधाने लयाभिमुखास्तेन चित्तेन सहास्तं गच्छन्ति एषा लिङ्गशरीरस्य विनश्यदवस्था द्वितीयभूमिका । न चैषां संस्कारसुखादीनां पुनरुत्पादो भविता पुरुषार्थसमाप्त्या प्रयोजनाभावादिति तृतीया, अस्यामवस्थायां पुरुषो बुद्ध्यादिगुणसंबन्धविशेषशून्यः स्वरूपमात्रज्योतिर्निर्विषयचिज्ज्योतिःस्वरूपो मनआेपाधिकतमोमालिन्यरहितः केवलाकेवलेषु मुक्तेषु अविभागी भवति इयं चात्यन्तिकफलनिष्पत्तिरूपा विदेहकैवल्यस्य चरमभूमिका, इमां त्रिविधां चित्तभूमिभाविनीमत्र जीवन्मुक्तिदशायां विशुद्धचित्तो योगी साक्षात्करोति 'एतां सप्तविधां प्रज्ञां निरभिमानतया पश्यन् पुरुषः कुशलः कल्याणः अकल्याणबुद्धिपर्यभिमानत्यागादुच्यते बाधितस्येवाकुशलस्यावस्थानाद् गौणं कुशलत्वमत इति जीवन्मुक्तलक्षणं सूत्रेणोक्तं प्रतिप्रसवे चित्तस्यात्यन्तप्रलयेऽपि कुशल इत्येता दुःखविस्मयादिभिः सत्वादिभिश्चाकुशलगुणैरत्यन्तविनियोगाद् अत्र मुख्यं कुशलत्वं यत्तु क्वचित् ज्ञानिनोऽपि गुणातीतत्वमुच्यते तत्तु गुणाभिमानशून्यतामात्रेणेश्वरस्य निर्गुणत्ववत् तत्सिद्धम् अविप्लवाविवेकख्यातिर्हानोपाय इति ।

अथ विवेकख्यातेरारुरुक्षं मन्दाधिकारिणं प्रति साधनमाह

**योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा-**
**विवेकख्यातेः ॥ २८ ॥**

योगाङ्गान्यष्टौ वक्ष्यमाणानि तेषामनुष्ठानात्पञ्चपर्वणो विपर्ययस्य तत्कार्य-

यद्वा घटत्वस्य सम्बन्धमर्यादया प्रकारत्वभानम्। तथा च घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपप्रामाण्यं मनसा प्रथमानुव्यवसायेन सुग्रहं ज्ञानत्वघटितमपि सुग्रहं ज्ञानत्वस्य योग्यत्वेन भानाङ्गीकारादित्याहुः।

तन्न। वह्निगुञ्जापुञ्जयोर्गुञ्जावह्नीति भ्रमव्यावृत्तं तद्वद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वं तद्वाच्यम्। न चानुपस्थितयोरवच्छेद्यावच्छेदकभावो ग्रहीतुं शक्यः। प्रथमानुव्यवसायेन पूर्वोक्तरीत्या तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोर्ज्ञाने द्वितीयानुव्यवसायेनोपस्थितयोस्तयोः संसर्गविधयाऽवच्छेद्यावच्छेदकभावः शक्यग्रह इति परत एव प्रामाण्यग्रहो न तु स्वतः। तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकग्राह्यत्वस्य तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यत्वस्य यावत्तदनुव्यवसायग्राह्यत्वादिरूपस्य वा स्वतस्त्वस्य सम्भवादेव द्वितीयानुव्यवसायेन गृहीते प्रामाण्ये ज्ञानान्तरेऽनुमानादिनापि ग्रहः सम्भवतीति नाप्रसिद्धसाध्यकानुमानसिध्यर्थं कुसृष्ट्यादरणमिति दिक्।

कर्मत्वजातिमत्कर्म। तच्चोक्तमेव।

सामान्यविशेषसमवायाभावाख्याः पदार्था उक्ता एवेति सप्तैव पदार्थाः।

एवकारस्य नीलं सरोजं भवत्येवेत्यादौ क्रियासङ्गतस्यात्यन्तायोगव्यवच्छेदः शक्यः। शङ्खः पाण्डुर एवेत्यादौ विशेषणसङ्गतस्यायोगव्यवच्छेदः। पार्थ एव धनुर्धर इत्यादौ विशेष्यसङ्गतस्यान्ययोगव्यवच्छेद इति प्राञ्चः।

नव्यास्तु चैत्रस्यैवायं भ्राता मैत्रस्यैवेदमित्याद्यनुरोधेनान्ययोगव्यवच्छेदबोधस्यावबोधात्तेनैव सर्वत्रोपपत्तौ नायोगव्यवच्छेदादिबोधो एवकारादिति, न तत्र शक्तिः। विस्तरस्त्वस्मत्कृतएवकारवादे द्रष्टव्यः।

अत्र केचित । स्वत्वं पदार्थान्तरं दुर्वारम् । तद्धि न द्रव्यादित्रयान्तर्गतम् । गुणेऽपि वृत्तेः । न च तद्वृत्तित्वे मानाभावः । अरुणया पिङ्गाक्ष्येत्यत्रारुणगुणस्य क्रयसाधनत्वप्रतीत्या स्वत्वाश्रयस्य क्रयसाधनत्वेन गुणेऽपि तद्वृत्तित्वसिद्धेः । नापि सामान्यादिकम् । उत्पत्तिमत्त्वे सति विनाशित्वात् ।

ननु तत्र मानाभावः । तथा हि । स्वत्वाश्रयस्य प्रत्यक्षत्वेऽपि तत्सत्त्वस्य संशयभ्रमयोर्जायमानत्वेन तस्येन्द्रियाग्राह्यत्वात् । न च प्रतिग्रहादिज्ञानसहकृतेन्द्रियग्राह्यम् । स्वत्वजनकज्ञानविशेषस्य प्रतिग्रहपदार्थत्वेनान्योन्याश्रयापत्तेः । न च प्रतिग्रहादिक्रिया कर्तृकर्मसम्बन्धजनिका कर्तृकर्मनिरूप्यक्रियात्वात् गमनक्रियावत् । अस्तिक्रियायां ध्वंसप्रागभावानवच्छिन्नसत्त्वप्रतिपादिकायां कर्तृनिरूप्यायां कर्मशून्यायां कर्मसम्बन्धजनिकायां व्यभिचार इति कर्मपदम् । घटंजानातीत्यत्र विषयरूपकर्मनिरूप्यायां व्यभिचारवारणाय कर्तृपदम् । ज्ञानरूपक्रिया तु न कर्तृनिरूप्येति तद्वारणाय विगीतत्वं क्रियाविशेषणम् । तेन चौर्यादिक्रियायां न व्यभिचारः । न च गमनक्रियाया दृष्टान्तत्वात् सम्भवः । उत्तरसंयोगावच्छिन्नस्य पदस्य तदर्थत्वेन संयोगस्य द्विष्ठतयोभयनिरूप्यत्वेन दृष्टान्तत्वसम्भवादनुमानात्तत्सिद्धिरिति वाच्यम् । ग्रामं त्यजतीत्यादौ त्यागक्रियायां व्यभिचारादप्रयोजकत्वाच्च ।

एतेन क्रिया कर्तृकर्मनिष्ठधर्मजनिका फलावच्छिन्नत्वेन धातुप्रतिपाद्यत्वादिति परास्तम् । स्वरूपासिद्धेः सत्त्वासिद्धौ स्वत्वजनकज्ञानस्य धातुवाच्यत्वासिद्ध्याऽसिद्धेः । न चार्जितेषु नानाविधेषु स्वं स्वमित्यनुगतधर्मसिद्धिरिति वाच्यम् । अक्षादिशब्दप्रयोगेणापि अनुगत-

धर्मसिद्ध्यापत्तेः । अथै प्रतिग्रहानन्तरं यथेष्टविनियोगदर्शनात्तयोः कार्यकारणभावः । न च कालान्तरभावियथेष्टविनियोगं प्रत्याशुविनाशिनः प्रतिग्रहस्य द्वारं विना कारणत्वं सम्भवतीति द्वारत्वेन स्वत्वसिद्धिः । तच्च प्रतिग्रहादिना जन्यते दानादिना न नश्यति तच्च स्वधननिष्ठं स्वामिनिरूप्यम् ।

ननु इदं ममेति ज्ञानरूपप्रतिग्रहस्य स्वत्वजनकत्वे परकीयद्रव्येऽपि ममेदमिति ज्ञानात् स्वत्वापत्तिः । न च स्वत्वं प्रति स्वत्वस्य प्रतिबन्धकत्वात्परकीयद्रव्ये परस्य स्वस्वत्वसत्त्वान्नान्यस्य स्वत्वोत्पत्तिरिति वाच्यम् । देवदत्तस्येदं न मम किं तु यज्ञदत्तस्येति ज्ञानाद्देवदत्तस्वत्वनाशे इदं ममेति यज्ञदत्तातिरिक्तज्ञानाद्यज्ञदत्तातिरिक्तस्यापि तत्र स्वत्वोत्पादापत्तेः । न च देवदत्तस्य नेदं मम किं तु यज्ञदत्तस्येति ज्ञानविषयतया विशेषेण स्वत्वोत्पादकं तदभावान्न यज्ञदत्तातिरिक्तस्वत्वोत्पत्तिरिति वाच्यम् । देवदत्तस्य स्वत्वाभाववति देवदत्तस्य तादृशज्ञानात् स्वत्वोत्पादापत्तेरिति चेन्न । स्वत्वं प्रति स्वत्वस्य प्रतिबन्धकादेव तत्र स्वत्वानुत्पत्तेः । ज्ञानद्वयस्य तत्र कारणात् । नाशकं तु स्वत्वे इदं न ममेति ज्ञानम् । न च परिकीयद्रव्येऽपि यज्ञदत्तस्य न ममेति ज्ञानात्स्वत्वनिवृत्त्यापत्तिः । यज्ञदत्तस्वत्वस्यापि द्रव्यनिष्ठसम्बन्धविशेषेण यज्ञदत्तस्वत्वनाशे तदीयज्ञानवद्धेतुत्वादिति चेन्न । चौर्याद्यनन्तरं यथेष्टविनियोगात्तत्रापि द्वारत्वेन स्वत्वकल्पनापत्तेः । किं च स्वत्वस्य स्वरूपसतस्तादृशविनियोगहेतुत्वे ममेदमर्जितमिति ज्ञानाभावेऽपि तादृशविनियोगापत्तेस्तादृशज्ञानसहितस्य तस्य तद्धेतुत्वे लाघवात्ताद-

शज्ञानस्यैव तद्धेतुत्वमस्तु किं तेन। अपि च यथेष्टविनियोगस्येष्टसाधनाताज्ञानाधीनत्वेन स्वत्वानपेक्षणाच्च।

ननु कथं तर्हि स्वत्वव्यवहारः प्रतिग्रहादिविषयत्वेनेति चेन्न। विषयत्वस्य विषयस्वरूपतया दत्तेऽपि स्वत्वव्यवहारापत्तेः। प्रतिग्रहरूपत्वे च तन्नाशकाले स्वत्वाभावापत्तेः। किं च पितृमरणस्य निर्विषयतया तद्विषयत्वासम्भवेन धनेषु स्वत्वव्यवहाराभावापत्तेः। मरणकालीनपुत्रज्ञानविषयत्वेन तद्व्यवहार इति चेन्न। पुत्राज्ञातसुवर्णादिविनियोगेनोदासीनस्य प्रत्यवायो न स्यात्, दानात्फलं च स्यादिति चेन्न। यादृशोपायव्यतिरेके विनियोगासम्भवस्तादृशोपायसमानकालीनाः शास्त्रादिविरुद्धानां तादृशोपायविरोध्युपायानां यावन्तोभावास्तावदभावविशिष्टशास्त्राविरुद्धतादृशोपायसमयोत्तरवृत्तित्वविशिष्टत्वेनैव स्वत्वव्यवहारसम्भवात्। उपायद्वये शास्त्राविरोधित्वविशेषणान्न चौर्योपात्तचौर्यानीतयोः स्वत्वतदभावो येन रूपेण विनियोगोपायता तेन रूपेण शास्त्रानिषिद्धत्वं वक्तव्यम्। तेन कृष्या ब्राह्मणनिषिद्धप्रतिग्रहाब्राह्मणार्जितेन च स्वत्वाभावः। कृषित्वेन प्रतिग्रहत्वेन विनियोगोपाये न निषिद्धता किं तु ब्राह्मणकृषित्वेन तत्तत्प्रतिग्रहत्वेनेति।

अत्र केचित्। उत्तरकालीनविनियोगस्य विनियोगेच्छाकारणसत्त्वे स्वीये परकीये च दर्शनेन तत्क्रियादेरकिंचित्करत्वात्। स्वत्वाप्रतीतौ शास्त्रनिषिद्धत्वस्याप्यज्ञानाच्च। तस्मात्स्वत्वं पदार्थान्तरम्। प्रमाणं तु परस्वं नाददीतेत्यादिशास्त्रम्। तच्च प्रतिग्रहादिना जन्यते दानादिना नश्यति तच्च क्रयात्पितृमरणाच्च सर्वेषामुत्पद्यते पितृमरणोत्तर-

मुत्पन्नसुतस्य पैतृके स्वत्वं पितृमरणादेव परं तु पुत्राभावविशिष्टभर्तृमरणस्य स्त्रीस्वत्वकारणत्वकल्पनात् पुत्रानुत्पादसमयेऽपि भ्रातुः स्वत्वमुत्पद्यतेऽन्यथोदासीनस्तद्विनियोगान्न प्रत्यवेयात्, पुत्रजन्मना च तत्स्वत्वं नश्यति गर्भस्थस्यापि पुत्रस्य पितृमरणादुत्पद्यते ।

एवं प्रतिग्रहादिलभ्यभूभ्यामुत्पन्नधान्यादौ स्वत्वं तदीयस्वत्वादुत्पद्यते क्रयादिगृहीतदुग्धादिजन्यदध्यादौ स्वत्वं च दुग्धपरमाणुस्वत्वेन जन्यम् । न च तज्जनिते स्वत्वोत्पादस्तत्सत्त्वेन चेत्तर्हि कालान्तरे त्वद्दुग्धपरमाणुजनितद्रव्यान्तरे ऽपि तत्स्वत्वापत्तिरिति वाच्यम् । परमाणुस्वत्वस्य स्वजन्यस्वत्वेन नाशाङ्गीकारात् । अत एव प्रोक्षणादिजन्यसंस्कारवदात्मनिष्ठं स्वत्वमिति परास्तम् । क्रीततन्तुभिः पटोत्पादने स्वत्वाभावापत्तेः । तदवयवे स्वत्वाभावात् । दशभ्रातृणां धननिरूपितदशत्वस्वीकारापेक्षया दशनिरूपितमेकमेव धने स्वत्वमिति लाघवाच्च । न च दशसु धनेषु एकस्य तव दशस्वत्वानि न तु दशधनानामेकमेव स्वामित्वमिति लाघवमिति वाच्यम् । तत्र तवापि दशस्वत्वस्वीकारात् । अन्यथा एकस्य दानेन स्वत्वनाशे ऽन्येषु अपि स्वत्वाभावप्रसङ्गात् । न च दशभ्रातृकस्थले एकस्य नाशात्तत्स्वत्वनाशे भ्रात्रन्तराणां तत्र स्वात्वाभावापत्त्या तत्रापि नानास्वत्वस्वीकारो दुर्वार इति वाच्यम् । चरमभ्रातृनाशस्यैव तत्स्वत्वनाशे हेतुत्वात् । न च तत्पुत्रस्य तत्र स्वत्वानुपपत्तिप्रसङ्गः । तत्स्वत्वं प्रति तत्स्वत्वस्य विरोधित्वेन सत्यपि तत्स्वत्वे पितृमरणात्तदुत्पत्तेः । तव ज्ञानादिरूपोपायस्य समवायेन हेतुत्वं मम तु विषयतयेति दिक् ।

दशभ्रातृषु तद्धननिरूपितमेकमेव वास्तु । यथा दशनिरूपितमेकं धने स्वत्त्वमिति केचित् । प्रमाणप्रमेयादीनामत्रैवान्तर्भावात्, शक्तिसादृश्यादीनामतिरिक्तत्वनिरासाच्च सप्तैव पदार्थाः ।

इति धारापुरनिवासिलक्ष्मणदेवात्मजमाधवदेवविरचितो

न्यायसारः समाप्तः ।

शुभम् ।

प्रयाजादौ क्रतुः प्रयोजकः, पुरुषार्थं फल-
म्प्रयोजकम्। प्रयोजनत्वन्नामानुष्ठापकत्व-
मित्यर्थः—'विधिः यदर्थं यदनुष्ठापयति सः
प्रयोजकः। दर्शादिविधिः स्वर्गार्थन्दर्शादि-
कमनुष्ठापयतीति स्वर्गादिर्दर्शादौ प्रयोज-
कः। प्रयाजादिविधिः प्रयाजान् दर्शाद्य-
र्थम् अनुष्ठापयतीति दर्शादिः प्रयाजाना-
म्प्रयोजकः। दध्यानयनविधिः दध्यानयन-
मामिक्षार्थमनुष्ठापयतीति न वाजिनार्थम्,
आमिक्षार्थन्दध्यानयनानुष्ठाने सति वाजि-
नस्य स्वतः सिद्धत्वात्। अत आमिक्षैव
दध्यानयने प्रयोजिका, न वाजिनम्। "पुरो-
डाशकपालेन तुषानुपवपतीति" तुषोपवा-
पाङ्गत्वेन पुरोडाशकपालं विधीयते, तथा-
ऽपि तुषोपवापः कपालस्य प्रयोजको न
भवति,—पुरोडाशार्थमुपात्तेनैव कपालेन तु-
षोपवापसिद्धेः—किन्तु पुरोडाश एव कपा-
लस्य प्रयोजकः—इत्याद्यूह्यम्॥

(७७) क्रमकथनम् तत्र प्रथमः श्रौतक्रमः

ननु—"विधिना साङ्गप्रधानङ्कर्तव्यतया
चोद्यते। तत्राङ्गानाम् प्रधानानाङ्कर्मणाम्ब-
हुत्वात् क्रमेणानुष्ठानं वाच्यम्,—तत्क्रम-
नियामकम् प्रमाणङ्किम्" इति चेत्,—न,
श्रुत्यादीनामेव क्रमनियाकत्वात्। तथा हि—
"अध्वर्युर्गृहपतिन्दीक्षयित्वा ब्राह्मणन्दीक्ष-

यति" इत्यत्र क्त्वा-श्रुत्या गृहपतिदीक्षानन्तरम् ब्रह्मदीक्षा—इति श्रौतक्रमः ॥

(७८) तृतीयपाठक्रमः "समिधो यजति" "तनूनपातं यजति" इत्यादौ विधिवाक्यपाठक्रमादेव समिदादियागानुष्ठानक्रमः ॥

(७९) तृतीयोऽर्थक्रमः "अग्निहोत्रञ्जुहोति", "यवागूम्पचति" इत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात् पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमन्त्यक्त्वाऽर्थक्रमः स्वीकर्तव्यः,—अर्थः प्रयोजनम् होमरूपं, तदर्थं क्रमः अर्थक्रम; तेन पूर्वम् पाकः पश्चाद् होमः ॥

(८०) चतुर्थः प्रवृत्तिक्रमः तथा—"सप्तदश प्राजापत्यान् पशूनालभते" इत्यत्र सप्तदशपशुद्रव्यकप्रजापतिदेवताकाः सप्तदश यागाः सहकर्तव्यत्वेन बोधिताः। तत्रोपाकरणाख्यः आद्यः पदार्थः यतः कुतश्चिदारभ्य यत्र क्वचन पशौ समापनीयः। नियोजनादिकन्तु—येन क्रमेण उपाकरणम् प्रवृत्तम्, तेनैव क्रमेण कर्तव्यम्। कथम्। प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव नियोजनम्, तृतीयक्षण एव प्रोक्षणम्, व्यवधानप्रयोजकाभावात्। अत्र तु सप्तदशपशूनां सहानुष्ठेयवचनात् प्रथमतो यत्र क्वचित् पशौ कृतमुपाकरणं स्वाश्रयकर्तव्यनियोज-

नाय षोडशभिः क्षणैर्व्यवधानं सहते, नत्वधिकम्। तत्रोपाकरणक्रमेण नियोजनम् प्रथमपशावकृत्वा पश्वन्तरे नियोजनङ्कृत्वाऽनन्तरं प्रथमपशौ नियोजनकरणे षोडशक्षणाधिकक्षणव्यवधानं शास्त्रानुमतमापद्येत। तन्निरासाय उपाकरणं येन क्रमेण प्रवृत्तन्तेनैव नियोजनादिकङ्कार्यम्-इतिप्रवृत्तिक्रमः॥

(८१) पञ्चमः स्थानक्रमः

तथा ज्योतिष्टोमे[अ] औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानाम् अग्नीषोमीयसवनीयानुबन्ध्यानाम् पशूनान्त्रयाणां साद्यस्क्याख्ये सोमयागे "सहपशूनालभेत" इत्येकदानुष्ठानलक्षणं साहित्यम् बोधितम्; तदपि सवनीयस्य स्थाने विहितम्। तत्र प्राक् कृतक्रमम्परित्यज्य सवनीयस्य स्थाने साहित्यविधानादादौ[क] सवनीयपशोरुपाकरणम्, ततोऽग्नीषोमीयस्य, ततोऽनुबन्ध्यस्य-इति स्थानात् क्रमः।

(८२) षष्ठो मुख्यक्रमः

तथा दर्शे साम्नाय्यधर्माणां शाखाच्छेदनादीनाम्पूर्वमाग्नेयधर्माणान्निर्वापादीनाञ्च अनन्तरम्प्रवृत्तावपि मुख्ययोराग्नेयसान्नाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानन्तु

(अ) सुत्यादिवसात् पूर्वम् अत्रौपवसथ्यम्।

(क) पूर्वम्।

ख्ययागक्रमेण आदौ आग्नेयपुरोडाशस्य प्रयाजशेषाभिधारणम्, ततः पयसोऽभिघारणम् इति मुख्ययागक्रमात् अभिधारणक्रमः ॥ इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठानम्, अन्यथाऽनुष्ठाने वैगुण्यम् — इत्यलम् ॥

इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा ॥

५५५

# विषयानुक्रमणिका ।

५५७

अथ श्रीजयदेवकविप्रणीतस्य

# प्रसन्नराघवनाटकस्य टीका

## भावबोधिनी

### श्रीगङ्गानाथेन रचिता ।

सदाशिवशवोपरि स्थितसुपुष्टखर्वाकृतिं
स्फुरज्जलदरक्ततनुं लसितचारुचर्माम्बराम् ॥
जटातटपरिस्फुरन्मुनिपिशङ्गनागाब्जका-
म्भजे सकलदेवताप्रणतिनमस्कृतां कामपि ॥ १ ॥

"मातः सरस्वति किमप्यहमादरेण
"सम्प्रार्थये हृदि निधाय तवाङ्घ्रियुग्मम् ।
"वाचस्त्वमेतसो मम तथा भव सावधाना
श्रीमत्कवेर्वचसि न स्खलतो यथैते ॥ २ ॥

ध्यायं ध्यायं गणाधीशं स्मारं स्मारम्पितुः पदम् ।
करोमि नाटकस्येमां विवृतिम्भावबोधिनीम् ॥ ३ ॥

नाधीत्य व्याकरणं साहित्यमधीत्य किमप्येव ।
अस्यामहम्प्रवृत्तो हन्तव्यं साहसम्परमम् ॥ ४ ॥

पितुः श्रीतीर्थनाथस्य प्रभोर्लक्ष्मीश्वरस्य च ।
मातुस्तीर्थलतादेव्याः पादयोरियमर्पिता ॥ ५ ॥

"धीराः कुशाग्रमतयो भवतः प्रणम्य
"मौलौ निधाय करवारिरुहे समीहे ।
"वाणीयमर्थरहिताऽपि विशृङ्खलापि
"सानुग्रहेण हृदयेन विलोकनीया ॥ ६ ॥

"देवद्विजनृपादीनामाशीर्वादसमन्विता, अष्टभिर्वा द्वादशभिः पदैस्सम्यङ्नियोजिता । नान्दी कार्याऽतियत्नेन" इति नाट्याचार्यवचनानुरोधेन विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं विघ्न-

त्सारणसाधारणकारणमङ्गलं द्वादशपदया नान्द्याऽऽतन्वानो विष्णु स्तौति चत्वार इति । तेवक्ष्यमाणक्रियाः, विद्रुमलतावत् रक्ता या अङ्गुल्यः तासां श्रेणयो येषु ते तथाभूताः, प्रबालवदरुणाङ्गुलिराजमन्तः इति यावत्, तथा च शोणसरोजानां ये कोरकाः तद्वत् रुचा येषां ते तथोक्ताः रक्तोत्पलकलिकासदृशकान्तयः इति यावत्; एवम्भूताः शार्ङ्गिणो विष्णोः चत्वारस्तत्सङ्ख्यकाः पाणयः कराः श्रेयः सुकृतम् । पुण्यश्रेयसी सुकृतं वृषः इत्यमरः । प्रथयन्तु दिशन्तु, इत्यनुषङ्गः । किं क्रियाः पाणय इत्यपेक्षायामाह भालेष्विति । ये अब्जभुवः कमलयोनेर्ब्रह्मणः भालेषु चतुर्षु कपालेषु, पुण्याः पवित्राः पुण्यफलसर्वोत्कर्षादिबोधकाः ये वर्णाः अक्षराणि तेषां या आवलयः ताः युगपदेककालं लिखन्ति ॥ ब्रह्मणः भालानाञ्चतुष्ट्वेन विष्णुकराणाञ्च तथात्वेन युगपल्लेखः सर्वप्राणिनां भालाक्षरलेखकस्यापि विधातुर्भालाक्षरलेखको विष्णुरेव तद्विधातृत्वादिति भावः ॥ तथा श्रियः लक्ष्म्याः पयोधरयुगे गण्डद्वये कपोलद्वये च चतुर्ष्वपि स्थलेषु कस्तूरीमकरीः कस्तूरिकारचितमकरीलेखांश्च युगपत् लिखन्ति ॥ अत्रापि चतुर्षु स्थलेषु युगपल्लेखः करचतुष्ट्वेन सम्भवति ॥ अत्र शार्दूलविक्रीडितं वृत्तम् । तल्लक्षणञ्च "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति ॥ १ ॥

"अङ्गवर्णनेनाङ्गिन उत्कर्षः" इति न्यायेन पाञ्चजन्यध्वनिं वर्णयति–आकल्पमिति । आकल्पं, कल्पात् आ कल्पमभिव्याप्येत्यर्थः । कल्पो ब्रह्मदिनम् । तत्परिमाणञ्च विष्णुपुराणे–"कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिनमुच्यते" इति । मुरजितः मुरारेर्विष्णोः मुखम् इन्दुरिव तस्मात् तत्सकाशात् मधुरं कोमलं यथा स्यात्तथा उन्मीलन् उद्भवन् यो मरुत् तस्य या माधुरी माधुर्यं तया धीरः गम्भीरः उदात्तः तीव्रः मनोहरः प्रियश्च पाञ्चजन्यस्य शङ्खविशेषस्य ध्वनिः नादः त्वां सुखयतु आनन्दयतु ॥ किं विशिष्टो ध्वनिरित्यपेक्षायामाह–लीलेति । लीलया अनायासेनैव लङ्घितः अतिक्रान्तः मेघनादस्य जलदनिनदस्य ( पक्षे मेघनादनाम्नो रावणतनयस्य ) विभवः प्रभावः ऐश्वर्यं येन स तथाभूतः । तथा दानवाः राक्षसा एव दन्तिनः गजाः तेषां कुम्भेषु कर्णेषु च (पक्षे कुम्भकर्णनाम्नो रावणभ्रातुः ) व्यथादायी क्लेशकरः । ( तीक्ष्णशब्दस्य मस्तककर्णव्यथाजनकत्वं सुप्रसिद्धम्) (एवम्भूतः सन् दशमुखं दिक्चक्रं दशदिङ्मण्डलं) पक्षे दशवदनं रावणं समस्तदानवमण्डलस्वरूपम्, । आक्रामति आक्रम्य अभिव्याप्य वर्तते । अत्र मेघनादकुम्भकर्णदशमुखशब्दाश्रयश्लेषैः विष्णोरवतारेण रामचन्द्रेण मेघनादकुम्भकर्णनिराकरणपुरस्सरं रावणस्य निराकरणं नाटकस्येतिवृत्तं सूचितम् । तत्सूचनञ्चोक्तं नाट्यप्रदीपे नान्दीलक्षणप्रस्तावे–"आशीर्नमस्क्रियावस्तुनिर्देशान्यतमा मता" इति ॥ शार्दूलविक्रीडितवृत्तम् ॥ २ ॥

पुनर्विष्णुं वर्णयन्नाह–नाभाति ॥ हरिः वः युष्मान् पात्वित्यनुषङ्गः। किंविशिष्टो हरिरित्यपेक्षायामाह– नाभीत्यादिना। नाभ्यां यत्पद्मं तस्मिन् वसन् यश्चतुर्मुखः ब्रह्मा तेन उद्गीतः गीयमानः यः स्तवः स्तुतिः तस्य आकर्णनेन श्रवणेन प्रोन्मीलती प्रफुल्लिते कमनीये सुन्दरे ये लोचने तयोर्या कला छविः तया खेलन्ती मिलिता मुखेन्दोः द्युतिः शोभा यस्य स तथाभूतः। अथ च मधुकैटभौ तन्नामधेयावसुरौ सक्रोधं यथा स्यात् तथा पश्यन् (अस्य सर्वत्रायं ऽभिसन्धिः); तथा अम्बुधेः सुतां कन्यां लक्ष्मीं सकरुणस्नेहं सानुक्रोशं, सप्रेम च यथा स्यात्तथा, पश्यन्; तथा सरोजे वसतिर्वासो यस्य एवम्भूतं स्वनाभिकमलस्थं ब्रह्माणम् उत्प्रासप्रणयाभ्यां सह यथा स्यात्तथा सहासं (ब्रह्मणो मधुकैटभभीतस्य हासास्पदत्वम्) सविस्रम्भं च "प्रणयाःस्त्वमी विस्रम्भयाञ्चाप्रेमाणः" इत्यमरः (अयं सृष्टिं करिष्यतीति विश्वासः) यथा स्यात्तथा पश्यन्। स्नेहकरुणाहास्यप्रणयानां विरुद्धस्वभावानां युगपदाविष्करणेन भगवदुत्कर्षो व्यज्यते॥ शार्दूलविक्रीडितं वृत्तम्॥ ३॥

एतावती तावद्द्वादशपदा नान्दी। तल्लक्षणञ्च साहित्यदर्पणे– "आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते॥ देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता" इति। नाट्यप्रदीपे च "आशीर्नमस्क्रियावस्तुनिर्देशान्यतमा स्मृता" इत्यादि॥ सूत्रधारलक्षणञ्च भारतीये नाट्यशास्त्रे– "नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्। रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः" इति। पुनस्तत्रैव "नर्तकीयकथासूत्रं प्रथमं येन सूच्यते, रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते" इति नान्द्यन्ते सूत्रधार इत्यनेन नान्दीपाठोऽन्येन नटेन क्रियत इति केचिन्मन्यन्ते। किन्त्वेतत्–'सूत्रधारः पठेन्नान्दीमध्यमं स्वरमास्थित' इत्यनेनना स्याचार्यवचनेन विरुद्धम्॥ अतो नान्दीगानप्राधान्येन सूत्रधारेणैव कर्तव्यम्, तत्र तु वादित्रादिसाहाय्यमन्यैरपि विधेयमित्येव शिष्टपरिगृहीतः पन्थाः। अनेन च गीतवादित्रपुरस्सरनान्दीगानावसाने सूत्रधारोऽयिमं वक्ष्यजातं कथयतीत्यपि समञ्जसम्भवति॥

अयइति॥ कथं भगवतः शङ्करस्य शिवस्य यात्रायां मिलिता एव पारिषदाः इत्यभिसन्धिः॥ किंविशिष्टस्य शङ्करस्येत्यपेक्षायामाह– निजेत्यादि। निजवदनमेव यत् शारदं शरत्कालीनम् अरविन्दं कमलं तस्मिन् नर्तितो भ्राम्यमाणः गिरिनन्दिन्याः पार्वत्याः नयनरूपः खञ्जनो येन स तस्य तथाभूतस्य पार्वत्या सस्पृहमालोकितस्येति यावत्। शरद्येव खञ्जरीटनृत्यमिति शारदोपन्यासः। तथा सकलमुनिजनहृदयाङ्कुरकस्य योगबीजत्वात्। तथा त्रिकूटा महती या जटा तस्याः पाटलः श्वेतरक्तः "श्वेतरक्तस्तु पाटलः" इत्यमरः यः उत्सङ्गः क्रोडः तस्मिन् ताण्डवितो नर्तितो गङ्गायाः शिरःस्थितायाः तरङ्गनिकरो वीचीसमूहो येन स तस्य तथाभूतस्य। तथा च मन्दाकिन्याः जटानिवेशि

तायाः स्वर्णाद्याः चन्दनललाटिकायमानः चन्दनरचितललाटभूषणायमानः । "पत्रपाश्या ललाटिका" इत्यमरः । ललाटिकाशब्दात् क्यङन्तात् शानच् प्रत्ययः. । अथ च मुकुटे उपनीतो नूतनः सुधाकरश्चन्द्रो येन स तस्य तथाभूतस्य । शशिखण्डमण्डन एव शिवः अत एव नूतनपदम् । त्रिभुवनमेव यन्नलिनं कमलं तस्य निर्माणे सृष्टौ निर्मलो बिसाङ्कुरः मृणालाङ्कुरो यः स तस्य जगत्त्रयसृष्टिनिमित्तभूतस्येति यावत् । एवम्भूतस्य शङ्करस्य यात्रायां पूजनोत्सवे "यात्रा देवार्चनोत्सवे" इति विश्वः । मिलिता एकीभूताः पारिषदाः परिषदि साधवः ( 'परिषदो ण्यः,' परिषदः इत्यत्र योगविभागात् णः ) सभ्याः । सभ्यलक्षणं च नाट्यशास्त्रे-"सभ्यास्तु विबुधैर्ज्ञेयाः ये दिक्षान्विता जनाः । मध्यस्थाः सावधानाश्च वाग्मिनो न्यायवेदिनः ॥ त्रुटितात्रुटिताभिज्ञाः विनयावनमत्कन्धराः ॥ अगर्वा रसभाववज्ञास्तौर्यत्रितयकोविदाः । असद्वादनिषेद्धारश्चतुरा मत्सरच्छिदः । अमन्दरसनिष्यन्दहृदया भूषणोज्ज्वलाः । सुवेषा भोगिनो नानाभाषा वीरविशारदाः स्वस्वोचितासने सुस्थास्तत्प्रशंसापरायणाः" इति ॥ तत् तस्मात् कारणात् एतान् पारिषदान् उपगम्य तेषां समीपं गत्वा । निजकला नाट्यचातुरी तस्याः विलोकने यः प्रसादः तद्विलोकने कृपा तस्मै । अभ्यर्थयामि, अर्थधातोरात्मनेपदित्वेऽपि कृदन्तात् तत्करोतीति णिचि कृते परस्मैपदप्रयोगः समर्थ्यते साम्प्रदायिकैः ॥ प्रार्थये यत्सावधाना भूत्वा मदभिनयं पश्यन्त्विति भावः ॥

पृ० २ किमिति । व्यर्थैवाभ्यर्थनेति भावः । अभ्यर्थनयेत्यत्र कारणार्थकत्वे योगे तृतीया ॥ यतः यस्मात् कारणात् ॥ आकारेणेति । चतुराः विचक्षणाः जनाः परेषामिङ्गितम् अभिप्रायानुरूपां चेष्टाम्, आकारेणैव मुखनेत्रादिविकारेणैव तर्कयन्ति ॥ यथा षट्पदा भ्रमराः गर्भस्थं कोरकावस्थं केतकीपुष्पम् । दर्शनायोग्यमिति यावत् । आमोदेनैव सौरभेणैव तर्कयन्तीत्यनुवङ्गः ॥ ४ ॥

नूनम् तर्कयामि यत् । नूनं तर्केऽर्थनिश्चये इत्यमरः । एतदभिसन्धानादेव मदुक्तप्रश्नोक्त्याक्षेपादेव सामाजिकानां पारिषदानां समाजात् सकाशात् "सभासदः सभास्तारः सभ्याः सामाजिकाश्च ते" इत्यमरः तेषामभिप्रेतं ज्ञात्वा मे सखा मित्रम् ॥ रङ्गतरङ्गनामा अत्रैवागच्छति ॥ प्रविश्य जवनिकान्तरालादिति शेषः ॥ ८

नटः पारिपार्श्वकः । "रङ्गावतारी शैलूषो नटो भरतभारतौ" इत्यमरः । उक्तं च भारतीये—"नान्दीं प्रयुज्य निष्क्रान्ते सूत्रधारे सहानुगः स्थापकः प्रविशेत्पश्चात्सूत्रधारगुणाकृतिः ॥ पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः" इति । स च सूत्रधारापेक्षया किञ्चिदूनविद्यः । यथोक्तं तत्रैव-"तस्मादेव विद्यया भावः किञ्चिदूनस्तु मारिषः" इति ॥ भाव इति नटस्य सूत्रधारं प्रति समुचितोक्तिः । यथाह भरतः-"सूत्रधारः पुनः पारिपार्श्वकेनाभिधो-

यते भाव इत्येव तेनासावपि मार्षस्तु मारिषः" इति । तथा च "उत्कृष्टो विद्यया भावः किञ्चिदूनस्तु मारिषः" इति । विश्वनाथश्च—"सूत्रधारं वदेद्भाव इति वै पारिपार्श्वकः" इति ॥ मन्मुखेन मद्द्वारा भवन्तं सामाजिकाः पारिषदाः उदीरयन्ति कथयन्ति **यत् किलेत्यादि**। सामाजिकसन्देशरूपेण सूत्रधारस्य स्तुतिं चिकीर्षन् उत्कृष्टपदवीं तस्मिन् योजयन् नट आह—**भरताधिराजेति** । भरताः नटाः (भरता इत्यपि नटा" इत्यमरः) तेषां राजा तत्सम्बुद्धौ ॥

एवमुक्ते नटोऽपरं तदुच्यमानमनाकर्ण्यस्वोच्चपदवीमनुचितां मन्यमानो नटोक्तिमाक्षिपति सूत्रधारः ।

कर्णपिधानं खेदक्रोधसूचकम्. नैतादृशीमनुचितोक्तिं शृणोमीति कर्णपिधानम् । "अहहेत्यद्भुते खेदे" इत्यमरः । असमञ्जसमनुचितम् अनुचितमेवास्तु, न तत्कथनेन प्रयोजनम् (असमञ्जसमित्यत्र, न समञ्जसमिति व्युत्पत्तिः । समञ्जसमित्यत्र 'सम्यगञ्जोऽत्र' इति व्युत्पत्तिः । तत्र च 'अच्प्रत्यन्वव' इति योगविभागादच् । यद्वा 'सङ्गतमञ्जसा तत्त्वमत्र' इति व्युत्पत्तिः । तत्र च 'ह्रस्वो नपुंसके' इति ह्रस्वत्वम्) कार्यं सामाजिकाज्ञापनं श्रोतव्यं तावत् शृणोमि कृतं ते सभ्यालापैरिति हृदयम् ॥

अस्तु तावत्सामाजिकसन्देशः । मदुक्तौ किमसमञ्जसमित्येव कथयतु भावः, पश्चात् कथयिष्यामि यदुक्तं सामाजिकैरिति भावः ॥

नन्वित्यवधारणार्थकमव्ययम् । प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु इत्यमरः । ननु प्रश्नेऽप्यनुनये ऽनुज्ञाने ऽप्यवधारणे इति विश्वश्च । इदमेवासमञ्जसमिति पूर्वेण सम्बन्धः । यत् किलेति वार्तायाम् वार्तायामरुचौ किल इति त्रिकाण्डशेषादरुचिसूचकश्च । नन्विति वर्तमाने ज्यायसि ज्येष्ठे कनीयसि मयि राजपदं भरतराजपदमुपन्यस्यते प्रयुज्यते ॥ मत्सकाशे भरतराजेति यदुच्यते तदेवासमञ्जसमित्यनुषङ्गः ॥ हि यस्मात् अहं भरतमात्रक एव सामान्य एव नटोऽहम् । राजपदभाजनं भरताधिराजेति पदव्याः योग्यं पात्रं ममाग्रजन्मा मम ज्येष्ठभ्राता गुणारामनामैव ॥ (भाजनशब्दस्य नित्यनपुंसकत्वात् पुल्लिङ्गविशेष्यत्वेऽपि न लिङ्गपरिवर्तनम्) ॥ प्रशंसाश्रवणोपजातकुतूहलो नटः पृच्छति । कीदृशाः गुणाः अस्येति कीदृग्गुणः ॥

नन्विति निश्चये । अस्य नाम्नैव गुणाः उक्ता इति भावः ॥ न सर्वत्र नामानुसारिणो गुणा इति नटस्य हृदयम् ॥ अथ किमिति स्वीकारे । तदुक्तं—"यत् सत्यमिति भावार्थमथकिं स्वीक्रियार्थकम्"-इति भरतः । गुणसंवादं नाम्ना दर्शयितुं काव्यलिङ्गमुपन्यस्यति—**गुणग्रामेति** । महात्मनां नामापि, गुणानां ये ग्रामाः समूहाः तानभिसंवदति अनुरूपमभिधत्ते यत् तत्तथाभूतम् (ताच्छील्ये णिनिः)। अनुकूलान्युदाहरणान्याह—**सुवर्णेत्यादिना** । सुवर्ण इत्यत्र शोभनो वर्णो यस्येति व्युत्पत्तिः । शोभनरूपाभिधायी चायं शब्दो कनकवाची,

कनकञ्च शोभनवर्णमित्यनुगुणमेव नाम। तथा श्रीखण्ड इत्यत्र श्रियः लक्ष्म्याः खण्डः अंश इति व्युत्पत्तिः। मलयचन्दनवाची चायं शब्दः। ("मालयस्तु स्याच्छ्रीखण्डः" इति त्रिकाण्डशेषात्)। तथा रत्नाकर-शब्दो रत्नानामाकरः आश्रय इति व्युत्पत्तौ समुद्रवाची। तथा सुधाकर-शब्दः सुधायुक्ताः कराः किरणाः यस्येति व्युत्पत्तौ चन्द्रवाची॥ यथा सुवर्णादिनामग्रहणेनैव तत्तद्द्रव्यगुणाः व्यज्यन्ते तथैवात्रापि गुणारा-मेति नाम्ना, आरमन्ति सोल्लासं वर्तन्ते यत्र स 'आरामः'। (हलश्च इति घञ्)। गुणानामारामः गुणाराम इति व्युत्पत्त्या, विशिष्टगुणा-करत्वं व्यज्यत इति भावः॥ ५॥

(पृ॰ ३) न केवलं नाममात्रे गुणारामः किन्तु क्रियाऽप्यस्य नामानु-रूपैवेति प्रदर्शयन्नाह-य इति। यः गुणारामः रतिजनकस्य तन्नामकस्य राज्ञः सदसि सभायां हरचापारोपणं नाम रूपकं नाटकविशेषम् अभि-नीय रङ्गभूम्यादीन् रचयित्वा नाट्यं प्रदर्श्य परितुष्टेन रूपकाभिनयचा-तुरीसन्तोषितेन समर्पितां पारितोषिकरूपेण दत्तां रङ्गविद्याधर इति ख्यातिं पदवीं प्रियामिव कान्तामिव समासादितवान् प्राप्तवान्॥

अभिनन्दयति अलङ्करोति॥

दक्षिणस्यां दिशि तद्विग्देशे भवः दाक्षिणात्यः (दक्षिणा+त्यक्) तेन नटापसदेन नटेषु अपसदो नीचः तेन (अपकृष्टमपकृष्टे वा सीदतीत्यपसदः, षद्लृ विशरणादौ इति धातोरच्)। नीचनटेनेति यावत्। आत्मानं गुणारामरूपेण प्रख्याप्य रङ्गविद्याधर इति पदवी गुणारामलब्धा स्वायत्तीकृतेति भावः। गायकेनेत्यत्र सहयोगे तृतीया। मैत्रीम् मित्रस्य भावस्ताम्। (मित्राद्भावे ष्यञ् ङीप् च, हलस्तद्धित-स्येति यलोपः) रङ्गसङ्गरः रङ्गे नृत्ये (रङ्गो नृत्ये रणक्षितौ"इति विश्वः) सङ्गरः युद्धम् अन्योन्यनृत्यकौशलनिर्णयाय सङ्ग्रामरूपम् रूपकाभि-नयनमिति यावत्॥ अत्र गुणारामो रामं सूचयति दाक्षिणात्यपदं रावणम्, सुकण्ठपदं सुग्रीवम् इत्यादि बोध्यम्॥ अहो इति विस्म-यार्थकमव्ययम्। ('अहो ही च विस्मये'। इत्यमरः) महानुपक्रमः महान् कुतूहलकरः कार्यारम्भः॥

गुणारामोपक्रममभिनन्दयन्नाह-कीर्तिमिति। मृणालवत् कमनी-यौ भुजौ यस्याः सा तां तथाभूताम्; तथा अनिद्रः पूर्णोदितो यश्चन्द्रः तद्वदाननं यस्याः सा ताम्; तथा स्मितं विकसितं यत्सरोरुहं कमलं तद्वत् चारुणी नेत्रे यस्याः सा ताम्। ज्योत्स्ना चन्द्रिका, तद्वत् स्फीत मिति यावत् स्मितं हसितं यस्याः सा ताम्। (सर्वाण्येतानि विशे-षणानि कीर्तिदयितोभयसाधारणानि)। एवम्भूतां स्वच्छां (सर्वैः विशेषणैः स्वच्छत्वमेव लक्षितम्) कीर्तिं, दयितामिव प्रियवधूमिव, पुनः अपहृताम् परेण बलाच्चोरितां लब्धुं पुनः स्वायत्तीकर्तुं परमं महान्तमुपक्रमम् कः नातनोति। अपि तु सर्वः करोत्येवेति भावः॥ अत्र दयितापहारोपन्यासेन भाविजानकीहरणं तदानयनार्थं रामप्रयत्न-

च्च सूचितो भवति। प्रस्तावनायां क्वचित्प्रतिवस्तुन आक्षेपस्योचितत्वात्। तथा च धनञ्जयोक्तिः—"स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम्" इति॥ वसन्ततिलकं वृत्तम् तल्लक्षणञ्च—'ज्ञेयं वसन्ततिलकं तभजा जगौ गः' इति॥ अत्र वक्रोक्तिरलङ्कारः "यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते। श्लेषेण काक्वा वा" इति लक्षणात्॥ ६॥

तदिति। कृतं गुणारामवृत्तेन। प्रकृतां सामाजिकानुज्ञां कथय॥

इदमिति। इदमेव सामाजिकाः उदीरयन्ति यत् किल त्वयाऽभिनीयमानं नाटकप्रबन्धमवलोकयाम इति सम्बन्धः।

नाट्यप्रबन्धं विशेषयन्नाह। प्रत्यङ्कमिति। अङ्कमङ्कं प्रति प्रत्यङ्कम् (वीप्सायामव्ययीभावः)। अङ्कुरिताः उत्पन्नाः प्रादुर्भूताः ये सर्वे नव रसाः शृङ्गारादयः तैरभिरामं मनोरमम्। तथा नव्यानि उल्लसन्ति प्रफुल्लानि यानि कुसुमानि पुष्पाणि तेषां याः राजयः श्रेणयः ताभिः विराजते इतिविराजी विशोभी बन्धः रङ्गभूमिरचना यस्मिन् तम् तथाभूतम्। पुनः घर्मेतरांशुः शीतांशुः चन्द्रः तद्वत् वक्रतया अरालतया (चन्द्रपक्षे) क्वचिदनतिसुगमतया (नाटकपक्षे) अतीव रम्यं मनोहरम्। पुनः अतिमञ्जुलं मनोज्ञम् ("मनोज्ञं मञ्जु मञ्जुलम्" इत्यमरः) संविधानं सन्दर्भो यस्मिन् तम् तथाभूतं नाट्यप्रबन्धम् अभिनीयमानमवलोकयाम इति पूर्वेण सम्बन्धः॥ वसन्ततिलकं वृत्तम्॥ अयं श्लोकः प्ररोचना। तल्लक्षणं च रङ्गशेखरे "प्ररोचनापि कर्तव्या पूर्वरङ्गार्थसिद्धये," नाट्यदर्पणे च "भावसिद्धिः प्ररोचना" इति॥ ७॥

(पृ० ४) पूर्वं नाटकनाम अज्ञात्वा पश्चात् निपुणं विभाव्य नाम अवधार्य आत्मनो मूढतां विमृशन्नाह—कथमिति। निजशिरसो यः शेखरः शिरोभूषणम् तस्मिन् शयान्यपि वर्तमानमपि नीलोत्पलं, रत्नाकरस्य समुद्रस्य या वीचयो लहर्यः तासां या मालाः श्रेणयः तेषाम्परिसरे प्रान्तभूमौ ("पर्यन्तभूः परिसरः" इत्यमरः) विचारयामि अन्वेषयामि। अहोऽस्माकं मूढता यदुक्तश्लोकस्थमपि नाटकनाम अन्यत्र मृगयामहे इति॥ नन्विति निश्चये। इहैव श्लोके प्रत्यङ्कमित्यादौ अष्टपङ्क्तिकमाल्लिखिते प्रतिचरणाद्याष्टमाक्षरसंयोजनेनेति भावः॥

तमेव प्रत्यङ्केति श्लोकं। अहो इत्याश्चर्ये, तथा चामरः 'अहो हो च विस्मये' ॥ कविकुलेति। कवीनां कुलमेव यत् कुमुदं तस्य यो विकाशः तस्मिन्, तत्कारणीभूता या चन्द्रिका कौमुदी सा तस्याः प्रसादोऽनुग्रहः तस्य महिमा प्रभावः॥ यस्याः सरस्वत्याः प्रसादात्। यदनुरोधादिति यावत्। एवं विधो यासां ताः पूर्वोक्तरूपाः, प्रत्यङ्केत्येवंरूपा विचित्राशया इति यावत्। अथ च विचित्रमधुराः, विचित्राः गुणालङ्कारयुक्ताः मधुराः माधुर्यगुणसम्पन्नाः सूक्तयः समुल्लसन्ति प्रादुर्भवन्ति प्रादुर्भूय सहृदयहृदयानि प्रसादयन्तीति ध्वन्यर्थवैशिष्ट्यम्। यद्यपि माधुर्यमपि गुणत्वाद्विचित्रेऽन्तर्भूत एव तथाऽपि माधुर्यं विशेष

आदरः सहृदयानामिति तस्य पृथगुक्तिः । नन्विति निश्चये । अनेनैव जयदेवेन उक्तम् । अन्यत्रेति शेषः ॥

**वाणीति ।** हे वाणि वाग्देवि या तव चरणकमलपरागकणिका सतां सहृदयानां स्वान्तभूमिम् अन्तःकरणम् सम्प्राप्ता भवति, सैव कवितालतारूपेण परिणता कवितारूपेण अङ्कुरिता पुनः पूर्णपरिणतिं प्राप्य इयं सूक्तिरूपा उज्जृम्भते समुल्लसति । शारदाचरणकमलमकरन्दकणिकैव कविताया मूलकारणमिति हृदयम् । यस्याः कवितालतायाः किसलयं पल्लवं, सूक्तमेवापदेशो यस्य तत्तथाभूतम् । सूक्तव्याजेनेति यावत् । त्वत्कर्णेऽपि चिराय चिरकालपर्यन्तं पदं स्थानं विधत्ते । कीदृशे कर्णे इत्यपेक्षायामाह **शिर इति ।** शिरसो यः कम्पः (काव्याभिनन्दनं) तेन भ्रंशितः पारिजातकलिकागुच्छो यस्मात् स तस्मिन् तथाभूते कर्णे । विचित्रमधुरसूक्तीः स्वकर्णभूषणरूपेणोद्वहति भगवती वाग्देवीति हृदयम् ॥ पारिजातकलिकाया अपि अधिकतराह्लादजननी कविसूक्तिरिति चतुर्थचरणेन व्यञ्जितम् ॥ त्वत्कर्णेऽपीत्यत्र केचिद्विचक्षणा अक्रमतादोषमुद्भावयन्ति, किं तु तद्भ्रान्तिविलसितम्—यतः 'पादरेणुजनितलतिकापल्लवं कर्णेऽपि दधाति देवीति एवमस्याः प्रसादः'' इति कविहृदयम् । तथा च अपिशब्दस्य 'कर्ण' इत्यस्याव्यवहितोत्तर एव सन्निवेशः समुचित इति ध्येयम् ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

**ममेति ।** कवीनां कमलसद्मा ब्रह्मा आदिगुरुरिति यावत् तस्मिन् मुनौ । वल्मीकाज्जन्म यस्य स तस्मिन् वाल्मीकौ मम मनः कौतुकितं विस्मयापन्नम् । तस्य महिमानं विभाव्य विस्मितोऽस्मीति भावः । प्रभावं सूचयन्नाह—**यस्येति ।** यस्य मुनेः एकमपि वदनसरोजं कवितारूपेणामाद्य सम्प्राप्य चत्वारि (ब्रह्मणो) मुखान्येव यानि कमलानि तेषां यद्वनं तस्मिन् यो विहारः तस्य विनोदमानन्दमनुभवति भारती नाम राजहंसी । अहो प्रभावस्तपस्विनो वाल्मीकेः यन्मुखारविन्दस्यन्दमाना वाग्देवी रामचरितवर्णनरूपा विधातृवदनस्यन्दनसुखमनुभवतीति भावः । एकमेव सरोजमासाद्य चतुस्सरोजविहारसुखमनुभवतीति विरोधः । तत्परिहारब्रह्मणश्चतुर्मुखत्वश्रवणात् ॥ अत्र विरोधरूपकयोरङ्गाङ्गिभावः सङ्करः ॥

त्रिभुवनस्य जगत्त्रयस्य आभोगः तस्मिन् समस्ते जगत्त्रये इति यावत् । "आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि"इति विश्वमेदिन्यौ । **भास्वदिति ।** भास्वान् सूर्यः तस्य वंशे वतंसो मौलभूषणं यः स एवम्भूतो रामचन्द्रः तस्य या कीर्तिः सैव रमणी तस्य रङ्गप्रसङ्गेन स्वनत् शब्दायमानं यद्वादित्रं वाद्यं तस्य यः प्रथमः आद्यो ध्वनिः स तथाभूतः रामचन्द्रयशश्चन्द्रिकाचुम्बितचकोरायमाणचित्तः आद्यः कविरिति यावत् । एवम्भूतो वल्मीकजन्मा मुनिः ऋषिर्वाल्मीकिः विजयते, सर्वोत्कर्षेण वर्तते । तदुत्कर्षं प्रदर्शयन्नाह—**पीत्वेति ।** यस्य

वाल्मीकेः वदनमेव यदिन्दुमण्डलं तस्माद्गलत् यत्काव्यरूपममृतं तस्य तन्मयो योऽब्धिः सागरः तस्य किमपि लवमेव पीत्वा कवय एव ये नूतनाः आधुनिकाः अम्बुदाः मेघाः तन्मयी कादम्बिनी मेघमाला आकल्पं कल्पान्तपर्यन्तं वर्षति। काव्यरूपममृतमिति यावत्। यथा समुद्रादम्बु गृहीत्वा मेघाः तद्वर्षन्ति एवमर्वाचीनाः कवयः वाल्मीकिकृतरूपकाव्यामृतसागरात् लवमेव गृहीत्वा सरसानि काव्यानि निर्मातुं शक्नुवन्तीति परिस्फुटार्थः॥ रूपकमत्रालङ्कारः वृत्तं च शार्दूलविक्रीडितम्॥ ९॥

विमृश्य विचार्येति यावत्। रामचन्द्र इति। रामचन्द्रे दाशरथौ—राम एव चन्द्रः तस्मिन्निति श्लेषः—निर्भरं दृढम् आनन्दितो हृष्टो मे चित्तमेव चकोरः। यथा चकोरश्चन्द्रमसि हृष्यति तथैव मच्चितं रामे हृष्यतीति भावः। यस्य रामचन्द्रस्य कीर्तिरेव या चन्द्रिका कौमुदी तस्यां चुम्बिनो लुब्धः वाल्मीकेरपि सारस्वतसागरः सरस्वत्याः इदं सारस्वतम्। सरस्वतीसम्बन्धीति यावत्, एवम्भूतः सागरो रत्नाकरः समुल्ललास उच्छलितोऽभूत्। यथा पूर्णं चन्द्रमसं दृष्ट्वा समुद्रः समुच्छलति एवं रामचन्द्रयशश्चन्द्रिकां विलोक्य प्राचेतसस्य काव्यमयं हृदयं समुल्ललास, येनानेन रामचरितवर्णनरूपं काव्यं निरमायीति भावः॥

पृ० ५ चन्द्र इति। चन्द्रे विधौ, रामचन्द्रे दाशरथौ, नारीणां दृशः नेत्रस्य अञ्चलं प्रान्तभागः तस्मिन्; त्रिष्वप्येतेषु कस्य मनः चित्तं नामोदते नाह्लादितो भवति। सर्वेषामपि भवत्येवेति काक्वा व्यज्यते। त्रयसाधारणं, विशेषणमाह नीलेति। मध्यमणिन्यायेनास्यसम्बन्धः। चन्द्रपक्षे—नीलोत्पलस्य यः सुहृत् प्रकाशकत्वात् सूर्यः। तस्मात् तत्सकाशात् कान्तिर्यस्य स तस्मिन्। [सूर्यादेव चन्द्रमसो ज्योतिरिति ज्योतिश्शास्त्रसिद्धान्तोऽत्रानुसन्धेयः] रामचन्द्रपक्षे—नीलोत्पलसुहृत् तत्सदृशी कान्तिर्देहप्रभा यस्य स तस्मिन्। नीलोत्पलश्यामगात्रे इति यावत्। नारीदृगञ्चलपक्षे—नीलोत्पल सदृशी कान्तिः शोभा आह्लादकत्वं यस्य स तस्मिन्॥ अलङ्कारोऽत्र दीपकम्॥ १०॥

झटितीति। पितामहविष्टपात् प्रजापतिलोकात् झटिति त्वरया जगतीं जगतीतलम् आगच्छन्त्याः वाचोदेव्याः सरस्वत्याः, महति दीर्घतमे पथि यः श्रमः खेदः समजायत अभूत्। अपीति शङ्कायाम्। ("शङ्का सम्भावनास्वपि इत्यमरः) असौ वाग्देवी एनम् श्रमं कथं मुञ्चेत् कथं परिहरेत्। सा रघुपतेर्ये गुणाः तेषां यो ग्रामः समूहः तस्य या श्लाघा प्रशंसा कीर्तनमिति यावत्। तद्रूपा या सुधा तन्मयी या दीर्घिका वापी तां नावगाहते चेद्यदि। रघुकुलमैलिमाणिक्यरामचन्द्रगुणग्रामसुधासम्पर्कादेव अपगतजगदागमनपरिश्रमा वाग्देवीति भावः। रामचन्द्रचरितवर्णनेनैन चरितार्था वाग्देवीति हृदयम्॥ हरिणीवृत्तम्॥ ११॥

रामचन्द्रचरितस्य स्वकाव्यविषयत्वौचित्यमाशङ्क्य नटवचनमुद्भावयति कथमिति । तदेव समर्थयति-नायमिति ।

तदेवोपोद्बलयति-**स्वसूक्तीनामिति** । स्वसूक्तीनां स्वकाव्यानां पात्रं विषयमेकमद्वितीयं रघोः रघुवंशस्य तिलकं मौलिभूषणम् । रामचन्द्रमिति यावत् । कलयतां मन्यमानानां कवीनां को दोषः । न कोऽपीति भावः ॥ यदि नाम कवीनां दोषः तर्हि केषामिति शङ्कायामाह **स त्विति** । सः अवगुणः दोषः गुणगणानामेव । काव्यलिङ्गमुपन्यस्यति-**यदिति** । यत् यस्मात् कारणात् जगति संसारे एतैर्गुणगणैः असौ रामचन्द्रः एक एव सततं यः सुखेन संवासः सहवर्तनं तस्य वसतिः आश्रयः चक्रे कृतः । कथं सर्वे एकत्र मिलिता इत्याकाङ्क्षायामाह-**अपरेति** । एको गुणः अपरे गुणे तत्सहवासे लुब्धः अपरगुणसहवासं वाञ्छन् तेन सह मिलितः । एवं सर्वे गुणाः परस्परसहवासं वाञ्छन्तः एकत्र रामचन्द्रे ससुखमासन् इति भावः ॥ यद्वा न विद्यते परो यस्मात् सोऽपरः, एवम्भूतो यो गुणः तस्मिन् लुब्धैरित्यादि पूर्ववत् । अस्मिन् पक्षे केचिदत्युत्कृष्टा गुणाः रामचन्द्रे सन्तीति विमृश्य इतरे गुणाः तत्सहवासं वाञ्छन्तः तत्र वसतिं चक्रुरित्याशयः ॥ शिखरिणीवृत्तम् ॥ १२ ॥

एतदेव दृढयन्नाह **बीजमिति** ॥ चिरार्जितं चिरकालसमासादितं सुचरितमेव यस्य कवित्वद्रुमस्य बीजं, प्रज्ञा काव्यजननी अनिर्वचनीया शक्तिरेव अस्याङ्कुरः, पण्डितमण्डलीपरिचयः काव्यज्ञशिक्षाभाषणादिरूपः यस्य काण्डः स्तम्बः; काव्यमेव यस्य नवः पल्लवः, कीर्तिः काव्यनिर्माणजन्यं यश एव यस्य पुष्पपरम्परा; एवम्भूतः कवित्वद्रुमः परिणतः सकलकलः सन् रघुकुलस्य य उत्तंसः चूडामणिः तस्य या प्रशंसा सैव यत्फलम् । तद्विना किमन्यो निष्फलः क्रियते । नैवेति भावः, सकलकलापरिपूर्णमपि काव्यं रामचरितवर्णनं विना निष्फलमेवेति हृदयम् ॥ रूपकमत्रालङ्कारः । वृत्तं शार्दूलविक्रीडितम् ॥ अत्र "शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात्, काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे इति प्रकाशकृदुक्तिरनुसन्धेया ॥ १३ ॥

अस्य नाटकस्य कविः रचयिता कः? नटमुग्धत्वमूलकः प्रणयः, तदज्ञतामूलश्च कोपः ॥ कवेर्नाम गुणांश्च वर्णयन्नाह **विलास इति** । असमस्य अद्वितीयस्य रसस्य निष्यन्देन मधुरः एवम्भूतो यस्य वाचां विलासः विन्यासः कुरङ्गाक्ष्याः बिम्बाधरम् अधरभावं न्यग्भावं गमयति । रमणीबिम्बाधररसादपि मधुरो यस्य वाग्विलास इति भावः । एवम्भूतः कौण्डिन्यः तद्गोत्रजो महादेवस्य तन्नाम्नः मैथिलश्रोत्रियकुलमलङ्कुर्वतो ब्राह्मणस्य तनयः पुत्रः जयदेवः तन्नामधेयः पक्षधरापरनामकः किं तव श्रवणयोः कर्णयोः आतिथ्यं नायासीत्? किं त्वं तन्नाम न कदापि श्रुतवानसीति भावः ॥ शिखरिणीवृत्तम् ॥ नाटकादौ

कविगोत्रादिकीर्तनौचित्यम् ॥ यथा भारतीये "गोत्रं नाम च बधोयात्"इति ॥ १४ ॥

पृ० ६ **लक्ष्मणस्येवेति** । लक्ष्मणस्येव यस्य अस्य कवेः सुमित्राया तन्नामधेयाः गर्भात् जन्म यस्य एवम्भूतस्य । सुमित्रातनयस्येति यावत् । ( लक्ष्मणसामान्यमेतद्विशेषणम् ) मनः भ्रमत् सत् रामचन्द्रचरणरूपे कमले भृङ्गायते । यथा भ्रमराः इतस्ततः संचरमाणाः कमलमेव आश्रयन्ते तथैवास्य मनोऽपि लक्ष्मणमनोवत् रामचन्द्रपद एव लग्नमिति भावः ॥ अलङ्कारोऽत्र श्लेषोपमा ॥ १५ ॥

**कथमिति** । यथा चकोरपोतः 'स्वहृदयाह्लादजनकं चन्द्रं न जानाति तथैवाहमपि स्वहृदयैकवत्सलं कविं जयदेवं विस्मृतवानिवास्मीति भावः॥ सूक्तिरत्नम्, एतन्नाटकरूपमिति यावत् । स कविर्मयेत्युक्तो यत् त्वत्सूक्तय एव मौक्तिकगणो चिरं चिरकालपर्यन्तं मया चौरापहारचकितेन चौरापहरणतः सावधानेन परिरक्षणीयः (सूक्तिपक्षे परकृतकाव्यानि आत्मीयत्वेन व्यपदिशन्तः कुकवय एव चौराः) । रक्षणप्रकारानाह **कर्णे इति** । कर्णे निधाय यत्नतः श्रुत्वा (सूक्तिपक्षे) कर्णभूषणत्वेनपरिधाय (मौक्तिकपक्षे), कण्ठपीठे विधाय यत्नतः सङ्गृह्य गुणग्रहणाय. मर्थस्य यस्य कस्यचिदग्रे अप्रकाश्येति यावत्, यद्वा वारंवारमुच्चोर्य प्राकट्यन्नीत्वा ( सूक्तिपक्षे) कण्ठमालारूपेण परिधाय (मौक्तिकपक्षे), 'मूर्धनि धृत्वा सबहुमानं शिरोनमनेन श्लाघयित्वा ( सूक्तिपक्षे), शिरोभूषणरूपेण परिधाय (मौक्तिकपक्षे), पुनः नते हृदये कृत्वा सहृदयानामग्रे प्रकाश्य, यद्वा वारं वारं विचार्य (सूक्तिपक्षे) हृदयभूषणरूपेण परिधाय (मौक्तिकपक्षे) ॥ वसन्ततिलकं वृत्तम्, तभजाजगौग इति लक्षणात् ॥ १६ ॥

अलीका मिथ्या शङ्का चौरापहारभयम् । अलीकत्वं समर्थयति-- **सुललितेति** । सुललितं वचनं शब्दो यस्याः सा तां तथाभूताम् रमणीयपदगुम्फितामथ च रमणीयवाक्चतुराम् । उदारं प्रसादादिगुणसम्पन्नं वृत्तं समासश्छन्दश्च यस्याः सा ताम्, अथ च उदारमकृपणं वृत्तं चरित्रं यस्याः सा ताम्, । एवम्भूतां परस्य कृतिं काव्यरूपामथवा युवतिं हृत्वा चौरवृत्तेन अपहृत्य अर्णवस्य समुद्रस्य परमतिदूरं तटमपि गत्वा आत्मसङ्गोपनाय पलाय्य कः जनः सुखस्य भाजनं पात्रं (नित्यनपुंसकत्वाच्च लिङ्गपरिवृत्तिः) स्यादिति वद । न कोऽपीति काकुा व्यज्यते ॥ अनेन पद्येन रावणकृतजानकीहरणादि सकलं रामायणवृत्तमाक्षिप्तमित्यस्य पताकास्थानकत्वम् । तल्लक्षणं च दशरूपके-"प्रस्तुतागन्तुभावस्य भाविनोऽन्योक्तिसूचनम् । पताकास्थानकं तुल्यसंविधानविशेषणम्"इति ॥ पुष्पिताग्रावृत्तम् । तल्लक्षणं च 'अयुजि नयुगरेफतो यकारो, युजि तु नजौ जरगाश्च पुष्पिताग्रा'इति ॥ १७ ॥

प्रमाणे तर्कशास्त्रे प्रवीणः चतुरः । न्यायाभिमतषोडशपदार्थेषु निर्दिष्टत्वात् प्रमाणस्य सकलन्यायशास्त्रसूचकत्वम् ॥ अनेनायं जय-

देवः तत्त्वचिन्तामणेरालोककर्त्तेति सूचितं भवति । यथाहुर्मिथिलादेशीयपञ्जीकाराः–"जयदेवापरनामकः पक्षधरो महादेवसुतः" इति । पक्षधरश्च आलोककर्त्तेति सुप्रसिद्धमेव आलोककर्तुर्नामान्तरञ्जयदेव इति तत्रत्यादेव–"अधीत्य जयदेवहरिमिश्रात् पितृव्यतः तत्त्वचिन्तामणिरित्यमानोऽश्यमकाश्यते"–इति श्लोकादवगम्यते ॥ यथा कौमुदीसूर्ययोरेककालाधिकरणता न सम्भवति तथा कोमलताप्रधानकवितार्ककर्शत्वप्रधानतार्किकत्वयोरपीति कथमनयोरस्मिन् महाजने सामानाधिकरण्यमिति विचिन्त्य विस्मयम् आपन्नोऽस्मि ॥

कोऽत्राश्चर्यविषय इति प्रदर्शयन्नाह–**येषामिति** । कोमलं माधुर्यप्रसादादिगुणसम्पन्नं यत्काव्यं तस्मिन् यत् कौशलं पाटवं तस्य याकना लीला तद्वन्तो भारती येषां कवीनां भवति । कोमलकाव्य करणचतुराः ये कवय इति यावत् । तेषां कवीनां कर्कशः कठोरशब्दमयो यः तर्कः तस्य या वक्ररचना तस्याः उद्गारे निर्माणे किं हीयते? का हानिः? न काऽपीति भावः ॥ एतत्समर्थनाय दृष्टान्तमुपन्यस्यति पृ· **र्यैरिति** । यैः पुरुषैः कान्तायाः कुचकुड्मले अतिकोमले (कुड्मलपदमतिसौकुमार्यद्योतकम्) कररुहाःनखाःसानन्दं यथास्यात्तथाऽऽरोपिताः विन्यस्ताः, तैः पुरुषैः मत्तकरीन्द्रकुम्भशिखरे अतिकठोरे शराः न आरोपणीयाः प्रवेष्टव्याः किम्? आरोपणीया एवेति काकुध्वनिः। शार्दूलविक्रीडितं वृत्तम् ॥ अस्यैव कवेः उक्तिरूपेण उपलभ्यते–अपरो व्येतदाशयः श्लोकः–"तर्केषु कर्कशधियो वयमेव नान्यः, काव्येषु कोमलधियो वयमेव नान्यः, कृष्णे समर्पितधियो वयमेव नान्यः, कान्तासु रञ्जितधियो वयमेव नान्यः" इति ॥ १८ ॥

**अपिनामेति** । शङ्कायाम् । कवितायां काव्यनिर्माणे कोविदाः पण्डिताः, "सन् सुधीः कोविदो बुधः" इत्यमरः ॥ अस्य (स्वान्यस्य) कवेः जयदेवस्य सूक्तिभिः काव्यैः विनोदमेष्यन्ति किम्? नैवेत्याशयः। निसर्गमत्सरा हि विद्वांसः स्वकवितामात्रायत्तहृदयाः परकृतिषु प्रायेण मत्सरिणो भवन्तीति शङ्कास्थानम् ॥

अनेनैव जयदेवेनैव क्वचिदन्यत्रोक्तम् ॥ सुजनाः परकृतिष्वपि मुदं भजन्त इत्याशयेनाह **अपीति** । कियन्तः कतिपये सन्तः सज्जनाः स्वकीयैः निजनिर्मितैः वाग्विलासैः सूक्तिरूपैः मुदं हर्षमुपयान्तः प्राप्नुवन्तोऽपि परभणितिषु परकीयसूक्तिषु तोषं मुदं यान्ति, परस्यापि काव्यं श्रुत्वा मोदंत इति भावः । एतत्समर्थनाय दृष्टान्तमुपन्यस्यतिः **निजेति** । निजस्य यो घनमकरन्दः पुष्परसः तस्य यः स्यन्दः प्रस्रावतेन पूर्णम् आलवालं मूलस्थजलाधारो यस्य स तथाभूतो रसालः स्चूतवृक्षः कलशसलिलसेकं रक्षकादिकर्तृकजलसेचनं किं न ईहते काङ्क्षते? अपितु काङ्क्षत एवेति काकुव्यङ्ग्यम् ॥ परेषां रसालत्वेन स्वकाव्यस्य च कलशसलिलत्वेन वर्णनं विनयप्रदर्शनार्थम् । मालिनीवृत्तम् । ननमययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ॥ १९ ॥

सरलता सुगमबोधता प्रसादगुण इति यावत् । कोमलता माधुर्यम् वक्रता दुर्बोधता । कठिनता कठोरता दीर्घसमासटवर्गादिमयतेति यावत् । रमणीये आनन्ददायिन्यौ, वक्रताकठिनते क्लेशकारिण्यावेवेति नटस्याशयः । वक्रतामनुमोदयन्नाह-निन्द्यन्तइति । यदि नामेति निन्दायाम् (तथा चामरः "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इति ) मन्दमतिभिः । मूर्खैः वक्राः अनतिसुगमाः कवीनां गिरः सूक्तयः निन्द्यन्ते नानुमोद्यन्ते । एतद्दुर्वेदाध्यमपरत्र दृष्टान्तयति-स्तूयन्त इति । नीरसैः अरसिकैः पुरुषैः मृगदृशो वक्राः कुटिलाः कटाक्षच्छटाः न स्तूयन्ते नाभिनन्द्यन्ते ॥ यद्यपि दुर्विदग्धानामेवं भवति तथापि तद्वैदग्ध्यवतां तत्तद्विषयकलाविचक्षणानां सतां सज्जनानां मनः किं वक्रतां क्वाचित्ककुटिलतां नेहते किम् । अपि तु ईहत एव । इममेवार्थान्तरन्यासेन द्रढयति-धत्त इति । हरः शिवः वक्रां कुटिलां ऐन्दवीं चान्द्रमसीं कलां किरीटशिखरे ललाटे किं न धत्ते ? अपि तु धत्त एवेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

सूक्तिकठिनतामनुमोदयन्नाह-अमृतजलधेरिति । अमृतजलधेः सुधासागरस्य पयांसि जलं पायम्पायं पुनःपुनः पीत्वा (पा धातोः णमुल् ) । सैरीभिर्नाडीभिः संगृह्येति यावत्, पयोधरो मेघः यदि स्फटिकावनौ मणिकुट्टिमे ताराकाराः तारास्वरूपाः करकाः हिमखण्डानि किरति क्षिपति ॥ तस्यैव तुलनां समतां सततम् अमृतस्य स्यन्दवत् उद्गारो यासामेवम्भूताः प्रतिभावतां कवित्वशक्तिमतां गिरः सूक्तयः आनीयन्ते । यथा कठिनाः करकाः स्फटिकावनिमागत्य द्रवन्तो रसं जनयन्ति तथैव कठिनाः कविसूक्तयः सहृदयहृदयमासाद्य आमोदं जनयन्त्येवेति भावः । हरिणीवृत्तम् । तल्लक्षणञ्च-"नसमरसलागः षड्वेदैर्हयैर्हरिणी मता" इति ॥ २२ ॥

नूनमिति निश्चये । कौतुकं चमत्कारकारिता, प्रमोदो हर्षः प्रसादगुणचातुर्यं वा, ताभ्यां मेदुरं सान्द्रम् स्निग्धमिति यावत् । अन्तःकरणं हृदयम् । यत् यस्मात्कारणात् एवंविधाः पूर्वोक्तरूपाः सरसाः समुचितानुभावविभावव्यभिचारिभावसंवलिताः शीतलाः हृद्याः कोमलाः मधुराः । प्रसादगुणसम्पन्ना इति यावत्, एवम्भूताः सूक्तयः समुल्लसन्ति ॥ सर्वा अप्यस्य कृतयः सरसाः कोमलाश्चेत्यतो मन्ये यदस्य कौतुकानन्दसान्द्रमन्तःकरणमिति भावः ॥

पृ० ८ कवित्वं प्रशंसन्नाह-यस्या इति । कवितैव कामिनीति रूपकम् । केषां जनानां कौतुकाय आह्लादाय न भवतीति कथय । सर्वेषां कौतूहलकरी भवत्येवेति भावः । तामेव विशिनष्टि-यस्या इत्यादिना । यस्याः कविताकामिन्याः चोरः चौरपञ्चाशिकानामककाव्यकर्तेव चिकुरनिकरः केशकलापः । मयूरः सूर्यशतकाद्यनेककाव्यनिर्मातेव कर्णपूरः कर्णभूषणम् । भासः अज्ञातकालिकोऽयं कविः (कालिदासेन बाणेन मम्मटेन च वर्णितः) हासः स्मितम् । कविकुलगुरुः

कविश्रेष्ठः कालिदास एव विलासः लालित्यम् । हर्षः श्रीहर्ष इति प्रसिद्धो हर्षः आनन्दः । बाणः बाणभट्ट इति ख्यातो हृदये वसति-र्यस्य स तथाभूतः पञ्चबाणः कामः ॥ मन्दाक्रान्तावृत्तम् । तल्लक्षणं च मन्दाक्रान्ता जलधिषडगैः म्भौ नतौ ताद्‌गुरू चेदिति ॥ २३ ॥

पुनः कवित्वं प्रशंसन्नाह-नेति । ब्रह्मविद्या राज्यलक्ष्मीर्वा न तथा अनिर्वचनीयप्रभावा यथा इयं पूर्वं तरूपा कवीनां कविता (कविपदं सुकविपरमिति न पौनरुक्त्यम्), या कविता लोकोत्तरे अनिर्वचनीये पुंसि रसस्वरूपे रामरूपे वा निवेश्यमाना सती पुत्रीव हृदये हर्षं तनोति विस्तारयति । यथा सुपात्राय प्रदत्ता सुपुत्री पितरं सुखाकरोति तथैवेयं कविसूक्तिः सुनायकचरितवर्णनपरा लोकोत्तर-मानन्दं सहृदयहृदयैकवेद्यं विस्तारयतीति हृदयम् ॥ ब्रह्मविद्या केव-ललोकोत्तरज्ञानप्रदा न हर्षदा, राज्यलक्ष्मीश्च केवलहर्षप्रदा न लोको-त्तरज्ञानप्रदा । ताभ्यामधिका च कविता उभयमपि ददातीत्यस्याः उत्कर्षः ॥ व्यतिरेकोऽत्रालङ्कारः । इन्द्रवज्रा च वृत्तम् । स्यादिन्द्रवज्रा यदि तौ जगौ ग इति लक्षणात् अनेन जनककृतकन्यादानसामरम्भ-प्रस्तावः सूचितो भवति ॥ २४ ॥

'रङ्गभूमेर्बहिः स्थानं यत् तन्नेपथ्यमुच्यते'इति भरतः ॥ तथा चान्यत्र-'कुशीलवकुटुम्बस्य स्थली नेपथ्यमिष्यते' इति । कविताप्र-शंसारूपं सूत्रधारवाक्यमुपश्रुत्य हृष्टस्य याज्ञवल्क्यशिष्यस्य उक्तिः साध्वित्यादि । कुशीलवानां नटानां कुलस्य उत्तंसः शिखामणिः तत्सम्बुद्धौ ॥ दाल्भ्यायनोक्तिमुपश्रुत्य सूत्रधारः सचकितमाह-कथमिति । अन्ते समीपे वस्तुं शीलमस्येति अन्तेवासी शिष्यः ॥ अनवलोकनीयः चतुर्थो वर्णः शूद्रो यस्य स तस्य । ब्रह्मचारिण इति यावत् । (ब्रह्मचारिणां शूद्रदर्शननिषेधश्रवणात्) ॥ नटाः संस्कारच्यु-तक्षत्रियेभ्यः शूद्रासु जाताः शूद्रा एवेति ध्येयम् ॥ निष्क्रान्तौ नट-सूत्रधाराविति शेषः ।

प्रस्तावनालक्षणं साहित्यदर्पणे "नटी विदूषको वाऽपि पारि पार्श्वक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा" इति । अयमेव च पूर्वरङ्गः । "पूर्वरङ्गः सभा-पूजा कवेर्गोत्रादिकीर्तनम् । नाटकादेस्तथा संज्ञा सूत्रधारोऽप्यथो मुखम् ॥ गीतिक्रिया च नाट्यं च वर्णिकाग्रहणं तथा । धृतिर्जवनि-कायाश्च पूर्वरङ्गश्चतुर्विधः" इति भरतोक्तेः ॥ अत्र च प्रथमप्रकार एव पूर्वरङ्ग इति ध्येयम् ॥

---

तमेव न ब्रह्मविद्येत्यादि । साकूतं साक्षेपम् । अनेन सूत्रधारेण । न ब्रह्मविद्येत्यादिश्लोकं समर्थयन्नाह-तथाहीति । सकलानां लो-

कानां लोचनान्येव यान्यरविन्दानि कमलानि तेषां प्रकाशकत्वाद् आह्लादकत्वात् यो मार्तण्डः सूर्यः तस्मिन् ( मार्तण्डपदेन तद्वंशजस्य भाविवरत्वं सूचितम् ) । सकललोकलोचनाह्लादक इति यावत् । क्वचिदपि कस्मिंश्चदपि । पुरुषेषु प्रकाण्डः तस्मिन् प्रशस्ते श्रेष्ठे इति यावत् "प्रकाण्डो विटपे शस्ते" इति विश्वः । निजां कन्यां सीतां समर्पयितुं कामो यस्य सः ("तुम् काममनसोरपि"इति मकारलोपः) । अस्मद्गुरुणा याज्ञवल्क्येन उपदिष्टायां ब्रह्मविद्यायां कुलक्रमागताय राजलक्ष्म्यां च । ब्रह्मोपासने राज्यशासने चेति यावत् । शिथिलो मन्द आदरो यस्य स एवम्भूतः संवृत्तः ॥ योग्यवरान्वेषणपरवशचित्तस्य राजर्षे जनकस्य ब्रह्मोपासने राज्यशासने च न पूर्ववदावेश इति सूच्यमुक्तं सूत्रधारेण न ब्रह्मविद्येत्यादीत्याशयः ॥

अयं कथोद्घातः । तल्लक्षणञ्च दशरूपके यथा—"स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ॥ गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्विधैव सः"इति ॥

समीरेण वायुना यः संघट्टः संघर्षणं तेन कलं सशब्दं यथा स्यात्तथा क्वणन्-वल्लक्याः स्वकार्यविशिष्टवीणायाः गुणाः सूत्रं यस्य स तेन ॥ ध्वनिसादृश्येन भ्रमर गुञ्जितं वीणाध्वनित्वेन ज्ञातवानस्मि । **गगनेति** । आकाशे संचरमाणयोः भ्रमरशब्दज्ञाने हर्षः विहङ्गरुतज्ञानसिद्धिप्रदे गुरौ विस्मयश्च भगवतः याज्ञवल्क्यस्य प्रसादस्य महिमा महत्त्वम् । येन यत्प्रसादात् एवंविधानां कीटपतङ्गानाम् वचनस्य शब्दस्य अवबोधेन अर्थज्ञानेन मधुरां रुचिरां सिद्धिं पातञ्जलसूत्रतृतीयपादीयसप्तदशसूत्रोक्तामासादितवान् प्राप्तवानस्मि । योगसूत्रं च—"शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम्" ॥ एतौ भ्रमरौ । भ्रमरवचनानि मनुष्यभाषया विपरिवर्त्य वर्णयति दाल्भ्यायनः । कलः मधुरास्फुटः आलापो यस्य स कलालापः ("ध्वनौ तु मधुरास्फुटे कलः"इत्यमरः) । **सन्ततेति** । सन्ततमनवरतं विकस्वरात् प्रफुल्लात् इन्दुमौलेः शिवस्य या मन्दाकिनी स्वर्गङ्गा तस्यां यत् कुमुदकाननं तस्मात् आगतोऽस्मीति शेषेण सम्बन्धः ॥ सन्ततविकस्वरत्वं हरप्रसादादेवावधेयम् ॥ **रुचिरेति** । रुचिरः श्रवणीयो य आलापः तस्य पेशलता कोमलता । अहो इत्याश्चर्यं । **रुचिरेति** । कलालापमधुरप्रियेति नामद्वयस्य रुचिरता ॥

इन्दुमौलिं चन्द्रशेखरम् । शिवमिति यावत् कैलासो रावणेनोच्चलित एव ततो बाणस्य तदधिकतरसारजिज्ञासा, तदुत्तोलनेन निजभुजबलं सफलं मन्येत इति अत एव तस्य शिवं प्रति प्रश्नः **कैलासादिति** । कैलासादधिकः सारो गुरुत्वं यस्य तत् वस्तु किमस्ति यस्मिन् यदुत्तोलने मम दोर्दण्डमण्डलम् बाहुसहस्रं सफलतामेति सफलं

भवति । अस्मिन् पद्ये केचिद्वृत्तशास्त्रविचक्षणाः प्रथमपादान्तस्थं 'किं' इत्यक्षरस्य लघुत्वं विभाव्य हतवृत्ततादोषमुद्भावयन्ति । परन्तु, "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु विजानीयाच्छेषेष्वनियमो मतः" इति नियमं विस्मृत्यैव तैरस्मिन्सूक्तिरिति सुधीभिर्विभाव्यम् ॥ २५ ॥

बाणासाध्यं धनुर्नमनं विभाव्य शिवस्य हासः, अस्तीति । भुवं भुनक्तीति भूभुक् राजा, जनक एव भूभुक् तस्मिन् । तद्गृहमनीति यावत् ॥ यथा शलभा दीपे निपत्य दह्यन्ते तथैव एतद्धनुःक्षिप्ते शराग्नौ निपत्य तिस्रः पुरः दग्धा इति भावः । एतद्दृष्टान्तेन अनायासेन दग्धा इति सूचितं भवति ॥ २६ ॥

कार्मुकं धनुः । स बाणासुरः । तत्र जनकनगरम् निशाचरचक्रवर्तिनि राक्षसराजे रावणे । लूनानि गृहीतानि सकलानि प्रसूनानि पुष्पाणि यस्मात् तत् । कुसुमानां पुष्पाणाम् उपयोगः प्रयोजनम् । उपायनीकरोमि अनुपायनमुपायनं करोमि निवेदयामि नवीनं वृत्तान्तम् । सीतास्वयंवररूपमिति यावत् । लङ्केश्वरस्येत्यत्र कर्मणः शेषत्वविवक्षायां षष्ठी ॥ अनर्थोऽनिष्टस्तस्याङ्कुरस्य उद्भेद उत्पत्तिः राक्षसराजयोः बाणरावणयोः श्रुतं स्वयंवरवृत्तमित्यत्रैवागत्य बलात्सीतां नयिष्यत इति अहो महती अनिष्टसम्भावना । कातरतया भीरुतया । अलंयोगे तृतीया । नात्र भयावसर इति भावः । यतो भ्रमेण आरोपिताः लक्षिताः भ्रमराणामुक्तयः सम्भवन्ति । अतो नते नोक्तेषु सर्वथा विश्वसिमीति भावः । न ह्येतौ सामान्यभ्रमरौ यदनयोः वचनं न विश्वसनीयमित्युपेक्षायामाह–मकरन्देति । मकरन्दस्य यूथिकापुष्पविशेषस्य विचित्रसुगन्धिचूतवृक्षस्य वा यो रसः तस्य यः स्यन्दो द्रवः तद्वत् सुन्दरस्य मनोहरस्य उद्गारस्य शब्दस्य धारिणौ गुञ्जकावित्यर्थः । श्रवणं कर्णमानन्दयतो यावित्ति तौ तथोक्तौ एतौ भ्रमरौ वन्दिनाविव राजतः शोभेते ॥ २७ ॥

समनन्तरप्रविशतोर्वन्दिनोः प्रवेशसूचकत्वात् प्रवृत्तकमिदम् । तल्लक्षणं दशरूपके–'कालसाम्यसमाक्षिप्तप्रवेशः स्यात्प्रवृत्तकम्" इति । पात्रप्रवेशसूचनस्यावश्यकत्वमुक्तं संगीतकल्पतरौ–"असूचितस्य पात्रस्य प्रवेशो नैव युज्यते" इति ॥ समादिष्टौ आज्ञप्तौ । फलितं सार्थकं भूतम् । घुणाक्षरन्यायः आकस्मिकी समानार्थकतेति यावत् । अयं न्यायो जीर्णकाष्ठपट्टादौ कीटभक्षणजन्या कस्मिकाक्षरविन्यासमुपजीव्य प्रवर्तित इत्यादिकमस्मदीयन्यायलतिकायामनुसरणीयम् ॥ अस्मद्गुरवे याज्ञवल्क्याय ॥

विष्कम्भकः । अस्य लक्षणादिकमुक्तं भरतेन । तद्यथा–वृत्तवर्तिष्यमाणानां कथाङ्गानां निवेदकः । संक्षेपोक्तिः सविष्कम्भो मध्यपात्रप्रयोजितः कुतोऽपि स्वेच्छया प्राप्तः सम्बन्धो नोभयोरपि ॥ विष्कम्भकः

पुरुषार्थस्योपायमनवगतमवगमयन्नुत्कर्षाद्विशिष्टः शब्द उक्तः । अन्यथा सर्व एव शब्दः शब्दान्तराद् भिन्न इति अविशेषणमेव स्यात् । अतो नाऽविदितार्थस्य प्रवृत्तिः । प्रदर्शनार्थं चेदम् । अतो ऽर्थशब्दाऽभिधोच्चारणादिज्ञानं च कर्मकर्तृकारणभावसाधनेनोपदेशशब्देनोच्यते प्रेषणादिवत् । तैरपि हि यथाविवक्षितमर्थादयो निर्दि-

शब्दगतो विशेषः प्रतिशब्दं समवायादप्रयोजक इत्यर्थगतेन हेतुना विशेषेण विशिष्टः शब्द उक्तः । स चाऽयमर्थगतो विशेष इत्याह–पुरुषार्थस्योपायमनवगतमवगमयन्नुत्कर्षाद्विशिष्टः शब्द उक्तः। अन्यथा सर्वः शब्दः शब्दान्तराद्भिद्यतइत्यविशेषणमेव स्यात् । अनवगतमित्यनुज्ञाया व्यवच्छिनत्ति । यतश्चाऽर्थविशेषोपदेशता शब्दस्य तस्य च नाऽनवगतसङ्गतिना पुरुषेण प्रतीतिः अतोपि व्युत्पत्तेरपेक्षेत्याह–अतो नाऽविदितार्थस्य प्रथमप्राविणः पुरुषस्योपदेशात्प्रवृत्तिः । ननूपदेशो विधिः, स चाऽर्थभेदाऽभिधायकः शब्द इति क्व चित्क्व चिदुच्चारणमाह शब्दस्योच्चारणमिति । क्व चिदर्थं, विध्युद्देशेनैकवाक्यत्वादिति । क्व चिद्वचनं चोदनेति । क्रियायाः प्रवर्तकं वचनमिति । क्व चित् ज्ञानं शास्त्रं शब्दविज्ञानादसन्निकृष्टेर्थे विज्ञानमिति । वार्तिककारश्चाऽभिधाभावनामाहुरित्यभिधामिति । अत आह-प्रदर्शनार्थं चेदं, विशिष्टः शब्दो विधिरिति । अतो ऽर्थशब्दाऽभिधोच्चारणादिज्ञानं च कर्मकर्तृकरणभावसाधनेनोपदेशशब्देन यथायथमुच्यते । तेषु तेषु शास्त्रप्रदेशेषु चोदनाविधिशास्त्रशब्दा उपदेशशब्दा एवेत्यर्थः । अत्रैव लौकिकं निदर्शनमाह–प्रेषणादिवत् । कथमेतन्निदर्शन ? मित्यत आह–तैरपि हि प्रेषणादिशब्दैः कर्मकरणसाधनैर्यथाविवक्षमर्थादयो निर्दिश्यन्ते । यद्यर्थभेदाऽभिधायित्वेन उत्कर्षः शब्दस्य तर्हि प्राप्ताऽप्राप्तविवेकेनाऽर्थ एव प्रव-

श्यन्ते । अर्थस्तर्हि प्रवर्त्तकः । सत्यं, शब्दो ऽपि, तत्प्रतिपादनात् । कथं तर्ह्यङ्गोपदेशः ? अपेक्षितो ह्यर्थः पुरुषार्थः । अन्यथा ग्रामादिरपि न तथा स्यात् । अपेक्षितश्चोपदिष्टसाधनाऽनुग्रहः । ननु लिङादिभ्यः प्रवर्त्तना ऽवगम्यते । पराहतं चेदम् उपदेशो नियोज्यार्थकममीप्सितचोदतको न शब्द इति चोदनालक्षणो ऽर्थो धर्म इति शास्त्रकृद्वचनव्याघातः प्रसज्येतइत्याह—अर्थस्तर्हि प्रवर्तकः ।

परिहरति—सत्यं, शब्दोपि प्रवर्तकस्तत्प्रतिपादनात् । अयमभिसन्धिः । न तावत्साक्षादपेक्षितोपायता ऽपि प्रवृत्तिहेतुस्तस्याः प्रवृत्तेः प्रागभावादपि तु स्वज्ञानेन प्रवर्त्तयतीति तच्च शब्देनैव जन्यतइति यथा ऽर्थस्तद्विषयत्वात्प्रवर्तकस्तथा शब्दो ऽपि तज्जनकत्वादित्यविशेषः । तथा च न व्याघातः । एतेन पूर्वार्धे कारिकाया व्याख्यातम् । अत्र च पुरुषार्थस्येति पुरुषो नियोज्यो ऽभिमतः शुद्धस्येति नियोज्यार्थस्यैव न नियोक्त्रर्थस्येत्यर्थः । ननु यदि पुरुषार्थोपायाऽभिधायी शब्द उपदेशः, कथं तर्ह्यङ्गोपदेशः ? न खल्वङ्गानि पुरुषार्थसाधनानि, अपि तु क्रत्वर्थानि । परिहरति—अपेक्षितो ह्यर्थो ऽत्र पुरुषार्थो, न हि जात्या कश्चित्पुरुषार्थो व्यवस्थितः । अन्यथा ग्रामादिरपि न तथा स्यात् । तस्यापि स्वयमसुखवत् कदा चित्कथं चिदिष्यमाणत्वाच्चेन्न तर्हि जात्या पुरुषार्थत्वम् । यथाह न्यायवादी 'सोयं प्राण्यर्थो ऽपरिसंख्येयः प्राणभृद्भेदस्याऽपरिसंख्येयत्वा'दिति । न चाङ्गकार्ये प्रति जात्यैवाऽपेक्षा नास्ति पुरुषाणामित्याह—अपेक्षितश्चोपदिष्टसाधनस्य श्रेयःसाधनाऽनुग्रहः । अननुग्रहे साधनवैगुण्येन श्रेयसो ऽजननात् ।

अत्र चोदयति—ननु लिङादिभ्यः प्रवर्तना ऽवगम्यते । अन्यथा तच्छ्राविणः प्रवृत्त्यनुपपत्तेः । न पुनः पुरुषार्थोपायता । न

१ प्रमादि १ पु॰ पा॰ ।

नेति । नेदं पराहतम्[1] । तथा हि—

पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥

प्रवृत्तिसमर्थो हि कश्चिद्भावाऽतिशयो व्यापाराऽभिधानः प्रवर्त्तना । सा च क्रियाणामपेक्षितोपायतैव । न हि खलु भूतार्थप्रतीतिः प्रवृत्तिहेतुः । पराहतं चेदमुपदेशो नियोज्यार्थकर्माऽप्रस्थिप्रचोदनेति । यदि हि नियोज्यप्रयोजनं कर्मभूतमाहुः कथमेषावप्रवृत्तप्रवृत्तना ? सेयं पराहतिः । नेदं पराहतं पराहतिपरिहारेण सर्वं परिहृतं भवतीत्याशयः । कुतः ? तथा हि ।

पुंसो नेष्टाऽभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।

प्रेक्षावतां हि कायवचनचेष्टे प्रयत्नपूर्वके, प्रयत्नश्च रागपूर्वः, सुखानुशयी च रागो न दुःखे नाप्यसुखे[2] भवितुमर्हति, द्वेषादुपेक्षणाच्च । क्रिया च दुःखेत्यनुभवो लोकस्य । सा यदि सुखसाधनमपि न स्यान्नाऽस्यां सुखार्थिनः प्रवर्त्तेरन् । न चैते उपायाः साक्षात् सुखे प्रवर्तितुमीशते इति प्रेक्षावद्व्यापारोपरमप्रसङ्गः । तस्माद् दुःखरूपासु क्रियासु सुखसाधनतेवेच्छोपहारमुखेन प्रवर्त्तयति । स्वविज्ञानेन चाऽसाविच्छां प्रवृत्तिहेतुमुपहरतीत्युक्तम् । यदि पुनः शब्दः सुखसाधनतां न प्रतिपादयेन्न क्रियायां पुरुषं प्रवर्त्तयेत् । ननु तथापीष्टसाधनतामात्रं शब्देन प्रतिपादितं, कुतः पुनरतः प्रवर्त्तनाप्रत्ययः ? इत्यत आह—

प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ॥

तद्व्याचष्टे—प्रवृत्तिसमर्थो हि कश्चिद्भावाऽतिशयो व्यापाराऽभिधानः प्रवर्त्तना । अयमर्थः । न वयं परिस्पन्दमेवैकं व्यापारमाचक्ष्महे, येनाऽस्पन्दनात्मनः समीहितसाधनताया अप्रवर्त्तनात्मत्वेन पर्यनुयुज्येमहि, अपि तु भावधर्म एव कश्चित्समीहितसाधनाऽनु-

---

[1] परिहृतम् मू॰ पु॰ पा॰ । [2] असुखदुःखे॰ १ पु॰ पा॰ ।

**तथात्वमप्रतिपद्य तत्र प्रवर्त्तते कश्चित्। याप्याज्ञा[1]दिभ्यः प्रवृत्तिः सापि कथं चिदपेक्षितनिबन्धनत्वमुपाश्रित्यैव। अन्यथा ऽभावात्। ननु कर्त्तव्यमिति प्रतिपत्तेः प्रवृत्तिः।**

गुणो व्यापारपदार्थः। तद्यथा आत्मनो बुद्ध्यादिजननप्रवृत्तस्य मनःसंयोग एवाऽयं भावधर्मः[2]। तद्वदन्यापि स्पन्दस्तदितरो वा भावधर्मः प्रवृत्तिजननाऽनुकूलतया व्यापारविशेषः प्रवर्तना। न चाऽसौ शब्दस्तद्भावना चेत्याह—सा च क्रियाणामपेक्षितोपायतैव। कुतः? न हि तथात्वमपेक्षितोपायत्वमप्रतिपद्य तत्र क्रियासु प्रवर्तते कश्चित्। नन्वनपेक्षितोपाये ऽप्याज्ञया राज्ञः प्रवर्तन्ते प्रेक्षावन्त इति कथमपेक्षितोपायतैव प्रवृत्तिहेतु? रित्यत आह—याप्याज्ञादिभ्यः प्रवृत्तिः सा ऽपि कथं चिदपेक्षितनिबन्धनतामुपाश्रित्यैव। यद्यप्याज्ञादयो नियोक्त्रर्थकर्माणस्तथापि तद्विषयसंपादनस्य कथं चिन्नियोज्याऽपेक्षितनिबन्धनत्वमप्यस्ति। तथा हि। तत्संपादनपरितोषित आज्ञापयिता समीहितमस्मै प्रयच्छति अहितं वा न विधत्ते। तदिदमपेक्षितमुपाश्रित्य भृत्यस्य प्रवृत्तिः। कुतः पुनरेत?दित्याह—अन्यथा तदनुपाश्रये प्रवृत्तेरभावात्। न खलु यस्य यो न हिताऽहितप्राप्तिपरिहाराभ्यां यतते स तदाज्ञामनुरुध्यते। न चैतावतोपदेशस्याऽऽज्ञादिभिरविशेष,स्तेषां नियोजकाऽर्थसमुद्देशेन प्रवृत्तेरानुषङ्गिकत्वान्नियोज्यार्थस्योपदेशस्य तद्वैपरीत्यात्। तस्माल्लिङादिभ्यः प्रवर्तनाऽवगतिरुपपन्ना ऽनुपपन्ना च पराहतिरिति।

अत्र केचिदाम्नायं प्रति आढ्यमानिनः प्राहुः। ननु कर्त्तव्यमिति प्रतिपत्तेः प्रवृत्तिः। इदमाकूतम्। कार्यदर्शनोन्नेयव्यावृत्तयः खल्वमी लिङादयः। कार्यं च प्रवृत्तिलक्षणं वृद्धानां लिङादिश्रवणसमनन्तरमुपलभ्यते। तच्च बुद्धिपूर्वकं, स्वतन्त्रप्रवृत्तित्वात् अस्मत्प्रवृत्तिवत्। अनुमिता च बुद्धिरस्मत्प्रवृत्तिहेतुबुद्धिगोचरचारिणी

१ यदप्याज्ञा मू॰ पु॰। २ संयोगस्तत एवाऽयं धर्मः २ पु॰ पा॰।

**कथं हि तथा प्रतिपद्यमानो न प्रवर्त्तेत ? यो हि स्वर्णमुपल-**

प्रवृत्तिहेतुबुद्धित्वात् अस्मत्प्रवृत्तिहेतुबुद्धिवदिति । तस्याश्च विषयं स्वयमेव चक्षुरुन्मील्य पिण्डिकरोगं[1] परित्यज्य पर्यालोचयन्तः शब्दव्यापारपुरुषाशयतत्समीहिततत्साधनताव्युदासेन कर्त्तव्यतामेव प्रतिपद्यामहे । तथा हि । स्तनपानादावपि न जातु समीहितोपाय इत्येव प्रवृत्ताः स्मः, किं तु कर्त्तव्यमेतदिति । अतीते वर्त्तमाने ऽनागते च समुद्भविदाख्याते एतत्ते भवितेतिवत्कर्त्तव्यतात्मना प्रवृत्तेः । तदवगमे च तदात्मनि प्रवृत्तेः कर्त्तव्यतैव प्रवृत्तिहेतुरिति लिङादिश्रवणाऽनन्तरा प्रवृत्तिः कर्त्तव्यताऽभिधानमेव लिङादीनामापादयति । तथा च विदितसङ्गतितया लिङादयो वेदे ऽपि तामेवाऽभिदधते । एतावांस्तु भेदो लौकिकवचसः प्रमाणान्तराऽपेक्षप्रवृत्तित्वादपेक्षितोपायताप्रतीतिपुरःसरत्वाच्च दुःखरूपक्रियाकर्त्तव्यताऽवगतेरपेक्षितोपायतां तत्प्रमाणभूतामन्तर्भाव्य कर्त्तव्यताऽवगतिः । अपौरुषेयस्तु वेदो न स्वार्थे प्रमाणान्तरमपेक्षतइत्यपेक्षितोपायताऽवगमनिरपेक्ष एव कर्त्तव्यताऽवगमहेतुः । तथा च सा वेदादवगम्यमाना ऽनुष्ठातारमधिकारिणं नियोज्यमपेक्षते, न पुनः साध्यमस्या एव, तादूप्यात् । नियोज्यश्च यत्र साध्यविशिष्टो भवेत् तत्र साध्यविवृद्धिर्यथा स्वर्गकामो यजेतेति । यत्र त्वसौ निमित्तवान्यथा यावज्जीवमिति निषिध्यमानक्रियाकर्त्ता वा यथा न कलञ्जं भक्षयेदिति तत्र भगवानाम्नाय एव निरस्ताऽखिलदोषाशङ्को भावार्थविषयं नञर्थविषयं वा कार्यं हिताऽहितसाधनताऽवगमनिरपेक्षो ऽवगमयन्प्रवृत्तिं निवृत्तिं वा विधत्तइति किमपेक्षितोपायतये ? ति ।

नन्वपेक्षितोपायतामन्तरेण कर्त्तव्यमिति शतशो ऽप्यभिधीयमानं न प्रवृत्तये कल्पतइत्यत आह—कथं हि तथा प्रतिपद्य-

१ चक्षुषी निमील्य डिण्डिकरोगम् । च पु॰ पा॰ ।

भ्य मृत्तिकेत्याह कस्तस्योत्तरं दद्यात् ? कः पुनरयमर्थः कर्त्तव्यमिति ? न कश्चित् । प्रतिभा । का पुनरियम् ? नियतसाधना'वच्छिन्नक्रियाप्रतिपत्त्यनुकूला' प्रज्ञा । प्रतिभाक्रिमाणो न प्रवर्तेत ? शब्दस्तावत्कर्तव्यतायां विदितसङ्गतिस्तामवगमयति । तथा नैमित्तिकनिषेधाऽधिकारयोरसौ प्रतीयमाना न शक्या नेति वक्तुम् । न चाऽपेक्षितोपातयतानिवृत्तौ तस्या अपि निवृत्तिरिति साम्प्रतम् । सा हि तस्यां न प्रमाणम् । न चैकप्रमाणनिवृत्तौ प्रमाणान्तरेण प्रतीयमानं तदेव निवर्त्तितुमर्हति । न हि संतमसे द्रव्यं चक्षुषा न गृह्यते इति न त्वचा व्यवस्थाप्यते । न च निमित्तान्तरं नैमित्तिकाऽपूर्वे न कर्तव्यं प्रेक्षावता । असुखत्वे सति हिताऽहितप्राप्तिपरिहाराऽनुपायत्वात् काकदन्तपरीक्षावदित्यनुमानं संभवति । आम्नायजन्मना कर्तव्यताबोधेन बाधितविषयत्वात् । तदाह—यो हि स्वर्णमुपलभ्य मृत्तिकेत्याह कस्तस्योत्तरं दद्यात् ? तस्मादनपेक्षादाम्नायात् कर्तव्यता ऽवगता ऽनुष्ठान[1]माक्षिपत्येव । अन्यथा तत्त्वाऽनुपपत्तेः । तस्यास्तन्नान्तरीयकत्वात् । तस्मात्सूक्तं कथं हि तथा प्रतिपद्यमानो न प्रवर्तेत ।

ननु यदि हितसाधनता कर्तव्यता तर्हि तदर्थतत्त्वं वाच्यम्, न च तदस्तीत्याशयवान्सिद्धान्ती पृच्छति—कः पुनरयमर्थः कर्तव्य?मिति । तत्रान्तरे पूर्वपक्ष्येकदेशी प्राह—न कश्चित् । नन्वेवमसदर्थो कर्त्तव्यतावगतिरप्रमाणम् । अप्रमाणं च न व्यवहाराय कल्पतइत्याह—प्रतिभा । ननु व्यभिचारादर्थमनिश्चयात्मकमनैकान्तिकलिङ्गप्रसूतं संवेदनं प्रतिभेति प्रतिभाविदः । न चाऽनिश्चया[2]त्मकं विज्ञानं व्यवहाराङ्गं भवतीत्याशयवानाह—का पुनरियम् ? एकदेशिन उत्तरं—नियतसाधनाऽवच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञेति । न हि ते प्रतिभाविदः, ये संवेदनमनिश्चयात्मकं प्रतिभामाचख्युः ।

१ कर्तव्यताऽनुष्ठानं २ पु. पा. ।

याविषयत्वे हि क्रियाप्रतीतिः स्यात् । सा च प्रवृत्तिहे-तुः । अप्रमाणं न व्यवहाराङ्गम् । संशयविपर्ययौ हि तथा । न हीदमित्थमनेन कर्तव्यमिति अनुपजातप्रतिभाभेदः प्रवर्तते प्रत्यक्षाद्यवगतेऽप्यर्थे । तत्र हि प्रमाणकार्यस-

संशयो हि सः । वयं तु साध्यसाधनेतिकर्तव्यताऽवच्छिन्नायाः क्रियायाः प्रतिपत्तावनुकूलां तत्प्रतिपत्त्या कार्येऽनुष्ठानलक्षणे कर्तव्ये सहकारिणीं कर्तव्यमिति प्रज्ञां प्रतिभामध्यगीष्महि । एवं तर्हि क्रियैवास्या विषय इति न निर्विषयेत्यत आह—प्रतिभाक्रियाविषयत्वे हि क्रियाप्रतीतिः स्यात् । सा च त्रैकाल्याऽवच्छिन्नक्रियागोचरा । यथा पचति पक्ष्यत्यपाक्षीदिति । इयं पुनरतीताऽनागतवर्तमानानामन्यतमेनाप्यनवच्छिन्नमद्भुतार्थमिव प्रतिभासयन्ती प्रज्ञा । न पुनरस्याः परमार्थसद्विषयः, कालत्रयरहितत्वात् खपुष्पवत् । न खलु कुर्यादिति वर्तमानाख्या, करोतीत्यविशेषप्रसङ्गात् । नाऽनागता, करिष्यामीति । नाऽतीता, अकार्षमिति । तदेषा न प्रमाणम् । असद्विषयत्वान्न संशयः । एकान्ताऽवसायान्न विपर्ययः । सर्वेषां सर्वत्र व्यवहारदर्शनात् । अत एव चित्तवृत्तिं तामिमामाचक्षते विकल्परूपामाचार्याः 'शब्दज्ञानाऽनुपाती वस्तुशून्यो विकल्प' इति वदन्तः ।

ननूक्तमप्रमाणं प्रतिभा कथं व्यवहारं प्रवर्तयेदिति, अत आह—सा च प्रवृत्तिहेतुः । कुत एतदप्रमाणं न व्यवहाराङ्गमिति । संशयविपर्ययौ हि तथा । प्रतिभा पुनस्ताभ्यामन्या व्यवहारं प्रवर्तयतीत्यभिप्रायः । तत्किमन्यतामात्रेण प्रवृत्तिहेतुः? नेत्यमिति, तदन्वयव्यतिरेकाऽनुविधानात्प्रवृत्तिभावाऽभावयोः । तत्र व्यतिरेकं तावदाह—न हीदमित्थमनेन कर्तव्यमित्यनुपजातप्रतिभाभेदः प्रवर्तते प्रत्यक्षाऽवगतेऽप्यर्थे । ननु प्रत्यक्षादेरेव हानोपादानोपेक्षाः फलमिति

माप्तिः। प्रतिभानेत्रो हि लोक इतिकर्तव्यतासु समीहते। किं पुनरस्या निमित्तम्? शब्दः। तत्र व्युत्पन्नानां साक्षाद्भावनामुखेन वाऽप्रसिद्धशब्दनिबन्धनव्यवहाराणां बालादीनामनादिशब्दभावना। अन्यथा आद्यकरणविन्यासाद्यसम्भवात्। यथोक्तम्।

किमर्थं प्रतिभेत्यत आह—तत्र हि प्रमाणकार्यसमाप्तिः। प्रमाणानां हानादिलक्षणं कार्यं तत्प्रतिभाभेदे सति समाप्यते नाऽन्यथा। तेन हानादिक्रियासु प्रवृत्तानि प्रत्यक्षादीनि काष्ठानीव पाके ज्वलनं प्रतिभारूपमपेक्षमाणान्यपि नाऽकारणमित्युक्तं भवति। अन्वयमिदानीमाह—प्रतिभानेत्रो हि लोक इतिकर्तव्यतासु समीहते। इति कर्तव्यतास्वनुष्ठानेषु कायवचनचेष्टासु समीहते प्रयतते कार्यमिति प्रतिभासाधनो हि लोक इत्यर्थः। तदनेन क्रियाप्रतिपत्तावानुकूल्यं प्रतिभासु दर्शितम्। नन्वयं विकल्पः, स च शब्दज्ञानाऽनुपातीति तद्विदः। न च प्रतिभा शब्दज्ञानमनुपतति। बालादीनां तदभावेन तदनुत्पादादप्रवृत्तिप्रसङ्गात्। तस्मान्निमित्तान्तरं वाच्यम्, न च तदस्तीत्याशयवानाह—किं पुनरस्या निमित्तम्? उत्तरं—शब्दः[१]। तत्र ये तावद् व्युत्पन्नास्तेषां प्रतिभायाः साक्षाद्भावनामुखेन वाऽप्रसिद्धशब्दनिबन्धनव्यवहाराणां बालादीनाम्।

नन्वियं पटुभ्यासाऽऽदरप्रत्यययोनिर्भावनानाऽसति पूर्वाऽनुभवे भवितुमर्हति, अनुभवोऽप्यविदितसंबन्धशब्दविज्ञानजन्मा नास्ति। नाऽस्मिन् जन्मनि बालादीनां प्राग्भवीया तु भावना सर्वसंस्कारच्छेदः प्रायणात् ध्वंसते स्मेति न सम्प्रतितनीं प्रतिभां भावयेत्, भावने वा जात्यन्धबधिरादयस्तज्जन्माऽनुभूतानिव जन्माऽन्तराऽनुभूतान् रूपशब्दादीनपि व्याचक्षीरन्नित्यत आह—अनादिशब्दभावनाऽवश्याऽभ्युपेतव्या। कुतः? आद्यकरणविन्यासादीनामन्यथाऽसंभवात्। यथोक्तं प्रतिभाविद्भिः।

१ निमित्तं शब्दः २ पु० पा०।

**आद्यः करणविन्यासः प्राणस्योर्ध्वे समीरणम् ।**
**स्थानानामभिघातश्च न विना शब्दभावनाम् ॥**

**विच्छिन्नप्रतीतीनामपि च पदार्थानां किं कथमनुसन्धीयेत, विचारविकल्पाऽप्रत्यवमृष्टपूर्वशक्तिः समाविष्टपूर्वशक्तिप्रतिभासेवोपदीयमानोपश्लेषं विदधाति । ता-**

आद्यः करण[1]विन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥

जातमात्रः खल्वयं बालकः पिचा मुखहुते मधुसर्पिषी जिह्वया लेढि, सोऽयमाद्यः करणविन्यासः । प्राणांश्चोर्ध्वं समीरयति यत्क्वसनीत्युच्यते । अपि चोदीरितेन वायुना हृदयादीनि स्थानान्यभिहन्ति यतः शब्दभेद आविरस्ति । तदेतत्सर्वं प्राग्भवीयशब्दभावनाविजृम्भितम् । अत्र प्रयोगः, बालानामेवंविधा चेष्टा कर्त्तव्यताऽवगतिपूर्विका स्वतन्त्रचेतनप्रवृत्तित्वाद्या या स्वतन्त्रचेतनप्रवृत्तिः सा सा कर्त्तव्यताऽवगतिपूर्विका यथाऽस्मदादीनाम् । तथा विवादाध्यासिता कर्त्तव्यताऽवगतिः शब्दयोनिः कर्त्तव्यताऽऽकारत्वात् यो य एवमाकारः स सर्वः शब्दयोनिर्यथाऽस्मदादीनाम् । स च शब्दः साक्षादनुपलभ्यमानो भावनामुखेनाऽधिकरणसिद्धान्तन्यायेन करणभावमापद्यते । भावना च यथाकार्यदर्शनोन्नेया यावत्कार्यदर्शनं व्यवस्थाप्यनइति न जात्यन्धबधिरादीनां जन्मान्तराऽनुभूतरूपादिव्याख्यानप्रसङ्गः ।

व्युत्पन्नानामपि शब्दभावनायोनिरस्ति प्रतिभेत्याह—विच्छिन्नप्रतिपत्तीनामपि च पदार्थानां किं कथमनुसंधीयतइति विचारकल्पनाप्रत्यवमृष्टपूर्वशक्तिः समाविष्टपूर्वशक्तिप्रत्यवभासेवोपदीयमानोपश्लेषं विदधाति । अयमर्थः । संतापतप्ततनवो हि शीतह्रददर्शनमात्रादप्सु निमज्जनाः प्रवर्त्तन्ते, नान्तरा विचारयन्ति । दृश्यमानह्रदगता

[1] कारण २ पु॰ पा॰ ।

आपस्तापमपनेतुं समर्थाः सति शिशिरभावे तोयत्वाद्यत्तोयं शिशिरं ततत्सर्वं तापाऽपनोदनसमर्थं यथा गङ्गातोयम्, वयं च तप्तास्तदिह तत्प्रशमनाय निमज्जाम इति । नाना चैतेषां परस्परोपश्लेषमन्तरेण कर्तव्यता । न चास्यामसत्यां स्वतन्त्रचेतनप्रवृत्तिः । न चोपश्लेषे समुदाचरद्वृत्ति किं चित्प्रमाणमस्ति । तस्मादसंवेदितरूपा शब्दभावनेव इदमित्थमनेन कर्तव्यमिति प्रतिभाहेतुरास्थेयः । न चैवं वाच्यं, प्रागभवीयं तज्जन्मजं वा यच यत् प्रतिभाति तच तद्भावनाबीजमस्तु, किं शब्देनेति । आनुमानिकाऽनुभवजन्मनो भावनाया भूतार्थगोचरत्वेन कर्तव्यताऽऽकारप्रतीत्यकारणत्वात् । कर्तव्यताकाररहितस्य चाऽर्थोपश्लेषमात्रस्य प्रतीतिः । अथ किं कथमनुसंधीयते इति विचारविकलेति अनुमानबीजभूतानां धर्मिस्वरूपदर्शनतद्धर्मसंदेहजिज्ञासापक्षहेतुधर्मपरामर्शप्रमाणान्तराबाधानामभावं सूचयति । अप्रत्यवमृष्टपूर्वशक्तिरिति व्याप्तिस्मरणाऽभावमाह । न जातु गृहीतव्याप्तिरपि तस्या अस्मरन्ननुमातुमर्हति ।

ननु न यदि पूर्वशक्तिपरामर्शः किमिति तापदूनं शिशिरह्रदाऽवगाहने प्रवर्तयेन्न दहनज्वालाकलापाऽऽलिङ्गने ? एतन्निराकरोति– समाविष्टपूर्वशक्तिप्रत्यवभासान्नेदमनुमानं येन पूर्वशक्तिपरामर्शमपेक्षते, ऽपि तु स्वकारणात्पूर्वशक्त्याकारोपजायमाना क्वचित्प्रवर्तयति क्वचिन्न । ननु यदि पूर्वशक्त्यवभासा प्रतिभा तर्हि पूर्वैव शक्तिरस्या विषय इति न निर्विषयेति, एतन्निराकरोति–इवेति । न तु सैव । तथा हि । कर्तव्यतावभासा प्रतिभा पूर्वशक्तिमपि तदवच्छेदकतया गोचरयति, कर्तव्यता च न परमार्थसतीति तदवच्छेदेन प्रतिभारूढेनात्मना शक्तिरप्यवस्तुसती । स्वरूपेण तु सत्त्वमप्रयोजकं प्रतिभायामनारोहात् । सेयमेवंविधा प्रतिभा भावानामुपश्लेषं विदधाति । कुतः ? तादर्थ्यात्प्रवृत्त्यर्थत्वादस्याः ।

ननु भवतु प्रवृत्त्यर्था भावना, उपश्लेषविधानादित्यत आह–

दृश्यादनुपश्लेषे तदभावात् । दुर्ज्ञानोपायेषु च प्राज्ञैरपि स्वरविशेषाश्रयभेदेषु पक्षिणां पूर्वशब्दभावनाऽनुगमात्प्रत्युत्पन्नशब्दव्यापारा[1] प्रतिभा प्रवृत्तिनिबन्धनं, नोपायज्ञानम् । उपदेशाऽसकृद्दर्शनयोरभावात् । आहारविशेषप्रतिपत्तिश्च तज्जातीयानामविदितप्रीत्युपायत्वेन प्रथमज्ञाननिबन्धना न भवेत् । जातिभेदाऽभिव्यक्तप्रतिभाभेदानुपश्लेषे तदभावात् । विशिष्टार्थप्रतिपत्तिनिबन्धनो व्यवहारोऽनवच्छिन्नप्रतिपत्तिपदार्थमात्रान्नोत्पत्तुमर्हतीत्यर्थः । अपि च यत्प्राज्ञानामपि प्रमाणैरेकान्तदुष्करं तन्मन्दधियामपि पक्षिणां प्रत्युत्पन्नशब्दव्यापाराभावे ऽपि पूर्वशब्दभावनाऽनुगमलब्धजन्मप्रतिभाभेदवशादीषत्करमिति प्रमाणेभ्यो ऽपि सामर्थ्याऽतिशयं प्रतिभाया दर्शयति—दुर्ज्ञानोपायेषु च प्राज्ञैरपि स्वरविशेषाऽऽश्रयभेदेषु पक्षिणां पूर्वशब्दभावनाऽनुगमाद्विप्रकृष्टशब्दव्यापारा प्रतिभा प्रवृत्तिनिबन्धनम् ।

ननूपायज्ञानमेव प्रमाणभूतमस्ति, तन्न प्रवृत्तिनिबन्धनमिति किं प्रतिभये?त्यत आह- नोपायज्ञानं प्रवृत्तिनिबन्धनम् । कुतः ? उपदेशाऽसकृद्दर्शनयोरभावाद्धि कारणम् उपायज्ञानं कारणद्वयनिवृत्तौ निवर्तते धूम इव धूमध्वजनिवृत्तावित्यर्थः । अथ कुलायनिर्माणे कलविङ्कानां स्वरभेदविकारे च मधौ पुंस्कोकिलानामुपायज्ञानबीजमसकृद्दर्शनमध्यारोप्येतेत्याह—आहारविशेषप्रतिपत्तिरस्मदादिभिरेतदादरणीयमिति प्रतिभेति यावत् । तज्जातीयानां तज्जातिर्येषां तेषां समानजातीयानामुत्पन्नमात्राणामसकृद्दर्शनाऽभावादविदितप्रीत्युपायत्वेन प्रथमज्ञाननिबन्धना न भवेत् । प्रथमग्रहणेनाऽसकृद्दर्शनाऽभावं सूचयति ।

नन्वनादित्वात्प्रेत्यभावस्य पुनः समानाऽसमानजातीयविविधदेहोपधानसमधिगततत्तज्जातिनियततत्तद्भावनानिचयस्यैकस्यामपि

१ व्यापाराभावेऽपि मू पु॰ पा॰ ।

दानां प्लवनादिक्रियायां प्रवृत्तिश्चाऽज्ञातोपायानामेकजातीयानां च रागादिमयी प्रवृत्तिः, शाश्वतिकविरोधानां द्वेषप्रवृत्तिः। अतो नेष्टाऽभ्युपायमात्रं प्रवृत्तिहेतुः, अपि तु प्रतिभेत्यादर्शयन् वृद्धाः। यथा ऽवोचन्-

उपश्लेषमिवाऽर्थानामाकरोत्यविचारिता।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्त्तते॥

जातौ समस्तप्रतिभोदयप्रसङ्गः, कारणसन्निधानादित्यत आह—जातिभेदाऽभिव्यक्तप्रतिभाभेदानाम्। एतदुक्तं भवति। येन कर्माशयेन यद्गुणकं जन्म स तज्जन्मोचितामेव भावनामभिव्यनक्ति, न जात्यन्तरोचिताम्। तस्यास्तत्राऽनुपयोगात्। अभिव्यक्तभावनाभेदः प्रतिभाभेदमुत्पादयन्नभिव्यनक्ति। उत्पत्तौ सत्यां प्रतीतेः प्लवनादिक्रियाप्रवृत्तिश्चाऽज्ञातोपायानां जातमात्राणां चक्रवाकादीनां न भवेत्। एकजातीयानां च पारावतोरगादीनां रागद्वेषमयी प्रवृत्तिर्जातमात्राणामज्ञातसुखदुःखोपायानां न भवेत्। शाश्वतिकविरोधिनामहिनकुलादीनां द्वेषवती प्रवृत्तिर्न भवेत्।

पूर्वपक्षैकदेशी प्रकृतमुपसंहरति—अतो नेष्टाऽभ्युपायता प्रवृत्तिहेतुरपि तु प्रतिभेति। एतच्चादर्शयन् वृद्धाः। यदवोचन्—

उपश्लेषमिवार्थानां सा करोत्यविचारिता।

अविचारिते किं कथमनुसंधीयतइति विचारविकलेति व्याकृतम्। न च सा व्यतिरिक्तविषयेत्याह—

सार्वरूप्यमिवापन्ना विषयत्वेन वर्त्तते॥

विच्छिन्नप्रतिपत्तीनां तापहृदतोयादीनां सहसोपश्लेषं विदधाति। तेषां सार्वरूप्यमापन्नेव न त्वापन्ना। तेषां तदारोहिणां वस्तुसत्तया विचाराऽसहत्वात्। तस्मात्प्रतिभैव तादूप्यमापन्ना विषयत्वेन वर्त्तते। न तु तद्व्यतिरिक्तोऽस्ति विषयः। एतदपि च विच्छिन्नप्रतिपत्तीनामपि बहुपदार्थानां समाविष्टपूर्वशक्तिप्रत्यवभासेवोदीयमानेति व्याख्यातम्। न चेयमाकस्मिकी, न वा प्रमाणभूता ऽपि न व्यवहाराङ्गमित्याह—

साक्षाच्छब्देन जनिता भावना ऽनुगमेन वा ।
इतिकर्त्तव्यतायां तां न कश्चिदतिवर्त्तते ॥
प्रमाणत्वेन तां लोकः सर्वः समनुगच्छति ।
व्यवहाराः प्रवर्त्तन्ते तिरश्चामपि तद्वशात् ॥
स्वरवृत्तिं विकुरुते[1] मधौ पुंस्कोकिलः कथम् ।
जन्त्वादयः कुलायादेः करणे शिक्षिताः कथम् ॥
आहारप्रीतिविद्वेषप्लवनादि[2]क्रियासु च ।
जात्यन्वयप्रसिद्धासु[3] प्रयोक्ता[4] मृगपक्षिणाम् ॥

उच्यते—

न निरालम्बनं ज्ञानं क्रियासाधनयोगिनि ।
सामान्ये ऽस्मिन्विप्रकृष्टे यच्छब्दवदुपायधीः ॥

साक्षाच्छब्देन जनिता भावना ऽनुगमेन वा ।
इति कर्तव्यतायां तां न कश्चिदतिवर्त्तते ॥

अप्रमाणभूतामपि च निर्विषयतया व्यवहारान् प्रत्यन्तरङ्ग-तया चाऽव्यभिचारितया च ।

प्रमाणत्वेन तां लोकः सर्वः समनुगच्छति ।
न केवलं प्रेक्षावतां मनुष्याणामपि तु
व्यवहाराः प्रवर्त्तन्ते तिरश्चामपि तद्वशात् ॥

तदुदाहरणप्रचयमात्यन्तिकप्रसिद्धिख्यापनायाह—अन्यथा

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलः कथम् ।
जन्त्वादयः कुलायादिकरणे शिक्षिताः कथम् ॥
आहारप्रीतिविद्वेषप्लवनादिक्रियासु कः ।
जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ॥

८४ सिद्धान्ती पूर्वपक्षैकदेशिनमनन्तरतया निराकरोति—उच्यते ।

---

१ स्वरप्रवृत्तिं कुरुते मू॰ पु॰ पा॰ । २ आहारप्रीत्युपश्लेषाद्भावनादि मू॰ पु॰ पा॰ । ३ प्रयुक्तासु मू॰ पु॰ पा॰ । ४ प्रत्ययः—मू॰ पु॰ पा॰ ।

सा खलु प्रतिभा ऽऽलम्बनवती न वा ? आलम्बनवती चेत्तदेवाऽवबोद्धव्यं प्रवृत्तिनिबन्धनं, न च तदन्यदीहितोपायतायाः ।

न निरालम्बनं ज्ञानं क्रियासाधनयोगिनि ।
सामान्ये ऽस्मिन्विप्रकृष्टे यच्छब्दवदुपायधीः ॥

यद्यपि प्रतिभा निर्विषयेत्युक्तं, तथापि कदा चिदिदमभ्युपगतसिद्धान्तमात्रं स्यान्न तात्त्विकमिति दूषणाऽभिधित्सया विकल्पितम् । सा खलु प्रतिभा आलम्बनवती न वा । तत्र प्राथमं पक्षमाश्रित्याह—आलम्बनवती चेत्तदेव वा बोध्यं प्रवृत्तिहेतुर्न प्रतिभा । नन्वेतावतापि किमभिमतसिद्धि ? रित्यत आह— न च तदन्यदीहितोपायतायाः । एतच्चोपरिष्टान्निपुणतरमुपपादयिष्यते । तथा चाऽभिमतसिद्धिः ।

द्वितीयं पक्षमवलम्बते परः । ननु न विज्ञानं बाह्याऽविषयं सम्भवति । विकल्पाऽसहत्वात् । निराकारस्य वा विज्ञानस्य तद्विषयः साकारस्य वा । न तावन्निराकारस्य । विषयलक्षणाऽयोगात् । तथा हि । यदि सत्ताया विषयः सर्वे ऽर्थाः सर्वेषां सत्तामात्रस्याऽविशेषाद्विषया इति सर्वसर्वज्ञतापत्तिः । अथोत्पादकत्वाद्विषयत्वं तच्च कस्य चिदेवार्थस्य कस्य चिदेव प्रतिपत्तुः कस्य चिदेव प्रत्ययं प्रतीति नाऽतिप्रसङ्गः, तथापि चक्षुरादीनामप्युत्पादकत्वाद्विषयत्वं प्रसज्येत, विज्ञानसमये च तदुत्पादकस्याऽतीतत्वात् । क्षणिकत्वेन कार्यकारणयोरयौगपद्यात् वर्तमानताज्ञानाऽभावप्रसङ्गः । एकसामग्रीप्रतिबन्धेन वा वर्तमानविषयत्वे नेत्रादीनामपि तदेकसामग्रीनिवेशिनां विज्ञानकालानां ग्रहणप्रसङ्गः ।

स्यादेतत् । प्रत्ययः स्वकारणाऽऽसादितसामर्थ्यभेदः कं चिदेवाऽर्थं वर्तमानमवभासयति न सर्वं, स हि तस्य महिमेति न

नेष्टादिविषयता । यथाऽऽह 'विषयग्रहणं धर्मो विज्ञानस्ये'ति । अथैतदालोचनीयं, किंविषयः पुनरयं सामर्थ्यभेदः स्वकारणाऽधीनजन्मा विज्ञानस्येति । अर्थो विषय इति चेत्? किमयमस्य निर्वर्त्यो यथा संयवनस्य पिण्डः, विकार्यो वा यथाऽवघातस्य व्रीहयः, संस्कार्यो वा यथा प्रोक्षणस्योलूखलादिः, प्राप्यो वा यथा दोहनस्य पयः? किमनेनाऽनभ्युपेताऽऽरोपणेन? अर्थप्राप्तौ तु विज्ञानं समर्थमिति ब्रूमः । का पुनरियं प्राप्तिः? प्रमितिरर्थधर्मः कं चिदेव प्रमातारं प्रति द्वित्वादिसंख्येवाऽपेक्षाबुद्धिमन्तं प्रति बुद्धिध्वंसाच्च ध्वंसते द्वित्वादिकमिवाऽपेक्षाबुद्धिविनाशादिति चेत् । न तावदुन्मीलितलोचना नीलादिकमिव तद्धर्मं प्रमितिमीक्षामहे । अपि चाऽतीतानागतयोरप्रमितिप्रसङ्गः । न ह्यस्ति सम्भवः, अप्रत्युत्पन्नो धर्मोऽधर्मश्च तस्य प्रत्युत्पन्न इति ।

यदुच्यते, न विज्ञानादन्योऽर्थप्रकाशः किं तु विज्ञानप्रकाश एव सः । विज्ञानप्रकाशश्च संज्ञान[1]मेव । कथमन्यप्रकाशोऽन्यस्येति चेत् । स्वभावभेदात् । रूपादयो हि स्वप्रत्ययादुपजायमाना नात्मनः परस्य वा प्रकाशकाः, ज्ञानं तु स्वप्रत्ययमेसमासादितजन्माऽऽत्मपरप्रकाशनपरमार्थं न जातु तदर्थमन्तरेण दृष्टरूपं पश्चादर्थेन सम्बध्यते परशुरिव शुद्धः स्वकारणाऽधीनजन्मा पश्चाच्छिदया, किं त्वर्थसहितमेवेति न पर्यनुयोगमर्हति । न हि परशुः स्वकारणादयोमयस्तत्त्वे किं चिदपेक्षते पर्यनुयुज्यते वा । स्वभावभूतं चाऽस्य परप्रकाशनमप्रकाशननिवृत्त्या कथं चित्कल्पितभेदं फलमिति स्वपरप्रकाशनसामर्थ्यमसामर्थ्यनिवृत्त्या कथं चित्कल्पितव्यतिरेकेण[2] प्रमाणमिति न निर्विषयं सामर्थ्यमिति ।

तत्र ब्रूमः । कः पुनरर्थः स्वपरप्रकाशनपरमार्थं विज्ञान?-

१ विज्ञानम् । २ पु॰ पा॰ । २ व्यतिरेकि । २ पु॰ पा॰ ।

मिति। यदि प्रकाशनस्वभावं, सिद्धमेतत्। अथ परस्परसम्बन्धस्वभावं, कः पुनरेषां सम्बन्धः? विषयविषयिभावः सम्बन्ध इति चेत्। तस्याऽर्थज्ञानसमवायेन नानात्वमनेकवृत्तितया प्रसज्येत। तथा च ते एव तत्त्वम्। अतीताऽनागताऽर्थवृत्तिता च कथमस्येत्यभिहितप्रायम्। विज्ञानमात्राऽऽश्रयत्वे तु कथमस्याऽर्थाऽन्वयः? तस्मादात्मपरप्रकाशनपरमार्थं विज्ञानमिति वर्णयता बलाद्विज्ञानतादात्म्यं नीलादेरभ्युपगतं भवति। तथा च निराकारं विज्ञानं प्रति विषयलक्षणाऽयोगात् साकारस्य विषयो ऽर्थ इति।

अपि च विज्ञानप्रकाश एव चेदर्थप्रकाशस्तत्तद्भेदेनाऽर्थभेदो व्यवस्थापनीयः। तस्य च निराकारतया विशेषस्याऽभावात् इदं नीलस्य संवेदनमिदं पीतस्येति विभागाभावादर्थक्रियाविशेषाऽर्थिनो न प्रवर्त्तेरन्। आकारभेदवत्त्वे तु विज्ञानस्य नीलसारूप्यं व्यवस्थापनहेतुत्वात् प्रमाणं संविद्रूपता त्वस्य नीले ऽर्थे व्यवस्थाप्यमानत्वात् फलम्। यद्यपि सारूप्यं विज्ञानं चेत्येकमेव तत्त्वं तथापि कथं चिदेकव्यावृत्तिनिष्ठरूपाऽवगाहनस्वभावैर्विकल्पैर्व्यावर्त्यभेदाऽऽरोपितभेदं प्रमाणफलभावमश्नुते। यदाह "न हि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राऽविशेषादविशेषप्रसङ्गात्। तां तु सारूप्यमाविशत्स्वरूपवन्तां घटयेदिति। तत्सारूप्यतदुत्पत्तिभ्यां च विषयत्वेन नेन्द्रियादिषु तत्प्रसङ्गः। अर्थाऽऽहिताऽऽकारवेदनमेव चाऽर्थवेदनं ज्ञानाकाराश्च वर्त्तमाना इति वर्त्तमानताऽप्युपपन्नेति। यथाह।

भिन्नकालं कथं ग्राह्यमिति चेद्ग्राह्यतां विदुः।
हेतुत्वमेव तद् युक्तं ज्ञानाऽऽकाराऽर्पणक्षमम्॥ इति।

तथाप्युक्तं स्यादर्थवेदनमिति। तस्मात्साकारज्ञानगोचरोऽर्थ इति सौत्रान्तिकाः प्रपेदिरे।

तदिदमनुपपन्नम्। तथा हि। साकारं विज्ञानमर्थविषयमित्य-

यापादेश्चाशुद्धिरूपस्यच्चयो नाशस्तनुतारूपस्तस्मिन्सति सम्यक्ज्ञानस्याभिव्यक्तिर्दीप्तिर्यथा यथा साधनान्यनुष्ठीयन्ते तथा तथाऽशुद्धिस्तनुत्वमापद्यते यथा यथा च चीयते तथा तथा तत्क्षयक्रमानुसारिणीज्ञानस्यापिदीप्तिर्वर्धते सा खल्वेषा विवृद्धिः प्रकर्षमनुभवत्याविवेकख्यातेः सत्वादिरूपगुणजीवेश्वररूपपुरुषयोः स्वरूपविज्ञानपर्यन्तमित्यर्थः दीप्तिश्चाचाश्रुतामतविशेषग्रहणं श्रवणमननाभ्यां वसामान्यत एव ज्ञानं भवति । एवं च जिज्ञासामात्रद्वारा यमनियमान्तर्गतसर्वकर्मणां ज्ञानहेतुत्वं जिज्ञासानन्तरं च कर्मत्याज्यमनुत्पन्नज्ञानेनापीति चिन्त्यम् अत एव कर्मणा सहिताज्ज्ञानात्सम्यग्योगोऽभिजायते ज्ञानं च कर्मसहितं जायते दोषवर्जितमिति कौर्मे ज्ञानसाहित्येन कर्मानुष्ठानमुक्तं ॥ यद्यपि विषयान्तरसञ्चाराख्यप्रतिबन्धनिवृत्तिरूपतया संप्रज्ञातो विज्ञानकारणं तथाप्यशुद्धिक्षयद्वारा योगाङ्गानुष्ठानस्यैव ज्ञानदीप्तिहेतुत्वं न योगस्येत्यङ्गपदोपादानं तच्च योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणं असदुत्पादानभ्युपगमात्सत एव न वस्तुनोऽतिशयहेतुः कारणमुच्यते एवं च सत्येवाशुद्धिर्वियोगाख्येनातिशयेन योगाङ्गानां कार्या यथापर शुश्छेद्यस्यविवेकख्यातेस्तु प्राप्तिकारणं वर्तमानावस्था विशिष्टायास्तस्याः कारणं उत्पत्तिप्रतिबन्धकनिवर्तनद्वारा यथाधर्मः सुखस्यनतुवैशेषिकादीनामिवोत्पत्ति कारणं अस्माकं निमित्तकारणानां प्रतिबन्धनिवृत्तिकारणत्वसिद्धान्तात् ॥ विवेकख्यात्यादेरुत्पत्तौ च चित्तमेव कारणं कारणानि च पूर्वाचार्यगणितानि नव उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः वियोगान्यत्वधृतयः कारणं नवधा स्मृतमिति ॥ तत्रोत्पत्तिकारणमुपादानकारणं यथा ज्ञानस्य मनःतद्धिज्ञानस्योत्पत्तिरूपातिशये कारणं १ स्थितिकारणं यथा मनसः पुरुषार्थता ॥ भोगापवर्गरूप-

मिति। यदि प्रकाशनस्वभावं, सिद्धमेतत्। अथ परस्परसम्बन्धस्व-भावं, कः पुनरेषां सम्बन्धः? विषयविषयिभावः सम्बन्ध इति चेत्। तस्याऽर्थज्ञानसमवायेन नानात्वमनेकवृत्तितया प्रसज्येत। तथा च ते एव तत्त्वम्। अतीताऽनागताऽर्थवृत्तिता च कथमस्येत्यभिहितप्रा-यम्। विज्ञानमात्राऽऽश्रयत्वे तु कथमस्याऽर्थोऽन्वयः? तस्मादा-त्मपरप्रकाशनपरमार्थं विज्ञानमिति वर्णयता बलाद्विज्ञानतादात्म्यं नीलादेरभ्युपगतं भवति। तथा च निराकारं विज्ञानं प्रति विषय-लक्षणाऽयोगात् साकारस्य विषयोऽर्थ इति।

अपि च विज्ञानप्रकाश एव चेदर्थप्रकाशस्तत्तद्भेदेनाऽर्थभेदो व्यवस्थापनीयः। तस्य च निराकारतया विशेषस्याऽभावात् इदं नीलस्य संवेदनमिदं पीतस्येति विभागाभावादर्थक्रियाविशेषाऽर्थिनो न प्रवर्त्तेरन्। आकारभेदवत्त्वे तु विज्ञानस्य नीलसारूप्यं व्यवस्था-पनहेतुत्वात् प्रमाणं संविद्रूपता त्वस्य नीले ऽर्थे व्यवस्थाप्यमान-त्वात् फलम्। यद्यपि सारूप्यं विज्ञानं चेत्येकमेव तत्त्वं तथापि कथं चिदेकव्यावृत्तिनिष्ठरूपाऽवगाहनस्वभावैर्विकल्पैर्व्यावर्त्यभेदा-ऽऽरोपितभेदं प्रमाणफलभावमश्नुते। यदाह "न हि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राऽविशेषादविशेषप्रसङ्गात्। तां तु सारूप्य-माविशत्स्वरूपवन्तं घटयेदिति। तत्सारूप्यतदुत्पत्तिभ्यां च विषय-त्वेन नेन्द्रियादिषु तत्प्रसङ्गः। अर्थाऽऽहिताऽऽकारवेदनमेव चार्थ-वेदनं ज्ञानाकाराश्च वर्त्तमाना इति वर्त्तमानताऽप्युपपन्नेति। यथाह।

भिन्नकालं कथं ग्राह्यमिति चेद्ग्राह्यतां विदुः।

हेतुत्वमेव तद् युक्तं ज्ञानाऽऽकाराऽर्पणक्षमम्॥ इति।

तथाप्युक्तं स्यादर्थवेदनमिति। तस्मात्साकारज्ञानगोचरो ऽर्थ इति सौत्रान्तिकाः प्रपेदिरे।

तदिदमनुपपन्नम्। तथा हि। साकारं विज्ञानमर्थविषयमित्य-

यापादेश्चाशुद्धिरूपस्यचयो नाशस्तनुतारूपस्तस्मिन्सति सम्यक्ज्ञानस्याभिव्यक्तिर्दीप्तिर्यथा यथा साधनान्यनुष्ठीयन्ते तथा तथा ऽशुद्धिस्तनुत्वमापद्यते यथा यथा च चीयते तथा तथा तन्नयक्रमानुसारिणीज्ञानस्यापिदीप्तिर्वर्धते सा खल्वेषा विवृद्धिः प्रकर्षमनुभवत्याविवेकख्यातेः सत्वादिरूपगुणजीवेश्वररूपपुरुषयोः स्वरूपविज्ञानपर्यन्तमित्यर्थः दीप्तिश्चाचाश्रुतामतविशेषग्रहणं श्रवणमननाभ्यां वसामान्यत एव ज्ञानं भवति । एवं च जिज्ञासामात्रद्वारा यमनियमान्तर्गतसर्वकर्मणां ज्ञानहेतुत्वं जिज्ञासानन्तरं च कर्मत्याज्यमनुत्पन्नज्ञानेनापीति चिन्त्यम् अत एव कर्मणा सहिताज्ज्ञानात्सम्यग्योगो ऽभिजायते ज्ञानं च कर्मसहितं जायते दोषवर्जितमिति कौर्मे ज्ञानसाहित्येन कर्मानुष्ठानमुक्तं ॥ यद्यपि विषयान्तरसञ्चाराख्यप्रतिबन्धनिवृत्तिरूपतयासंप्रज्ञातोविज्ञानकारणं तथाप्यशुद्धिक्षयद्वारा योगाङ्गानुष्ठानस्यैव ज्ञानदीप्तिहेतुत्वं न योगस्येत्यङ्गपदोपादानं तच योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणं असदुत्पादानुभ्युपगमात्सत एव न वस्तुनो ऽतिशयहेतुः कारणमुच्यते एवं च सत्येवाशुद्धिर्वियोगाख्येनातिशयेन योगाङ्गानां कार्या यथापर शुच्छेद्यस्यविवेकख्यातेस्तु प्राप्तिकारणं वर्तमानावस्था विशिष्टायास्तस्याः कारणं उत्पत्तिप्रतिबन्धकनिवर्तनद्वारा यथाधर्मः सुखस्यनतुवैशेषिकादीनामिवोत्पत्ति कारणं अस्माकं निमित्तकारणानां प्रतिबन्धनिवृत्तिकारणत्वसिद्धान्तात् ॥ विवेकख्यात्यादेरुत्पत्तौ च चितमेव कारणं कारणानि च पूर्वाचार्यगणितानि नव उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः वियोगान्यत्वधृतयः कारणं नवधा स्मृतमिति ॥ तत्रोत्पत्तिकारणमुपादानकारणं यथा ज्ञानस्य मनःतद्धिज्ञानस्योत्पत्तिरूपातिशये कारणं १ स्थितिकारणं यथा मनसः पुरुषार्थता ॥ भोगापवर्गरूप-

पुरुषार्थसमूहो मनसः स्थितिरूपातिशये कारणं पुरुषार्थसंमाप्तौ मनसः स्वयमेव विलयात् । शरीरस्याहारश्च स्थितिकारणं । २ अभिव्यक्तिकारणं यथारूपस्यालोकः बुद्धिवृत्तिरूपाभिव्यक्तिरुपातिशयेनविशिष्टस्वरूपस्यालोकः कारणं तथा पौरुषेयबोधरूपाभिव्यक्तिरूपातिशयविशिष्टरूपस्य बुद्धिवृत्तिरूपं रूपज्ञानं कारणं ३ विकारकारणं यथा मनसो विषयान्तरं स्वगोचररागादिविकाररूपातिशयेन विशिष्टस्य कारणं यथा वाग्निः वाक्यस्य ४ प्रत्ययस्य प्रामाण्यनिश्चयस्य कारणं यथा शब्दादिना यत्पर्वतेऽग्निज्ञानं जातं तस्य प्रत्ययजनकं धूमज्ञानं आनुमानिकवह्निज्ञानं तु अभिव्यक्त्यैव संगृहीतं ५ प्राप्तिकारणं च योगाङ्गानुष्ठानं विवेकख्यातेः ६ वियोगकारणं तदेशाशुद्धेर्यथोपपादितं ॥ तथा हि कारणानां कार्यप्राप्तिस्वभावः तस्याः कुतश्चित्प्रतिबन्धोऽप्राप्तिः यथा निम्नोपसर्पणस्वभावानामपां प्रतिबन्धः सेतुना तथा बुद्धिसत्वं सुखप्रकाशशीलतयास्वभावतस्तज्जनकं । तमसाधर्मेण च प्रतिबद्धंयोगाङ्गानुष्ठानेन तदपगमेच तत्प्राप्नोति ७ निमित्तकारणमाचामाप्तिकारणे प्रवेशनीयं प्रतिबन्धकनिवृत्तिद्वाराकारणंचाप्तिकारणं ७ अन्यत्वकारणं यथा स्वर्णपिण्डस्य स्वर्णकारः कटककुण्डलादिरूपभेदकारणं यद्यप्यसौविकारकारणमपिस्वर्णपिण्डस्य कुण्डलादिरूपविकारकरणात् तथापि कटकविनाशपूर्वकं कुण्डलादीनामुत्पादनादन्यत्वकारणमप्युच्यते स्वर्णस्य सर्वविकारानुगतत्वेन तदन्यत्वकरणात्स्वर्णपिण्डस्येत्युक्तं कुण्डलं कटकं करोतीत्यादिप्रत्ययश्चाचमानं तथा एकजातीयस्यस्त्रीप्रत्ययस्यस्याकारपरिणतबुद्धिवृत्तेः मूढत्वादिधर्मैरन्यत्वे भिन्नत्वेऽविद्यादिचतुष्टयं कारणं तथा हि कर्तव्याकर्तव्यशून्यतारूपमोहजनकत्वे अविद्याकारणं दुःखजनकत्वे द्वेषः सुखजनकत्वे रागः रागद्वेषमोहशून्यतारूपे माध्यस्थे

तत्वज्ञानं कारणं ८ धृतिकारणं यथा आश्रयविषयाशरीरमिन्द्रियाणां इन्द्रियाणि च शरीरस्य योगक्षेमनिर्वाहकत्वेन धारकाणि एवं पृथिव्यादीनि महाभूतान्याधारतयाशरीराणां मनुष्यवरुणसूर्यगन्धर्वशशिलोकस्थानां धारकाणि । एवं महाभूतानि अन्योन्यं सर्वेषां सर्वाणि धारकाणि तद्यथा आकाशं वायोर्धारकं वात्या च छिद्राकाशस्य धारिकाछिद्रस्य तच तन्त्वत्वात् । एवं वायुस्तेजसो धारकः तेजश्चावरणमण्डान्तर्वर्तिवायूनां धरकमित्यादिक्रमेणोन्नेयं । तैर्य्यग्योनमानुषं दैवतानि च शरीराणि परस्परोपकारकत्वात्परस्परधारकाणि स्थितिहेतुर्हि पुरुषार्थाहारादिर्मनः शरीराद्यविभक्तः सन्तानि स्थापयति धृतिहेतुश्शरीरादिरिन्द्रियादीन्यनुप्रविश्यैव तानि धारयतीति तयोर्विशेषः इत्येवं नवैव कारणानि यथा योगमेतद्रूपैरेव कारणत्वैरविद्याकर्मजीवेश्वरादीनां सर्वकारणत्वप्रतिपादिकाः श्रुत्यादयोव्याख्येयाः । आधुनिकास्तु उत्पाद्यविकार्याप्यसंस्कार्यरूपेण चतुर्विधं कार्यमाहुस्तेषां नवानामत्रैवान्तर्भावः योगाङ्गानुष्ठानं तु द्विधैव कारणत्वं लभते अशुद्धेर्वियोगकारणत्वं विवेकख्यातेः प्राप्तिकारणत्वमिति ।

तत्र योगाङ्गान्याह ।

**यमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाधयोऽष्टावङ्गानि ॥ २९ ॥**

आद्यपादोक्तान्यन्तरङ्गाणि उत्तमाधिकारिकाणि अभ्यासवैराग्यश्रद्धाप्राणायामादीनि । एतत्पादादावुक्तानि च मध्यमाधिकारिकाणि तपः स्वाध्यायेश्वरप्रणिधानानि मध्यमसाधनानि च अत्यन्तबहिरङ्गैरनुक्तैः सह पिण्डीकृत्य योगज्ञानोभयसाधनतया मन्दाधिकारिणं प्रत्यत्रोच्यन्त इत्यपौनरुक्त्यं तत्र वैराग्यस्य नियमान्तर्गत-

सन्तोषे प्रवेशः श्रद्धादीनां च तपआदिषु परिकर्मणां च धारणादि चिके श्रवणमननयोश्च प्रमाणविषयेत्र ज्ञाने साक्षाद्धेतुत्वमित्याशयेनाशुद्धिक्षयादिद्वारकेषु ज्ञानसाधनेषु न ते गणिते इति बोध्यम् ।

तत्र यमानाह ।

**तत्राहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहा यमाः ॥ ३० ॥**

आश्रमविहितनित्यकर्माविरोधेन सर्वथा सर्वदा सर्वभूतानामनभिद्रोहो हिंसा शौचादिषु क्षुद्रजन्तुहिंसाया अपरिहार्यत्वात्तृतीयान्तं । तत्पापक्षालनाय च योगिनां प्राणायामादिकं नित्यत्वेन शास्त्रे उक्तं उत्तरे च यमनियमा अहिंसाप्रयोजनकत्वात् तदविरोधेनैवानुष्ठेयाः अत एव शास्त्रेषु यमनियमादयः सत्यादिभिरहिंसा सिध्यतीति प्रतिपादनाय ते प्रतिपाद्यन्ते । अहिंसानिर्मलीकरणाय च योगिभिस्तेनुष्ठीयन्ते । तदुक्तं स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सते तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति मोक्षधर्मेपि ।

यथा नागपदेन्यानि पदानि पदगामिनां ।
एवं सर्वमहिंसायां धर्मार्थमपि धीयते ॥

इति सत्यं यथा दृष्टं श्रुतमनुमितं तथा वाक् तथा तात्पर्ययुक्तं मनश्च । दर्शनादीनां प्रमात्वमपि विवक्षितं अज्ञाननिमित्तकपापान्तरवत् भ्रान्तिनिमित्तकासत्यस्यापि पापत्वात् । यदा च दृष्टार्थविपरीतार्थबोधने मनसस्तात्पर्यं तदा यथार्थेपि वागसत्यैव यथाऽश्वत्थामा हत इति युधिष्ठिरवाक्ये तत्र गजविषये वाक्यस्य सत्यत्वेपि मनसो न सत्यत्वं दृष्टविपरीतद्रोणपुत्रहननबोधने तात्पर्यात् अतो मनश्चेति यदि परत्र पुरुषे स्वबोधसंक्रान्तये स्वबोधसदृशबोधजननाय या वागुक्ता सा यदि न विपरीतार्थबोधनेच्छया

प्रयुक्तत्वरूपवञ्चितत्ववती नापि भ्रमेण प्रयुक्ता नापि अप्रसिद्धपदादि-भिर्बोधजननाक्षमा स्याल्लोकहिताय च स्यात्तदा सत्या स्वविनोदार्थेङ्गीतिः परस्यबोधाजननेऽपि नासत्यत्वमतः परचेत्यादि चतुर्थ्यन्तं । सर्वभूतोपकारार्थं ब्रह्मणा निर्मिता एषा वाक् न भूतोपघाताय भवति यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यान्न सत्या स्यात् पापकजनकत्वादतो लोकहितायेत्युक्तं यथा दस्युभिस्सार्थेगमनं पृष्टस्य सार्थगमनाभिधानं तेन हि पुण्यवत्प्रतीयमानेन पुण्यसदृशेन कष्टं तमो नरकमेव प्राप्नुयात् । तस्मात्परीक्ष्यसर्वभूतहितं सत्यं ब्रूयात् असत्यान्निवर्तेत । निवृत्तावपि भूतोपघातप्रसङ्गे तदपि न्न ब्रूयादिति तत्वं अस्तेयं स्तेयान्निवृत्तिः स्तेयं चाशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणं प्रतिग्रहव्यावृत्तयेऽशास्त्रपूर्वकमिति स्वीकरणं च भ्रमसाधारणं ममेतिबुद्धिमात्रं तन्निवृत्तिस्तत्रास्पृहारूपाऽस्तेयं । ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थसंयमः उपस्थविषये सर्वेन्द्रियोपरम इति यावत् मैथुनस्य स्मरणकीर्तनकेलिप्रेक्षणगुह्यभाषणसंकल्पाध्यवसायक्रियानिर्वृत्तिरूपाष्टाङ्गत्वात् प्रेक्षणं रागपूर्वकं दर्शनं अपरिग्रहः विषयाणामर्जनरक्षणक्षयसङ्गहिंसारूपदोषदर्शनादस्वीकरणम् दम्भाशक्त्यादिनिमित्तकस्वीकारवारणाय पञ्चम्यन्तं हिंसा चात्र दातॄणां प्रतिग्रहीत्रन्तराणां च द्रष्टव्या ।

यमानां विशेषमाह ।

**जातिदेशकालसमयानवच्छिन्नाः**
**सार्वभौमा महाव्रतं ॥ ३१ ॥**

तत्र अहिंसा जात्यवच्छिन्ना मत्स्यबन्धकस्य मत्स्येष्वेव नान्यत्र हिंसा जात्या मत्स्यत्वादिना परम्परयावच्छिन्ना मत्स्यादपति-

रिक्तस्याहिंसा। एवमुत्तरत्रापि परम्परयैवावच्छिन्नत्वं बोध्यं सैवदेशाव-च्छिन्ना न तीर्थे हनिष्यामीति सैव कालावच्छिन्ना न चतुर्दश्यां न पुण्ये-हनि हनिष्यामीति। एवं त्रिभिर्जात्याद्यवच्छेदैः परम्परया शून्यस्य पुरुषस्य देवब्राह्मणार्थे हनिष्यामि नान्यथेत्येवं संकेतावच्छिन्ना सम-यावच्छिन्ना। समयः सङ्केतः यथा वा क्षत्रियाणां युद्ध एव हिंसा नान्यत्रेति। एवं सत्यादीनामपि जात्याद्यवच्छिन्नत्वमूह्यं। एवमेभि-र्जात्यादिभिरनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः। एवं पालि-ताश्च ते सर्वभूमिषु जात्याद्युक्तसर्वविषयेषु सर्वथा विदिता अवि-दितव्यभिचाराः सार्वभौमाः सन्तो महाव्रतसंज्ञकाः संज्ञाफलं च प्रकृष्टयोगिनामनुष्ठानं। नन्वेवं वैधहिंसानामपि परित्यागे प्रत्यवायः उत्पन्नात्मजिज्ञासस्यान्तर्यागरूपनित्यकर्मानुष्ठानेनैवाप्रत्यवायात्।

बाह्यमाभ्यन्तरं चेति द्विविधं कर्म वैदिकं।
तयोरन्यतमत्कुर्यान्नित्यं कर्म यथा विधीति—

वसिष्ठोक्तेः,।

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परं तपेति।

गीतोक्तेश्च, भाष्यकृताऽग्रे वैधहिंसाया अपि पापहेतुत्वस्य वक्ष्यमाणत्वाच्चेति दिक्।

नियमानाह।

## शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥ ३२॥

शौचं स्थूलशरीरस्य मृज्जलादिजनितं मेध्यगोमूत्रयवाग्वादि-भक्षणोपवासादिरूपं तज्जन्यत्वाद् बाह्यं। चित्तस्य सत्वस्वभावस्य रागद्वेषादिरूपमलानां मैत्र्यादिना प्रक्षालनमाभ्यन्तरं सन्तोषः अत्या-

वश्यकप्राणयात्रानिर्वाहकसंनिहितसाधनादधिकस्यालिप्सा। तयोर्निर्द्वुषं द्वन्द्वसहिष्णुता द्वन्द्वं च बुभुक्षापिपासे। यद्यपि शीतोष्णादिवन्नानयोः परस्परं विरोधस्तथापि पारिभाषिकद्वन्द्वता बोध्या। तथा शीतोष्णे स्थानासने। स्थानमूर्ध्वावस्थानं आसनमुपवेशनं काष्ठमौनाकारमौने च काष्ठमौनमिङ्गितेनापि स्वाभिप्रायाप्रकाशनं। आकारमौनं त्ववचनमात्रं एतानि च शास्त्रोक्तव्रतेनैव सोढव्यानि न तु वृथा॥ व्रतानि चैषां यथायोगं कृच्छ्रचान्द्रायणसान्तपनादीनि॥ स्वाध्यायो मोक्षशास्त्राध्ययनं प्रणवजपो वा ईश्वरप्रणिधानं परमगुरौ तस्मिन्सर्वकर्मार्पणं तच्च व्याख्यातं तेष्वीश्वरप्रणिधानं मुख्यो नियमः निर्विघ्नपरमात्मयोगहेतुत्वात् तदुक्तं,।

शय्यासनस्थोऽथ पथि व्रजन्वा स्वस्थः परिक्षीणवितर्कजालः।
संसारबीजक्षयमीक्षमाणः स्यान्नित्ययुक्तो मृतभोगभागीति,

ईश्वरप्रणिधानजतदनुग्रहेण सदैव योगयुक्तः स्यादिति वाक्यार्थः स्वस्थः परमात्मनिष्ठः परमात्मार्पितकर्मणां मुख्यतस्तद्योगस्यैव फलत्वौचित्यात्॥ वक्ष्यमाणं वितर्कजालं वक्ष्यमाणप्रतिपक्षभावनां विनापि परिक्षीणं यस्य सः संसारबीजानां संस्कारादीनां क्षयमनुदिनमुपलभमानः अमृतेत्यादेर्जीवन्मुक्तसुखानुभवितेत्यर्थः एवं भूतो नित्ययुक्तः स्यादित्यर्थः न केवलमस्येश्वरार्पितकर्मण ऐश्वरयोग एव भवति किं तु तद्द्वारा पूर्णत्वादिना जीवतत्त्वसाक्षात्कारोऽपि तदुक्तं प्राक् "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चे"ति यज्ञदानदेवद्विजपूजाऽभयदानादेरच तपस्यन्तर्भावः अत्र देवब्राह्मणार्थहिंसाया अपि त्याज्यत्वोक्त्या प्रकृष्टयोगिनां बाह्यकर्माभावसिद्धिः नियमानां प्रतिनियतदेशकालाद्यवच्छिन्नतया सार्व-

भौमत्वासम्भवान्महाव्रतत्वं नोक्तं यमानां त्वभावरूपतया तदनवच्छिन्नत्वसम्भवः यमनियमयोर्यमानां निवृत्तिरूपत्वेन शक्यसंपादनत्वेन त एव परमहंसानामावश्यकाः नियमास्तु प्रवृत्तिरूपतया योगान्तरायत्वान्नावश्यकाः।

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचिदिति।

स्मृतेश्च ॥

एषामन्तरायैर्विघ्नप्राप्तावुपायमाह।

**वितर्कबाधने प्रतिपक्षभावनं ॥ ३३ ॥**

विपरीतास्तर्का विचारा येषु ते वितर्का हिंसादयः यथा हनिष्याम्यहमपकारिणमनृतं वक्ष्यामि द्रव्यमप्यन्यस्य स्वीकरिष्यामि दारेषु चास्य व्यवायी भविष्यामि परिग्रहेषु चास्य स्वामी भविष्यामीति। एवं त्यक्ष्याम्यहं शौचादिकमिति नियमविषये वितर्कः। एवमासनादिकं त्यक्ष्ये प्राणायामांस्त्यक्ष्ये इत्यादिरुत्तरविषयो वितर्कः। एवमुन्मार्गाभिमुखेन हिंसादिविषयेण वितर्कज्वरेणातिज्वलितेन बाध्यमानो योगी वितर्कप्रतिपक्षान् दुःखफलकत्वादीन्विभावयेत् तद्यथा घोरेषु संसाराङ्गारेषु पुनःपुनरावृत्त्या पापच्यमानेन मया शरणमुपागतः सर्वभूताभयप्रदानेन योगधर्मः स खल्वहं तन्त्यक्त्वा तान् दुःखदान् वितर्कान् हिंसादीन् पुनराददानस्तुल्यः श्ववृत्तेनेति। यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनरादातेति दुःखफलकत्वचिन्तनेऽस्य तात्पर्यम्।

इदानीं वितर्कान् तत्प्रतिपक्षान् तच्चिन्तनं चाह॥

**वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनं ॥ ३४ ॥**

हिंसादय इति वितर्काणां स्वरूपकथनं तत्र हिंसा कृता कारिता परैः क्रियमाणा साधुसाध्वित्येवमनुमोदितेति त्रिधा। एकैका पुनस्त्रिधा मांसचर्मादिविषयेण लोभेन अपकृतमनेनेत्येवं क्रोधेन, यज्ञाद्यर्थं हिंसया निर्दोषो धर्मो भविष्यतीत्येवं मोहेन, चेति। मृदुमध्याधिमात्रत्वं हिंसादिविशेषणं सूत्रे तथा त्रिलोभादिमृदुत्वादिनैव तेषां तत्त्वं लोभक्रोधमोहाश्च त्रिविधाः मृदुमध्याधिमात्रा इत्येवं सप्तविंशतिर्भेदा हिंसायाः सूत्रोक्ताः पूर्वपादोक्तन्यायेनान्येपि भवन्ति मृदुमृदुर्मध्यमृदुस्तीव्रमृदुरिति मृदुस्त्रिधा। एवं मध्याधिमात्रावपीत्येवमेकाशीतिभेदाः तीव्रत्वमतीव्रतीव्रमात्रत्वं। सा पुनर्मत्स्यानामेवेत्येवं नियमेनैकत्र दिवसे स्थावरस्य वा जङ्गमस्य वान्यतरस्यैव हिंसेत्येवं विकल्पेन स्थावरजङ्गमयोरुभयोरपीत्येवं समुच्चयेनेत्येवं प्राणभृतां हिंसकानां हिंस्यानां चानन्तत्वान्नियमादीनामनन्तप्रकारत्वात्तैरसंख्येया भवति। एवं हिंसायामिवानृतादिष्वपि कृताकारितादिभेदा योजनीयाः ते च दुःखं चाज्ञानं मोहश्च तावनन्तं फलं येषां तादृशा इति प्रतिपक्षभावनं दुःखादिफलकत्वं प्रतिपक्षः। ननु कथं हिंसादीनां तत्फलकत्वमिति चेत् शृणु। तत्राधर्मतस्तमःसमुद्रेके सति हिंसकः प्रथमं वध्यवीर्यं बलान्नियमयति सङ्कोचयति शस्त्रनियोजनादिना ततः शस्त्रादिनिपातेन दुःखयति ततो जीवितान्मोचयतीति त्रिधा हिंसा ततस्त्रिप्रकारं दुःखं हन्ता प्राप्नोति तथा हि परस्य वीर्याक्षेपादस्य हन्तुरपि चेतनाचेतनमुपकरणं स्त्रीपुत्रधनादिकं क्षीणवीर्यं कार्याक्षमं भवति तथा परस्य शस्त्रपातादिना, दुःखोत्पादाद्धन्तापि नरकतिर्यक्प्रेतादिषु पाशशस्त्रादिना दुःखमनुभवति तथा प्राणवियोजनात् कर्ताऽपि प्रतिक्षणं

जीवितात्यये संमोहमयीं रोगमयीं मरणावस्थामापन्नो मरणमिच्छन्नपि दुःखरूपविपाकस्य प्रतिनियतजन्मादिभोग्यत्वात्तदलभमानः कथं कथमपि जीवति किं च ईश्वरांशजीवे द्वेषेणेश्वरस्याप्यस्मिंद्वेषो भवति पितुरिव दुष्टे पुत्रे तदुक्तं ।

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिष्विति ।

यदि तु पुण्यकर्मरूपस्य सुखबीजस्य चित्तभूमावावापे तेन सहावापं गता हिंसा भवेद् यथा धान्यबीजवापेन सह तृणबीजावापः तदा तत्र सुखप्राप्तावप्यल्पायुर्भवेत् । नन्वहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यस्तस्माद्यज्ञे वधो ऽवध इत्यादिश्रुतिस्मृतिभिर्वैधहिंसातिरिक्तहिंसाया एव प्रतिषेधात् कथं वैधहिंसाया अनिष्टसाधनत्वमिति चेन्न । विध्यर्थप्रेरणयाऽनिष्टाननुबन्धित्वानाक्षेपाद् राजत्वादिप्रापककर्मणां गर्भवासजन्माद्यनर्थहेतुतायाः सर्वसंमतत्वात् । नापि बलवदनिष्टाननुबन्धित्वस्य । पुरुषभेदेन बलवत्वस्याप्यवस्थितत्वात् । सर्वमेव दुःखं विवेकिन इत्युक्तेः किं च तदाक्षेपेऽपि यज्ञादिनान्तरीयकहिंसायाः सामान्यतोऽनिष्टजनकत्वश्रुत्यविरोधः अपि चावैधहिंसात्यागस्य स्वर्गाऽदिसाधनताबोधकविधिभिर्वैधहिंसायाः स्वर्गादिसाधनताबोधकविधिभिश्च सह हिंसायामृण्त्वाद्यनिष्टहेतुताबोधकश्रुतिस्मृतीनां नास्त्येव विरोधो येन तासां सङ्कोचः कल्प्येत अतो युक्तं पुण्यावापगतानां हिंसानामनिष्टहेतुत्वं पुण्यावापगताहिंसास्वपि युधिष्ठिरादीनां प्रायश्चित्तश्रवणादिदमेव युक्तं । वधोऽवध इत्यादिकं तु बधाभासत्तापरमिति दिक् । एवमनृतादिष्वपि दुःखाज्ञानफलकत्वमसम्भवि मरणादिकं विहाय योज्यं एवं वितर्काणां नियतमेवमनिष्टं कार्यं भावयन् योगीवितर्केषु न मनो दद्यात् प्रतिपक्षभावनाहेतोर्हातुर्महावितर्का यदास्य योगिनो विष-

यत्सान्निध्येप्यप्रसन्नस्वभावा भवन्ति तदा वितर्कहानिकृतमैश्वर्यसिद्धसूचकं यमादिनिष्पत्तिसूचकं भवति तत्तन्निष्पत्त्यवधारणे च तत्तद् भूमिषु यत्नं विहाय भूमिकान्तरे योगी यत्नमातिष्ठेदित्येतत्प्रतिपादनाय ।

तत्सिद्धीराह ।

**अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः ॥ ३५ ॥**

प्रतिष्ठास्थैर्ये उक्तवितर्कैरसंस्पर्श इति यावत् । तस्यां सत्यां तत्संनिधिस्थानां सर्वप्राणिनां सर्पनकुलादीनामन्योन्यं वैरत्यागो भवतीत्यर्थः ।

**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं ॥ ३६ ॥**

सर्वप्राणिनां भवतीति शेषः क्रिया यज्ञादिको धर्मस्तत्फलं स्वर्गादि तयोराश्रयत्वं सर्वप्राणिनां सत्यप्रतिष्ठस्य वचनाद्भवतीत्यर्थः धार्मिको भूया इति वचनात्संबोध्यधार्मिको भवति । स्वर्गं प्राप्नुहीतिवचनात्स्वर्गं प्राप्नोति । एवं प्रकारेणास्य वागमोघा सत्या भवति मनश्च तथा भवतीति भावः ।

**अस्तेयप्रतिष्ठायां रत्नोपस्थानं ॥ ३७ ॥**

सर्वदिग्भ्यो रत्नोपस्थानं भवतीत्यर्थः ।

**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८ ॥**

वीर्यं शक्तिविशेषः यस्य शक्तिविशेषस्यालाभात् प्रतीघातवर्जितान् गुणान् ज्ञानक्रियाशक्तिं वर्धयति तथासिद्धश्च स्वयं ज्ञानी भूत्वा शिष्येषु ज्ञानाधाने समर्थश्च भवतीत्यर्थः ।

**अपरिग्रहस्थैर्ये जन्मकथन्तासंबोधः ॥ ३९ ॥**

अपूर्वेण देहेन्द्रियादिसंघातेन ज्ञानहेतुः सम्बन्धो जन्म तस्य कथंता किंप्रकारता तयोः संबोधः साक्षात्कारः कोऽहमासं

कथमहमासमित्यतीतजन्मनः स्वरूपप्रकारयोर्जिज्ञासा किं स्विदिदं कथं वेदमिति वर्त्तमानस्य तयोः सा के वा भविष्यामः कथं वा भविष्याम इति भाविनस्तयोः सा इत्येवं पूर्वापरान्तमध्येषु भूतभविष्यद्वर्तमानेषु जन्मसु अस्य योगिनो जिज्ञासोत्पन्नमात्रैव स्वरूपेण स्वविषयेण ज्ञानेनोपावर्त्तते विशिष्टा भवति नास्त्यत्र साधनापेक्षेत्यर्थः ।

अथ नियमसिद्धीराह ।

**शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥**

शौचात् शौचस्थैर्यात् जुगुप्सा कुत्सा अशुचित्वदोषस्याशेषतः साक्षात्कार इति यावत् । स्वाङ्गे पूर्वमल्पजुगुप्सायां मृज्जलाभ्यां मेध्याशनेन च शौचं कुर्वाणो दिने दिनेऽधिककायदोषदर्शी कायेऽप्रीतिमान्भवन्ति । किं च कायस्वभावज्ञो मज्जलादिभिः । क्षालयन्नपि तच्छुद्धिमपश्यन् तमपि कायं जिहासुः परकायैरत्यन्तमेवाप्रयतैः सुतरां न संसृज्यत इत्यर्थः ।

अन्तःशौचस्य सिद्धिमाह ।

**सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शन योग्यत्वानि च ॥ ४१ ॥**

भवन्तीति शेषः शुचेः क्षालितमलस्य बुद्धिसत्वस्य चित्तस्यादौ सत्वशुद्धिः सत्वोद्रेको भवति । ततः सौमनस्यं प्रीतिः स्वत एवानंदो जायते । ततोऽविक्षेपादेकाग्र्यं तत इन्द्रियजयस्तत आत्मदर्शनयोग्यत्वं भवतीत्यर्थः ।

**सन्तोषादनुत्तमसुखलाभः ॥ ४२ ॥**

सन्तोषस्तृष्णाक्षयस्तत्स्थैर्यात् नास्त्युत्तमं सुखं यस्मात्तादृशस्य सुखस्य लाभो भवतीत्यर्थः तृष्णारूपप्रतिबन्धापगमे चित्तस्य स्वाभा-

विकृसत्वाधिक्यनिमित्तिका सुखस्वभावत्ता स्वत एवाविर्भवति न तु तत्सुखे विषयापेक्षेति तन्निर्विषयं शान्तिसुखमात्मसुखमित्युच्यते । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण । आनन्दः श्रोत्रियस्य चाकामहतस्येति,, श्रुतेः । ईश्वरस्य पूर्णकामत्वात् श्रोत्रियस्य च ज्ञानेन कामक्षयादुभयोरपि वैतृष्णयस्य तुल्यतया समानं सुखमिति श्रुत्याशयः बुद्धेः सत्वात्मकतया सुखस्वभावतया जीवेऽपि नित्यं सुखमिदमेव गीयते । स्वाभाविकस्य यावद्द्रव्यभावित्वात् तमसापिहितत्वाच्च न सदाभिव्यक्तिः सन्तोषाभिव्यक्तसुखस्यानुत्तमत्वे स्मृतिः ।

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति ॥

कामसुखं विषयजं दिव्यं सङ्कल्पमात्रोत्थं तृष्णाक्षयसुखं तृष्णाक्षयाभिव्यक्तसुखं विदेहकैवल्ये सुखवाक्यानि दुःखनिवृत्त्या गौणानि । ईश्वरेणाविभागात्तत्सुखसाक्षितापराणीवेति दिक् ।

**कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥**

उत्पद्यमानमेव तप अधर्मादितामसगुणरूपाशुद्धिरूपाणि मायावरणमलं दूरीकरोति तदावरणमलापगमाच्च कायसिद्धिरणिमाद्या इन्द्रियसिद्धिर्दूराच्छ्रवणाद्येति अर्थः ।

**स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥ ४४ ॥**

सम्प्रयोगो दर्शनं द्रष्टुमिच्छा विषया ऋषयो देवाः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य वर्तन्त इति ।

**समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥**

ईश्वरेर्पितसर्वव्यापारस्य समाधेर्योगस्य सिद्धिर्निष्पत्तिर्यया सर्वं देशान्तरदेहान्तरकालान्तरस्थमपि ईप्सितं ध्येयं यथार्थमेव जानाति गुरुवाक्यादितः श्रवणमननयोरविपर्ययो भवति ततोऽस्य

कथमहमासमित्यतीतजन्मनः स्वरूपप्रकारयोर्जिज्ञासा किं स्विदिदं कथं वेदमिति वर्तमानस्य तयोः सा के वा भविष्यामः कथं वा भविष्याम इति भाविनस्तयोः सा इत्येवं पूर्वापरान्तमध्येषु भूत भविष्यद्वर्तमानेषु जन्मसु अस्य योगिनो जिज्ञासोत्पन्नमात्रैव स्वरूपेण स्वविषयेण ज्ञानेनोपावर्त्तते विशिष्टा भवति नास्त्यत्र साधनापेक्षेत्यर्थः।

अथ नियमसिद्धीराह।

**शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः॥ ४०॥**

शौचात् शौचस्थैर्यात् जुगुप्सा कुत्सा अशुचित्वदोषस्याशेषतः साक्षात्कार इति यावत्। स्वाङ्गे पूर्वमल्पजुगुप्सायां मृज्जलाभ्यां मेध्याशनेन च शौचं कुर्वाणो दिने दिनेऽधिककायदोषदर्शी कायेऽप्रीतिमान्भवन्ति। किं च कायस्वभावज्ञो मज्जनादिभिः क्षालयन्नपि तच्छुद्धिमपश्यन् तमपि कायं जिहासुः परकायैरत्यन्तमेवाप्रयतैः सुतरां न संसृज्यत इत्यर्थः।

अन्तःशौचस्य सिद्धिमाह।

**सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शन योग्यत्वानि च॥ ४१॥**

भवन्तीति शेषः शुचेः क्षालितमलस्य बुद्धिसत्वस्य चित्तस्यादौ सत्वशुद्धिः सत्वोद्रेको भवति। ततः सौमनस्यं प्रीतिः स्वत एवानंदो जायते। ततोऽविक्षेपादेकाग्र्यं तत इन्द्रियजयस्तत आत्मदर्शनयोग्यत्वं भवतीत्यर्थः।

**सन्तोषादनुत्तमसुखलाभः॥ ४२॥**

सन्तोषस्तृष्णाक्षयस्तत्स्थैर्यात् नास्त्युत्तमं सुखं यस्मात्तादृशस्य सुखस्य लाभो भवतीत्यर्थः तृष्णारूपप्रतिबन्धापगमे चित्तस्य स्वाभा-

विकसत्वाधिक्यनिमित्तिका सुखस्वभावता स्वत एवाविर्भवति न तु तत्सुखे विषयापेक्षेति तन्निर्विषयं शान्तिसुखमात्मसुखमित्युच्यते। ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण । आनन्दः श्रोत्रियस्य चाकामहतस्येति,, श्रुतेः । ईश्वरस्य पूर्णकामत्वात् श्रोत्रियस्य च ज्ञानेन कामक्षयादुभयोरपि वैतृष्ण्यस्य तुल्यतया समानं सुखमिति श्रुत्याशयः बुद्धेः सत्वात्मकतया सुखस्वभावतया जीवेऽपि नित्यं सुखमिदमेव गीयते । स्वाभाविकस्य यावद्द्रव्यभावित्वात् तमसापिहितत्वाच्च न सदाभिव्यक्तिः सन्तोषाभिव्यक्तसुखस्यानुत्तमत्वे स्मृतिः ।

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति ॥

कामसुखं विषयजं दिव्यं सङ्कल्पमात्रोत्थं तृष्णाक्षयसुखं तृष्णाक्षयाभिव्यक्तसुखं विदेहकैवल्ये सुखवाक्यानि दुःखनिवृत्या गौणानि । ईश्वरेणाविभागात्तत्सुखसाचितापराणिवेति दिक् ।

**कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥**

उत्पद्यमानमेव तप अधर्मादितामसगुणरूपाशुद्धिरूपाणि मावरणमलं दूरीकरोति तदावरणमलापगमाच्च कायसिद्धिरणिमाद्या इन्द्रियसिद्धिर्दूराच्छ्रवणादेति अर्थः ।

**स्वाध्यायादिष्टदेवतासम्प्रयोगः ॥ ४४ ॥**

सम्प्रयोगो दर्शनं द्रष्टुमिच्छा विषया ऋषयो देवाः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य वर्तन्त इति ।

**समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥**

ईश्वरार्पितसर्वव्यापारस्य समाधेर्योगस्य सिद्धिर्निष्पत्तिर्यया सर्वं देशान्तरदेहान्तरकालान्तरस्थमपि ईप्सितं ध्येयं यथार्थमेव जानाति गुरुवाक्यादितः श्रवणमननयोरविपर्ययो भवति ततोऽस्य

योगिनः प्रज्ञा समाधिकालेऽपि यथार्थमेव जानाति। न चैवमीश्वरप्रणिधानादेव योगनिष्पत्तावितराङ्गवैयर्थ्यं अन्येषामेतत्सम्पादनद्वारा योगाङ्गत्वाद् अत ईश्वरप्रणिधानस्य मुख्यतो योगसाधकत्त्वं बोध्यं।

अथासनमाह।

स्थिरसुखमासनम् ॥ ४६ ॥

स्थिरं निश्चलं सुखकरं च यत्तदासनं आस्यतेनेन प्रकारेणेत्यासनं तच्चयपासनं अङ्गुष्ठोसन्निवध्नीयात्। हस्ताभ्यां व्युत्क्रमेण तु।

ऊर्वोरुपरि विप्रेन्द्रं कृत्वा पादतले उभे इति।
एकपादमथैकस्मिन् विन्यस्योरौ च संस्थितः ॥
इतरस्मिंस्तथा पादं वीरासनमुदाहृतं।
अस्यैवार्धमर्धासनमुच्यते ॥ २ ॥
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्।
पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलः ॥
भद्रासनं भवेदेतत्सर्वव्याधिविषापहं ॥ ३ ॥
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते ॥

दण्डासनं उपविश्य श्लिष्टाङ्गुलिकौ श्लिष्टगुल्फौ भूमिश्लिष्टजघोरुपादौ प्रसार्य दंडवच्छयनं। सोपाश्रयं योगपदयोगेनोपवेशनपूर्वकं जानुप्रसारितबाहोः शयनं क्रौञ्चनिषदनोष्ट्रनिषदने तेषामुपविष्टानां संस्थानदर्शनात्प्रत्येतव्येजान्वोरुपरि हस्तौ कृत्वा कायशिरोग्रीवाणामवक्रभावेनावस्थानं समसंस्थानं। स्थिरसुखं च सूत्रोक्तं यथासुखमिति तदर्थः यावत्यो जीवजातयस्तेषां यादृशान्युपवेशनानि तावन्त्यासनानीति संक्षेपः।

आसनस्थैर्योपायमाह ।

**प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥**

आसनस्थैर्यं भवतीति शेषः प्रयत्नोपरमे सति कंपरूपाङ्गजेजपाभावात् स्थिरं भवत्यासनं । बहुव्यापारोत्तरं क्रियमाणमासनमंगकंपनान्न स्थिरं बहुव्यापारोत्तरमपि अनंते पृथिवीधारिणि स्थिरे शेषनागे समापन्नं तद्धारणया तदात्मतापन्नं चित्तमासनस्थैर्यं निष्पादयति तच्च तदनुग्रहात्सजातीयभावनाददृष्टवशाद्वेत्यन्यदेतत् ।

आसनप्रतिष्ठायां सिद्धिमाह ।

**ततो द्वंद्वानभिघातः ॥ ४८ ॥**

शीतोष्णादिभिर्द्वन्द्वैरासनजयान्नाभिभूयते ।

क्रमप्राप्तं प्राणायाममाह ॥

**तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥**

सत्यासने बाह्यस्य वायोराचमनमन्तः प्रवेशः श्वासः कोष्ठ्यस्य वायोर्निःसरणं प्रश्वासस्तयोर्गतिविच्छेदः प्राणायाम इत्यर्थः स्वाभाविकश्वासप्रश्वासयोरभाव इति यावत् स च रेचकपूरककुम्भकेषु सर्वेष्वेवानुगतः तत्र प्रथमभूमिकायां त्रयाणां पौर्वापर्येण सहानुष्ठानं अत एव त्रिभिर्मिलित्वा एकः प्राणायाम इत्युक्तं ।

प्राणायामस्तु विज्ञेयो रेचकपूरककुम्भकैरिति ।

पश्चात् ।

रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणं ।

प्राणायामोऽयमित्युक्तः सर्वैः केवलकुम्भक ।

इत्युक्तः केवलकुम्भकरूपोऽपि स इति बोध्यः ।

तस्यावान्तरभेदानाह ।

**बाह्याभ्यन्तरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥**

यत्र गतिविच्छेदरूपे प्राणायामे प्रश्वासेन रेचनेन यो गत्यभावः स बाह्यवृत्तिः प्राणायामो रेचको नाम । यत्र श्वासेन पूरकेण गत्यभावः स आभ्यन्तरवृत्तिः प्राणायामः पूरकनामा यत्रोभयोः श्वासप्रश्वासयोरभ्यासनिरपेक्षात्सकृत्प्रयत्नादभावः स स्तंभवृत्तिः कुम्भकनामा । शुद्धकुम्भकरूपस्य चतुर्थप्राणायामस्य व्यावृत्तये सकृत्प्रयत्नादित्युक्तम् कुम्भके यथा तप्ते उपले न्यस्तं जलं सर्वतः संकोचमापद्यते तथा बाह्याभ्यन्तरयोर्द्वयोरपि युगपत् गत्यभावेन संकोचरूपस्तम्भो भवति इत्येवंविधोऽप्यसौ देशेन परिदृष्टः एतावता देशेन रेचकादिः कर्तव्य इत्येवं संधारितः तद्यथा नासाग्रात्प्रादेशवद्वादशांगुलहस्तादिपरिमितः बाह्यदेशो रेचकस्य विषयः स चेषीकातूलादिक्रियया निश्चेयः पूरकस्य चापादतलमस्तकमाभ्यन्तरो विषयः स च । पिपीलिकास्पर्शसदृशस्पर्शेन निश्चेयः कुम्भकस्य तु रेचकपूरकयोर्बाह्याभ्यन्तरदेशौ समुच्चितौ विषयः उभयत्रैव प्राणस्य विलयात् । स च तूलस्य क्रियायां उक्तस्पर्शस्य वानुपलब्ध्या निश्चेयः तथा कालेन परिदृष्टः क्षणानामियत्तावधारणेनावच्छिन्नः एतावद्भिः क्षणै रेचकादिः कार्य इत्येवं नियमितः निमेषावच्छिन्नकालस्य चतुर्थो भागः क्षणः तथा संख्यापरिदृष्टः मात्राणां द्वादशादिसंख्याभिरवधारितः । यद्यपि संख्याभिरपि कालनियम एव तथापि प्रकारभेदाद्भेदः यत्र हि शंखध्वन्यादिना कालनियमः क्रियते स कालपरिदृष्टः यत्र वक्ष्यमाणमात्रासंख्याभिः कालनियमः क्रियते स संख्यापरिदृष्ट इति तत्र मात्रा निमेषोन्मेषावच्छिन्नः कालः लघ्वक्षरावच्छिन्नो वा स्वजानुमण्डलं त्रिः परामृश्य छोटिकावच्छिन्नो वा । श्वासक्रियावच्छिन्नो वा प्रणवोच्चार-

वागादयस्सर्वे प्राणाः प्रत्येकं श्रेष्ठतामात्मनो मन्यमाना-स्तन्निर्धारयिषया प्रजापतिमुपजग्मुः । स च तानुवाच "यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरमिव भवति सयुष्माकं मध्ये श्रेष्ठ" इति । तस्मिन्प्रजापतावेवमुक्तवति वागादि-षूत्क्रान्तेष्वपि मूकादिभावं शरीरं स्वस्थमस्थात् । मुख्य-प्राणस्योच्चिक्रमिषायां तु वागादीनां व्याकुलत्वात्तान्प्रति प्राण उवाच "मा मोहमापद्यथ यतोऽहमेवैतत्करोमि" । किं तत् । पञ्चधा प्राणापानादिभेदेनात्मानं विभज्यैतद्बा-णं शरीरम् । वाति गच्छतीति बानं बानमेव बाणमस्थिरं शरीरमिति यावत् । तदवष्टभ्य विधारयामीति श्रवणाद्दे-हधारणं प्राणलिङ्गमेव । अर्थतोऽनुक्रान्तश्रुतिस्तु "मा मोहमापद्यथाहमेवैतत्पञ्चधाऽऽत्मानं विभज्यैतद्बाणमवष्ट-भ्य विधारयामी"ति । प्राणवायोः प्रज्ञात्मत्वं कथमिति चेत्, ज्ञानेन्द्रियाश्रयत्वादिति ब्रूमः । तस्मादुपक्रमादिप-र्यालोचनया ब्रह्मरूपैकवाक्यार्थप्रतीतावपि तस्याजीव मुख्यप्राणरूपपदार्थप्रतीतिजन्यत्वेन गुणत्वात् पदार्थप्र-तीतेश्च तज्जनकतया प्रधानत्वादेकवाक्यार्थप्रतीतिमपोह्य वाक्यभेद एव न्याय्य इति जीवमुख्यप्राणब्रह्मणां त्रया-णामुपास्यानां प्रत्येकं स्वातन्त्र्येण वाक्यार्थत्वमिति त्रीणि वाक्यानि नैकं ब्रह्मवाक्यमिति चेन्न । उपासात्रैविध्यात्त्री-ण्युपासनानि प्रसज्येरन्नित्यर्थः । उपक्रमोपसंहारा-भ्यां ब्रह्मपरत्वेनैकवाक्यत्वं सम्भवति । वाक्यभेदो न युक्तः । न च पदार्थप्रतीतेर्मुख्यत्वं, तस्या वाक्यार्थप्रतीति शेषत्वेन तस्या एव प्रधानत्वात् । न हि जनकत्वमात्रेणैव प्राधान्यं युक्तं, सन्निपत्योपकारकाणामपि प्रधानताऽऽप-त्तेः । "अत एव प्राण" इत्यत्रान्यत्र ब्रह्मलिङ्गवशात्प्रा-णशब्दस्य ब्रह्मणि प्रवृत्तेराश्रितत्वाच्च, इहापि हिततमोप-

न्यासादिब्रह्मलिङ्गयोगाद्ब्रह्मण एवायमुपदेश इति । यत्तु जीवादिलिङ्गमस्तीति तत्परत्वमिति तन्न, प्राणव्यापारस्यापि परमेश्वरायत्तत्वेन देहधारणस्यापि ब्रह्मण्युपचरितुं शक्यत्वेनानन्यथासिद्धप्राणवार्योर्लिङ्गाभावात् । तथा च श्रुतिः "न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिता"विति प्राणादिव्यापारस्येश्वरायत्तत्वमाह । नापि "न वाचं विजिज्ञासीते"त्यादिजीवलिङ्गविरोधः । जीवस्य ब्रह्मानन्यत्वेन सर्वोपाधिपरित्यागेन जीवस्य स्वरूपं ब्रह्मदर्शयितुं "न वाचं विजिज्ञासीते"त्यादि प्रत्यगात्माभिमुखीकरणार्थं उपदेशो न विरुध्यते । "यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धी"ति श्रुत्यन्तरं वागादिव्यापृतस्य वक्तुर्ब्रह्मत्वं दर्शयति । तस्माद्ब्रह्मपरमेवेदं वाक्यं न प्राणादित्रितयपरम् । एकदेशिनस्तु "नोपासात्रैविध्यादाश्रितत्वादिह तद्योगा" दित्यस्यार्थान्तरमाचक्षते । तथा हि । न ब्रह्मवाक्ये जीवमुख्यप्राणलिङ्गयोर्विरोधः । कुतः । उपासनात्रैविध्यात् । जीवधर्मेण प्राणधर्मेण ब्रह्मधर्मेण च सहितस्य त्रिविधस्योपासनस्यैकस्य विवक्षितत्वादित्यर्थः । अतो न वाक्यभेद इति । तत्र "आयुरमृत"मिति, "उपासो वायुः प्राण"इति, "इदं शरीरं परिगृह्योत्थापयती"ति, "तस्मादेतमेवोक्थमुपासीते"ति प्राणधर्मः । "अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्याम"इत्युपक्रम्य "वागेवास्या एकमङ्गमदूदहत्तस्यै नाम परस्तात्प्रतिविहिता भूतमात्राप्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोती"त्यादिजीवधर्मः । "ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूत-

मात्रा न स्युर्न प्रज्ञामात्रास्स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्रास्स्युर्न ह्यन्यतरतो रूपं किञ्चन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पितास्स एष प्राण एव प्रज्ञात्मे''त्यादि ब्रह्मधर्मः । एतदर्थस्तु । ''प्राणो हि भूतानामायु''रिति श्रुत्यन्तरेण प्राणस्यायुष्ट्वं सिद्धं जीवनस्य तदधीनत्वात् । तस्मात्प्राणस्यैव देहाद्युत्थापकत्वाद्देहादिकमुत्थापयतीत्युक्थं प्राणः । एवमायुष्ट्वामृतत्वोक्थत्वं प्राणधर्म इत्यर्थः । ''सहवासः सहोत्क्रान्तिश्च''त्युक्त्यानन्तर्यं ''मथ''शब्दार्थः । अस्या जीवाख्यप्रज्ञायास्सम्बन्धीनि भूत्वा सर्वाणि भूतानि तद्दृश्यत्वेन कल्पितानि वस्तुतो यथैकं भवन्ति तथा तद्वस्तु व्याख्यास्याम''इत्युपक्रम्योक्तं ''वागेवे''ति । बुद्धेस्साभासायाः स्वरूपतोऽसाध्यत्वेऽपि विषयत्वरूपपूर्णशरीरमिन्द्रियसाध्यम् । तत्र नामप्रपञ्चविषयित्वमर्धशरीरं बुद्धेरहङ्कारलक्षणायाः । तथा रूपप्रपञ्चविषयित्वमर्धशरीरम् । तथा च कर्मेन्द्रियेषु मध्ये वागेवास्याः प्रज्ञाया देहार्धमेकमङ्गमदूदुहद्बुद्धेश्चितवती पूरयामासेत्यर्थः । नामात्मकप्रपञ्चे वाग्द्वारा प्रविष्टा बुद्धिर्नामप्रपञ्चविषयित्वलक्षणमर्धशरीरमाप्नोतीति यावत् । तस्याः प्रज्ञायाः पुन''र्नाम''किल ''परस्ता''दपरभागे रूपप्रपञ्चविषयित्वलक्षणेऽर्धशरीरे चक्षुरादिना प्रतिविहिता समुपस्थापिता भूतमात्रा शब्दरूपाद्यर्थरूपा कारणं भवतीत्यर्थः । चक्षुरादिना प्रकाशितोऽर्थप्रपञ्चो बुद्धेरितरभागं रूपप्रपञ्चविषयित्वलक्षणं पूरयामासेति यावत् । एवं वागिन्द्रियेणार्थप्रपञ्चेन च जीवाख्यप्रज्ञापूर्णविषयित्वलक्षणं शरीरं प्राप्य दृष्टा भवतीति

सिद्धम् । तदुपहितचैतन्यद्वारा स्वरूपे द्रष्टृत्वाध्यासमाह "प्रज्ञये"ति । तया द्वारा वाचं करणं प्रतिचिदात्माऽहं वक्तेत्यध्यासमनुभूय वाचा करणेन सर्वाणिनामानि वक्तव्यत्वेनाऽऽप्नोति, चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टृत्वमनुभवतीत्यर्थः। सर्वभूतविषयिकत्वमात्मनि द्रष्टृत्वादिसम्पादकत्वं च बुद्धेर्धर्म इति फलम् । "चक्षुरेवास्या" इत्यादिपर्यायान्तरार्थोऽपि संगृहीतः । सर्वाधारत्वानन्दत्वादिर्ब्रह्मधर्म इत्याह "ता वा" इति । भूतानि पृथिव्यादीनि पञ्च, मात्राश्च शब्दादयः पञ्च, एता दश भूतमात्राः, "अधिप्रज्ञं" प्रज्ञा इन्द्रियाणि तदुत्थज्ञानानि वाऽधिकृत्य प्रवर्तन्ते । दश प्रज्ञामात्राः पञ्चेन्द्रियाणि तदुत्थबुद्धयश्चा"धिभूतं" भूतानि पृथिव्यादीनि शब्दादीनि चाधिकृत्य प्रवर्तन्ते । एवं भूतमात्राणां दशानां ग्राह्यत्वेन प्रज्ञामात्रात्मकग्राहकापेक्षत्वमुक्तम् । प्रज्ञामात्राणां दशानां ग्राहकाणां ग्राह्यभूतमात्रापेक्षत्वं चोक्तम् । इदमेव मिथःसापेक्षत्वं ग्राह्यग्राहकयोः साधयति "यद्धी"ति । तदेव स्पष्टयति "न ह्यो"ति । ग्राह्याद्ग्राह्यं न सिध्यति, किन्तु ग्राहकादेव । एवं ग्राह्यं विना ग्राहकं न निर्वहतीत्यन्योन्यसापेक्षत्वमित्यर्थः । इदं ग्राह्यग्राहकद्वयं वस्तुतो न भिन्नमित्याह "नो" इति । किं त्वेकस्मिन्नात्मन्यारोपितमिति शेषः । "तद्यथे"त्यादि कृतव्याख्यानम् । तस्माद्ब्रह्मण एव धर्मत्रयेणोपासनमेकं विवक्षितम् । अन्यत्राऽपि "मनोमयः प्राणशरीर"इत्यादावुपाधिधर्मेण ब्रह्मण उपासनस्याऽऽश्रितत्वादिहाऽपि तद्युज्यते । तस्माद्ब्रह्मवाक्यमिति । इदमेकदेशिमतमयुक्तम् । तथा हि । किमत्रोपासात्रयविशिष्टं ब्रह्म विधेयं, उत ब्रह्मविशिष्टोपासात्रयं, किं

वा ब्रह्मानुवादेन तदाश्रितोपासात्रयम् । नाद्यो ब्रह्मणः सिद्धत्वेन विध्ययोगात् । नाऽपि द्वितीयो वाक्यान्तरेण ब्रह्मणो ज्ञातत्वात् । नाऽपि तृतीयो ब्रह्मानुवादेनोपास्तिविधावेकशोऽप्या वशीकारादुपास्तीनां मिथोऽसम्बन्धात्प्रत्युपास्तिविध्या वृत्त्या वाक्यभेदस्य दुरपह्नवत्वात् । तस्माद्यथाव्याख्यातमेव रमणीयम् ॥

एकादशन्याया अस्मिन्पादे सूत्राण्येकत्रिंशत् ॥

इति प्रथमाध्यायस्य प्रथमः पादः ॥

एवं प्रथमे पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि सर्वज्ञसर्वशक्तिजगदुत्पत्तिस्थितिलयकारणब्रह्मपरतया नीतानि । कानि चिद्वाक्यान्यस्पष्टब्रह्मलिङ्गानि सन्दिह्यमानानि द्वितीयतृतीयपादाभ्यां ब्रह्मपरतया नीयन्ते । तत्र द्वितीयपादे प्रायश उपास्यब्रह्मपराणि विचार्यन्ते, तृतीये ज्ञेयपराणीति विभागः ॥

## सर्वत्र प्रसिद्धोपदेशात् । १ । २ । १ ॥

पूर्वस्मिन्पादे सर्वज्ञत्वादिगुणस्य ब्रह्मणः सिद्धत्वात्तदुपजीव्योत्तरस्योत्थानाद्धेतुहेतुमद्भावः सङ्गतिः पूर्वोत्तरयोः । पूर्वाधिकरणेनास्याधिकरणस्यावान्तरसङ्गतिस्तु । यथा पूर्वं जीवादिलिङ्गबाधया ब्रह्मपरत्वमुक्तं ब्रह्मलिङ्गवशात्, न तथेह ब्रह्मलिङ्गमस्ति, किं तु ब्रह्मणः प्रकरणत्वमेव । तथा च प्रकरणापेक्षया लिङ्गस्य बलवत्त्वाज्जीवस्य मनोमयत्वादिलिङ्गमस्तीति तत्परमेवास्त्विति प्रत्युदाहरणसङ्गतिः । यद्वा पादान्तरत्वान्नावान्तरसङ्गत्यपेक्षेति । सर्वत्राधिकरणे सविशेषवाक्यविचाररूपे पूर्वोत्तरपक्षयोरुपास्तिरेव फलम् । यत्र तु निर्विशेषवाक्यविचारस्तत्र

पूर्वपक्षे तदुपास्तिः सिद्धान्ते प्रमितिरिति भेदः । छान्दोग्ये श्रूयते "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत, अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर"इत्यादि । अस्यार्थः । सर्वं जगद्ब्रह्मैवेत्यत्र हेतुमाह "तज्जे"ति । तस्माज्जायत इति तज्जम् । तस्मिंश्च लीयत इति तल्लम् । तस्मिन्ननिति चेष्टत इति तदनम् । तज्जं च तल्लं च तदनं च तज्जलान् । अवयवलोपश्छान्दसः । 'इति' शब्दो हेतौ । यस्मादेवं तस्मात्सर्वं जगद्ब्रह्मैवेत्यर्थः । "स क्रतुं कुर्वीते"त्यत्र विहितमुपासनमनूद्य शान्तिरूपं गुणं विदधाति "शान्त"इति । यतो ब्रह्मातिरिक्तं किञ्चिन्नास्ति, अतो द्वेष्यादीनामभावाच्छान्तः सन्नुपासीतेत्यर्थः । गुणं विधाय गुणिविधित्सया पुंप्रयत्नसाध्योपासनायाः फलमाह "अथे"ति । "पुरुषो"ऽधिकृत उपासकः "क्रतुमयः" संकल्पमयः । तत्र हेतु"र्यथे"ति । ज्ञानं कर्म वा यथाऽस्मिन्देहे स्थितः सङ्कल्पयति तथा तदनुसारेण फलं परत्र लभते । तेन सोऽधिकृतः "क्रतु" ध्यानं कुर्वीत । किं ध्यायेदित्याकांक्षायामाह "मनोमय"इति । विभक्तिव्यत्ययेन मनोमयं प्राणशरीरं परमात्मानं ध्यायेदित्यर्थः । अत्र मनोमयत्वादेः प्रकृतब्रह्मसापेक्षत्वनिरपेक्षत्वाभ्यां संशयः, किमत्र मनोमयत्वादिगुणकः शारीर उपास्यत्वेन गृह्यते, किं वा परमात्मेति । किमत्र युक्तं, शारीर इति । कुतः । "अप्राणो ह्यमनाः शुभ्र"इत्यादिना ब्रह्मणो मनआदिसम्बन्धनिरासाज्जीवस्य मनआदिसम्बन्धस्य सर्वत्र सिद्धत्वात् । तस्मान्मनोमयत्वादेः प्रकृतब्रह्मनिरपेक्षत्वात्तद्गुणकशारीर एवोपास्य इति प्राप्ते ब्रूमः "सर्वत्र प्रसि-

ह्मोपदेशात्" । अत्र परमेव ब्रह्मोपास्यत्वेन परिगृह्यते । कुतः । सर्वत्र प्रसिद्धोपदेशात्सर्वेषु वेदान्तेषु यत्प्रसिद्धं ब्रह्म जगत्कारणं तस्यैवात्र "सर्वं खल्विदं ब्रह्मे"त्यादिनोपदेशादित्यर्थः । यदुक्तं मनोमयत्वादि प्रकृतब्रह्मसम्बन्धीति तन्न । मनोमयत्वादेर्विशेष्याकांक्षायां य"त्सर्वं खल्विदं ब्रह्मे"ति प्रकृतं तदेवान्वेति, नाप्रकृतो जीवः, अन्यथा प्रकृतहानिप्रसङ्गात् । न च तदसम्भवः सर्वात्मकत्वेन सर्वस्याप्युपपत्तेरिति ॥

किञ्च ।

**विवक्षितगुणोपपत्तेश्च ॥ १ । २ । २ ॥**

विवक्षिता उपासनायामुपादेयत्वेनोपदिष्टा ये गुणाः सत्यसङ्कल्पत्वादयस्तेषां ब्रह्मण्येवोपपत्तेरित्यर्थः । "मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाश आत्मा सर्वकर्मा सर्वकाम"इत्यादिनोपदिष्टाः । यद्यपि मनोमयत्वादि जीवस्यासाधारणं तथाऽपि सत्यसङ्कल्पत्वाद्यनुरोधेन सर्वात्मके ब्रह्मणि मनोमयत्वाद्युपपत्तिः । जीवधर्मान्ब्रह्मणि दर्शयन्ति च श्रुतिः 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुख"इति । जीर्णः स्थविरो भूत्वा दण्डेन वञ्चसि गच्छसि सोऽपि त्वमेवेत्यर्थः । "अप्राण"इत्यादि श्रुतिस्तु निर्गुणब्रह्मविषयेत्यविरोधः ॥

एवं सत्यसङ्कल्पत्वादीनां ब्रह्मण्युपपत्तिमुक्त्वा जीवे तेषामनुपपत्तिमाह ।

**अनुपपत्तेस्तु न शारीरः ॥ १ । २ । ३ ॥**

"तु" शब्दोऽवधारणार्थः । अत्र मनोमयत्वादिगुणकं

ब्रह्मैवोपास्यं, न तु शारीरः । कुतः । "अनुपपत्तेः" सत्यसङ्कल्पत्वादीनां जीव आञ्जस्येनानुपपत्तेरित्यर्थः ॥

शारीरस्य मनोमयत्वादिगुणकत्वाभावे हेत्वन्तरमाह

कर्मकर्तृव्यपदेशाच्च ॥ १ । २ । ४ ॥

न शारीर इत्यनुषङ्गः । न शारीरो मनोमयत्वादिगुणक इहोपास्यः । कुतः । कर्मकर्तृव्यपदेशात् । "एतमितः प्रेत्याभिसम्भवितास्मी"ति । एतमिति प्रकृतं मनोमयत्वादिगुणकमुपास्यं कर्मत्वेन व्यपदिशति । "अभिसम्भवितास्मि"प्राप्तास्मीति शारीरमुपासकं कर्तृत्वेन व्यपदिशति । न च सत्यां गत्यावेकस्मिन्शारीरे कर्मकर्तृभाव आञ्जस्येनोपपद्यते । तस्मान्न शारीर उपास्यः ॥

किञ्च

शब्दविशेषात् ॥ १ । २ । ५ ॥

मनोमयत्वादिगुणः परमात्मैव न शारीरः । कुतः । "शब्दविशेषा"न्मनोमयत्वादिविशिष्टपरमात्माभिधायकस्य प्रथमान्तशब्दस्य सत्त्वादित्यर्थः । तथा हि समानप्रकरणे "व्रीहिर्वा यवोवाश्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन्पुरुषो हिरण्मय"इत्यादौ पुरुषो हिरण्मय इति प्रथमान्तशब्देन परमात्माभिधानं, अन्तरात्मन्निति सप्तम्यन्तेन शारीराभिधानं दृष्टमिति । इहाऽपि प्रथमान्तत्वेन श्रुतो मनोमयइत्यादिशब्दः परमात्मपर एवेति ॥

ननु कर्मकर्तृव्यपदेशो न सम्भवति जीवब्रह्मणोरभेदादित्याशङ्क्याह

स्मृतेश्च ॥ १ । २ । ६ ॥

स्मृतिवशाज्जीवपरमात्मनोर्भेद इत्यर्थः ।

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥"

इत्याद्या स्मृतिः कल्पितं भेदं दर्शयति । अतः कर्मकर्तृव्यपदेश उपपद्यत इत्यर्थः ।

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ १ । २ । ७ ॥

ननु नात्र परमात्मोपास्यः । कुतः । अर्भकौकस्त्वात् । अर्भकमल्पमोकः स्थानं यस्य सोऽर्भकौकास्तस्य भावस्तत्त्वं तस्मादित्यर्थः । "एष म आत्मान्तर्हृदय" इति हृदयरूपपरिच्छिन्नायतनत्वादित्यर्थः । किञ्च तद्व्यपदेशाच्च स्वशब्देनैवैषः "अणीयान्व्रीहेर्वा यवाद्वे"त्यणीयस्त्वस्य व्यदेशादाराग्रमात्रो जीव इहोपास्यो न सर्वगतः परमात्मेति चेन्न । "निचाय्यत्वादेव"मेवमर्भकौकस्त्वाणीयस्त्वादिविशिष्टत्वेन रूपेण परमात्मन इहनिचाय्यत्वादुपास्यत्वादित्यर्थः । सर्वगतस्य ह्यल्पदेशगतत्वं कयाचिदपेक्षया सङ्गच्छते, यथा सर्वलोकाधीशः परमात्मा श्रीरामचन्द्रोऽयोध्याधीश इति व्पदिश्यते । एवं शालग्रामे विष्णुबुद्धिवद्धृदयपुण्डरीके परमात्माऽर्भकौकस्त्वादिगुणक उपासनापेक्षया व्यादिश्यते । नैतावता सर्वगतत्वहानिः । तत्र दृष्टान्तो "व्योमवदि"ति । यथा सर्वगतमपि व्योम सूचीपाशाद्यवच्छेदेनार्भकौकोऽप्यणीयोऽपि व्यपदिश्यते तद्वद्भापीत्यर्थः ॥

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ १ । २ । ८ ॥

ननु ईश्वरस्य व्योमवत्सर्वगतत्वे चेतनत्वाविशेषाज्जीववत्सुखदुःखानुभवरूपसम्भोगप्राप्तिरिति चेन्न । "वैशेष्या" ज्जीवपरमात्मनोरत्यन्तं विशेषादित्यर्थः । जीवः कर्ता भोक्ता धर्माधर्मवांश्चेति तस्य सुखदुःखसम्बन्धो युक्तः । परमात्मा तु तद्विलक्षण इति न तस्य सम्भोगप्राप्तिरिति । विशेष एव वैशेष्यम् । स्वार्थे ष्यङ् विशेषातिशयद्योतनार्थो वा । न च जीवपरमात्मनोरभेदाद्भोक्तृत्वादिवैलक्षण्यमपि न स्यादिति वाच्यम्, बिम्बप्रतिबिम्बयोः परस्परधर्मासाङ्कर्यस्याबालसिद्धत्वादिति । तस्मान्मनोमयत्वादिगुणकः परमात्मैवोपास्यो न शारीर इति सिद्धम् ॥

अत्ता चराचरग्रहणात् ॥ १ । २ । ९ ॥

पूर्वं ब्रह्मणो भोक्तृत्वाभाव उक्तः । तर्हि तद्वदत्तृत्वमपि जीवस्य न ब्रह्मण इति दृष्टान्तसङ्गत्येदमारभ्यते । अत्र पूर्वपक्ष उपास्तिः फलम्, सिद्धान्ते निर्विशेषब्रह्मप्रमितिरिति विवेकः । कठवल्लीषु श्रूयते "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनो मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स"- इति । अस्यार्थः । यस्य परमात्मनो ब्रह्म च क्षत्रं चोभे जात्या प्रसिद्धे अन्नवदोदनः, यस्य च मृत्युः सर्वमारक उपसेचनमोदनमिश्रघृतं भवति ससर्वस्यात्ता परमात्मा कारणात्मा यत्र वर्तते तं निर्विशेषमात्मानं "नाविरतो दुश्चरिता" दिति मन्त्रोक्तोपायवान्यथावेद, इत्थमन्य उपायरहितो न वेदेति काक्वर्थः । अत्रौदनोपसेचनेन सूचितः कश्चिदत्ता प्रतीयते । तत्र किमग्निरत्ता, उत जीवः, आहोस्वित्परमात्मेति संशयः । त्रयाणामप्यस्मिन्ग्रन्थे प्रश्नोपन्यासः संशयबीजम् । किं तावत्प्राप्तमग्निरिति । कुतः । "अग्निरन्नाद" इति श्रुतिप्रसिद्धिभ्याम् । जीवो वास्या "त्तयो-

रन्यः पिप्पलं स्वाद्वत्ती''ति श्रुतेः । न परमात्मेति प्राप्ते ब्रूमः । अत्ता चराचरग्रहणात् । अत्तेश्वरो भवितुमर्हति । कुतः । चराचरग्रहणाच्चराचरयोः स्थावरजङ्गमयोरद्यत्वेन ग्रहणाद्भक्षणादित्यर्थः । मृत्यूपसेचनत्वेन सर्वप्राणिमात्रस्याऽद्यत्वेन प्रतीयमानत्वात् । ब्रह्मक्षत्रग्रहणमुपलक्षणार्थम् । न हि सर्वसंहर्तुः परमात्मनोऽन्यस्य जीवादेश्चराचरात्तृत्वं युक्तम् । तस्मादत्तेश्वर एव ॥

## प्रकरणाच्च ॥ १ । २ । १० ॥

इतश्चेश्वर एवात्ता । कुतः । प्रकरणात्परमात्मनः प्रकृतत्वादित्यर्थः । ''न जायते म्रियते वा विपश्चि''दित्यादिना परमात्मनः प्रकृतत्वात् । ''क इत्था वेद यत्र स'' इति च दुर्विज्ञेयत्वं ब्रह्मणोऽसाधारणलिङ्गं द्रष्टव्यम् ॥

## गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥१।२।११॥

पूर्वं ब्रह्मक्षत्रशब्दस्य मृत्युपदसान्निध्यादनित्यवस्तुपरत्ववदिहापि पिबच्छब्दस्य सन्निहितगुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरत्वमस्त्विवति दृष्टान्तसङ्गत्यास्यारम्भः । पूर्वपक्षे बुद्धिभिन्नजीवज्ञानं फलम्, सिद्धान्ते तु निर्गुणब्रह्मज्ञानमिति विभागः । अत्तृत्ववाक्यानन्तरं कठवल्लीषु पठ्यते ''ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः''इति । अस्यार्थः । ऋतमावश्यकं कर्मफलं पिबन्तौ भुञ्जानौ जीवपरमात्मानौ । छत्रिणो गच्छन्तीतिवदेकस्य जीवस्य भोक्तृत्वेन ब्रह्मणोऽपि भोक्तृत्वेन व्यपदेशः । सुकृतस्य धर्मस्य कार्ये देहरूपे लोके वर्तमानौ परार्ध्ये परस्य ब्रह्मणोऽर्धं स्थानमर्हतीति परार्ध्यं हृदयं तस्मिन्परमे श्रेष्ठे

या गुहा नभोलक्षणा तां प्रविश्य स्थितौ छायातपवन्मिथो विरुद्धौ कर्तृत्वादितद्वैलक्षण्याभ्याम् । तौ ब्रह्मविदः पञ्चाग्नयः कर्मिणश्च वदन्ति । त्रिणाचिकेतोऽग्निश्चितो यैस्ते त्रिणाचिकेतास्तेऽपि वदन्तीत्यर्थः । तत्र संशयः किमिह बुद्धिजीवौ निर्दिष्टावुत जीवपरमात्मानाविति । बुद्धिजीवाविति प्राप्तम् । कुतः । जीवस्य बुद्धिभिन्नत्वेन ज्ञानार्थं प्रश्नदर्शनात् । "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय" इति । मनुष्ये प्रेते मृते सति येयं विचिकित्सा संशयः परलोकगामी भोक्ता जीवोऽस्तीत्येके नास्तीति चान्येऽतस्त्वयोपदिष्टोऽहमेतं निर्विचिकित्सं तत्त्वं ज्ञातुमिच्छामीति मृत्युं प्रति नचिकेतसो वचनमिति । नचिकेता मृत्युं प्रति वरत्रयं पृष्टवान्स्वपितुः सौमनस्यमग्निविद्याऽऽत्मविद्या चेति । तेषां वराणां मध्य एष तृतीयो वर इत्यर्थः । एवं च बुद्धिजीवयोः पृष्टत्वात्तावेवात्र निर्दिश्येते । किं च गुहाप्रवेशस्य ब्रह्मणोऽसम्भवादृतपानासम्भवाच्च बुद्धिजीवाविति प्राप्ते ब्रूमः । गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । गुहां प्रविष्टाविह जीवपरमात्मानावेव । कुतः । आत्मानौ हि । हि यस्मादात्मानौ तस्मादित्यर्थः । "ऋतं पिबन्तौ"विति कर्मफलभोगश्रवणेनैकस्तावदात्मेति द्वितीयोऽप्यात्मैवेति न्याय्यः । तत्र हेतुमाह "तद्दर्शना"दिति । संख्याश्रवणे हि संख्यावतोरेकरूपत्वस्य लोके दर्शनादित्यर्थः । तद्यथाऽ"स्य गोर्द्वितीयोऽन्वेष्टव्य" इत्युक्ते गौरेव द्वितीयोऽन्वेष्टव्यो नाश्वो न वा मनुष्य एवमिहाऽपि चेतनत्वसाम्याज्जीवपरमात्मानावेव । बुद्धिविलक्षणजीवप्रश्नस्यान्यदेवोत्तरम् । नैतद्वाक्येनाऽपि गुहाप्रवेशानु-

पपत्तिर्ब्रह्मणो "यो वेद निहितं गुहाया"मित्यादौ बहुलं गुहाप्रवेशश्रवणात् । न चर्तपानानुपपत्तिश्छत्रिन्यायस्य दर्शितत्वादिति। तस्माज्जीवपरमात्मानावेव गुहां प्रविष्टौ ॥

किं च

विशेषणाच्च ॥ १ । २ । १२ ॥

जीवपरमात्मनोरेवास्मिन्ग्रन्थे गन्तृगन्तव्यभावेन मन्तृमन्तव्यभावेन च विशेषितत्वादित्यर्थः । "आत्मानं रथिनं विद्धि शरीरं रथमेव चे"त्यादिनाऽनन्तरेण ग्रन्थेन रथादिकल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्तारं कल्पयति । "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद"मिति परमात्मानं गन्तव्यं कल्पयति । तथा "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती"ति पूर्वस्मिन्ग्रन्थे मन्तृमन्तव्यत्वेन तावेव विशेषितौ । स जीवोऽध्वनः संसारमार्गस्य । पारमेव विशिनष्टि "त"दिति । व्यापनशीलस्य ब्रह्मणः स्वरूपं परमं कार्यकारणातीतं पदं तदेव पारं ज्ञेयं नान्यदित्यर्थः । दुर्दर्शं सूक्ष्मत्वाद्दुर्ज्ञानमत एव गूढमनुप्रविष्टमाच्छादितरूपेण विद्यमानम् । कुत्रेत्यत आह "गुहे"ति । गुहायां बुद्धावाहितं निक्षिप्तं गह्वरे बहुविधानर्थसङ्कटे देहे स्थितं पुराणं पुरातनं तमीश्वरमध्यात्मयोगः प्रत्यगात्मन्येव चित्तसमाधानं तत्सहकृताद्वाक्यादधिगमस्साक्षात्कारस्तेन "सोऽहमेवे"ति निश्चित्य धीरो विद्वान्हर्षाद्युपलक्षितं संसारं जहातीत्यर्थः । तथा "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानो जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक" इति मन्त्रान्तरेऽपि जीवपरमात्मानावेव विशिनष्टि मन्तृमन्तव्यभावेन

आत्मेश्वरयोः समानस्तुल्यो वृक्षो देहः । पुरुषो जीवो निमग्नो "मनुष्योऽह"मित्यभिनिवेशवाननीशयाऽविद्यया मुह्यमानस्तत्त्वमजानन्ननिशं शोचति संसारमनुभवति । जुष्टं ध्यानादिना सेवितं यदा तत्प्रकर्षदशायामन्यं बिम्बभूतमीश्वरं प्रत्यक्त्वेन पश्यति तदा स एवात्मत्वेन दृष्टस्य महिमानं स्वरूपं प्राप्नोति, ततश्च वीतशोको भवति । तत्र हेतु"रिति" शब्देनोक्तः । बन्धहेतोरविद्याया दग्धत्वादित्यर्थः । न ह्यविद्याध्वंसानन्तरं बन्धकल्पनं युक्तं, "न हि वा एवंविदि किञ्चन रज आध्वंसते"इति श्रुतेः । रजोऽविद्या विदुषि किञ्चनेषदपि स्वकल्पितं नाध्वंसते न संपादयति स्वस्या एवाभावादित्यर्थः । तस्मात्पूर्वस्मिन्परस्मिंश्च ग्रन्थे जीवपरयोरेव विशेषितत्वात्तावेव गुहां प्रविष्टाविति जीवत्वादिधर्मविनिर्मुक्तः परमात्मा ज्ञेय इति सिद्धम् ॥

## अन्तर उपपत्तेः ॥ १ । २ । १३ ॥

पूर्वं "पिबन्तौ"विति प्राथमिकद्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरदृष्ट्यनुसाराच्चरमश्रुता गुहाप्रवेशादयो नीताः । तर्हि तद्वदेव"दृश्यत"इति प्राथमिकप्रत्यक्षत्वोक्त्याऽक्षिप्रतिबिम्बात्मावगत्यनुरोधाच्चरमश्रुता अमृतत्वादयः स्तुत्यर्थत्वेन कथञ्चिन्नेया इति दृष्टान्तसङ्गत्याऽस्यारम्भः । पूर्वपक्षे प्रतिबिम्बोपास्तिः फलं, सिद्धान्ते ब्रह्मोपास्तिरिति । उपकोशलविद्यायां छान्दोग्ये श्रूयते "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनी एव गच्छती"त्यादि । अस्यार्थः । पुरुषः परमात्मा दृश्यते शास्त्रतो न त्विन्द्रियत इति शेषः । "एष

आत्मे''त्युपकोशलं प्रत्याचार्य उवाच । प्रतिबिम्बात्मकच्छायाव्यावृत्त्यर्थमाह ''त''दिति । इत्युवाचेत्यन्वयः । अक्षिरूपस्थानस्य ब्रह्मसारूप्यमाह ''त''दिति । वर्त्मनी पक्ष्मस्थाने इति द्वितीयाद्विवचनम् । ब्रह्मणो निर्लेपत्वाच्चक्षुषोऽपि निर्लेपत्वात्सारूप्यमित्यर्थः । तत्राक्षिण्यन्तर उपदिश्यमानः परमात्मोत प्रतिबिम्बादिरिति संशये, ''दृश्यत'' इति वचनात्सर्वगतस्याक्षिस्थानत्वानुपपत्तेश्च न परमात्मा किन्तु प्रतिबिम्बादिरिति प्राप्ते ब्रूमः । अन्तर उपपत्तेः । अन्तरोऽक्षिमध्यगतः परमात्मैव । कुतः । उपपत्तेरात्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेरित्यर्थः । न च ''दृश्यत''इत्यनेन विरोधो, दर्शनस्य शास्त्रीयत्वेनाविरोधात् । किञ्च, ''एतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभिसंयन्त्येष उ एव वामनी रेषहिसर्वाणि वामानि नयत्येष उ एव भामनीरेष हि सर्वेषु लोकेषु भाती''त्यत्र निर्दिष्टसंयद्वामत्वादिगुणानां परमात्मन्येवोपपत्तेरन्तरः परमात्मैव । तदर्थस्तु । संयद्वामशब्दार्थमाह, ''एतं ही''ति । वामानि कर्मफलान्येतमक्षिपुरुषं हेतुमाश्रित्याभिसंयन्त्युत्पद्यन्ते । संयन्ति वामान्यस्मादिति वा संयद्वामः सर्वफलोदयहेतुरित्यर्थः । वामनीरप्ययमेवेत्याह, ''एष''इति । वामनीशब्दार्थमाह, ''एष ही''ति । वामानि शोभनानि जनं प्रापयति, जनस्य सर्वशुभप्रापकोऽप्ययमेवेत्यर्थः । भामनीरप्ययमेवेत्याह, ''एष''इति । भामनीपदार्थमाह, ''एष ही''ति । भामानि भानानि नयतीति भामनीः । अयमेव सर्वप्रकाशक इत्यर्थः । न हि प्रतिबिम्बस्यान्यस्य वैतादृशा गुणाः सम्भवन्ति । तस्मादक्ष्यन्तरः पुरुषः परमात्मा ॥

कथं पुनः सर्वगतस्याल्पमक्षिस्थानं व्यपदिश्यत इत्यत्रोत्तरं पठति ।

**स्थानादिव्यपदेशाच्च ॥ १ । २ । १४ ॥**

ईश्वरस्याल्पस्थानादिव्यपदेशो नानुपपन्नः । कुतः । स्थानादिव्यपदेशात्, "यश्चक्षुषि तिष्ठ"न्नित्यादावीश्वरस्य चक्षुःस्थानव्यपदेशस्य दृष्टत्वादित्यर्थः । "आदि"पदेन रूपवत्त्वपरिग्रहो दृष्टान्तत्वेनोक्तः । "हिरण्यश्मश्रु"रित्यादौ रूपवत्त्वस्योपासनार्थत्वेनापादनादिहाप्युपासनार्थमल्पस्थानव्यपदेशो न विरुध्यत इति भावः ॥

अपि च

**सुखविशिष्टाभिधानादेव च ॥ १ । २ । १५ ॥**

अक्षिपुरुषः परमात्मैव । कुतः । सुखविशिष्टाभिधानात् । एवकारेण नात्र संशयः कार्य इति सूच्यते । सुखविशिष्टं ब्रह्म वाक्योपक्रमे श्रूयते, तस्यैवेहाभिधानादित्यर्थः । तथाहि गुरुगृह आचार्याज्ञया चिरकालं वर्तमानमुपकोशलं गार्हपत्याद्यग्नय ऊचुः "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"ति तत्र कं शब्दो वैषयिकसुखे रूढः, खं शब्दश्चाकाशे रूढः । इति परस्परभेदे प्राप्ते श्रुतिराह "यद्वाव कं तदेव खं यदेव खं तदेव क"मिति । एवं परस्परवैशिष्ट्यप्रतिपादनात्सुखविशिष्टं ब्रह्म वाक्योपक्रमे श्रुतमिति । तस्यैवात्र ग्रहणं युक्तं नाप्रकृतच्छायादेरित्यक्ष्यन्तरः परमात्मा ॥

किञ्च

**श्रुतोपनिषत्कस्य गत्यभिधानाच्च ॥ १ । २ । १६ ॥**

॥ श्रीः ॥

॥ श्रों नमः श्रीमते भगवते रामानुजाचार्याय ॥

# अथ श्रीभाष्यं विशिष्टाद्वैतपरम्।

## रामानुजदर्शनम्।

### तत्र प्रथमोऽध्यायः।

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥ १ ॥

पाराशर्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृताम्
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीविनीम्।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥ २ ॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते।

## अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्रायमथशब्द आनन्तर्ये भवति। अतःशब्दो वृत्तस्य हेतुभावे। अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा, ब्रह्मण इति कर्मणि षष्ठी "कर्तृकर्मणोः कृती"ति विशेषविधानात्। यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः, तथाप्याक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्कर्मणि षष्ठी गृह्यते। न च "प्रतिपदविधाना षष्ठी न समस्यत" इति

कर्मणि षष्ठ्याः समासनिषेधः शङ्कनीयः, "कृद्योगा च षष्ठी समस्यत" इति प्रतिप्रसवसद्भावात्। ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः, बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः। स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनायोगाद् भगवच्छब्दवत्। तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः। अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ब्रह्म। ज्ञातुमिच्छा जिज्ञासा इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते। मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वादुपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतोर्ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः "वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषे"ति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यम् "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धि"रिति। अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवदध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः। मीमांसाशास्त्रम् "अथातो धर्मजिज्ञासे"त्यारभ्य "अनावृत्तिः शब्दादनावृत्तिः शब्दादि"त्येवमन्तं सङ्गतिविशेषेण विशिष्टक्रमम्। तथाहि प्रथमं तावत् "स्वाध्यायोऽध्येतव्य" इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते। तच्चाध्ययनं किंरूपं कथं च कर्त्तव्यमित्यपेक्षायाम् "अष्टवर्षं ब्राह्मणमुपनयीत तम[1]ध्यापयेदि"त्यनेन

"श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान्" ॥

इत्यादिव्रतनियमविशेषोपदेशैश्चापेक्षितानि विधीयन्ते। एवं सत्सन्तानप्रसूतसदाचारनिष्ठात्मगुणोपेतवेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्याचार्योच्चारणानूच्चारणरूपमक्षरराशिग्रहणफलमध्ययनमित्यवग-

[1] "तमध्यापयीते"ति पाठान्तरम्।

म्यते । अध्ययनं च स्वाध्यायसंस्कारः, "स्वाध्यायोऽध्येतव्य" इति स्वाध्यायस्य कर्मत्वावगमात् । संस्कारो हि नाम कार्यान्तरयोग्यताकरणम् । संस्कार्यत्वं च स्वाध्यायस्य युक्तम्, धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात्, जपादिना स्वरूपेणापि तत्साधनत्वाच्च । एवमध्ययनविधिर्मन्त्रवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति । अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनाद् गृहीतात्स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्त्तते । तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वा ऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति । तथा च वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं दर्शयन्ति "तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "अन्तवदेवास्य तद्भवति" "नह्यध्रुवैः प्राप्यते ध्रुवं तत्" "प्लवा ह्येते अदृढा यज्ञरूपाः" "परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्, तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय, येनाक्षरं पुरुषं वेद सत्यं प्रोवाच[1] तां तत्त्वतो ब्रह्मविद्याम्" "ब्रह्मविदाप्नोति परम्" "न पुनर्मृत्यवे" "तदेकं पश्यति" "न पश्यो मृत्युं पश्यति" "स स्वराड्भवति" "तमेवं विद्वानमृत इह भवति" "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती"त्यादीनि । ननु च साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं स्वर्गादीनां च क्षयित्वं ब्रह्मोपासनस्यामृतत्वफलत्वं च ज्ञायत एव, अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्त्ततां किमर्थो धर्मविचारापेक्षा । एवं तर्हि शारीरकमीमांसायामपि न प्रवर्त्तताम्, साङ्गवेदाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् । सत्यम् ।

१ प्रोवाच प्रब्रूयादित्यर्थः ।

आपाततः प्रतीतिर्विद्यत एव, तथापि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापाततः प्रतीतोऽप्यर्थः संशयविपर्ययौ नातिवर्त्तते । अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्त्तव्य इति चेत् । तथैव धर्मविचारोऽपि कर्त्तव्य इति पश्यतु भवान् ॥

ननु च ब्रह्मजिज्ञासा यदेव नियमेनापेक्षते तदेव पूर्ववृत्तं किंचिद् वक्तव्यम् । न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः, अधीतवेदान्तस्यानधिगतकर्मणोऽपि वेदान्तवाक्यार्थविचारोपपत्तेः । कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते, तदनधिगतकर्मणा न शक्यं कर्त्तुमिति चेत् । अनभिज्ञो हि भवाँच्छारीरकशास्त्रविज्ञानस्य । अस्मिन् शास्त्रे ऽनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभूतमिथ्याज्ञाननिबर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितम् । अस्य हि भेदावलम्बि कर्मज्ञानं क्वोपयुज्यते, प्रत्युत विरुद्धमेव । उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानस्वरूपत्वाविशेषादिहैव क्रियते, स तु न साक्षात्सङ्गतः । अतो यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम् । बाढम्, तदपेक्षितं च कर्मज्ञानमेव, कर्मसमुच्चिताज् ज्ञानादपवर्गश्रुतेः । वक्ष्यति च "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि"ति । अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः केन नेति विभागो न शक्यते ज्ञातुम्, अतस्तदेव पूर्ववृत्तम् । नैतद्युक्तम्, सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः । अविद्यानिवृत्तिरेव हि मोक्षः, वर्णाश्रमविशेषसाध्यसाधनेतिकर्त्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् । श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति "अन्तवदेवास्य तद्भवति" "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" "ब्रह्मविदाप्नोति परम्" "ब्रह्म वेद ब्रह्मैव भवति" "तमेव विदित्वाऽतिमृत्युमेती"त्याद्याः । यदपि चेदमुक्तम्, यज्ञादिकर्मापेक्षा विद्येति, तत् वस्तुविरोधाच्छ्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते, न फलोत्पत्तौ "विविदिष-

न्ती"ति श्रवणात् । विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गोपायतां श्रुतिरेवाह "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदि"ति । तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्याम् "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "सत्यं ज्ञानमनन्तं ब्रह्म" "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" "अयमात्मा ब्रह्म" "तत्त्वमसी"त्यादिवाक्यजन्यज्ञानादविद्या निवर्त्तते । वाक्यार्थज्ञानोपयोगीनि च श्रवणमनननिदिध्यासनानि । श्रवणं नाम वेदान्तवाक्यान्यात्मैक्यविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम् । एवमाचार्योपदिष्टस्यार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं मननम् । एतद्विरोध्यनादिभेदवासनानिरसनायास्यार्थस्यानवरतभावना निदिध्यासनम् । एवं श्रवणमननादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्त्तयतीत्येवंरूपस्य श्रवणस्यावश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम्, तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत्, इहामुत्र च फलभोगविरागः, मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयम्, अनेन विना जिज्ञासानुपपत्तेः, अर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते । एतदुक्तं भवति, ब्रह्मस्वरूपाच्छादिकाविद्यामूलमपारमार्थिकं भेददर्शनमेव बन्धमूलम्, बन्धश्चापारमार्थिकः, स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्त्यते, निवर्त्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम्, तस्यतस्य वाक्यजन्यज्ञानस्य स्वरूपे तदुत्पत्तौ कार्ये वा कर्मणो नोपयोगः, विविदिषायामेव तूपयोगः, सा च पापमूलरजस्तमोनिबर्हणद्वारेण सत्त्वविवृद्ध्या भवतीतीममुपयोगमभिप्रेत्य "ब्राह्मणा विविदिषन्ती"त्युक्तमिति । अतः कर्म्मज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम् ॥

अत्रोच्यते । यदुक्तमविद्यानिवृत्तिरेव हि मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति, तदभ्युपगम्यते । अविद्यानिवृत्तये वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम् । किं वाक्याद्वाक्यार्थज्ञानमात्रम्, उत तन्मूलमुपासनात्मकं ज्ञानमिति । न तावद्वाक्यजन्यम्, तस्य विधा-

नमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च । न च वाच्यं भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्त्तकं ज्ञानं न जनयति, जातेऽपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय, चन्द्रैकत्वे ज्ञातेऽपि द्विचन्द्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति, सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः, सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् । सत्यपि वाक्यार्थज्ञानेऽनादिवासनामा[1]त्रया भेदज्ञानमनुवर्त्तेत इति भवता न शक्यते वक्तुम्, भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात् । ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्त्तकान्तराभावात् कदाचिदपि नास्या वासनाया निवृत्तिः । वासनाकार्यं भेदज्ञानं छिन्नमूलम् अथ चानुवर्त्तेत इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वान्मिथ्याज्ञानानिवृत्तिरविरुद्धा, प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्त्तते । अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति, भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्, तद्विरुद्धभावनायाश्चाल्पत्वादनया तन्निरासानुपपत्तेः । अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् । तथाच श्रुतयः "विज्ञाय प्रज्ञां कुर्वीत" "अनुविद्य विजानाति" "ओमित्येवात्मानं ध्यायथ" "निचाय्य तन्मृत्युमुखात्प्रमुच्यते" "आत्मानमेव लोकमुपासीत" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "सोऽन्वेष्टव्यः स विजिज्ञासितव्य"-इत्येवमाद्याः । अत्र "निदिध्यासितव्य"इत्यादिनैकार्थ्यात् "अनुविद्य विजानाति""विज्ञाय प्रज्ञां कुर्वीते"त्येवमादिभिर्वाक्या[2]र्थज्ञानस्य ध्यानोपकारकत्वात् तत् अनुविद्य विज्ञायेत्यनूद्य प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते । श्रोतव्य इति चानुवादः स्वाध्यायस्यार्थपरत्वेनाधीत-

---

१ अनादिवासनयेत्यपि पाठान्तरम् ।

२ "वाक्यार्थज्ञानं ध्यानोपकारकत्वादनुविद्ये"ति पाठान्तरम् ।

वेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्त्तेत इति श्रवणस्य प्राप्तत्वात्, श्रवणप्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति चानुवादः, तस्माद्ध्यानमेव विधीयते। वक्ष्यति च "आवृत्तिरसकृदुपदेशादि"ति। तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते, विद्युपास्त्योर्व्यतिकरेणोपसंहारदर्शनात्, "मनो ब्रह्मेत्युपासीते"त्यत्र "भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद" "न स वेदाकृत्स्नो ह्येषः" "आत्मेत्येवोपासीत" "यस्तद्वेद यत्स वेद स मयैतदुक्त" इत्यत्र "अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स" इति। ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपा ध्रुवा स्मृतिः "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष"इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकारा, "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर" इत्यनेनैकार्थ्यात्, एवं च सति "आत्मा वाऽरे द्रष्टव्य" इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते। भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता। वाक्यकारेणैतत्सर्वं प्रपञ्चितम्, "वेदनमुपासनं स्यात् तद्विषये श्रवणादि"ति सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम्, "सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवदि"ति पूर्वपक्षं कृत्वा "सिद्धं तूपासनशब्दादि"ति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम्, "उपासनं स्याद् ध्रुवानुस्मृतिदर्शनान्निर्वचनाच्चे"ति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम्। सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता, दर्शनरूपता च प्रत्यक्षतापत्तिः। एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि"ति, अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तम्। प्रियतम एव हि वरणीयो भवति, यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति। यथाऽयं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तम्,

नमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च । न च वाच्यं भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्त्तकं ज्ञानं न जनयति, जातेऽपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय, चन्द्रैकत्वे ज्ञातेऽपि द्विचन्द्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति, सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः, सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात् । सत्यपि वाक्यार्थज्ञानेऽनादिवासनामा[१]त्रया भेदज्ञानमनुवर्त्तत इति भवता न शक्यते वक्तुम्, भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात् । ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्त्तकान्तराभावात् कदाचिदपि नास्या वासनाया निवृत्तिः । वासनाकार्यं भेदज्ञानं छिन्नमूलम् अथ चानुवर्त्तत इति बालिशभाषितम् । द्विचन्द्रज्ञानादौ तु बाधकसन्निधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वान्मिथ्याज्ञानानिवृत्तिरविरुद्धा, प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्त्तते । अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति, भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्, तद्विरुद्धभावनायाश्चाल्पत्वादनया तन्निरासानुपपत्तेः । अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम् । तथाच श्रुतयः "विज्ञाय प्रज्ञां कुर्वीत" "अनुविद्य विजानाति" "ओमित्येवात्मानं ध्यायथ" "निचाय्य तन्मृत्युमुखात्प्रमुच्यते" "आत्मानमेव लोकमुपासीत" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "सोऽन्वेष्टव्यः स विजिज्ञासितव्य"-इत्येवमाद्याः । अत्र "निदिध्यासितव्य"इत्यादिनैकार्थ्यात् "अनुविद्य विजानाति""विज्ञाय प्रज्ञां कुर्वीते"त्येवमादिभिर्वाक्या[२]र्थज्ञानस्य ध्यानोपकारकत्वात् तत् अनुविद्य विज्ञायेत्यनूद्य प्रज्ञां कुर्वीत विजानातीति ध्यानं विधीयते । श्रोतव्य इति चानुवादः स्वाध्यायस्यार्थपरत्वेनाधीत-

१ अनादिवासनयेत्यपि पाठान्तरम् ।
२ "वाक्यार्थज्ञानं ध्यानोपकारकत्वादनुविद्ये"ति पाठान्तरम् ।

वेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्त्तत इति श्रवणस्य प्राप्तत्वात्, श्रवणप्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति चानुवादः, तस्माद्ध्यानमेव विधीयते । वक्ष्यति च "आवृत्तिरसकृदुपदेशादि"ति । तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते, विद्युपास्त्योर्व्यतिकरेणोपसंहारदर्शनात्, "मनो ब्रह्मेत्युपासीते"त्यत्र "भाति च तपति च कीर्त्या यशसा ब्रह्मवर्च्चसेन य एवं वेद" "न स वेदाकृत्स्नो ह्येषः" "आत्मेत्येवोपासीत" "यस्तद्वेद यत्स वेद स मयैतदुक्त" इत्यत्र "अनु म एतां भगवो देवतां शाधि यां देवतामुपास्स" इति । ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपा ध्रुवा स्मृतिः "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष"इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात् । सा च स्मृतिर्दर्शनसमानाकारा, "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर" इत्यनेनैकार्थ्यात्, एवं च सति "आत्मा वाऽरे द्रष्टव्य" इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता । वाक्यकारेणैतत्सर्वं प्रपञ्चितम्, "वेदनमुपासनं स्यात् तद्विषये श्रवणादि"ति सर्वासूपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम्, "सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवदि"ति पूर्वपक्षं कृत्वा "सिद्धं तूपासनशब्दादि"ति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम्, "उपासनं स्याद् ध्रुवानुस्मृतिदर्शनान्निर्वचनाच्चे"ति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम् । सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता, दर्शनरूपता च प्रत्यक्षतापत्तिः । एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि"ति, अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तम् । प्रियतम एव हि वरणीयो भवति, यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति । यथाऽयं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रयतत इति भगवतैवोक्तम्,

"तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते" ॥ इति ।
"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" । इति च ।

अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य स एव परमात्मना वरणीयो भवतीति तेनैव लभ्यते परमात्मेत्युक्तं भवति । एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते, उपासनपर्यायत्वाद्भक्तिशब्दस्य । अत एव श्रुतिस्मृतिभिरेवमभिधीयते, "तमेव विदित्वाऽतिमृत्युमेति" "तमेवं विद्वानमृत इह भवति" "नान्यः पन्था अयनाय विद्यते" ।

"नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" ॥ इति ।

एवंरूपाया ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणीति "यज्ञादिश्रुतेरश्ववदि"त्यभिधास्यते । यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यन्ते, तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रयाणादनुवर्त्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि । वक्ष्यति च "आप्रयाणात्तत्रापि हि दृष्टम्" "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्" "सहकारित्वेन चे"त्यादिषु । वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह "तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्चे"ति । विवेकादीनां स्वरूपं चाह "जात्याश्रयनिमित्तदुष्टादन्नात्कायशुद्धिर्विवेक" इति, अत्र निर्वचनम् "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरि"ति । "विमोकः कामानभिष्वङ्ग" इति, "शान्त उपासीते"ति निर्वचनम् । "आरम्बणसं-

शीलनम् पुनःपुनरभ्यासः," निर्वचनं च स्मार्त्तमुदाहृतं भाष्य[१]कारेण "सदा तद्भावभावित"इति । "पञ्चमहायज्ञानुष्ठानं शक्तितः क्रिये"ति, निर्वचनम् "क्रियावानेष ब्रह्मविदां वरिष्ठः" "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेने"ति च । "सत्यार्जवदया-दानाहिंसानभिध्याः कल्याणानी"ति, निर्वचनम् "सत्येन लभ्यः" "तेषा-मेवैष विरजो ब्रह्मलोक"इत्यादि । "देशकालवैगुण्याच्छोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसादः, तद्विपर्ययोऽनवसाद" इति, निर्वचनम् "नायमात्मा बलहीनेन लभ्य" इति । "तद्विपर्ययजा तुष्टिरुद्धर्षस्तद्विपर्ययोऽनुद्धर्ष" इति, अतिसंतोषश्च विरोधीत्यर्थः, निर्वचनमपि "शान्तो दान्त" इति । एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति । तथाच श्रुत्यन्तरम् "विद्यां चाविद्यां च यस्तद्वेदोभयं सह, अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत"इति । अत्राविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्म, अविद्यया कर्मणा, मृत्युं ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म, तीर्त्वा अपोह्य, विद्यया ज्ञानेन, अमृतं ब्रह्म, अश्नुते प्राप्नोतीत्यर्थः । मृत्युतरणोपायतया प्रतीता ऽविद्या विद्येतरत् विहितं कर्मैव, यथोक्तम्,

"इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया" ॥ इति,

ज्ञानविरोधि च कर्म पुण्यपापरूपम्, ज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम् । अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण, पापस्य च ज्ञानोत्पत्तिविरोधित्वम् "एष एवासाधु कर्म कारयति तं यमधो निनीषती"ति श्रुत्याऽवगम्यते । रजस्तमसोर्यथार्थज्ञानावरणहेतुत्वं सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम्, "सत्त्वात्संजायते ज्ञानमि"-त्यादिना । अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयम्, तन्निरसनं चान-

१ अत्र भाष्यकारशब्देन द्रमिडाचार्योऽभिधित्सितो रामानुजाचार्याणाम् ।

